CHIN, *s.* चिबुकं, हनु *m.*, *f.*

CHINA-CLOTH, *s.* चीनांशुकं.

CHINE, *s.* पृष्ठं, कशेरुका.

CHINK, *s.* छिद्रं, रंध्रं. 2 क्वणितं, रावः. -*v. i.* स्फुट् 6 P, विदृ pass. 2 शिंज् 1, 2 A; क्वण् 1 P, स्वन् 1 P.

CHIP, *s.* खंडः-डं, शकलः-लं, लवः, विदलं, तष्टं. -*v. t.* तक्ष् 1, 5 P; खंडीकृ 8 U; 'c. axe' तक्षणी. -CHIPPINGS, *s.* तक्षानि, खंडानि.

CHIROGRAPHY, -ER, *See* WRITING, WRITER.

CHIROMANCER, *s.* हस्तरेखाविद्याज्ञः.

CHIRP, *v. i.* विरु 2 P, कूज् 1 P. -ING, *s.* विरावः, कूजितं, रुतं.

CHISEL, *s.* वर्धनः, तक्षणी, टंकः. -*v. t.* तक्ष् 6 P, तुद् 1, 6 P,

CHIT, *s. See* BOY. -CHAT, *s.* जल्पनं, विश्रंभालापः, विश्रंभकथा.

CHIVALRY, *s.* शौर्यगुणः, सुविक्रमः, सुधीर्यं, पौरुषं, धामन् *n.* -OUS, *a.* धामवत् (ती *f.*), सुविक्रांत, महावीर्य.

CHOICE, *s. See* under CHOOSE.

CHOIR, *s.* गायक-संगायक-गणः, गायकचक्रं.

CHOKE, *v. t.* प्रति-नि-रुध् 7 U, स्तंभ् 9 P. 2 कंठं संपीड् 10, गलं ग्रह् 9 P, श्वासावरोधं कृ 8 U, श्वासं निरुध्. -ED, *a.* कलुष, (कंठः स्तंभितबाष्पवृत्तिकलुषः S. 4); निरुद्धश्वास.

CHOLER, *s.* पित्तं. 2 क्रोधः, अमर्षः; *See* ANGER. -IC, *a.* क्रोधिल, क्रोधन, चंड, कोपिन् (नी *f.*); 'c constitution' पित्तप्रकृतिः, कोपशीलता.

CHOLERA, *s.* विसू(चू)चिका, महामारी.

CHOOSE, *v. t.* वृ 5 U, वृ 9 U, ग्रह् 9 P (the sense being clear). 2 अभिलष् 1, 4 P, मनो बंध् 9 P; रुच् 1 A; इष् 6 P. 3 निरूप् 10, नियुज् 7 A 10. -CHOICE, *s.* वरणं, वरः, ग्रहणं; अभिलाषः, मनोबंधः; 'c. of a husband' स्वयंवरः; 'of one's c.' यथेप्सितं, यथाकामं, यथेष्टं, स्वेच्छया. 2 उत्तमभागः उत्तमांशः. 3 विकल्पः; कामः, रुचि *f.*; 'you have no c. in this matter' स्वरुच्या वर्तितुं न शक्नोषि. -*a.* सर्वोत्तम, विशिष्ट, उत्कृष्ट, परम, सार-विशेष-रत्न in comp.; 'c. food' भोजनविशेषः, विशिष्टान्नं; 'c. girl' स्त्रीरत्नं. -LESS, अविकल्प.

CHOP, *v. t.* खंडशः छिद् 7 P, कृत् 6 P, शकलीकृ U; *See* CUT. -*s.* खंडः-डं, शकलः-लं; 'c. house' पाकशाला. -CHOPS, *s.* आस्यं, वदनं.

CHORD, *s.* गुणः, तंत्रीः. 2 ज्या, जीवा.

CHORION, *s.* गर्भकोशः, गर्भवेष्टनं.

CHORISTER, *s.* गायकः, चारणः, किन्नरः.

CHORUS, *s.* ध्रुवः-वकः, अनुपदं. 2 गायकगणः.

CHOUSE, *v. t. See* CHEAT.

CHOWRIE, *s.* चामरं, रोमगुच्छः.

CHRISTEN, *v. t.* नाम कृ 8 U or दा 3 U. *See* CALL.

CHROMATIC, *a.* वर्णसंबंधिन् (नी *f.*). 2 ग्रामीण.

CHRONIC, *a.* कालिक (की *f.*), दीर्घस्थायिन् (नी *f.*), अविसर्गिन् (णी *f.*).

CHRONICLE, *s.* इतिहासः, पुरावृत्ताख्यानं, वृत्तविवरणं. -*v. t.* अभिलिख् 6 P, वृत्तांतं लिख्; यथाक्रमं रच् 10. -ER, *s.* पुरावृत्तरचकः, इतिहासलेखकः.

CHRONOLOGY, *s.* कालनिर्णयविद्या. 2 कालक्रमेण पुरावृत्तविवरणं. -IST, *s.* कालगणकः-ज्ञः, पुरावृत्तरचकः. -ICAL, *a.* कालानुसारिन् (णी *f.*), कालक्रमानुसारि; 'in c. order' आनुपूर्व्येण, अनुपूर्वशः; कालानुसारेण.

CHRONOMETER, *s.* कालमापनं, घटी, यामनाली.

CHRYSALIS, *s.* कोषकारः, कोशस्थः.

CHRYSOLITE, *s.* चंद्रकांतः,

CHUB-FACED, *a.* स्थूलास्य.

CHUCK, कुकुटीशावः. **2** (-ling) प्रिये-वत्से, वत्सजात (voc.). **3** चपेटिका, ईषत्प्रहारः, लघ्वाघातः.

CHUCKLE, *v. i.* अंतः विहस् 1 P or स्मि 1 A, आनंदं भज् 1 U.

CHUFF, *s.* ग्रामिकः, स्थूल-जड-बुद्धिः, असभ्यः. **-Y**, *a.* ग्राम्य, स्थूल, असभ्य.

CHUM, *s.* वयस्यः; प्रियसुहृद् *m.*

CHURCH, *s.* देवतायतनं, देवालयं, धर्ममंदिरं, भजनगृहं. **2** धर्मः; 'c. yard' श्मशानं, पितृवनं, प्रेतभूमि *f.*

CHURL, *s.* ग्राम्यजनः, ग्रामजः, वृषलः. **2** अविनीतः, असभ्यः; वामशीलः. **3** कृपणः, कदर्यः. **-ISH**, *a.* अशिष्ट, अश्लील, ग्राम्य, अविनीत, असभ्य. **2** खल, कदर्य, दुराचार. **-NESS**, *s.* अविनयः, असभ्यता, &c.

CHURN, *v. t.* मथ् 1 P, मंथ् 9 P, (with two acc.); 'the ocean was c. ed for nectar' अमृतमंबुनिधिर्ममंथे; समा-आ-लुड् 1 P, or c. **-ING**, *s.* मंथनं, मंथः; 'c. stick,-handle' मंथनदंडः, मथिन् *m.*, मंथानः; 'c. rope' मंथनरज्जुः *f.* 'c. ing stick' मंथः, मंथदंडः, वैशाखः; 'a pot used for c. ing' गर्गरी, मंथनी.

CHYLE, *s.* अन्नरसः, धातुपः. **-OUS**, *a.* अन्नरसमय (यी *f.*).

CICATRICE, *s.* सिध्मन् *n.*, रूढक्षतं. **-CICATRIZE**, *v. t.* क्षतं रुह् c. or शुष् c.; 'c. ed' रूढ, शुष्क, रोपित. **-ATION**, *s.* व्रणरोपणं, व्रणशोषणं.

CINCTURE, *s.* मेखला, रशना, कांची.

CINDER, *s.* अंगारः-रं, भस्मन् *n.*, अग्न्युच्छिष्टं.

CINNABAR, *s.* रक्तपारदः.

CINNAMON, *s.* दारुगंधः, दारुसिता, सुगंधित्वच् *f.*

CINQUE, *s.* पंचकं, पंचन् in comp.

CIPHER, *s.* शून्यं, बिंदुः, खं. **2** अक्षरं, वर्णः. **3** बीजाक्षरं; गूढाक्षरं. **4** अंकः. **-***v. t.* अंकविद्यां अभ्यस् 4 P or शिक्ष् 1 A. **2** गूढाक्षरैर्लिख् 6 P. **-ING**, *s.* अंकविद्या, गणनविद्या, गणितं.

CIRCLE, *s.* मंडलं, वृत्त, चक्रं, वलयः-यं, गोलः-लं; 'c. of friends' मित्रचक्रं-मंडलं; 'c. of people' परिषद् *f.*; 'being in the c. of her friends' सखीमध्यगता; तापसपरिषदावद्धमंडला प्रतीक्षते (Ka. 49) 'formed into, or sitting in, a c.' &c. **2** परिधिः, परिणाहः; 'area of a c.' फलं; 'segment of a c.' वृत्तखंडं. **-***v. t.* परिवृ 5 U, परिवेष्ट् 1 A or c., परि-इ 2 P. **-***v. i.* चक्रवत्-मंडलाकारेण-परिवृत् 1 A or परिभ्रम् 1, 4 P. **—CIRCULAR**, *a.* वर्तुल, वृत्त, मंडलाकार, चक्राकृति, गोल. **-LY**, *adv.* चक्रवत्, मंडलरूपेण.

CIRCUIT, *s.* परिभ्रमणं, पर्यटनं; आ-वि-वर्तः, आवृत्ति *f.* **2** मंडलं, परिधिः, परिणाहः. **-***v. i.* (to make a c.) परिभ्रम् 1, 4 P, परि-इ 2 P, परिवृत् 1 A.

-OUS, *a.* वक्र, कुटिलगामिन् (नी *f.*), अतिदीर्घ.

CIRCULATE, *v. t.* प्रचल् c., प्रसृ c., परिवृत् c., प्रवृद्ध c.; 'who c. ed false reports all around' समंतात् प्रवृत्तवीभत्सकिंवदंतीकाः (पौरजानपदाः) (U. 4). **-***v. i.* आ-वि-परि-वृत् 1 A, प्रचर्-चल्-1 P, प्रसृ 1 P. **-ION**, *s.* परिभ्रमणं, परिवर्तनं, प्रसरः, प्रचारः, चलनं, व्यावर्तः; 'c. of blood' रुधिराभिसरणं, रक्तवहनं. **-ING**, *a.* परिवर्तिन् (नी *f.*), व्यावर्तक.

CIRCUMAMBIENT, *a.* परिगत, व्यापक, परिवेष्टक.

CIRCUMAMBULATE, *v. t.* परि-इ 2 P, परिभ्रम् 1, 4 P, परिगम् 1 P, प्रदक्षिणीकृ 8 U. **-ION**, *s.* परिभ्रमणं, पर्यटनं, प्रदक्षिणा.

CIRCUMCISE, *v. t.* त्वचं छिद् 7 P or कृत् 6 P; 'c. ed man' वंडः-ठः, दुश्चर्मन् *m.*

CIRCUMDUCT, *v. t.* लुप् 6 P; *See* BAFFLE. **-ION**, *s.* लोपः; मोघीकरणं.

CIRCUMFERENCE, *s.* परिधिः, मंडलं, परिवेशः-षः, परि(री)णाहः; 'c. of a wheel' नेमि *f.*, प्रधिः, नीवः.

CIRCUMFLUENT,—FLUOUS, *a.* परिस्यंदिन् (नी *f.*), परिस्रुत, परिगलित. **-CIRCUMFLUENCE**, *s.* परिस्रवः, परिस्यंदनं.

CIRCUMFUSE, *v. t.* परि-समा-सु c., समाकृ 1 U, 4 P, व्याप् 5 P, वि-अव् 5 A. **-ILE**, *a.* व्यापक.

CIRCUMJACENT, *a.* उपांतिक, पर्यंतस्थ.

CIRCUMLOCUTION, *s.* वक्रोक्ति *f.*, वाक्यविस्तरः; अत्युक्ति *f.*, अतिशयोक्ति *f.* **-CIRCUMLOCUTORY**, *a.* वक्र, बहुवाक्य, सवाक्यविस्तर.

CIRCUMNAVIGATE, *v. i.* पोतेन परिभ्रम् 1, 4 P, समंततः प्लु 1 A, प्लु 1 P.

CIRCUMROTATION, *s.* चक्रावर्तः, परिवर्तः, आवृत्ति *f.* **-CIRCUMROTATORY**, *a.* आवर्तमान, परिवर्तिन् (नी *f.*).

CIRCUMSCRIBE, *v. t.* परिमा 3 A, सं-नि-यम् 1 P, संवृ 5 U, संकुच् c. **-CIRCUMSCRIPTION**, *s.* संकोचः, संयमः.

CIRCUMSPECT, *a.* समीक्ष्यकारिन् (णी *f.*), विमृश्यकारिन्, सावधान, अवहित, अप्रमत्त, दक्ष. **-ION**, *s.* समीक्ष्य-विमृश्य-कारित्वं, अप्रमादः, अवधानं, दक्षता. **-LY**, *adv.* समीक्ष्य, सुविमृश्य, सावधानं.

CIRCUMSTANCE, *s.* दशा, अवस्था, स्थिति *f.*, भावः, वृत्ति *f.* **2** वृत्तं, वृत्तांतः; 'c. s as they happened' यथावृत्तः वृत्तांतः. **3** विषयः, वस्तु *n.*, अर्थः. **4** संबंधः; 'under these c. s' एवंगते-सति; 'in good c. s' सुस्थ-सुस्थित-*a.*; 'in bad c. s' दुर्गत-दुर्दशापन्न-दुःस्थित *a.*; 'under any c. s' यद्वा तद्वा भवतु; केन केनापि प्रकारेण; 'according to c. s' यथास्थितं, यथासंभवं, यथावसरं, यथाकालं. **-ED**, *a.* स्थित, अवस्थित, भूत, स्थ in comp. **— CIRCUMSTANTIAL**,

c. विस्तृत, विस्तीर्ण. 2 अप्रकृत, आगांतुक (की *f.*), अतिरिक्त, अपत्यक्ष (प्रमाण). -LY, *adv.* यथावृत्तं, विस्तरं, &c.

CIRCUMVALLATE, *v. t.* परिखादिना परिवेष्ट् 1 A or अवकृ 7 U. -ION, *s.* समंतादुपरोधनं, परिखानिर्माणं.

CIRCUMVENT, *See* CHEAT.

CIRCUMVEST, *v. t.* परिव्ये 1 P, परिधा 3 U.

CIRCUMVOLVE, *v. t. See* REVOLVE.

CIRCUS, *s.* क्रीडारंगः, क्रीडांगनं, क्रीडाचक्रं.

CIST, *s.* कोशः, पुटः, आवेष्टनं.

CISTERN, *s.* जलकुंडं, जलाशयः, तोयाधारः.

CIT, *s.* नागरिकः, पृथग्जनः, नागरजनः.

CITADEL, *s.* दुर्गं, कोटः-टि *f.*

CITE, *v. t.* उपनी 1 P, उपन्यस् 4 P, उपक्षिप् 6 P, अवतृ c. 2 आह्वे 1 P, अभियुज् 7 A, 10. -ATION, *s.* आह्वानं, अभियोगः. 2 अवतारण, उपन्यस्तवाक्यं, अवतरणं.

CITRON, *s.* जंबीरः, जंभीरः, जंभः-भलः, बीजपूरः, फलपूरः.

CITY, *s.* पुरं-री, नगरं-री, पत्तनं, पुर *f.* — CITIZEN, *s.* पौरः, पुरवासिन् *m.*, नगरजनः, पौरजनः, पौरलोकः; 'c. s and villagers' पौरजानपदाः. -LIKE, *adv.* आर्यवत्, नागरिकवृत्त्या, पौरवत्. -SHIP, *s.* पौरत्वं, पौराधिकारः.

CIVET, -CAT, *s.* गंधमार्जारः.

CIVIC, *a.* पौर (री *f.*).

CIVIL, *a.* दक्षिण, सादर, प्रियंवद, सानुनय; अनुकूल; सुशील. 2 पौर (री *f.*), पुर in comp.; 'c. war' प्रकृतिक्षोभः, जनप्रकोपः. -ITY, *s.* दाक्षिण्यं, प्रश्रयः, आदरः, सौजन्यं, अनुरोधः, अनुवृत्ति *f.*, सुशीलता. -LY, *adv.* सादरं, सप्रश्रयं. —CIVILIZE, *v. t.* विनी 1 P, शिष्टाचारान् शिक्ष् c. or शास् 2 P, आर्यपदवीं आहृ c. (रोपयति), उन्नम् c. (नमयति), उत्कर्ष-उन्नतिं-नीं. -ATION, *s.* सभ्यता, आचारशिष्टता. -ED, *a.* शिष्टाचारापन्न, आर्यवृत्त, शिष्ट, सभ्य, विनीत.

CLACK, *s.* वावदूकता, अतिजल्पनं. -*v. i.* अतिभृशं जल्प् 1 P.

CLAD, *See* under CLOTHE.

CLAIM, *v. t.* स्वीय-आत्मीय- *a.* इति प्रतिपद् c. or याच् 1 A or भू 2 U or वच् 2 P; 'he c. s that property' तद्धनं मदीयमिति स भाषते or प्रतिपादयति; 'c. s reverence' संमानमर्हामीति प्रतिपादयति; ममेति वक्त्वा ग्रह् 9 P; अभिमानं कृ 8 U, स्वत्वं ज्ञा c. (ज्ञापयति), अभिमन् 4 A. 2 (have a c. to) अर्ह् 1 P. -*s.* अधिकारः, अभियोगः, अभिमानः, स्वत्वप्रतिपादनं, प्रार्थना; 'false c.' मिथ्याभियोगः; 'laying c. to learning' विद्याभिमानः. -ANT, *s.* अर्थिन् *m.*, अभियोक्तृ *m.*, प्रार्थयितृ *m.*

CLAM, *v. t.* सांद्रीकृ 8 U; श्यावीकृ. -MY, *a.* श्याव, सांद्र, घन.

CLAMBER, *v. t.* आयासेन अध्यारुह् 1 P.

CLAMOUR, *v. i.* उत्-आ-क्रुश् 1 P, उच्चैः घुष् 10, आरट् 1 P. -*s.* आ-उत्-क्रुशः, महारवः, उच्चैर्घोषः, जनरवः. -OUS, *a.* महास्वन, मुखर, बहुघोष, घोषकर (री *f.*).

CLAMP, *v. t.* कीलेन संयुज् 10 or संबंध् 9 P. -*s.* इष्टकाराशिः.

CLAN, *s.* गणः. 2 वंशः, कुलं, गोत्रं, वर्गः, संघः, शाखा, जाति *f.*

CLANDESTINE, *a.* निभृत, रहस्य, प्रच्छन्न, गूढ; 'c. marriage' चोरिकाविवाहः. -LY, *adv.* निभृतं, गुप्तं, रहः.

CLANG, *v. i.* क्वण्-क्वन्-1 P, शिंज् 1, 2 A. -*s.* शिंजितं, क्वणितं; तुमुलरवः, शस्त्रघोषः.

CLANK, *s.* शिंजितं, क्वणितं.

CLAP, *v. t.* करतलं दा 3 U or वद् c. 2 अकस्मात् संहन् 2 P, संघट्ट् c.; न्यस् 4 P. 3 करतालेन प्रशंस् 1 P; 'c. wings' उत्क्षिप् 6 P. -*s.*, -ING, *s.* करतालवादनं, तालः. 2 प्रशंसाशब्दः. 3 मेघगर्जितं-नादः, वज्रनिर्घोषः, मेघस्तनितं. 4 ध्वनिः; क्वणितं, संघातशब्दः. -PER, *s.* घंटावादकः, घंटाताडनी.

CLARIFY, *v. t.* सं-वि-शुध् c., विमलीकृ 8 U, पू 9 U. -*v. i.* विमलीभू 1 P, प्रसद् 1 P.

CLARINET, *s.* वेणुः, वंशः.

CLARION, *s.* तूर्यः; काहलः.

CLASH, *v. i.* विरुध् 7 U, विसंवद् 1 P, विप्रतिपद् 4 P, विवद् 1 A. 2 संघट्ट् 1 A, आहन् 2 U. -*s.* समाघातः, संघट्टः, विरोधः, विसंवादः, विप्रतिपत्ति *f.*-ING, *a.* परस्परविरोधिन् (नी *f.*), विरुद्धार्थ, विसंवादिन्.

CLASP, *v. t.* आश्लिष् 4 P, समा-आ-लिंग् 1 P, परिष्वंज् 1 A, परिरभ् 1 A, उपगुह् 1 U, आपीड् 10; 'c. to the bosom' वक्षसा परिरभ्, क्रोडीकृ 8 U. 2 कुडुपेन बंध् 9 P or पिनह् 4 P. 3 परिवेष्ट् 1 A, परिनिधा 3 U; 'c. the hands' हस्तौ समानी 1 P, अंजलिं बंध्. -*s.* आश्लेषः, आलिंगनं, परिरंभः, परिष्वंगः. 2 कुडुपः, गंडः.

CLASS, *s.* वर्गः, छात्रसमूहः, सहाध्यायिगणः. 2 श्रेणी *f.*, गणः (of verbs); समूहः, संघः; समाहारः. 3 जाति *f.* (kind); 'of the c. of beasts' पशुजातीयः. 4 वर्णः, जातिः, वर्गः; 'people of the lower c. es' अवरवर्णाः, अन्त्यजातीयाः; 'of the same c.' वर्म्यः, वर्गीयः, सवर्णः. -*v. t.*, -IFY, *v. t.* वर्गक्रमेण विन्यस् 4 P, यथावर्गं रच् 10, वर्गीकृ 8 U, गणीकृ, गणशः व्यस्. -CLASSICAL, *a.* संस्कृत, श्रेष्ठ, प्रथमवर्गीय. -CLASSIFIER, *s.* गणकारः; व्यासः.

CLATTER, *v. i.* क्वण्-क्वन्-1 P; क्वणक्वणायते (*D.*).

2 मलिप्-जल्प्-1 P. -*s.* क्वणितं, ध्वनिः, तुमुलरवः.

CLAVATED, *a.* ग्रंथिल, जटिल.

CLAUSE, *s.* पदं, अंगं, अधिकरणं. 2 वाक्यं. 3 नियमः.

CLAW, *s.* नखः-खं, नखरः-रं. -*v. t.* नखैः विदृ 9 P, 10 or आहन् 2 U.

CLAY, *s.* मृद् *f.*, मृत्तिका. 2 पंकः, जंबालः, कर्दमः; 'made of c.' मृण्मय (यी *f.*). -*v. t.* पंकेन लिप् 6 P or दिह् 2 U. -ISH, *a.* पंकिल, कार्दम (मी *f.*).

CLEAN, *a.* शुचि, पवित्र, वि-परि-शुद्ध, विमल, निर्मल, धौत (वासः). 2 विमलात्मन्, निर्दोष, अनघ. 3 श्लक्ष्ण, मसृण. -*v. t. See* CLEANSE, below. -*adv.* साकल्येन, अशेषेण, आमूलं, सर्वाशेन. -LY, *a.* निर्मल, पवित्रदेह. -*adv.* शुचि, निर्मलं. -LINESS, *s.* शौचं, शुद्धि *f.*, निर्मलता. -NESS, *s.* शुचिता, पवित्रत्वं, निर्मलता, &c.

CLEANSE, *v. t.* शुध् c., पू 9 U. 2 प्रक्षल् 10, प्र-सं-मृज् 2 P or c., धाव् 1 P, 10, निर्-अव-निज् 3 U, पवित्रीकृ 8 U. -ER, *s.* शोधकः, धावकः.

CLEAR, *a.* वि-निर्-अ-मल, प्रसन्न, शुद्ध, अच्छ, विशद, स्वच्छ. 2 स्पष्ट, सुप्रकाश, परिस्फुट, व्यक्त. 3 (fig.) विशद, निश्चित; निष्कालुष्य, निःसंदेह; oft. by निर् pr.; 'c. sky' अनभ्र-निरभ्र-नभः; 'c. from debt' अनृण, ऋणमुक्त; 'c. forest' निष्कंटक-असंबाध-वनं; 'a c. sum' अभग्न, निरवशेष, निरुद्धार. -*v. t.* 'make c.' विशदीकृ 8 U, विवृ 5 U, व्याख्या 2 P. 2 शुध् c., प्रसद् c., विमलीकृ, मृज् 2 P. 3 मुच् 6 P or c.; by निर् pr.; 'c. ed the forest of its thorns' अरण्यं निष्कंटकं चकार; निःक्षात्रियां पृथ्वीं चकार &c.; 'c. from obstacles' विघ्नानपनी 1 P, निर्विघ्नं *a.* कृ; 'c. a doubt' (शंकां) छिद् 7 P, निरस् 4 P, अपनी; 'c. debt' (ऋणं) शुध् c., अपाकृ; निस्तृ c.; 'c. oneself' आत्मानं निर्दोषं कृ; 'c. up a business &c.' समाप् c., संपूर् 10, निःशेषीकृ; 'c. the throat' उत्कासनं कृ. -*v. i.* (up) प्रसद् 1 P, प्रसादं गम् 1 P or ग्रह् 9 P, निरभ्रीभू (as sky); दिशः प्रसेदुः (R. III. 14), गंगा रोधःपतननकलुषा गृह्णतीव प्रसादं (V. 1). -LY, *adv.* व्यक्तं, स्पष्टं, स्फुटं. 2 प्रसन्नं, विशदं. 3 भिन्नार्थे, स्पष्टार्थं. -NESS, *s.* प्रसादः, वैशद्यं, वैमल्यं, स्वच्छता, शुद्धि *f.* 2 स्पष्टता, व्यक्तता, स्फुटता.

CLEAVE, *v. i.* संज् pass., आ-वि-सं-अनु°, लग् 1 P, संलग्नीभू. 2 विदृ pass., दल् 1 P, स्फुट् 6 P. -*v. t.* विदृ 9 P, 10; वि-निर्-भिद् 7 P, दल् c. (दलयति), विपट् 10. -ER, *s.* भेदकः. 2 मांसच्छेदिका. -CLOVEN, *a.* विदीर्ण, स्फुटित, विभिन्न; 'c. hoofed' द्विशफ.

CLEFT, *s.* दरी, भंगः, संधिः, छिद्रं, रंध्रं.

CLEMENT, CLEMENCY, *See* KIND, -NESS.

CLENCH, CLINCH, *v. t.* (the fist) मुष्टिं बंध् 9 P; 'a blow with the fist c. ed' मुष्टिप्रहारः-संघातः 2 बद्धमुष्टिना संग्रह् 9 P or पीड् 10. 3 दृढीकृ 8 U स्थिरीकृ.

CLERGY, *s.* पुरोहितवर्गः, धर्माध्यापकवर्गः. -MAN *s.* पुरोहितः, धर्मशासकः, धर्मप्रवक्तृ *m.* -CLERICAL *a.* याजकीय, धर्मोपदेशविषय.

CLERK, *s.* लिपिकारः, लेखकः, कायस्थः. 2 पुरोहितः धर्माध्यापकः. 3 पंडितः, कृतविद्यः, विद्वस् *m.* -SHIP *s.* कायस्थकर्मन् *n.*

CLEVER, *a.* चतुर, दक्ष, विचक्षण, विदग्ध, पटु, मतिमत् (ती *f.*), निपुण, कुशल, प्रवीण, विशारद, पेशलमति. -LY, *adv.* चतुरं, सपाटवं. -NESS, *s.* चातुर्यं, वैचक्षण्यं, पाटवं, नैपुण्यं, बुद्धिमत्ता, मतिप्रकर्षः.

CLEW, CLUE, *s.* सूत्रकोषः. 2 सूत्रं, संधानं; मार्गदर्शकः.

CLIENT, *s.* आश्रितः, अधीनः, पक्ष्यः, श्रावकः.

CLIFF, *s.* प्रपातः, भृगुः, अतटः.

CLIMATE, CLIME, *s.* प्रकृति *f.* 2 देशः, प्रदेशः, दिश् *f.*

CLIMAX, *s.* पराकाष्ठा, पराकोटि *f.*, अतिभूमि *f.*; 'anxiety reaching its c.' अतिभूमिं गतेन रणरणकेन (U. 1); 'the jealousy of her love reached its c.' दुरारूढः प्रणयोऽसहनः (V 4); सारः (a figure), उत्तरोत्तर उत्कर्षः.

CLIMB, *v. t.* आ-अधि-रुह् 1 P, अधिक्रम् 1 U, 4 P. -*v. i.* उपरि गम् 1 P. -ER, *s.* आ-अधिरोहिन् *m.*, आरोढृ *m.* 2 (plant) प्रतति-ती *f.*, वल्लरी, वल्लि-ला *f.*

CLINCH, *s.* श्लेषः, द्व्यर्थवाक्यं.

CLING, *v. i.* संज् 1 P, आ-प्र-स°, सज्ज् 1 U; (निवसने कः सज्जति S. 4), लग् 1 P, सं-परि°; 'c.-ing to my neck at the time of going' गमनसमये कंठे लग्ना (Mal. 2), आ-अव-लंब् 1 A, अनुबंध् 9 P; 'c. to hope' आशां न त्यज् 1 P, आशामवलंब्.

CLINIC, CLINICAL, *a.* शय्यागत, शयनग्रस्त.

CLINK, *v. i.* शिंज् 1, 2 A, विरु 2 P, क्वण् 1 P. -*s.* शिंजितं, क्वणितं, किंकिणीशब्दः. 2 नादः, शब्दः.

CLIP, *v. t.* छिद् 7 P; *See* CUT. 2 दृढं परिष्वंज् 1 A, उपगुह् 1 U. 3 संह् 1 P, ह्रस् c., संक्षिप् 6 P. -PER, *s.* वंचकः. 2 मुंडिन् *m.* -PING, *s.* खंडः, विदलं, तष्टं.

CLOAK, *s.* कंचुकः, प्रावारः-रकः, अवगुंठनं. -*v. t.* प्रावृ 5 U, आच्छद् 10, अवगुंठ् 10.

CLOCK, *s.* घटी, घटिका, यामनाली. -MAKER, *s.* घटीकारः. -WORK, *s.* घटीकर्मन् *n.*

CLOD, *s.* लोष्टः-ष्ठं, मृत्खंडः, मृत्पिंडः. 2 पिंडः; 'c.-pated', 'c. poll' जडः, मृत्पिंडबुद्धिः, स्थूलमतिः. -DY, *a.* लोष्टपूर्ण-मय (यी *f.*).

CLOG, *v. t.* उप-नि-रुध् 7 U, प्रतिबंध् 9 P, स्तंभ् 9

P. 2 निगडेन बंध् 9 P, शृंखलयति (D.) -s. पाशः, निगडः, बंधनं, शृंखला. 2 विघ्नः, प्रत्यूहः, अंतरायः. -GY, a. प्रतिरोधिन् (नी f.), विघ्नकर (री f.).

CLOISTER, s. मठः, विहारः. -AL, a. विविक्तसेविन् (नी f.). -ER, s. मुनिः, मठवासिन् m., संन्यासिन् m.

CLOSE, v. t. अपि-पि-धा 3 U, संवृ 5 U; आ-निमील् 1 P or c. (eyes &c.); निमिमील नरोत्तमप्रिया (R. VIII. 37) 'c. ed her eyes in death'. 2 निर्वृत् c., संपद् c., समाप् c., अवसो 4 P. 3 आविश् 1 A or c., आच्छद् 10, प्रावृ, अवगुंठ् 10; 'c. hands' हस्तौ बध् 9 P; पाणिपुटं कृ; 'c. in' परिवेष्ट् 1 A, परिवृ 5 U. -v. i. संमिल् 6 P, संगम् 1 A, संयुज् pass. 2 निमील् 1 P, मुकुलीभू 1 P (lotuses &c.). 3 अवसित-समाप्त-a. भू, निवृत् 1 A, निष्पद्-समाप्-pass. -round, समंततः परिवेष्ट् 1 A or c., परिवृ 5 U or c. -with, See AGREE. 2 संघट्ट् 1 A; बाहूबाहवि युध् 4 A. -s. अवसानं, अत्ययः, परिणामः, अंतः, विरामः, क्षयः. 2 निष्पत्ति f., सिद्धि f., समाप्ति f., 'c. of day' दिनात्ययः, सायाह्नः. -a. पिहित, संवृत, निर्मीलित. 2 बद्ध, समंततो निरुद्ध (prisoner &c.). 3 गाढ, अशिथिल, दृढ, घन; 'c. fisted' अमुक्तहस्तः, बद्धमुष्टिः. 4 अविरल, सांद्र, निबिड, गहन, निरंतर. 5 आसन्न, समीपस्थ, निकटवर्तिन् (नी f.), समीप, निकट. 6 विविक्त, गुप्त. 7 आसक्त, अभिनिविष्ट, एकाग्र; 'c. application to S'âstras' शास्त्राभिनिवेशः. 8 निर्वात; अश्रित; 'it is c. to-day' निर्वातं-अश्रितं-नभः. 9 संकट, संकुचित, अविस्तृत, संबाध; 'c. fight' रणसंकुलं, तुमुलयुद्धं. 10 दृढसौहृद, सुपरिचित. 11 कृपण. 12 (concise) संक्षिप्त. -adv. अंतिकं, समीपे-पं, निरंतरं; निकटे; 'c. to the ear' कर्णांतिकं; 'c. by' अनतिदूरे, नातिदूरं. -LY, adv. निभृतं, गुप्तं, रहसि. 2 निरंतरं, अविरलं, सन्निकृष्टं. 3 प्रयत्नतः, मनोभिनिवेशेन, चित्तासक्त्या. 4 गाढं, दृढं, &c. -NESS, s. समीपता, सन्निकर्षः, सन्निधिः. 2 रहस् n., गुप्ति f. 3 घनता, &c. 4 निर्वातता, &c.

CLOSET, s. कोष्ठः, कुटि-टी f., निभृतागारं, वेश्मन् n. -v. t. कुटयां गुप् 1 P or निविश् c.

CLOSURE, s. पिधानं, वेष्टनं, प्रावरणं.

CLOT, s. पिंडः, घनता, गुटिका, गुल्मः; 'c. of blood' घनशोणितं; 'c. of hair' जटा. -v. i. सांद्रीभू, घनीभू, पिंडीभू, जट् 1 P, ग्रंथै 1 A. -TED, -TY, a. पिंडीभूत, घनीभूत, ग्रथान.

CLOTH, s. वस्त्रं, वासस् n., वसनं, चेलः-लं, पटः, परिधानं, अंबरं; 'fine c.' अंशुकं; 'old, tattered, c.-s' कर्पटः, जीर्णवस्त्रं, चीरं; 'unbleached c.' अनाप्तं, निष्प्रवाणि, तंत्रकं, नवांबरं. — CLOTHE, v. t. (oneself) वासः &c. परिधा 3 U or ग्रह् 9 P; वस् 2 A; 'c. ing herself' गृहीतवसना. 2 (वस्त्रेण) आच्छद् 10, परिच्छद्, संव्ये 1 P; वस् c., परिधा c. (धापयति), वेष्ट् 1 A. -ED, CLAD, a. (in) वसान, परिदधत् (ती f.), (s.) in comp. 2 संवीत, आवृत, आच्छादित; परिच्छन्न; सवासस्, अनग्न. -IER, s. पटकारः, वस्त्रनिर्मातृ m. -ING, s. परिधानं, आच्छादनं, परिच्छदः, वासस् n., वसनं; 'food and c.' ग्रासाच्छादानं.

CLOUD, s. मेघः, घनः, अभ्रं, जीमूतः, स्तनयित्नुः, बलाहकः, मुदिरः, धूमयोनिः, and combinations of words for 'water' (q. v.) with 'giving' or 'bearing', जलदः, तोयवाहः, पयोधरः, जलमुचं, वारिदः, &c.; 'a c. of dust' धूलिपटलं; 'c.-capped' अभ्रंलिह, अभ्रंकष-लिख. -v. t. प्रच्छद् 10, आवृ 5 U. 2 तिमिरेण आच्छद्. -ED, a. मेघावृत, अभ्रित, अभ्राच्छादित; तमोवृत, दुर्दिनग्रस्त. -LESS, a. निरभ्र, अमेघ, &c. -Y, a. साभ्र, मेघाकीर्ण, समेघ; 'it is c. weather to-day' दुर्दिनमद्य. 2 तमोवृत, तिमिराच्छन्न, अंधकारयुक्त.

CLOUGH, s. कंदरः-रा, दरि-री f.

CLOVE, s. (Tree) लवंगवृक्षः. 2 (Spice) लवंगं, देवकुसुमं.

CLOVER, s. त्रिपर्णं, त्रिपत्रं.

CLOUT, s. चीरं, कर्पटः, कंथा. -v. t. जीर्णवस्त्राणि संधा-समाधा 3 U.

CLOWN, s. ग्राम्यः, ग्रामिकः, कृषीवलः, वृषलः, जानपदः, पृथग्जनः, असभ्यो जनः. -ISH, a. अशिष्ट, ग्राम्य, असभ्य, ग्रामीण. -ISHLY, adv. ग्राम्यवत्, अशिष्टं.

CLOY, v. t. उद्विज् c.; पिंडखर्जूरैर्वेजितस्य (S. 2) 'c. ed with eating dates;' अतितृप्तिं जन् c. (जनयति).

CLUB, s. यष्टि f., लगुडः, गदा, परिघः; 'armed with a c.' याष्टीकः, याष्टिधरः. 2 गणः, समाजः, लेलकः. 3 पंक्ति f.; सहभोजिनां संसर्गः. 4 अंशः, भागः; 'c. foot' स्थूलचरणः.

CLUE, See CLEW.

CLUMP, s. गुच्छः, संचयः, षंडः, निचयः, गुल्मः, स्तंबः.

CLUMSY, a. अचतुर, अदक्ष, अकुशल, असुंदर, ग्राम्य, स्थूल. -LY, adv. अदक्षं, दाक्ष्यं विना, अचतुरं, अपाटवं. -NESS, s. अचातुर्यं, अपाटवं, &c.

CLUSTER, s. गुल्मः, गुच्छः, स्तंबः, स्तबकः. 2 संघः, गणः, समूहः, निवहः, ओघः, चयः, समुदायः. -v. i. एकत्र मिल् 6 P, एकीभू 1 P, पिंडीभू. -v. t. संचि 5 U, एकीकृ 8 U, पिंडीकृ, समाहृ 1 P.

CLUTCH, v. t. ग्रह् 9 P, धृ 1 P, 10; आक्रम् 1 U, 4 P. 2 मुष्टिं बंध् 9 P. -s., ग्रहः, ग्रहणं; मुष्टिबंधः. 2 हस्तः, पाणिः, नखं; 'rescued from the c. es of death' मृत्युमुखान्मुक्तः.

CLUTTER, s. कोलाहलः, तुमुलरवः.

COACERVATE, See COLLECT.

COACH, *s.* रथः, प्रवहणं, यानं, वाहनं, शकटः-टिका; 'travels by c.' रथेन संचरति; 'a c. and four' चतुरश्वं यानं; 'c. box' सूतासनं; 'c. ful' पूर्णरथः, शाकटं; 'c. horse' रथ्यः; 'c. house' रथशाला; 'c. maker' रथकारः; 'c. man' सूतः, सारथिः, यंतृ *m.*

COACTION, *s.* प्रमाथः, बलात्कारः. -COACTIVE, *a.* प्रमाथिन् (नी *f.*), बलान्वित, सबल.

COADJUTOR, *s.* सहायः, सहकारिन् *m.*

COAGULATE, *v. i.* घनीभू 1 P, श्यै 1 A. -*v. t.* श्यै c., घनीकृ 8 U, संहन् 2 P. -ION, *s.* क्षीणता, संहति *f.*, घनीभावः, श्यानत्वं.

COAL, *s.* अंगारः-रं; 'c. black' अंगारसवर्णं, अतिकृष्ण.

COALESCE, *v. i.* संमिल् 6 P, संगम् 1 A; एकीभू, संयुज्-संधा-संश्लिष् pass. -COALITION, *s.* संयोगः, संश्लेषः, मेलनं, संधिः.

COARSE, *a.* स्थूल (cloth &c.)°; घन, नीरंध्र; अविरल, निबिडस्यूत. 2 असभ्य, अश्लील, ग्राम्य, अशिष्ट. 3 अवाच्य, नीच, निकृष्ट, गर्ह्य; 'c. food' मंदाहारः. -NESS, *s.* स्थूलता, ग्राम्यता, अश्लीलता, &c.

COAST, *s.* तीरं, तटः-टं, वेला. 2 सीमा. 3 देशः, प्रदेशः. -*v. i.* उपतीरं नावा संचर् 1 P, नौकां वह् c.

COAT, *s.* कंचुकः, उत्तरीयं, प्रावारः-रकः, निचोलः. 2 पटलं, आच्छादनं, पुटं, आवेष्टनं. 3 लो(रो)मन् *n.* (of animals). -*v. t.* आच्छद् 10, अवगुंठ् 10, आ-सं-वेष्ट् 1 A or c. 2 अनुव्यध् 4 P; विलिप् 6 P, क्षुर् 10. -ING, *s.* पटलं, पुटं, आच्छादनं, आवेष्टनं. 2 लेपः, क्षुरणं.

COAX, *v. t.* चाटूक्त्या सांत्व् 10, अनुनी 1 P, उपच्छंद् 10, लल् 10. -ER, *s.* चाटुकारः. -ING, *s.* चाटुवचनं, चाटु *m. n.*, उपच्छंदनं.

COBBLE, *v. t.* जीर्णपादुकाः सूच्या समाधा-संधा 3 U. 2 अपाटवं किंचित्कर्म कृ 8 U. -ER, *s.* पादुकासंधातृ *m.*; अनिपुणः शिल्पी.

COBRA, *s.* नागः, फणिन् *m.*; *See* SNAKE.

COBWEB, *s.* जालं, सूत्रजालं. 2 संतानः; 'c. of speech' वाग्जालं.

COCK, *s.* कुक्कुटः, शिखिन् *m.*, ताम्रचूडः, नखायुधः, कृकवाकुः; 'c.'s comb' शिखा, चूडा; 'c.-sparrow' चटकः. 2 प्रणाली, जलयंत्रं. 3 पुंगवः, मुखरः, नायकः. 4 तृणोत्करः; 'weather c.' वायुध्वजः-ज्ञापकः; 'c. and bull story' मृषा-वृथा-कथा; 'c. crowing' कुक्कुटरवः; प्रभातकालः; 'c. fight,' 'c. match' प्राणिद्यूतं, ताम्रचूडयुद्धं; समाह्वयः; 'c. pit' कुक्कुटयुद्धस्थानं. -*v. t.* ऊर्ध्वम् c. (नमयति), उत्क्षिप् 6 P, उच्छ्रि 1 U. -*v. i.* सलीलं चर्-चल् 1 P. 2 तृप् 4 P.

COCKATRICE, *s.* अजगरः.

COCK-BOAT, *s.* डुप-क्षुद्र-नौका.

COCK-SWAIN, *s.* क्षुद्रनौकापतिः.

COCKER, *v. t.* *See* FONDLE.

COCKLE, *s.* शुक्ति *f.*

COCKLOFT, *s.* अंत्रशाला, शिरोगृहं.

COCKNEY, *s.* नगर-पुर-वासिन् *m.*; ग्राकृतजनः.

COCOA-NUT, *s.* नारिकेलः-रः, कौशिकफलं; (tree) तृणद्रुमः, शिरःफलः, नालिकेरः-लः, नारि(लि)केरः-केलिः, नारीकेलः-ली, लांगली.

COCOON, *s.* कोशः-षः.

COCTION, *See* DECOCTION.

COD, *s.* बीजकोषः, पुटः.

CODDLE, *v. t.* ईषत्-शनैः पच् 1 P or कथ् 1 P. 2 निपुणं संवृध् c. or पुष् 1, 9 P, 10.

CODE, *s.* संहिता; 'c. of laws' धर्म-स्मृति-शास्त्रं, स्मृति *f.*

COEFFICACY, *s.* सहकारिता, संयोगिता.

COEFFICIENT, *s.* मानं.

CO-EQUAL, *a.* समानपदस्थ, स-सह-धर्मन्, समानभाव. -ITY, *s.* समानावस्था; तुल्यभागः, सहधर्मः, तुल्यपदस्थं.

CO-ERCE, *v. t.* सं-नि-यम् 1 P, निरुध् 7 U, निग्रह् 9 P, नियंत्र् 10; *See* COMPEL also. -ION, *s.* निग्रहः, संयमः; नियंत्रणं. -IVE, *a.* नियामक; प्रतिरोधिन् (नी *f.*).

CO-EVAL, *a.* सम-एक-कालीन; समान-तुल्य-वयस्क, सवयस्. -*s.* वयस्यः, स-तुल्य-वयस् *m.*

CO-EXIST, *v. i.* सम्-एकत्र वृत् 1 A or भू 1 P, एककाले भू or जीव् 1 P. -ENCE, *s.* एककालावस्थानं, सहवर्तनं, सहजीवनं. -ENT, *a.* सहवर्तिन्-जीविन् (नी *f.*).

CO-EXTEND, *v. i.* समं विस्तृ pass. or व्याप् 5 P. -CO-EXTENSION, *s.* अभिव्याप्ति *f.*; समविस्तारः.

COFFER, *s.* धनभांडं, कोषः-शः, मुद्राधारः.

COFFIN, *s.* शवाधारः, शवभाजनं. -*v. t.* शवभाजने निधा 3 U.

COG, *v. t.* Flatter, q. v.; 'c. a die' कूटाक्षं कृ 8 U; 'c. a wheel' नेमिं सदंतां कृ. -*s.* नेमिदंतः.

COGENT, *a.* बलवत् (ती *f.*), प्रबल; निरुत्तर. -LY, *adv.* निरुत्तरं. -COGENCY, *s.* बलं, सामर्थ्यं, प्रभावः, शक्ति *f.*

COGGLESTONE, *s.* चूर्णखंडः.

COGITATE, *v. t.* चिंत् 10, श्यै 1 P, विचर् c., विमृश् 6 P, आलोच् 10, वितर्क् 10. -ION, *s.* चिंता, विचारः, आलोचनं, विमर्शः, वितर्कः.

COGNATE, *a.* सजाति, एकजातीय, सगोत्र, संबंधिन् (नी *f.*), तुल्य-समान-प्रभव. -ION, *s.* बंधुता, ज्ञातिभावः, संबंधः, सजातीयत्वं.

COGNITION, *s.* ज्ञानं, प्रज्ञानं.

COGNIZABLE, *a.* ज्ञेय, बोध्य. 2 विचार्य, अनुसंधेय.

COGNIZANCE, *s.* विचारणं, अनुसंधानं, चर्चा; अनुयोगः. **2** चिह्नं, लक्षणं, संज्ञा, लिंगं; 'take c. of' अनुसंधा 3 U, विचर् c., अनुयुज् 7 A, ज्ञा 9 U, अवेक्ष् 1 A.

COHABIT, *v. i.* संवस् 1 P; अभिगम् 1 P (with another's wife), संभोगं कृ 8 U.

COHERE, *v. i.* संसज्-संयुज्-संहन्-संश्लिष्-pass. **2** युज् pass. -ENCE, *s.* संसक्ति *f.*, संश्लेषः, संयोगः. **2** संबंधः, संगति *f.*, अन्वयः, संदर्भः, अविरोधः. -ENT, *a.* संसक्त, संश्लिष्ट, संहत, संलग्न. **2** संगत, अविरुद्ध, संबद्ध, अनुरूप, सान्वय. -COHESION, *s.* संसक्ति *f.*, संयोगः, संश्लेषः, संलग्नता. -COHESIVE, *a.* सांद्र, संलग्नशील, स्निग्ध.

COHOBATE, *v. t.* पुनः संधा 3 U.

COHORT, *s.* सैन्यदलं-गुल्मं.

COIF, *s.* मुकुटः, शिरस्त्रं, शिरोवेष्टनं.

COIL, *s.* मंडलं, व्यावर्तनं, आवेष्टनं; गुणः (of a rope). **2** तुमुलं, व्यस्तता; 'mortal c.' नश्वरदेहः. -*v. t.* मंडलीकृ 8 U, वर्तुलीकृ, पुटीकृ; व्यावृत् c., आ-परिवेष्ट् c.

COIN, *s.* मुद्रा, नाणकं, टंकः; 'copper c.' पणः; 'I paid him in his own c.' यथैव स मयि व्यवहरत्यथैवाहं तस्मिन्नाचरं. -*v. t.* मुद्रयति (D.), मुद्रया अंकृ 10. **2** सृज् 6 P, कॢप् c., निमो 3 A. -AGE, *s.* मुद्रा; कल्पना, सृष्टि *f.* -ER, *s.* मुद्राकारः; कल्पकः.

COINCIDE, *v. i.* एकीभू 1 P, संगम् 1 A, सं-सन्निपत् 1 P, संधा-संयुज्-pass. **2** संमन् 4 A, एकचित्तीभू; *See* AGREE. **3** अनुरूप *a.* भू, युज् pass., अनुवृत् 1 A, संवद् 1 P, तुल्य-समान-*a.* भू. -ENCE, *s.* संनिपातः, संगमः; संयोगः. **2** संमति *f.*, ऐकमत्यं, संधिः, एकचित्तता. **3** संवादः, अनुरूपता, आनुगुण्यं. **4** दैवयोगः-घटनं; 'by an unlucky c.' दुर्दैवात्. -ENT, *a.* संपातिन् (नी *f.*). **2** समकालीन. **3** अविरुद्ध, अनुरूप, संवादिन्.

COITION, *s.* मैथुनं, सुरतं, रतिक्रिया.

COKE, *s.* अर्धदग्धांगारोच्छिष्टं.

COLANDER, *s.* चालनी, शोधनी, तितउः.

COLATION, *s.* शोधनं, चालनं.

COLD, *a.* शीत, शिशिर, हिम, शीतल, तुषार. अधर्म; 'c. rayed' (moon) हिमांशुः, शीतकरः, &c.; 'c. season' हिमागमः, शिशिरः, शीतकालः. **2** (fig.) अनादरयुक्त, विरक्त, निःस्नेह, निरुत्साह, उदासीन; 'gave me a c. welcome' निरुत्साहं स्वागतं मां व्याजिहार, मत्संभावनायां तेन औदासीन्यं दर्शितं; 'in c. blood' प्रकोपनं विना; पूर्वसंकल्पेन. -*s.* शीतं, शैत्यं; शिशिरः, हिमः. **2** प्रतिश्यायः; 'suffering from c.' शीतार्तः. -LY, *adv.* शीतं, शैत्येन. **2** निरुत्साहं, विरक्तं, उदासीनतया. -NESS, *s.* शीतता, हिमता, शैत्यं. **2** अनादरः, निःस्नेहता, विरागः, विरक्ति *f.*, औदासीन्यं.

COLIC, *s.* शूलः-लं, उदर-जठर-व्यथा-शूलं. -*a.* उदर-व्यथाजनक.

COLLAPSE, *v. i.* क्षयं-लयं-गम् 1 P, अवसद् 1 P. **2** संह-शृ-pass.; संकुच् 1 P; सं-सन्नि-पत् 1 P. -*s.* संकोचः. **2** संहारः, क्षयः, लयः, अवसादः. **3** सन्निपातः, शक्तिपातः, लयः.

COLLAR, *s.* ग्रैवं-वेयं, कंठभूषणं, माला. **2** कंठपाशः. -BONE, *s.* ग्रीवास्थि *n.*, जघु *n.*

COLLATE, *v. t.* समवलोक् 10, परीक्ष् 1 A; उपमा 3 A, संशुध् c. **2** वृत्तिं प्रदा 3 U. -ION, *s.* संपरीक्षणं, संशोधनं, उपमानं. **2** कल्यवर्तः, प्रातर्भक्ष्यः फलादिसंभारः, प्रातराशः. **3** वृत्तिप्रातिपादनं.

COLLATERAL, *a.* आनुषंगिक-प्रासंगिक (की *f.*), असरल. **2** भिन्नशाख, उपलोम. **3** समानोदक, सपिंड. **4** पार्श्वोपार्श्वगत. -LY, *adv.* पार्श्वोपार्श्वं; असरलं, वक्रं, प्रसंगतः.

COLLEAGUE, *s.* सहायः, सहकारिन् *m.*, समानव्यापारः, एकविषयिन् *m.*

COLLECT, *v. t.* चि 5 U, अवं-वि-सं-नि-, समानी 1P, संग्रह् 9 P, समाह 1 P, संभृ 3 U, समाक्षिप् 6 P, पिंडीकृ 8 U, राशीकृ, एकत्र कृ. **2** अनुमा 3 A, ऊह 1 A, अवगम् 1 P; 'c. ed his mind into itself' चित्तं समादधौ; 'c. oneself' संज्ञां-चेतनां-लभ् 1 A or आ-प्रति-पद् 4 A, चेतः-मनः-समाधा 3 U. -*v. i.* संमिल् 6 P, समागम् 1 P; *See* ASSEMBLE. -ION, *s.* गणः, संघः, समवायः, निवहः, चयः, समूहः, ओघः, समुच्चयः, समाहारः, समुदायः, वृंदं. -IVE, *a.* समवेत, संहत, समाहृत, गणीभूत, समवायिन् (नी *f.*), एकीकृत. -IVELY, *adv.* एकीभूय, संभूय; संघशः, साकल्येन. -OR, *s.* संग्राहकः, संचेतृ *m.* **2** करग्राहकः.

COLLEGE, *s.* विद्यालयः-यं, पाठशाला. **2** मठः, विहारः. **3** गणः, समाजः, जनसमूहः. -COLLEGIAN, *s.* विद्यार्थिन् *m.*, छात्रः; विद्यालयप्रविष्टः.

COLLET, *See* COLLAR.

COLLIDE, *v. i.* सं-समा-हन् 2 U, संघट्ट् 1 A or c.; संमृद् 9 P. -COLLISION, *s.* संघट्टः, समाघातः, प्रतिघातः, संमर्दः, संघर्षणं.

COLLIGATION, COLLIMATION, *s.* संबंधः; संधानं

COLLOCATE, *v. t.* सं-प्रति-स्था c. (स्थापयति), निध 3 U, न्यस् 4 P, निविश् c. **2** नियुज् 7 A, 10. -ION *s.* स्थापनं, निवेशनं.

COLLOCUTION, *s.* संभाषणं, कथाप्रसंगः, कथायोगः, संवादः, संकथा.

COLLOGUE, *See* FLATTER.

COLLOP, *s.* मांसखंडः-लवः.

COLLOQUY, *s.* संलापः, संकथा, संभाषणं, संवादः. -AL, *a.* आलापविषय, भाषणप्रयुक्त; 'c. style' संलापोचिता भाषासरणिः.

COLLUDE, *v. i.* पक्षपातं-कूटं कृ 8 U; वंच् 10, कूट

मेलं कृ. -COLLUSION, *s.* पक्षपातः, कूटसंविद् *f.*; प्रतारणा, शाठ्यं, कपटं.

COLLY, *s.* अंगारमलं-किट्टं. -*v. t.* अंगारेण कृष्णीकृ 8 U. -ED, *a.* अंगारमलिन, मलीमस, कृष्ण. -ER, *s.* अंगारखनकः-विक्रेतृ *m.* -Y, *s.* अंगारोत्पत्तिस्थानं.

COLLYRIUM, *s.* अंजनं, कज्जलं, नेत्ररंजनं.

COLON, *s.* द्विबिंदुः. 2 महदंत्रं.

COLONEL, *s.* गुल्मपतिः, सैन्यदलाध्यक्षः, वाहिनीपतिः.

COLONY, *s.* अधिनिवेशः; वासितः प्रदेशः. 2 गणः, संघः; *See* COLLECTION. -IST, *s.* अधिवासिन् *m.*, अधिनिवेशिम् *m.* -IZE, *v. t.* अधिवस् 1 P, अधिनिविश् 6 P, अध्यास् 2 A, (with acc.).

COLOSSUS, *s.* बृहत्प्रतिमा, भीमविग्रहा मूर्तिः. -COLOSSAL, *a.* बृहत्काय, अतिमानुषाकार, भीमविग्रह.

COLOUR, *s.* वर्णः, रागः, रंगः. 2 वर्णकः-का, लेपः; change c.' विवर्णीभू; 'ruddy c. ed face' लोहिताननं; 'without c.' पांडु, विवर्ण. 3 अप-व्यपदेशः, छद्मन् *n.*, छलं, व्याजः. 4 पताका, ध्वजः, केतुः. -*v. t.* रंज c., वर्ण 10, चित्र् 10. 2 व्यप-अप-दिश् 6 P, आच्छद् 10, शम् c. (शमयति). 3 सत्यवदाभास् c., सत्याभास *a.* कृ 8 U, सत्त्वसन्निभ *a.* कृ. -*v. i.* रंज् pass. 2 लज्जाया अरुणवदन *a.* भू, व्रीडित *a.* भू, लज्ज् 6 A. -ING, *s.* रंजनं; 'art of c.' चित्रकर्मन् *n.*, आलेख्यकरणं, आलेख्यविद्या. 2 वर्णनं; अलंकारः. -IST, *s.* वर्णिन् *m.*, रंजकः. -LESS, *a.* अवर्ण, विवर्ण, वर्णहीन. -COLORATE, *a.* सराग, रागयुक्त. -COLORIFIC, *a.* वर्णद.

COLT, *s.* अश्वशावः, किशोरः. 2 चपलः, प्रमत्तः. -ISH, *a.* चपल, तरल, चंचल, लोल.

COLTER, *s.* हलदंतः, फालदंतः.

COLUMBARY, *s.* कपोतागारं, विटंकः.

COLUMN, *s.* स्तंभः, यूपः, स्थाणुः, स्थूणा. 2 सूचिव्यूहः; सैन्यभागः. 3 पत्रभागः, धारा; 'c. of smoke' धूमराशिः, धूमांत्पीडः.

COMATE, *s.* सहायः, सहवासिन् *m.*

COMATOSE, *a.* अतिनिद्रातुर.

COMB, *s.* प्रसाधनी, कंकतः -तिका, केशमार्जनी. 2 कुक्कुटचूडा-शिखा. 3 दरी. -*v. t.* प्रसाध c., मृज् 2 P, वेजटीकृ 8 U. -MAKER, *s.* कंकतकृत् *m.*

COMBAT, *s.* युद्धं, संग्रामः, समरं; *See* BATTLE; single c.' द्वंद्वयुद्धं; 'hand-to-hand-c.' बाहुयुद्धं, बाहवि, बाहुयुद्धं; 'mingled c.' (melee) तुमुलं, संसकुलं. -*v. i.* युध् 4 A, विग्रह 9 P, विवद् 1 A. -*v. t.* प्रतियुध्, प्रतिरुध् 7 U, प्रतिबंध् 9 P. 2 खंड् 10, निरस् 4 P, निराकृ 8 U; 'c. one's passions' शम् 1 P, निग्रह् 9 P. -ANT, *s.* योधः, योद्धृ *m.*, वीरः.

COMBINE, *v. t.* संयुज् 7 U, 10, संश्लिष् c., संधा 3 U, संभृ 10, एकीकृ 8 U. -*v. i.* मिल् 6 P, संगम् 1 A; संहत-समवेत *a.* भू, एकीभू; संयुज्-संधा-संहन्-संसृज्-pass.; 'all things c. ed to ruin him' सर्वमेव तस्य नाशायाकल्पत; 'having c. ed' संभूय, मिलित्वा. -ATION, *s.* संहति *f.*, संयोगः, संसर्गः, संधिः, संघातः, संगः, सहायता, संश्लेषः, व्यतिकरः, समवायः; (of letters) संधिः; 'working by c.' संभूय समुत्थानं; 'in c. with his brothers' भ्रातृसंघातवान् (राजा).

COMBUSTIBLE, *a.* दाह्य, दाहग्राहक; ज्वलनार्ह, दहनशील. -*s.* दाह्यः पदार्थः.

COMBUSTION, *s.* दाहः, दहनं, ज्वलनं, शोषः.

COME, *v. i.* आगम् 1 P, आया 2 P, आ-इ 2 P; उपस्था 1 U, आव्रज् 1 P, आ-अभि-पद् 4 A; 'c. what may' यद्भावि तद्भवतु; 'c. harm, c. good' यद्भावि तद्भवतु शुभमशुभं वा. -about, संवृत् 1A, संभू, आपत् 1P. -back, निवृत्, प्रत्यागम्. -at, or by, *See* GET. -down, अवतृ 1 P, अवरुह् 1 P, अवपत् 1 P. -down upon, (सहसा-रभसा) अवस्कंद् 1 P, आपत् 1P, अभिद्रु 1 P, आक्रम् 1 U, 4 P. -forth, निर्गम्, निःसृ 1 P. -into, प्रविश् 6 P; 'c. into trouble' विपदाभिभू, आपद्ग्रस्त *a.* भू. -near, *See* APPROACH. -of, *See* ARISE. -off, out, निष्क्रम्; निर्गम्, उद्दि 2 P; 'came out successful' जयी बभूव. 2 प्रवृत्त, संपद्, निवृत्त, अवसो pass. -over, आ-इ 1 U. -short, न्यूनीभू. -to, सकाशं आगम्-या-इ-प्राप् 5 P; *See* AMOUNT; 'c. to life' उज्जीव् 1 P; 'came to nothing' तस्य कोऽपि परिणामो नासीत्, निष्फलं-निर्गुणं-बभूव; 'c. to pass' आपत्, समापद्, संवृत्; 'c. to oneself' प्रकृतिमापद् 4 A, संज्ञां-चेतनां-लभ् 1 A or प्रतिपद्, प्रकृतौ स्था. -up to, समुपागम्, समाया, समुपस्-सृप्. -up with, आसद् c., प्राप्. -upon, आ-समा-पत्, उपस्था, आक्रम्. -ING, *s.* आगमनं. -*a.* (to come) आगामिन् (नी *f.*); 'on the c. Monday' आगामिनी सोमवासरे; भाविन्, उत्तर; 'time to c.' उत्तरकालः; 'c. generations' पुत्रपौत्राः; उत्तरकालीना जनाः.

COMEDY, *s.* भाणः, प्रहसनं, हर्षप्रधानं नाटकं. -IAN, *s.* नटः, कुशीलवः, नर्तकः, वैहासिकः. 2 प्रहसनकृत् *m.*

COMELY, *a.* चारु, सुंदर (री *f.*), सुरूप; *See* BEAUTIFUL. -NESS, *s.* सौंदर्यं; *See* BEAUTY.

COMET, *s.* धूमकेतुः, केतुः, उत्पातः, उल्का.

COMFIT, COMFITURE, *s.* मिष्टान्नं, मोदकः.

COMFORT, *v. t.* समा-आ-श्वस् c., सांत्व् 10. 2 संतुष् c., आनंद् c., हृष् c., सुखं दा 3 U, सुखिन्-*a.* कृ 8 U; 'c. yourself' समाश्वसिहि. -*s.* आश्वासनं, सांत्वनं; संतोषणं. 2 सुखं, सुस्थता, सौख्यं, स्वास्थ्यं, निर्वृति *f.* -ABLE, *a.* सुखकर (री *f.*), सुखद; सुखशयितं प्रभुं (S. 4) 'to ask whether she had a c. sleep.' 2 आश्वासक, शांतिद, क्लेशापह, क्लमविनोदक. -ABLY,

adv. सुखं, यथासुखं; निकामं; 'I can't sleep c. even at night' रात्रावपि निकामं शयितव्यं नास्ति (S. 2). -ER, *s.* आश्वासकः, संतोषदः, शोकापहर्तृ *m.*; सांत्ववादः. -LESS, *a.* निरानंद, सुखरहित, संतोषहीन.

COMIC, COMICAL, *a.* हासजनक, हासकर (री *f.*), हास्योत्पादक. 2 अपरूप, असंगत. -ALNESS, *s.* हास्यता, कौतुकं; अपरूपता.

COMMAND, *v. t.* आज्ञा c. (आज्ञापयति), आदिश् 6 P, व्या-सं-समा-°, विधा 3 U, शास् 2 P, नियुज् 7 A, 10. 2 अधिष्ठा 1 P, अध्यास् 2 A; ईश् 2 A, प्रभू, (with gen.); 'Râkshasas c.-ed by 2 chieftains' नायकाभ्यामधिष्ठिता राक्षसाः. 3 नियम् 1 P, निग्रह 9 P; *See* CONTROL. 4 आत्मवशं नी 1 P, स्वायत्तीकृ 8 U. 5 अवलोक् 10; 'sitting at a window c. ing (the view of) a well' दीर्घिकावलोकनगवाक्षगता (M. 1); 'good forms c. respect' आकृतिविशेषेष्वादरः पदं करोति (M. 1); पदं हि सर्वत्र गुणैर्निधीयते (R. III. 62) 'c. notice or attention'. -*s.* आदेशः, निदेशः, शासनं, नियोगः. 2 अधिकारः, प्रभुत्वं, आधिपत्यं, अधिष्ठातृत्वं; 'has Râkshasas under his c.' तस्यादेशमनुवर्तमाना राक्षसाः or स राक्षसानामधिपतिः-नायकः-अधिष्ठाता; 'under one's c.' वशीकृत, स्वाधीन; 'to the c. of the army' सैनापत्ये; 'bring under one's c.' आत्मवशं नी, स्वाधीनं *a.* कृ; 'though I have no c. over language' तनुवाग्विभवोपि सन् (R. I. 9); 'who has perfect c. over language' यं वाग्वश्येवानुवर्तते (U. 1). -ANT, -ER, *s.* आज्ञापकः, आदेष्टृ *m.* 2 पतिः, अध्यक्षः, नायकः, नीः in comp.; 'c. of an army' चमूपतिः, सेनानीः, सेनाध्यक्षः. -MENT, *s.* आज्ञा, विधिः, सूत्रं. 2 चोदना, शास्त्र-धर्म-आज्ञा.

COMMEMORATE, *v. t.* स्मरणार्थं उत्सवं कृ 8 U or आचर् 1 P; संकृत् 10, संस्मृ c., वर्ण् 10. -ION, *s.* उत्सवकरणं, स्मरणोत्सवः; 'in c. of' स्मरणार्थं, समुद्दिश्य. -IVE, *a.* स्मारक, स्मरणकृत्.

COMMENCE, *v.* आ-प्रा-रभ् 1 A, प्र-उप-क्रम् 1 A, प्रवृत् 1 A, व्यवसो 4 P. 2 अनुष्ठा 1 P, प्रस्तु 2 U. -MENT, *s.* आरंभः, उपक्रमः, प्रस्तावः, मुखं, आदि *m.* 2 आमुखं, प्रस्तावना (in dramas). 3 अनुष्ठान, प्रवृत्ति *f.*, प्रवर्तनं; 'from the c.' आमूलात्, आदितः.

COMMEND, *v. t.* प्रशंस् 1 P, स्तु 2 U, श्लाघ् 1 A, कृत् 10, वर्ण् 10. 2 सम्-कृ c. (अर्पयति), हस्ते निक्षिप् 6 P, अधीन *a.* कृ 8 U; 'thy speech does not c. itself to me' त्वद्वचो नाभिनंदामि (S. 2). -ABLE, *a.* प्रशस्य, श्लाघ्य, स्तुत्य. -ATION, *s.* श्लाघा, प्रशंसा, स्तुति *f.* -ATORY, *a.* श्लाघासूचक, प्रशंसाकर (री *f.*), स्तुतिद्योतक. -ER, *s.* प्रशंसकः, स्तावकः.

COMMENSURATE, *v. t.* अनुरूप-अनुगुण-*a.* कृ 8 U. 2 अपवृत् c. -*a.*, -COMMENSURABLE, *a.* अनुरूप, अनुगुण, सदृश (शी *f.*), सम, तुल्य. 2 सापवर्तं.

COMMENT, *v. i.* व्याकृ 8 U, व्याचक्ष् 2 A, विवृ 5 U, भाष्यं लिख् 6 P. 2 निरूप् 10, चर्चां कृ, परीक्ष् 1 A, अनुसंधा 3 U. -ARY, *a.* टीका, व्याख्या, वृत्ति *f.*, भाष्यं. 2 निरूपणं, परीक्षणं, चर्चा. -ATOR, -ER, *s.* भाष्यकृत्-कारः, व्याख्यातृ *m.*, टीकाकारः-कृत्.

COMMENTITIOUS, *a.* कृत्रिम, कल्पित.

COMMERCE, *s.* वाणिज्यं, क्रयविक्रयः, निगमः. 2 व्यवहारः, संगमः-ति *f.*, संसर्गः. -*v. i.* वाणिज्यं कृ 8 U, पण् 1 A, व्यवह 1 P. -IAL, *a.* वाणिज्य-विषयक-संबंधिन् (नी *f.*); 'c. people' वाणिज्यपरायणा नराः.

COMMINATION, *s.* *See* CURSE, THREAT.

COMMINGLE, *v. t.* संयुज् 7 U, 10, संमिश्र् 10 एकीकृ 8 U, संकृ 6 P; *See* UNITE.

COMMINUTE, *v. t.* चूर्ण् 10, पिष् 7 P, क्षुद् 7 U. -ION, *s.* चूर्णनं, पेषणं, क्षोदः.

COMMISERATE, *v. t.* दय् 1 A (with gen.), अनुकंप् 1 A. -ION, *s.* दया, अनुकंपा, करुणा. -IVE, *a.* करुणात्मक, अनुकंपाशील, सदय, दयार्द्र.

COMMIT, *v. t.* कृ 8 U, आचर् 1 P, अनुष्ठा 1 P, विधा 3 U. 2 (Entrust) न्यस् c. (अर्पयति), न्यि 4 P, निक्षिप् 6 P. 3 नियुज् 7 A, 10, समादिश् P, प्रतिपद् c.; 'c. to memory' कंठस्थ *a.* कृ, अभ्यस् 4 U; 'c. to prison' कारागारे प्रविश् c. आसिध् 1 P; 'c. to writing' अभिलिख् 6 P; हस्त्यं-पत्रं आरुह् c. (पत्रमारोप्य दीयतां प्रत्यवेक्षितं कृ S. 6); पत्रे निविश् c. (पत्रे निवेशितमुदाहरणं प्रियायाः V. 2), पत्रे न्यस् c. -TAL, *s.* आचरणं, करणं, अनुष्ठानं. -TEE, *s.* कार्यसंपादिका सभा, नियुक्तजनाः. -MENT, *s.* आसेधः, निरोधः, कारान्निवेशनं. -COMMISSION, *s.* आचरणं, करणं. 2 समर्पणं, निक्षेपः, न्यासः. 3 नियोगः, व्यापारः, अधिकारः. 4 आज्ञा-शासनपत्रं, आदेशः. 5 परार्थ-विक्रयः. 6 नियुक्तजनाः; 'c. the army' सेनायां पदं. -*v. t.* नियुज् 7 A, 10, आदिश् 6 P, अधिकृ 8 U. -ER, *s.* नियोगिन् *m.*, अधिकारिन् *m.*

COMMIX, -TURE, *See* MIX, -TURE.

COMMODE, *s.* स्त्रीमस्तकाभरणं.

COMMODIOUS, *a.* उचित, उपयुक्त, योग्य. 2 सोपकर, यथायुक्त-योग्य. -LY, *adv.* युक्तं, योग्यं. -NESS, योग्यता, औचित्यं, &c.

COMMODITY, *s.* पण्यं, द्रव्यं, क्रयवस्तु *n.*, भांडं.

COMMON, *a.* साधारण (णी *f.*), सामान्य, सर्वीय, वैलौकिक (की *f.*). 2 प्राकृत, ग्राम्य; 'c. man' कृतः, पृथग्जनः, वृषलः. 2 प्रसिद्ध, व्यावहारिक (की *f.*), बहुशः कृत-दृष्ट. 4 बहुस्वामिक. 5 सुलभ; 'c. port' जनप्रवादः; 'c. food' गणान्नं, सहभोज

'c. road' प्रचारः ; 'in c.' सामान्येन; 'who have made c. cause with us' अस्माभिः सहैककार्याणां (Mu. 2). —s. प्रचारः, सर्वसाधारणं क्षेत्रं. —ALTY, s. प्रजा, लोकाः, अवरवर्णाः. —LAW, s. देशाचारः, देशव्यवहारः-विधिः. —LY, adv. सामान्यतः, प्रायः, साधारण्येन, बहुशः. —PLACE, a. प्रसिद्ध, प्राकृत. —WEALTH, s. प्रजाधीनं राज्यतंत्रं, प्रजाप्रभुत्वं; 'c. (of ants)' समूहः, स्वतंत्रो गणः.

COMMORANCY, s. वासः, वसति f.

COMMOTION, s. क्षोभः, विप्लवः; प्रकोपः, कलहः.

COMMUNE, v. i. संभाष् 1 A, संमंत्र् 10 A, संवद् 1 P, व्यवह 1 P; व्यासादयो देवादिभिः प्रत्यक्षं व्यवहरंति (S. B. 313) 'c. directly with Gods.' —ION, s. संभाषणं; संवादः. 2 व्यवहारः. 3 संसर्गः, संगः, संगमः. —ITY, s. समाजः, जनसमूहः, प्रजाजनः, जनता, गणः. 2 सामान्यं, साधारण्यं; ऐक्यं, साम्यं.

COMMUNICATE, v. t. कथ् 10, निवेद् c., आख्या 2 P, आचक्ष् 2 A, (with dat. of person), विवृ 5 U, प्रकाश् c., वद् 1 P, विज्ञा c. (ज्ञापयति), संदिश् 6 P. 2 विद् 1 P (with loc.), दा 3 U, प्रतिपद् c. (with dat.). —v. i. संगम् 1 A, समागम, संयुज् pass.; 'c. ing with Sindhu' सिंधुनदेन संगत-संगच्छमान. 2 संलप् 1 P, संवद् 1 P, संभाष् 1 A; व्यवह 1 P. 3 संचर् 1 P. —ION, s. कथनं, निवेदनं, विज्ञापनं; संदेशः, लेखः, लेख्यं. 2 दानं, वितरणं. 3 संगमः, संसर्गः, संव्यवहारः. 4 संकथा, संलापः, संवादः. 5 सामान्यपथः. 6 संचारः. —IVE, a. संप्रदान-संवादशील; 'not c.' मितवाक्, वाग्यत.

COMMUTE, v. t. परिवृत् c., विनिमे 1 A, विपर्यस् 4 P or c., प्रतिदा 3 U. —ATION, s. परिवर्तनं, विनिमयः. 2 विक्रिया, विपरिणामः, विपर्ययः; 'c. of a curse' उच्छापः.

COMPACT, a. सुसंहत, निबिड, घन, सांद्र, दृढ, अनंतर, अविरल. —s. नियमः, समयः, संविद् f., अभ्युपगमः, प्रतिश्रवः; 'a written c.' नियमपत्रं; 'make a c.' संविदमभ्युपगम् 1 P, प्रतिश्रु 5 P. —v. t. संहन् 2 P, संधा 3 U, संश्लिष् c., घनीकृ 8 U. —LY, adv. दृढं, निबिडं, घनं. —NESS, s. संहति f., निबिडता, &c.

COMPANION, s. सखि m., सहचरः, मित्रं, वयस्यः, सहायः, सजुस् m.; 'with Madhu for a c.' मधुसहायः, मधुद्वितीयः; 'c. of the king' (in love matters) नर्मसुहृद्-सचिवः; 'c. of youth' बालसहचरः; 'c. at school' सहाध्यायिन् m.; 'c. in arms' सहयोद्धृ m.; 'c. in joy & sorrow' समदुःखसुखः; 'boon c.' सहपायिन् m., सहभोजिन् m. —SHIP, s. साहचर्यं, साहाय्यं, संसर्गः, संगति f.

COMPANY, s. साहचर्यं, संगति f., समागमः, संसर्गः, संवासः, सहवसति f. 2 जनसमूहः, परिषद् f., समाजः; दलं, वृंदं, गणः, पंक्ति f., वर्गः; 'c. of soldiers' सैन्यदलं-गुल्मः; 'c. of traders' श्रेणी, नैगमाः; 'not admissible into c.' अपांक्तेयः; 'keep or bear c. with' सह वस्-चर्-1 P, संगमनुव्रज् 1 P; *See* ASSOCIATE.

COMPARE, v. t. तुल् 10 (तुलयति), उपमा 3 A; 'c. ed with the moon' शशांकेन तुलितं; समीक्ष् 8 U, सदृशीकृ. 2 एकत्र परीक्ष् 1 A, संप्रधृ 10. —COMPARATIVE, a. आनुषंगिक (की f.), तुलनया निर्णीत, उपमान्यः; oft. by अपेक्षया in comp. —LY, adv. 'as c. ed with' तुलनया, औपम्येन, उपमानेन, अपेक्षया; 'I like mango as c. ed with a Jambu fruit' जंबुफलाद्-जंबुफलापेक्षया 'आम्रं मेऽधिकतरं रोचते; 'the merits of Rāma c.' अन्यापेक्षया रामस्य गुणाः. —COMPARISON, s. तुला, तुलना, उपमा-मानं, सादृश्यं, औपम्यं; 'without c.' अतुल, अनुपम; 'standard of c.' उपमानं; 'subject of c.' उपमेयं.

COMPARTMENT, s. शाला, कोष्ठः, कक्षः-क्षा. 2 छेदः, भागः, भेदाः.

COMPASS, s. विषयः, गोचरं; 'within the c. of the eye' नयनगोचरस्थ. 2 मंडलं, परिधिः, परिणाहः, विस्तारः, परिमाणं, पर्यंतः. 3 परिमितता, अनतिक्रमः. 4 दिङ्निर्णयंयंत्रं. —v. t. परिगम् 1 P, परि-इ 2 P, परिवेष्ट् 1 A or c., पारय् 5 U. 2 अधिगम् 1 P, लभ् 1 A; *See* GET. 3 घट् c. (घटयति), साध् 5 P or c., संपद् c., निष्पद् c.

COMPASSION, s. दया, अनुकंपा, कृपा, घृणा, करुणा, अनुक्रोशः; 'feel or have c. for' अनुकंप् 1 A, अभ्युपपद् 4 A, दयां कृ or दृश् c. (loc.), दय् 1 A (gen.). —ATE, a. सदय, करुणार्द्र, सानुकंप, सानुक्रोश, कृपालु, दयालु, सकरुण, दयाशील. —ATELY, adv. सदयं, सानुकंपं, कृपया.

COMPATERNITY, s. धर्मपितृत्वं.

COMPATIBLE, a. अनुगुण, अनुरूप, अविरुद्ध, उपयुक्त; *See* CONSISTENT. —COMPATIBILITY, s. अविरोधः, योग्यता, अनुरूपता, अविसंवादः.

COMPATRIOT, s. स्वदेशजः, एकदेशनिवासिन् m.

COMPEER, s. वयस्यः, समानपदस्थः.

COMPEL, v. t. Ex. by causal of verbs with बलाद्, बलेन, or एव; 'I shall c. you to go' त्वां गमयिष्याम्येव or बलाद् गमयिष्यामि; 'c. s payment' बलाद् दापयति &c.; 'c.s me to ask' बलादनिच्छंतमपि मां प्रश्नकर्मणि नियोजयति (Ka. 134); sometimes ex. by अवश्यं with pot. pass. part; 'you will be c. ed to stay here' त्वयात्रावश्यं स्थातव्यं; or by मेर् c., प्रवृत् c. — COMPULSORY, a. अवश्य-क; 'it is not c. on you to go' गमनं न तेऽवश्यकं. 2 बलवत् (ती f.), बलिन् (नी f.). —LY, adv. बलात्, अवश्यं, बलेन, आंशि-

च्छत् a. (ती-न्ती f.). -COMPULSION, s. बलात्कारः, प्रसभं, साहसं, बलं; ' by c. ' बलात्, बलेन, प्रसभं, प्रसह्य, हठात्.

OMPEND, COMPENDIUM, s. संक्षेपः, संग्रहः, संहारः, सारः. -COMPENDIOUS, a. संक्षिप्त, संगृहीत, अविस्तीर्ण, परिमित, सारभूत. -LY, adv. संक्षेपेण, संक्षेपतः, समासतः, अविस्तरेण. -NESS, s. संक्षेपः, अविस्तरः.

OMPENSATE, v. t. परितुष् c., निष्कृतिं दा 3 U, प्रत्युपकृ 8 U, (of persons); अपाकृ, शुध् c., निष्कृ c. -ION, s. प्रतिकरं, निष्कृति f., निस्तारः, परितोषिकं. -IVE, a. क्षति-हानि-पूरक.

OMPETE, v. i. स्पर्ध् 1 A, संघृष् 1 P, विजि desid. (जिगीषते); oft. ex. by अहमहमिका, अहमहमिकया यणामलालसाः (Ka. 81) ' c.-ing with one another to salute first. ' -ENCE,-ENCY, s. योग्यता, सामर्थ्यं, शक्ति f., औचित्यं, कार्यक्षमता. 2 वस्तुचेतं द्रव्यं; ' bare c. ' ग्रासाच्छादनमात्रं. -ENT, a. योग्य, उचित, समर्थ, शक्त, क्षम, पर्याप्त, कार्यक्षम, कार्यनिर्वाहक्षम. 2 परिमित, अनाधिक. -ITION, s. स्पर्धा, अहमहमिका, संघर्षः, विजिगीषा. -ITOR, s. प्रतिस्पर्धिन् m., प्रत्यर्थिन् m., प्रतिपक्षः, प्रतियोगिन् m.

OMPILE, v. t. संकल् 1 P, 10 (कलयति), सं-समाहृ 1 P, आलीड् 10, संग्रह् 9 P; उद्धृत्य समाहृ. -ATION, s. संकलनं, संग्रहः, सारः. -ER, s. समाहर्तृ m., संग्रहीतृ m., व्यासः, संकलयितृ m.

OMPLACENCE,-CY, s. प्रसादः, संतोषः, प्रीतिः f. 2 सौजन्यं, अनुवृत्तिः f., दाक्षिण्यं. -COMPLACENT, a. प्रसन्न, सुसंतुष्ट, सुप्रीत. 2 सुशील, दक्षिण. -LY, adv. प्रसादेन, प्रीत्या, सानंदं.

OMPLAIN, v. i. Ex. by verbs of ' telling ' gen. with सशोकं, सविलापं; आ-अधि-क्षिप् 6 P; ' c. ed of her brother's rudeness to her father ' भ्रातुरविनयमधिकृत्य पित्रेऽकथयत्, or भ्रातुरविनयाचरणं पित्रे न्यवेदयत्; ' c. ed to me of partiality ' पक्षपातमधिकृत्य मां सविलापं विज्ञापयामास; ' how can I do what you c. of ' यत्त्वं मय्यारोपयसि तत्कथमहं कुर्यां. 2 विलप् 1 P, क्रुश् 1 P, परिदेव् 1 A, आक्रंद् 1 P, आक्रुश् 1 P. 3 अभियुज् 7 A, 10, राजकुले निविद् c. (in law). 4 पीड् pass. अनुभू 1 P ; ' has been c.ing of ill-health ' आमयपीडितः. -ANT, s. अभियोक्तृ m., अर्थिन् m., अभियोगिन् m., वादिन् m., पिशुनः. -ER, s. परिदेवकः, विलापिन् m. -COMPLAINT, s. अभियोगः. 2 विज्ञापना (सविलापा); दुःखनिवेदनं, विलपनं, परिदेवनं; ' breathed out this doleful c. ' इमानि परिदेविताक्षराणि सकरुणमुदीरयामास. 3 व्याधिः, पीडा, रोगः, आमयः.

OMPLAISANCE, s. दाक्षिण्यं, अनुवृत्तिः f., अनुनयः, प्रभवः, अनुरोधः. -COMPLAISANT, a. दक्षिण, अनुनयिन्-अनुरोधिन् (नी f.), अनुकूल, सप्रश्रय. -LY, adv. सानुनयं, सानुरोधं.

COMPLEMENT, s. पूरणं, परिपूरकं. 2 कोटिः f. 3 संपूर्णता, सामग्र्यं.

COMPLETE, v. t. समाप् c., संपद् c., साध् c., अवसो c. (साययति), निर्वह् c., संपॄ c. (पूरयति) or संपूर् 10, निर्वृत् c. -a. संपूर्ण, समाप्त, अवसित, सिद्ध, संपन्न, निर्वृत्त. 2 संपूर्ण, निखिल, अखिल, समस्त, समग्र, अशेष, अन्यून. 3 पक्व, परिणत; ' c. army ' चतुरंगबलं. -ION, s. समापनं, निर्वर्तनं, संपादनं. 2 सिद्धिः f., समाप्तिः f., निर्वृत्तिः f. 3 परिणामः, परिपाकः. 4 पूरणं, परिपूरकं. -LY, adv. संपूर्णं; निःशेषं, पर्याप्तं, निरवशेषं, अशेषतः, सर्वथा. 2 आमूलं, कात्स्न्र्येन. -NESS, s. संपूर्णता, निःशेषता.

COMPLEX, a. संकीर्ण, मिश्रित, विषम, संमिश्र, मिश्र, संकुल. 2 नानार्थक. असरल, बह्वर्थ. -ITY, s. संकरः, मिश्रता, संकुलता.

COMPLEXION, s. वर्णः, मुखरागः ; ' of a pale c. ' विवर्णः, पांडुवदनः. 2 आकारः, स्वरूपं. 3 प्रकृतिः f., शरीरभावः. -AL, a. प्रकृतिसंबंधिन् (नी f.).

COMPLICATE, v. t. संमिश्र् 10, संकीर्ण-संकुल-a. कृ 8 U, प्र-सं-कृ 6 P, संकरी-संकुली-कृ. -ION, s. संकुलीकरणं, संकीर्णता, संमिश्रता.

COMPLICE, s. पापसहायः. -ITY, s. पापसहायता, सहकारिता.

COMPLIMENT, s. अभिनंदनवचस् n., नमस्कारः ; ' presents c. s ' अभिनंद्य ब्रवीति; ' give my c. s to Chyavana ' च्यवनाय मां प्रणिपात्य (V. 5), मदीयो नमस्कारो वाच्यः; श्वश्रूजनं सर्वं विज्ञापय प्रापितमत्प्रणामः (R. XIV. 60). 2 प्रश्रयवाच् f., चाटूक्तिः f., प्रशंसा, श्लाघा, प्रशंसोक्तिः f.; ' high c. ' उच्चैर्वादः; स्तुतिः f. -v. t. See PRAISE. 2 मधुरगिरा-चाटूक्त्या सांत्व् 10. -ARY, a. उपचार in comp.; ' c. saying ' उपचारपदं; प्रियवादिन् (नी f.), स्तुतिमय (यी f.); ' c. present ' उपायनं. -ER, s. प्रियवादिन् m., चाटुकारः.

COMPLOT, v. i. गूढं मंत्र् 10 A, कूटसंविदं कृ 8 U. -s. गूढ-कू-मंत्रणा, कूटसाहित्यं. -TER, s. कूटसहायः.

COMPLY, v. i. अनुविधा 3 U, अनुरुध् 4 A, अनुवृत् 1 A. 2 अनु-सं-मन् 4 A, अनुज्ञा 9 U, स्वीकृ 8 U, प्रति-परि-ग्रह् 9 P, प्रतीष् 6 P, अभ्युपगम् 1 P; क्रियतामस्याः प्रणयपरिग्रहः (Ka. 145) ' c. with her request. ' -ANCE, s. अनुवृत्तिः f., अनुविधायित्वं, अनुरोधः, अनुसारः. 2 स्वीकारः, संमतिः f., अभ्युपगमः, परिग्रहः; ' in c. with your orders ' त्वच्छासनानुरोधात्-नुसारेण. -ANT, a. अनुविधायिन् (नी f.), अनुवृत्तिकुशल-शील, अनुरोधिन् (नी f.), वचने स्थित. -ER, s. अनुरोधिन् m., परिग्राहिन् m.

COMPONENT, *a.* or *s.* घटक, साधक, रचक; 'c. part' घटकावयवः, अंगं, भागः, साधनं.

COMPORT, *v. i.* Behave, q. v. 2 युज्-उपपद्-pass. -ABLE, *a.* योग्य, उचित. -MENT, *s.* आचारः, व्यवहारः, चेष्टितं.

COMPOSE, *v. t.* (of books &c.) ग्रथ् 1 P, विरच् 10, बंध् 9 P, निबंध्, संग्रंथ् 9 P. 2 विन्यस् 4 P, संधा 3 U, संकृप् c., संविधा, निर्मा 3 A. 3 घट् c. (घटयति), निर्मा, कृप् c.; or gen. ex. by आत्मक, रूप, मय (यी *f.*) in comp. ; 'the body c. ed of 5 elements' पंचभिर्निर्मितो देहः, पंचभूतात्मको देहः. 4 (Calm) स्थिरीकृ 8 U, शम् c. (शमयति), प्रसद् c., संस्तंभ् c., पर्यवस्था c. (स्थापयति); 'does not yet c. (collect) himself' नाद्यापि पर्यवस्थापयत्यात्मानं (U. 3). 5 (a dispute &c.) संधा 3 U, प्रशम् c., (प्रशमयसि विवादं S. 5). -ED, *a.* शांत, प्रसन्न, अव्याकुलं, अनुद्विग्न, स्थिरीकृत, समाहित. 2 विरचित, निर्मित, निबद्ध; 'c. in verse, or music' श्लोक-स्वर-बद्ध; 'c. of' घटित, आत्मक-(त्मिका *f.*), रूप in comp. -EDLY, *adv.* असंभ्रमं, प्रशांतचेतसा, निरुद्वेगं. -ER, *s.* रचकः, प्रणेतृ *m.*, निबंधृ *m.* -ITION, *s.* रचना, प्रणयनं, निर्माणं, निबंधनं. 2 विन्यासः, संधानं, प्रशमनं. 3 समसनं, मिश्रणं, संयोगः, संधिः, संघातः. 4 ग्रंथः, प्र-नि-बंधः. -URE, *s.* स्थैर्यं, शमः, प्रसादः, असंभ्रमः, अक्षोभः. 2 संधानं, संयोगः, मिश्रणं, निर्माणं.

COMPOTATION, *s.* सहपानं, संपीतिं *f.*

COMPOUND, *v. t.* संयुज् 10, संमिश्र् 10, संधा 3 U, समस् 4 P, संश्लिष् c. 2 (a dispute) संधा, समाधा, प्रशम् c. (शमयति). -*v. i.* ऋणशोधनेन आनृण्यं गम् 1 P; 'was glad to c. for his escape with the loss of it' तन्नाशेनापि मुक्तिरभवदिति हृष्टो बभूव. -*a.*, -ED, *a.* संयुक्त, यौगिक (की *f.*), संसृष्ट, संमिश्र, सामासिक, साधित; 'c. word' समासः. -*s.* मिश्रणं, संकरः; मिश्रितद्रव्यं, योगः. 2 परिसरभूमि *f.*, प्रांगणं (नं). -ER, *s.* मिश्रणकृत-समाधातृ *m.*; 'c. of medicines' औषधयोगविद् *m.*

COMPREHEND, *v. t.* बुध् 1 P, विद् 2 P, ज्ञा 9 U, ग्रह् 9 P, परिग्रह्, उपलभ् 1 A, अवगम् 1 P, ऊह् 1 A; विभू c., अवधृ 10. 2 व्याप् 5 P, अंतर्गण् 10, अंतर्भू c., परिग्रह् 9 P, आकल् 10, समाविश् c. -COMPREHENSIBLE, *a.* ग्राह्य, वेद्य, अवधारणीय, विभाव्य, धीगम्य; 'easily c.' सुबोध; 'not c.' दुर्बोध, दुर्ग्रह, दुर्गम, दुर्ज्ञेय. -COMPREHENSION, *s.* ग्रहणं, बोधः. 2 धी *f.*, मति *f.*, बुद्धि *f.*, अवधारणा, मेधा; 'power of c.' ग्रहणसामर्थ्यं, आकलनशक्तिः. 3 प्रतिसंहारः, व्याप्ति *f.*, समावेशः, अंतर्भावः. -COMPREHENSIVE, *a.* व्यापक, बहुविस्तीर्ण, व्यापिष् (णी *f.*), बहुग्रह. 2 साक्षेपिक (की *f.*). -LY, *adv.* समासतः, संक्षेपेण. 2 व्यापकत्वेन. -NESS, *s.* व्यापकत्वं. 2 संक्षेपः, समस्तता.

COMPRESS, *v. t.* संवृ 5 U, संकुच् 1 P, संहन् 2 P, संपीड् 10, संह 1 P. -IBLE, *a.* संकोचनीय. -IBILITY, *s.* संकोचक्षमता, संहरणीयता. -ION, *s.* संकोचः-चनं, संहति *f.*, संपीडनं; संवरणं.

COMPRISE, *v. t.* व्याप् 5 P, अंतर्गण् 10, परिग्रह् 9 P, समाविश् c., अंतर्भू c.; 'to be c. ed in' अंतर्गम् 1 P, अंतर्भू 1 P, or by आत्मक, गर्भ, in comp.

COMPROBATION, *s.* प्रमाणं, साक्ष्यं, संमतिं *f.*

COMPROMISE, *v. t.* आपुष् 10. 2 संशये पत् c., संशयस्थ *a.* कृ 8 U. -*s.* आपोषः-षणं. 2 मध्यस्थावलंबननियमः.

COMPROVINCIAL, *a.* एकदेशीय, एकदेशज.

COMPTROL, *v. t.* अधिष्ठा 1 P, पर्यव-ईक्ष् 1 A. -LER, *s.* कार्याधिकृतः, पर्यवेक्षकः, कार्यदृष्टृ *m.*

COMPULSION, -SORY, *See* under COMPEL.

COMPUNCTION, *s.* अनुशयः, अनुतापः, पश्चात्तापः. -COMPUNCTIOUS, *a.* अनुशयार्त, अनुतापिन् (नी *f.*).

'he has e. ed one danger to fall into another' (*Cf.* e. ed Scylla to fall into Charybdis) बंधनप्रष्टो गृहकपोतश्चिक्षायामुखे पतितः (M. 4). —*v. i.* अप-नि:-क्रम् 1 U, 4 P, अपसृ 1 P, अपक्षद् 1 P, निर्गम् 1 P, परा-इ 2 P, पलाय् 1 A, अप-या 2 P, अपधाव् 1 P, अलक्षितं-निभृतं-गम् ; 'he narrowly e. ed' कथं कथमपि मुक्तः ; 'e. ed with his life' पलायनेन जीवितं रक्षितवान्. —*s.* पलायनं, निर्गमः, अपक्रमः-मणं, निष्क्रमः, अपसर्पणं, अपयानं. **2** निस्तारः, मुक्ति *f.*, मोक्षः, त्राणं, क्षेमलाभः.

Escheat, *v. i.* राजसाद्-भू 1 P, (संतत्यभावात्) राजगामि भू, राजस्वतां आपद् 4 A, राजानं गम् 1 P. —*s.* राजसाद्भूतं क्षेत्रादि.

Eschew, *See* Avoid.

Escort, *s.* परि-अनु-चराः, रक्षापुरुषाः (pl.); परिवारः, रक्षकगणः, रक्षिवर्गः; 'send her with a good e.' सुरक्षितां तां प्रेषय. **2** रक्षणं, शरणं, रक्षा, अनुव्रजनं. —*v. t.* (रक्षार्थं) अनुगम् 1 P, सह-इ 2 P, अनुव्रज् 1 P, प्रतिरक्ष् 1 P, (ऋषिप्रतिरक्षितां S. 4). परि-अनु-चर 1 P.

Esculent, *a.* खाद्य, भक्षणीय. —*s.* खाद्यं, भक्ष्यं.

Escutcheon, *s.* कुलचिह्नपत्रं.

Esophagus, *s.* अन्नवाहि स्रोतस् *n.*

Esoteric, *a.* गूढ, अलौकिक (की *f.*); विशिष्ट.

Espalier, *s.* लताकुंजः, वृक्षजालं.

Especial, *a.* उत्तम, विशिष्ट, प्रधान, परम, मुख्य. **2** सविशेष, विशेष in comp.; 'e. qualification' विशेषगुणः. —**LY**, *adv.* विशेषेण-षतः, प्रधानतः, मुख्यशः.

Espionage, *s.* गूढावेक्षणं, चारवृत्ति *f.*, गूढप्रचारः. **2** चारप्रयोगः.

Esplanade, *s.* समः क्रीडादेशः, समीकृतं क्रीडास्थानं.

Espouse, *v. t.* परिग्रह् 9 P, वि-उद्-वह् 1 P, परिणी 1 P, वृ 5 U, 10 (वरयति). **2** अंगी-स्वी-कृ 8 U, परिग्रह्, दरी-उरी-कृ, अवलंब् 1 A, आधि 1 U. **3** रक्ष् 1 P, अनु-पा c. (पालयति), संवृध् c. **4** वाचा दा 3 U or प्रति-श्रु 9 U. —**AL**, *s.* परिग्रहणं, उद्वाहः, परिणयनं. **2** दानं, वाग्निश्चयः. **3** स्वीकारः, ग्रहणं, अनुपालनं; अवलंबनं, आश्रयः; 'e. of a cause' पक्षपरिग्रहः-पातः, पक्षावलंबनं.

Espy, *v. t.* (दूरात्) आलोक् 1 A, 10, निरूप् 10, ईक्ष् 1 A, निर्वर्ण् 10.

Esquire, *s.* कंचुकवाहः, सान्नहनिकः. **2** श्री pr., आर्यः, भवत् in comp.

Essay, *v. t.* आरभ् 1 A, परीक्ष् 1 A, उपक्रम् 1 A, व्यवसो 4 P; *See* Attempt. —*s.* परीक्षणं, प्रयत्नः, आरंभः, उद्योगः, उपक्रमः. **2** नि-प्र-बंधः, लेख्यं. —**IST**, निबंधलेखकः.

Essence, *s.* सारः, मूलं, अधिभूतं, मूलवस्तु *n.*; 'vital e. of body' शरीरधातवः (pl.). **2** सारः, निष्कर्षः, निर्गलितार्थः, पिंडितार्थः, भावः, निष्कृष्टार्थः. **3** Perfume, q. v. —**Essential**, *a.* सारवत्, सारभूत, ससीर. **2** आवश्यक, अत्यावश्य, गुरु, महत् ; oft. ex. by अप-ईक्ष् 1 A; 'sprinkling of water is e. to the growth of sprouts' अंकुरवृद्धिर्जलसेकमपेक्षत एव. —*s.* तत्वं, मूलतत्वं, मूलं. **2** परमार्थः, गुर्वर्थः. **3** (E. s of judicature) व्यवहारमातृकाः. —**LY**, *adv.* अवश्यं, तत्वतः, सारतः.

Establish, *v. t.* सं-प्रति-स्था c. (स्थापयति), अधिष्ठा c.; 'one whose rule is newly e. ed' अचिराधिष्ठितराज्यः (M. 1); प्रतिष्ठितं प्रकृतिषु 'well e.-ed' &c. **2** उप-प्रति-पद् c., समर्थ् 10; निर्णी 1 P, स्थिरी-दृढी-प्रमाणी-कृ 8 U, सं-स्तंभ् 9 P or c., निगम् c. (गमयति), सिद्धांतयति (D.). **3** व्यव-स्था c., प्रकृप् c., वि-धा 3 U. —**MENT**, *s.* संस्थापनं, स्थिरीकरणं. **2** प्रतिपादनं, उपपत्ति *f.*, निगमनं. **3** भृत्यादिवर्गः.

Estate, *s.* अवस्था, दशा; *See* Condition. **2** संपद् *f.*, धनं, रिक्थं, दायः; भूमि *f.*, विभवः, संपत्ति *f.*, द्रव्यं, वित्तं. **3** पदं, स्थानं. **4** वर्गः, गणः.

Esteem, *v. t.* बहु मन् 4 A or c., संमन्, पूज् 10, आ-दृ 6 A. **2** गण् 10, वि-भू c. —*s.* बहु-सं-मानः, आदरः, पूजा, मान्यत्वं. **2** मतं, मति *f.* —**Estimable**, *a.* मान्य, पूज्य, अर्घ्य, पूजार्ह.

Estimate, *v. t.* निरूप् 10, वि-भू c., निर्णी 1 P, विगण् 10, सं-परिसं-ख्या 2 P, संकल् 10, निश्चि 5 U, अर्घं-मूल्यं निरूप् or निर्णी. —*s.* गणना-नं, परिसंख्यानं; मूल्यनिरूपणं, अर्घगणना; 'rough e.' स्थूल-आकारमानं. **2** मतं; 'in the popular e' लोकमतेन. —**ION**, *s.* गणना-नं. **2** बहुमानः, मानः, आदरः, संमानः. —**OR**, *s.* गणकः, संख्यातृ *m.*

Estival, *a.* निदाघ-ग्रीष्म-संबंधिन्.

Estrade, *s.* समभूमि *f.*, समस्थानं-स्थलं.

Estrange, *v. t.* अप-वि-रंज् c., विश्लिष् c., भिद् 7 P or c., विरागं उत्पद् c., स्नेहं भिद् or छिद् 7 P or विपद् c. (घटयति). **2** दूरीकृ 8 U, विच्छिद्, विश्लिष् c., वियुज् 7 A, 10. —**ED**, *a.* विरक्त, विश्लेषित, भेदित, जातविराग, निवृत्तस्नेह, अपरक्त, अपरागिन्. **2** दूरीकृत, विच्छिन्न, वियोजित. —**MENT**, *s.* विरक्ति *f.*, अप-वि-रागः, स्नेहनिवृत्ति *f.*, स्नेहच्छेदः-भेदः-विरामः. **2** वियोगः, विच्छेदः, विरहः, विश्लेषः, दूरीभावः, पृथग्भावः.

Estuary, *s.* समुद्रवकः, पुटभेदः.

Estuate, *v. i.* फेनायते (D.), उत्सिच् pass.

Et cætera, (&c.) Ex. by आदि, आद्य, प्रभृति in comp.; 'horses, asses, &c.' अश्वरासभादयः, गुडादि, &c.

Etch, *v. t.* लिख् 6 P, चित्र् 10.

ETERNAL, *a.* नित्य, शाश्वत (ती *f.*), अनंत, सनातन (नी *f.*), अनादि, अनाद्य, सतत, सत्त, अनाद्यनंत, शाश्वातिक (की *f.*), निरंतर, अविसर्गिन्, अमर, अनपाय, अविच्छिन्न, अक्षय. -LY, *adv.* नित्यं, शश्वत्, सदा, निरंतरं, अविरतं, सर्वकालं, अनंतं. -ETERNITY, *s.* नित्यता, आनंत्यं, सनातनत्वं. 2 अनंतकालः.

ETESIAN, *See* ANNUAL.

ETHER, *s.* आकाशः-शं. 2 तेजोवहः, हिमद्रवः. -ETHEREAL, *a.* आकाशीय, नभस्-आकाश- in comp., वैहायस (सी *f.*). 2 तैजस (सी *f.*).

ETHICS, *s.* नीतिविद्या-शास्त्रं, नीति *f.*, आचारनीतिः. -ETHIC, ETHICAL, *a.* नीतिविषय-शास्त्रीय. -ALLY, *adv.* नीत्यनुसारेण.

ETHNIC,-AL, *a.* अन्य-भिन्न-देशीय.

ETHNOLOGY, *s.* नृवंशविद्या.

ETIQUETTE, *s.* आ-उप-चारः, विनयरीतिः *f.*,-विधिः, सदाचाररीतिः, सौजन्यं, सभ्यता, शिष्टाचारः.

ETYMOLOGY, *s.* व्युत्पत्तिः *f.*, व्युत्पादनं, शब्दसाधनं, शब्दव्युत्पत्तिविद्या. -ICAL, *a.* व्युत्पत्तिविषय; 'e. sense' यौगिकार्थः. -IST, *s.* शब्दव्युत्पत्तिकुशलः. -IZE, *v. t.* व्युत्पद् c.

EULOGY, *s.* प्रशंसा, स्तुतिः *f.*, स्तवः, श्लाघा, वर्णनं, गुणस्तुतिः-श्लाघा-वर्णना. -IZE, *v. t.* प्रशंस् 1 P, स्तु 2 U; *See* PRAISE. -ISTIC, *a.* स्तुतिमय (यी *f.*), प्रशंसाकर (री *f.*). -IST, *s.* प्रशंसकः, स्तुतिपाठकः, वंदिन् *m.*

EUNUCH, *s.* ष(शं)ढः-ढः, क्लीबः, नपुंसकः, पौंगंडः, पंडः, तृतीय(या)प्रकृतिः. 2 वर्षवरः, स्थापत्यः, कंचुकिन् *m.*, सौविदः, सौविदलः.

EUPHEMISM, *s.* मंगलभाषितं.

EUPHONY, *s.* सुस्वरः-शब्दः-स्वनः, सुश्लिष्टस्वरत्वं, अकर्कशता. 2 संयोगः, संधिः. -IC,-IOUS, *a.* सुस्वर, सुश्राव्य, सुखश्रव, श्रुतिसुख, अकर्कश, सुश्लिष्टस्वन.

EUPHORBIA, *s.* समंतदुग्धा, सीहुडः, वज्रः, स्नुह् *f.*, स्नुही, गुडा.

EVACUATE, *v. t.* परित्यज् 1 P, वि-हा 3 P, उत्-विसृज् 6 P. 2 रिच् 7 P, शून्यीकृ 8 U; 'e. bowels' शुध् c., मलशुद्धिं कृ 8 U. -ION, *s.* परित्यागः, उत्सर्गः. 2 (Of bowels) मलशुद्धिः *f.*, मलोत्सर्गः. मलोद्धारः, उद्धारः, विरेचनं.

EVADE, *v. t.* शाठ्येन परि-हृ 1 P, वक्रोक्त्या परिहृ, अप-लप् 1 P, अप-नि-ह नु 2 A, अप-व्यप-दिश् 6 P. -*v. i.* शाठ्येन पलाय् 1 A or अप-सृप् 1 P or अपधाव् 1 P, व्यपदेशं कृ 8 U, वाक्छलं कृ. -EVASION, *s.* अप-व्यप-देशः, छद्मन् *n.*, छलं, कपटं, निह्नवः, छलेन परिहरणं. 2 वक्रोक्तिः *f.*, वाक्छलं, अपलापः, कपटवचनं, कैतवोक्तिः. 3 Escape, q. v. -EVASIVE, *a.* सकपट, छलिन्, छद्मविद्, व्यपदेशिन्, अपह्नवकारिन्. 2 वक्र-कुटिल, जिह्म; 'e. answer' वक्रोक्तिः; 'when he made e. replies' यदा सूक्ष्मभेदान् बहूनकथयत् (Mn. 2). -LY, *adv.* सकपटं, वाक्छलेन, वक्रोक्त्या, प्रस्तुतं परिहृत्य.

EVANESCENT, *a.* क्षणिक, क्षणभंगुर, क्षणाधीन (नी *f.*). 2 अदृश्य, परोक्ष, अंतर्हित, अमरयक्ष.

EVAPORATE, *v. i.* वाष्पीभू 1 P, वाष्परूपेण उड्डी 1 P or नश् 4 P, वाष्पायते (D.), आतपेन शुष् 4 P. 2 (fig.) विनश्, विली 4 A, अंतर्धा pass., वि-हृ 1 P. -*v. t.* वाष्पीकृ 8 U, आतपेन शुष् c., उच्चुष् c., वाष्परूपेण नश् c. or उड्डी c. (गमयति). -ED, *a.* आतपशुष्क, शोषितरस. -ION, *s.* वाष्पीभवनं-करणं, वाष्पभावः, शोषणं.

EVE, *s.* पूर्वप्रदोषः. 2 Evening, q. v.; 'to be on the e. of taking place' उपस्था 1 P, प्रत्यासद् 1 P; *See* APPROACH.

EVEN, *a.* सम (in all senses); 'e. ground' समप्रदेशः-स्थलं-पाटः-भूमि *f.*; 'e.-handed' समक्रिय, समदर्शिन्; 'e.-minded' समचित्त-भाव, समवृत्ति. 2 समरेख, अवक्र, ऋजु. -*v. t.* समीकृ 8 U. -*adv.* अपि; 'e. though' 'e. if' यद्यपि; 'e. now' अद्यापि; 'e. so' एवमेव, एवं, तथैव, अथ किं; 'e. as' यथा, यथैव. -LY, *adv.* समं, तुल्यं; सम. तुल्य in comp. -NESS, *s.* समता, साम्यं, तुल्यता, एकरूपता, निर्विकारता, &c.

EVENING, EVEN, *s.* संध्या, संध्यासमयः, सायंकालः, वि-वै-कालः, दिनावसानं, प्रदोषः, रजनीमुखं, सायाह्नः; 'in the e.' सायं; 'good e. to you' शुभमस्ते प्रदोषः (भूयात्). -*a.* सायंतन (नी *f.*), प्रादोषिक (की *f.*), वैकालिक (की *f.*), सायंकालीन.

EVENT, *s.* वृत्तं, व्यतिकरः, वृत्तांतः, घटना, संभवः, संगतं; 'in the e. of' यदि, चेत्. 2 परिणामः, फलं, अनुवृत्तं, उद्गतं, उत्तरं फलं. -FUL, *a.* विख्यात, बहुघटनाविशिष्ट. -UAL, *a.* अंतिम, अंत्य. 2 आनुषंगिक (की *f.*), अनुवर्तिन्, अनुसारिन्. -UALLY, *adv.* अवशेषे, अंते, अंततः.

EVER, *adv.* कदा-चन-चित्, कदापि; कर्हिचित्, जातु; 'not e.' न कदाचन, न जातु, &c. 2 नित्यं, अहर्निशं; सदा, सर्वदा; 'for e.' शश्वत्, निरंतरं; अजस्रं, शाश्वतीः समाः; oft. by एकांत, अत्यंत in comp.; 'disappeared for e.' अत्यंतविलुप्तदर्शन; 'lost for e.' एकांतनष्ट; 'gone for e.' असन्निवृत्त्यै गत, अत्यंतगत; 'e. more' पुनः, इतः परं; 'e. and anon' वारंवारं, काले काले, मुहुर्मुहुः, मुहुः; 'e. since' यतः प्रभृति; 'e. so little' मनाक्-ईषत्-कियत्-किंचित्-अपि. With adj. ex. by नित्य, सदा, &c. in comp.; 'e. blooming' नित्यपुष्प; 'e. green' सततहरित, अम्लानपर्ण; 'e. lasting' नित्यस्थायिन्, नित्य, अक्षय्य, अमर; *See* ETERNAL; 'e. moving' सदा-नित्य-गति,

EVERY, *a.* प्रति-अनु- in comp.; 'e. day' प्रतिदिवसं; प्रतिवर्षं, अनुदिनं, &c.; oft. by repeating the word; 'in e. place' स्थाने स्थाने; दिवदिवसे 'e. day' &c.; 'at e. discussion' वादे वादे. 2 सर्व, विश्व, सकल; *See* EACH; 'knowing e. thing' सर्वज्ञः; 'suffering e. thing' सर्वसहा (धृत्री); 'e. one' 'e. body' सर्वः, सर्वजनः, प्रत्येकः, एकैकः; एकैकशः, पृथक् पृथक्; e.-day' (*a.*) प्रत्यहिक (की *f.*); 'e. thing' सर्वं; 'e. other' एकैकं परित्यज्य अन्य-अपरः; 'in e. way' सर्वथा; 'e. where' विष्वक्, सर्वतः, सर्वत्र, यत्र तत्र; 'e. time' यदा यदा; 'on e. side' सर्वतः, वितः, समंततः.

EVICT, *v. t.* निःस् c., निराकृ 8 U, बहिष्कृ, अधिकारात्-स्वत्वात्-भ्रंश् c. or च्यु c.

EVIDENCE, *s.* साक्ष्यं, प्रमाणं, प्रामाण्यं, निदर्शनं; written e.' लेखप्रमाणं, साधनपत्रं; 'ocular e.' प्रत्यक्षप्रमाणं, चाक्षुषज्ञानं. —*v. t.* प्रमाणीकृ 8 U, प्रमाणं साध् c. or वि-भू c. or उप-पद् c.

EVIDENT, *a.* स्पष्ट, सुस्पष्ट, स्फुट, परिस्फुट, व्यक्त, विशद, प्रकाश, प्रत्यक्ष, प्रकट; 'make e.' प्र-काश् c., आविष्कृ 8 U, स्पष्टीकृ, वि-वृ 5 U, विशदीकृ; 'to be e.' स्पष्टीभू 1 P, &c. —LY, *adv.* स्पष्टं, स्फुटं, व्यक्तं, प्रत्यक्षं, नाम, oft. with एव.

EVIL, *a.* दुष्ट, पाप, खल, कुत्सित, असाधु, निंद्य, अधम, पापिन्, असत्, गर्ह्य, गर्हित, वाच्य; gen. ex. by दुर्, दुस्, अप, असत्, पाप in comp.; 'e.-intentioned' पापाशय, दुर्बुद्धि; 'e. passions' दुर्विकाराः; 'e. eye' कुदृष्टि *f.*, पापदृष्टिः; 'e. course' कुपथः-मार्गः, असत्पथः; 'e.-conducted' दुराचार, अपकर्मन्, दुर्वृत्त; 'e. doer' दुर्वृत्तः, कुकर्मन् *m.*; पापकर्मा, दुष्कृतिन् *m.*, पापकृत् *m.*; 'e.-minded' दुरात्मन्, पापमति-बुद्धि, दुष्टमति, कुमति, दुर्मति, दुर्बुद्धि, पापाशयः; 'good or e. acts' शुभाशुभकर्माणि; 'e. speaking' दुरालापः, विज्ञानवाक्यं; 'e.-tongued' दुर्मुख, मुखरः, अवद्यमुख, कदृद. —*s.* अनिष्टं, अहितं, अशुभं, अपायः, अभद्रं, अरिष्टं, दुःखं. 2 दुर्गति *f.*, दुरवस्था, व्यसनं, आ-वि-पद् *f.*, कष्टं, अत्याहितं. 3 अपकारः, अपायः, हिंसा, क्षति *f.* 4 पापं, पापाचरितं, दुष्कर्म, कुकृत्यं, अधर्मः, दुष्टकृत्यं, दौरात्म्यं, दोषः, दुराचारः, दुष्कृति *f.*; 'Oh! An e. has befallen'! अमङ्गल्यं, अत्याहितं, हा धिक्, कष्टं.

EVINCE, *v. t.* निर्दिश् 6 P, प्रकाश् c., सूच् 10, दृश् c., स्पष्टी-व्यक्ती-प्रकटी-कृ 8 U, व्यंज् 7 P or c., ज्ञा c. —IBLY, *adv.* स्पष्टं, असंशयं, व्यक्तं. —IVE, *a.* द्योतक, सूचक, द्योतक.

EVISCERATE, *v. t.* निरंत्रीकृ 8 U.

EVITABLE, *v. t.* परिहार्यं, हेयं, वर्जनीयं, परिहरणीयं (की *f.*), परिहरणीयं.

EVOKE, *v. t.* आ-ह्वे 1 P, आ-समा-हृ 1 P. 2 उत्पद् c., जन् c. (जनयति); प्र-कृष c., प्रोत्सह् c., उद्दिश् c.; 'his speech e. ed laughter' तस्य वचः महासाय बभूव, उपहासास्पदं जातं. —EVOCATION, *s.* आह्वानं. 2 Appeal, q. v.

EVOLVE, *v. t.* वि-वृ 5 U, उद्विवृ c. 2 वि-स्तृ c., प्र-सृ c., वितन् 8 U. —EVOLUTION, *s.* उद्वेदः, विवर्तनं. 2 विस्तारः-रणं, प्रसारणं. 3 परंपरा, श्रेणी. 4 मूलत्यागः. 5 परिणामः; 'theory of e.' परिणामवादः.

EVULSION, *s.* उत्पाटनं, उत्कर्षणं, अवलुंचनं.

EWE, *s.* मेषी, एडका, उरणी, अविला; 'e.'s milk' अविसोढं, अविदुसं.

EWER, *s.* कमंडलुः, कुंभः, उदकपात्रं.

EXACERBATE, *v. t.* प्र-कुप् c., उत्तिज् c., क्रोधं उद्दीप् c.; *See* ENRAGE. —ION, *s.* प्रकोपणं-नं, क्रोधोद्दीपनं.

EXACT, *a.* यथार्थ, यथातथ, ऋत, सत्य. २ शुचि, निर्दोष, शुद्ध. 3 अवहित, अप्रमत्त; oft. by विशेष in comp.; स्थलविशेषः, नरविशेषः 'e. place', 'e. man &c.' 4 सूक्ष्म, विशिष्ट. 5 निर्विशेष, समान. —*v. t.* बलेन ग्रह् 9 P or आदा 3 A, बलाद् ग्रह or निष्कृष् 1 P or आ-हृ c., दा c. (दापयति); oft. by causal. 2 बाध् 1 A, अर्द् c., उपपीड् 10. —ION, *s.* बलाद् ग्रहणं or आदानं, निष्कर्षः, दापनं. 2 उपद्रवः, विप्लवः, बाधा, बाधनं, उपपीडा. —LY, *adv.* यथार्थतः, यथावत्, यथातथं, तत्त्वतः, सम्यक्, सत्यं, सूक्ष्मतया. 2 नाधिकं न न्यूनं; oft. by एव; 'e. so' एवमेव, अथ किं, तथैव; 'they two are e. alike' नास्ति किमपि तयोरंतरं. —NESS, *s.* याथार्थ्यं, सत्यता, तत्त्वता. 2 सूक्ष्मता. 3 अवधानं, अप्रमादः.

EXAGGERATE, *v. t.* अतिशयेन-अत्युक्त्या वर्ण् 10 or कथ् 10; संवृध् c. (Mr. 9), विस्तृ c. —ION, *s.* अत्युक्तिः *f.*, अतिशयोक्तिः, अनिवर्णनं, वाग्उपचयः, संवर्धनं.

EXALT, *v. t.* उन्नम् c. (नमयति), नी 1 P or प्राप् c., उन्नी 1 P, उच्छ्रि c., उत्कृष् 1 P; उच्चपदं प्राप् c. or अधिरुह् c. (रोपयति), उत्कृष्टपदे नियुज् 7 A, 10. —ATION, *s.* उन्नतिः *f.*, उच्छ्रायः, उन्नमनं, उत्कर्षः, उच्चपदारोपणं; 'self-e.' आत्मोत्कर्षः. —ED, *a.* उन्नत, उच्छ्रित, उत्कृष्ट, परम, उच्चैः; 'e. place' उच्चपदं; 'e. rank' गौरवपदं; *See* ELEVATE.

EXAMINE, *v. t.* परीक्ष् 1 A, निरूप् 10, अनुसंधा 3 U, विचर् c., विमृश् 6 P, अन्वेष्, आ-मर्श-लोच् 10. 2 निर्णी 1 P, निशि 5 U, परिच्छिद् 7 P. 3 अनुयुज् 7 A, पृच्छ् 6 P; ज्ञा desid. (जिज्ञासते). 4 विरिच्, समीक्ष्,

परीक्ष्, निरूप्, दृश् 1 P, आ-अव-लोक् 1 A, 10. -ATION, *s.* परीक्षा-क्षणं, विचारः-रणा, निरूपणं, अनुसंधानं, अनुयोगः; मयः. 2 निरीक्षणं, आलोचनं, संदर्शनं, मवेक्षा; 'judicial e.' व्यवहारदर्शनं. -EE, *s.* परीक्षकः, विचारकः, अनुयोक्तृ *m.*, माक्षिकः.

EXAMPLE, *s.* उदाहरणं, निदर्शनं, दृष्टांतः; 'for e.' यथा, तथाहि. 2 आदर्शः, प्रमाणं; 'follow an e.' अनुकृ 8 U, प्रमाणं अनु 4 A, वर्त्म अनुगम् 1 P, पदमनुविधा 3 U, (पदमनुविधेयं च महतां). -EXEMPLARY, *a.* प्रमाणी-आदर्शी-भूत, दृष्टांतयोग्य, प्रमाणयोग्य. 2 प्रशस्य, श्लाघ्य; अनुकरणीय-करणार्ह. -LY, *adv.* प्रमाणवत्, प्रमाणमिव, दृष्टांतरूपेण, अनुकरणीयतया. -EXEMPLIFY, *v. t.* उदाहृ 1 P, दृष्टांतेन स्पष्टीकृ 8 U or प्रकाशय् c. or प्र-दृश् c. -ICATION, *s.* उदाहरणं, निदर्शनं, उदाहरणेन स्पष्टीकरणं.

EXANIMATE, *a.* निर्जीव, विचेतन. 2 निरुत्साह, भग्नोत्साह.

EXASPERATE, *v. t.* प्रकुप् c., संक्षुभ् c., हृष् c., क्रुध् c., सं-रभ् c. (रंभयति), क्रोधं उद्दीप् c. -ED, *a.* प्रकोपित, संरब्ध, जातामर्ष, इद्धमन्यु, प्रदीप्तक्रोध, संक्षुब्ध, प्रक्षोभित. -ION, *s.* प्रकोपणं-नं, संरंभः, क्रोधोद्दीपनं.

EXCAVATE, *v. t.* उत्खन् 1 P, निर्भिद् 7 P or c., विदृ 10. -ION, *s.* विदारणं, उत्खननं. 2 खातं, गर्तः-र्तो, रंध्रं, बिलं, सुषिरं; 'e. underneath the ground' सुरंगा. -OR, *s.* खनकः, खातकृत् *m.*

EXCEED, *v. t.* अति-इ 2 P, अति-क्रम् 1 U, 4 P; स सत्कारो मनोरथानामप्यभूमिः (S. 7) 'e. ed even my expectations'; अतिचर्-गम् 1 P, लंघ् 1 A, 10; *See* BEYOND also. 2 अति-इ 2 A, अति-भू 1 P; *See* EXCEL. -ING, *a.* अतिशायिन्, अतिरिक्त, अधिक, अतिरेकिन्. 2 अत्यंत, परम, पर, भूरि, सु pr., अति pr.; 'e. man's power' अतिमानुष; 'e. written orders' आज्ञापत्रमुल्लंघयन्. -INGLY, *adv.* अत्यंतं, नितांतं, एकांततः, अत्यर्थं, निर्भरं, प्रगाढं, सुतरां, नितरां, प्र-नि-कामं, सातिशयं, अतिमात्रं, अतीव, अति-सु-pr. -EXCESS, *s.* उत्कर्षः, गाढता, बाहुल्यं, प्राचुर्यं, उत्सेकः, अतिशयः, उपचयः, आधिक्यं, अतिरेकः, उद्रेकः. 2 पौनरुक्त्यं, पुनरुक्तता. 3 मर्यादातिक्रमः, अतिक्रमः, अत्याचारः, असंयमः, अपरिमितता. -IVE, *a.* अत्यंत, अत्यधिक, अत्यर्थ, अतिमात्र, प्र-, गाढ, पर, परम, सातिशय, निभर, उत्कट, नितांत, अपरिमित, एकांत, अतिरिक्त, अतिशुद्ध, तीव्र; gen. by सु-अति-pr. -IVELY, *adv.* अत्यंतं, सु-अति- pr., तीव्रं, बलवत्; *See* above.

EXCEL, *v. t.* अतिशी 2 A, दूरी-अधः-अधरी-कृ 8 U, विशिष् c.; अतिरिच्-विशिष् pass. (with abl. of person); अतिक्रम् 1 U, 4 P, अति-इ 2 P; oft. by जि 1 P, अभि-परा-भू 1 P, तिरस्कृ, तिरंकृ, मर्यादीकृ 2 P, प्रत्यादिश् 6 P. -EXCEL, *s.* विशिष्टता, उत्कर्षः, प्रकर्षः, आतिशयः, भद्रता, उत्तमता, संपद् *f.*, 'e. of beauty' रूपसंपद्. 2 गुणोत्कर्षः, गुणविशिष्टता-प्रकर्षः. 3 गुणः, गुणवत्ता, परभागः, उत्कृष्टगुणः. -LENCY, *s.* उत्कर्षः, &c. 2 देवः, महाराजः-भागः. -LENT, *a.* विशिष्ट, उत्कृष्ट, उत्तम, श्रेष्ठ, परम, अग्र्य, वरेण्य, प्रशस्यतम, प्रवर, गुणवत्, सारवत्, गुणोपेत; oft. by वर- विशेष-in comp., and by words like ऋषभः, पुंगवः, व्याघ्रः, सिंहः, शार्दूलः, इंद्रः, प्रकांडः, उद्वः, तल्लजः, मतल्लिका, मचर्चिका, in comp.; पात्रविशेषः 'e. receptacle'; 'e. cow' गोमतल्लिका, गोतल्लजः, गवोद्वः, गोप्रकांडः, &c.; 'e. man' पुरुषर्षभः, पुरुषसिंहः, &c. -LENTLY, *adv.* सुष्ठु, उत्तमं, सु pr.

EXCEPT, *v. t.* वृज् 10, परिवृज्, अप-वि-हृ 3 P, त्यज् 1 P, अपास् 4 U, मुच् 6 P. 2 व्यावृत् c. (a rule &c.), संकुच् 1 P or c. -*prep.*, -ING, वर्जयित्वा, विहाय, मुक्त्वा, अंतरा-अंतरेण (with acc.), विना (with acc., instr., and abl.), ऋते (with abl.); oft. by वर्ज, व्यतिरिक्त in comp.; गौतमीवर्जमितरा निष्क्रांताः (S. 4). 2 यदि न. -ION, *s.* वर्जनं, विवर्जनं, हानं, त्यागः, अपासनं; with the e. of; *See* (*prep.*) above. 2 अपवादः, व्यभिचारः; 'rules have e.s' उत्सर्गाः सापवादाः; 'as general rules are limited (in scope) by e. s' अपवादैरिवोत्सर्गाः कृतव्यावृत्तयः (K. II. 27); 'that saying has no e. s' अव्यभिचारि तद्वचः (K. v. 36), इति लोकवादः न विसंवादमासादयति (Mallinātha); 'counter-e.' प्रतिप्रसवः, (तृष्णकाभ्यां कर्तरीत्यस्य प्रतिप्रसवः S. K.). 3 वर्जनीयं, वर्ज्यं. 4 दोषः, बाधः-धा, अपवादः; 'take e.' दोषं ग्रह् 9 P, (नाथ दोषं ग्रहीष्यति कुलपतिः S. 3); *See* OBJECT. -IONABLE, *a.* बाध्य, परिहरणीय, वर्ज्य. -IONAL, *a.* असाधारण (णी *f.*), असामान्य, अपवादभूत, अलौकिक (की *f.*); 'e.-ly sharp' अनन्यसाधारणं पटुः.

EXCERPT, *v. t.* उद्-हृ 1 P, निर्हृ, संकल् 10 (कलयति); 'e. passages' चूर्णिकृ 8 U. -ION, *s.* उद्धारः, उद्धृतभागः, निर्हारः; चूर्णिः.

EXCHANGE, *v. t.* वि-,नि-मे 1 A, प्रतिदा 1 P, 3 U, (तिलेभ्यः प्रतियच्छति माषान्), प्रतिपण् 1 A, व्यति-हृ 1 P, परिवृत् c.; 'e. civilities' सत्कारविनिमयं कृ; 'by e. ing clothes' वेषपरिवर्तनेन-व्यतिहारेण; अन्योन्यसंभिन्नदृशौ (Mal. 1) 'who e. ed glances with each other'. -*s.* विनिमयः, परि-(री)वर्तः, परिवृत्ति *f.*, परिवर्तनं, नैमेयः, नि(वि)मयः, परिदानं, प्रतिदानं-पणनं, व्यतिहारः; oft. by अन्योन्य or प्रति in comp.; 'e. of favours' अन्योन्योपकारः; 'e. of looks' अन्योन्यदृष्टिपातः, परस्परावलोकनं [illegible]

t. e. of blows' प्रतिघातः ; 'in e. for' विनिमयेन, व्यतिहारेण, प्रतिदानेन. 2 भाण्ड-द्रव्य-विनिमयः. 3 श्रेष्ठित्वम्.

EXCHEQUER, s. राजधनागारं, राजस्वकोषः ; 'chancellor of the e.' कोषाधीशः, कोषवेक्षकः.

EXCISE, v. t. राजदेयकरं-शुल्कं-निरूप् 10 or निर्धृ 10 or स्था c. (स्थापयति). —s. राजस्वं, करः, शुल्कं. —MAN, s. करनिरूपकः, शुल्काधिकारिन् m., कराध्यक्षः, शुल्कग्राहः.

EXCISION, s. उच्छेदः, कर्तनं, उत्पाटनं, उद्धरणं, विनाशः.

EXCITE, v. t. उत्तिज् c., प्रकुप् c., सं-वि-क्षुभ् c., उत्-सं-तप् c., उद्-दीप् c., उत्सह् 10, उत्था c. (उत्थापयति), प्रोत्सह् c., प्रचुद् 10, वृध् c., प्रवृत् c., संधुक्ष् 10 (feelings &c.). 2 जन् c. (जनयति), उत्पद् c., प्रबुध् c.; 'my curiosity is the more e. ed' इदमधिकतरमुपजनितं मे कौतुकं (Ka. 134); 'with anger e. ed' संजातामर्षं, उद्दीपितकोपं; oft. by dat. with or without प्र ; 'his speech e.ed laughter' तद्वचो हासाय बभूव ; See LEAD to. —ABLE, a. कोपन, उत्तेजनीय, सुलभकोप, क्रोधिल, शीघ्रकोपिन्. —ATION, —MENT, s. उत्तेजनं, उत्पापः, उत्थापनं, प्रकोपः, उद्दीपनं, संतापः-पनं, सं-वि-क्षोभः, संरंभः, चित्तोद्वेगः, चित्तोत्थापः, मनस्तापः, कोपोद्दीपनं. —ED, a. संरब्ध, प्रकोपित, क्षुब्ध, उत्तेजित, जातराष, इद्धमन्यु, संतप्त ; सं-वि-क्षोभित ; 'in an e. mood' क्रोधावेशेन ; रोषवशं गत. 2 उत्पन्न, जात. जनित. —ER, s. उद्दीपकः, उत्तेजकः, संक्षोभकः.

EXCLAIM, v. i. आ-उत्-क्रुश् 1 P, उच्चैः घुष् 10, तारस्वरेण वद् 1 P, आ-रद् 1 P, उच्चैः उदीर् c. —EXCLAMATION, s. उत्क्रोशः, आरटनं, घोषणं-णा, उच्चैः स्वरः, उद्गारः ; 'e. of joy' हर्षोन्नादनं, हर्षोद्गारः.

EXCLUDE, v. t. नि-प्रति-षिध् 1 P, नि-अव-रुध् 7 U, नि-यु c., व्या-वृत् c., (तृशब्दः पूर्वपक्षं व्यावर्तयति S. B.), बाध् 1 A, निरस् 4 U. 2 बहिष्कृ 8 U, निःसृ c., निष्कस् c., निराकृ, अपानुद् 6 P, व्यतिरिच् 7 P or c. 3 वृज् 10, त्यज् 1 P, वि-अप-हा 3 P, मुच् 6 P, अपास् 4 U. —EXCLUSION, s. निषेधः, व्यावर्तनं, व्यावृत्ति f., व्यातिरेकः, बाधः-धनं. 2 निराकरणं, निःसारणं. 3 वर्जनं, व्युदासः, हानं ; 'to the e. of' विहाय, मुक्त्वा, अतिक्रम्य, उज्झित्वा. —EXCLUSIVE, a. व्यावर्तक, निषेधक, निवारक, बाधक. 2 अनन्यसाधारण (णी f.); अनन्यसामान्य, अनन्यभुक्त ; 'e. of' विहाय, वर्जयित्वा, मुक्त्वा, हित्वा, रहित-हीन-in comp.; See EXCEPT. —LY, adv. अनन्यसाधारणं, केवलं, अन्यव्यतिरेकेण ; 'I am e. thy servant' अहं तवानन्यसाधारणो दासः (M. 4). —NESS, s. अनन्यसामान्या भुक्तिः.

EXCOGITATE, v. t. चिन्त् 10, परिकृप् c.; See CONSIDER. —ION, s. चिंतनं, परिकल्पनं.

EXCOMMUNICATE, v. t. (समाजात्) बहिष्कृ 8 U, निराकृ, अपास् 4 U, भ्रंश् c., च्यु c., अपाङ्क्तीकृ; 'one e. ed' अपाङ्क्तेयः, बहिष्कृतः. —ION, s. बहिष्कारः, अपाङ्क्तेयत्वं.

EXCORIATE, v. t. त्वचं-चर्म-उल्लिख् 6 P or निघृष् 1 P or कृन् 6 P or छिद् 7 P, निस्त्वचीकृ 8 U. —ION, s. त्वक्छेदः-भेदः, चर्मक्षतिं f.-विदारणं-उल्लिखनं-पीडनं.

EXCORTICATION, s. निस्त्वचीकरणं.

EXCRESCENCE, s. गंडः, विस्फोटः, शोफः ; 'fleshy e.' अधिमांसं, मांसपिंडः.

EXCRETE, v. t. उत्सृज् 6 P, उच्चर् c., निःसृ c.; मलोत्सर्गं कृ 8 U. —ION, —EXCREMENT, s. विष्ठा, उच्चारः, शकृत् n., पुरीषं, गूथं; See DUNG; 'e. and urine' विण्मूत्रं, मूत्रपुरीषं. —AL, a. उच्चरित, अवस्कृत, उत्सृष्ट.

EXCRUCIATE, v. t. अत्यंतं व्यथ् c. (व्यथयति) or बाध् 1 A or संतप् 1 P or c., प्र-पीड् 9 P. —ING, a. मर्मच्छिद्-स्पृश्, अरुंतुद, प्रमाथिन्, अतिव्यथाकर (री f.), अतितीव्र, नितांतकठिन. —ION, s. तीव्रतिग्म-वेदना, अतियातना.

EXCULPATE, v. t. (दोषात्-अपराधात्) वि-परि-शुध् c.; वि-मुच् 6 P or c., निर्दोषीकृ 8 U, दोषं परि-प्रमृज् 2 P or क्षल् 10; 'he e. ed himself' आत्मानं दोषमुक्तं चकार. —ED, a. निर्दोष, निरपराध, दोषमुक्त, विशुद्ध. —ION, s. दोषशोधनं-मुक्ति f., अपराधक्षालनं-मार्जनं, &c. —ORY, a. दोषप्रमार्जक-मोचक, दोषक्षालन (नी f.).

EXCURSION, s. पर्यटनं, भ्रमणं, विहारः, विहरणं. 2 पथत्यागः-भ्रंशः, मार्गोत्क्रमः, विचलनं, उत्क्रमः. 3 अभिद्रवः, आक्रमः, आपातः.

EXCURSIVE, a. भ्रमणशील, त्यक्तमार्गं. 2 सर्वतोधाविन्.

EXCUSE, v. t. क्षम् 1 A, मृष् 1 P, 10, सह् 1 A, तिज् desid. (तितिक्षते). 2 दोषाद् मुच् c. or शुध् ; 'e. a person' दोष-अपराधं-क्षम् (with gen.); 'e. a fine' दंडं अवसृज् 6 P or मुच् 6 P; 'e. oneself' अप-व्यप-दिश् 6 P, उत्तरं दा 3 U, अपदेशं-छद्म-कृ 8 U, आत्मानं विमुच् c.; 'e. ing myself on the ground of head-ache' शिरःशूलस्पर्शनमपदिशन् (D. K. II. 2); 'e. me' प्रसीदतु भवान्. —s. अप-व्यप-देशः, उत्तरं, निमित्तं, छलं, छद्मन् n., विमोचनहेतुः. 2 दोषक्षालनं, पापशोधनं, क्षमाप्रार्थना; oft. by हेतु ; 'under the e. of illness' अस्वास्थ्यहेतोः, अनामयापदेशेन. —LESS, a. निरुत्तर. 2 अक्षंतव्य.

EXECRATE, v. t. शप् 1 U, आक्रुश् 1 P, गर्ह् 1,

10 Ā, अभिशंस् 1 P. -ION, *s.* शापः, आक्रोशः, अभिशंसनं. -EXECRABLE, *a.* गर्ह्य, गर्हणीय, अधम, नीच; *See* ACCURSED.

EXECUTE, *v. t.* अनुष्ठा 1 P, सं-निः-पद् c., कृ 8 U, वि-धा 3 U, आ-चर् 1 P, निर्वह् c., साध् 5 P or c., निर्वृत् c.; 'e. thy business' स्वनियोगमशून्यं कुरु. **2** हन् 2 P, व्या-पद् c.. प्राणदंड-देहदंड-आदिश् 6 P, दंड् 10; 'he was ordered to be e.-ed' तस्य वध-देह-दंड आदिष्टः, वध्यतामसौ इति आदिष्टं. -ION, *s.* अनुष्ठानं, आचरणं, विधानं, करणं, संपादन, निष्पत्ति-सिद्धि *f.*, निर्वाहः-हणं. **2** घातः, हननं, हत्या, व्यापादनं, वधः; 'place of e.' वध्यस्थानं-भूमि *f.*; 'sentence of e.' प्राणदंडः, उत्तमसाहसं. -IONER, *s.* घातकः, मातंगः, दंडपाशिकः, वध्यापुरुषः. वधाधिकृतः. -IVE, *a.* निर्वाहक, निष्पादक, विधायक, कार्यक्षम, अनुष्ठानेयुक्त, कार्यनिर्वाहक. -OR, *s.* मृतलेखाधिकारिन् *m.*, (मृतस्य) उत्तरसाधकः.

EXEGESIS, *s.* विवरणं, व्याख्यानं, व्याकरणं. -EXEGETICAL, *a.* विवरणकृत्, प्रकाशक.

EXEMPT, *v. t.* मुच् 6 P or c., मोक्ष् 10, वि-अव-सृज् 6 P, वृज् 1 P, 10; 'e. from fine' दंडादानं क्षम् 1 A; 'e. from taxes' करादानं अनुज्ञा 9 U. -*a.*, -ED, *a.* मुक्त, वर्जित, हीन, रहित; oft. by अ, निर्, वि, वीत, गत, in comp.; 'e. from pride' गतावलेप, वीतदर्प, अगर्व, &c.; 'e. from avarice' निर्लोभि, वितृष्ण, लोभरहित, &c. **2** अनायत्त, अवश. -ION, *s.* मुक्तिः *f.*, मोक्षः, वर्जनं, रहितत्वं, मोचनं, अभावः; oft. by अ or अन् in comp.; अनवलेपः 'e. from pride,' दंडाभावः 'e. from fine,' &c.

EXEQUIES, *See* OBSEQUIES.

EXERCISE, *s.* प्रयोगः, व्यापारः. अनुष्ठान, आचरणं. **2** अभ्यासः, निषेवणं, अभ्यस्तता, आवृत्ति *f.*, चर्या. **3** व्यवसायः, उद्यमः, चेष्टा, उद्योगः, व्यापारः; 'bodily e.' व्यायामः, परिश्रमः; 'materials for taking e.' व्यायामोपकरणानि; 'military e.' रणशिक्षा, शस्त्राभ्यासः, युद्धाभ्यासः; 'shooting e.' शराभ्यासः, उपासनं; 'usual e.' नित्यकृत्यं. -*v. t.* उप-प्र-युज् 7 A, 10, व्या-यम् c. **2** अभ्यस् 4 U, (सदा) आचर् 1 P, अनुष्ठा 1 P, आ-नि-सेव् 1 A, अनु-परि-शील् 10; आ-यस् c., व्या-यम् c.; 'e. soldiers' शिक्ष् c., रणशिक्षां दा 3 U; 'e. oneself' व्यायम् 1 P, उद्यम्, व्यव-सो 4 P, चेष्ट् 1 A; व्यायामं-शरीरश्रमं-कृ 8 U. -*v. i.* परिश्रमं-व्यायामं-कृ: 'e. ed with an iron club' अयोदंडेन श्रममकरोत् (Ka. 76).

EXERT, *v. t.* नि-प्र-उप-युज् 7 A, 10, व्या-वृ c., प्रवृत् c.; 'e. oneself' प्रयत् 1 A, चेष्ट् 1 A, उद्यम् 1 P, व्यव-सो 4 P, प्रवृत् 1 A; 'e. one's utmost' यावच्छक्यं प्रयत्. -ION, *s.* व्यवसायः, उत्साहः, चेष्टा, व्यापारः, चेष्टितं, कार्ययोगः, यत्नः, उद्यमः, उद्योगः; *See* ATTEMPT. **2** आयासः, श्रमः, परिश्रमः, कायक्लेशः-आयासः.

EXFOLIATE, *v. i.* परिपुट् 6 P, विगल् 1 P.

EXHALE, *v. t.* उद्-गृ 6 P, उच्छ्वस् 2 P, निश्वस्, उद्-क्षिप् 6 P, उद्गम् 1 P, निर्मुच् 6 P, उद्गॄ c., निर्गम् c. (गमयति), प्र-वा 2 P, निष्कृ 6 P, उद्गम् c. **2** (As water) आ-पा 1 P, उच्छुष् c., आचम् 1 P, बाष्पीकृ 8 U; 'trees e. ing fragrance' परिमलीद्गारिणः वृक्षाः. -ATION, *s.* उद्गारः, निश्वासः, उच्छ्वासः, उच्छ्वसितं, निर्गमः, उद्गमनं, उत्क्षेपः. **2** बाष्पः, धूमिका, धूमः. **3** बाष्पोद्गमनं, धूमोद्गारः.

EXHAUST, *v. t.* उत्-सं-शुष् c., आ-पा 1 P. **2** शून्यीकृ 8 U, निःशेषीकृ, सर्वसारं हृ 1 P, विरिच् 7 P or c. **3** क्षि 1 P, क्षै c. (क्षपयति), नश् c., व्यर्थ-क्षयं-कृ, अप-चि 5 U; 'his wealth was e. ed in performing meritorious deeds' धर्मकर्माणि कुर्वतस्तस्य धनक्षयः संजातः (P. v. 1); 'who had e.-ed his whole treasure in gifts (charity)' निःशेषविधापितकोषजातं (R. v. 1). **4** खिद् c., क्रम् c. (क्रमयति), श्रम् c., अव-सद् c., ग्लै c. (ग्ला-ग्ल-पयति); 'I feel e. ed' क्लांतोस्मि, अवसन्नानि मे गात्राणि. -ED, *a.* शोषित, विरिक्त, निःशेषीकृत. **2** क्षीण, अपचित. **3** श्रांत, क्लांत, खिन्न, अवसन्न, ग्लान. -ION, *s.* शोषणं. **2** क्षयः, परिक्षयः, नाशः, व्ययः; अपचयः. **3** खेदः, श्रमः, क्रमः, ग्लानि *f.*, अवसादः, श्रांति-क्लांति-*f.* -LESS, *a.* अक्षय, अनाश्य, अक्षय्य, अविनाशिन्.

EXHIBIT, *v. t.* प्र-दृश् c., प्रकाश् c., निर्दिश् 6 P, प्रकटीकृ 8 U, प्रकटयति (D.), व्यञ्ज् 7 P or c., व्यक्तीकृ, आविष्कृ, प्र-सृ c. **2** (On the stage) प्रयुज् 7 A, 10, अभिनी 1 P; *See* ACT. -ER, *s.* प्रदर्शकः, प्रकाशकः. -ION, *s.* प्रदर्शनं, व्यंजनं, आविष्करणं, &c. **2** वृत्तिसाधनं, वृत्ति *f.* **3** अभिनयः, आविर्भावः. -IONER, *s.* वृत्तिभुज *m.*

EXHILARATE, -ION, *See* DELIGHT.

EXHORT, *v. t.* सोत्सुकं याच् 1 A or प्रार्थ् 10 A, उप-दिश् 6 P, अनु-शास् 2 P, प्र-सं-बुध् c. **2** आ-समा-श्वस् c., प्रोत्सह् c., प्र-चुद् 10, प्रवृत् c., उद्युज् 10. -ATION, *s.* उपदेशः, उपदेशवचनं, सोत्सुकप्रार्थना, प्रबोधनवाक्यं. **2** प्रोत्साहनं, प्रेरणं, प्रचोदनं, उत्तेजनं, प्रबोधनं, समाश्वासनं, प्रवर्तनं. -ATIVE, -ATORY, *a.* प्रबोधक, उपदेशक. -ER, *s.* उपदेशकः, प्रबोधकः.

EXHUME, *v. t.* (शवं) उत्खन् 1 P. -ATION, *s.* उत्खननं.

EXIGENCE, -CY, *s.* आवश्यकत्वं, अपरिहार्यत्वं, अवश्यप्रयोजनं-कार्यं. **2** अवसरः, प्रस्तावः, समयः, कालः. **3** आपद्-विपद् *f.*, संकट-कष्ट-समयः-कालः, विपत्समयः, कृच्छ्रं, कष्टः-ष्टं, दुर्गति *f.*

EXILE, *v. t.* प्र-निर्-वि-वस् c., प्र-नश् c.; (स्वदेशात्)

निःसृ c., अपाकृ 8 U, बहिष्कृ. —s. नि-प्र-वासः-सनं, प्रवाजनं. 2 प्रव्रजनं, दूरसंस्थितिः f., विवासनावधिः; 'to go into e.' प्रव्रज् 1 P.

Exist, v. i. भू 1 P, वृत् 1 A, विद् 4 A, अस् 2 P; जन् 4 A, उत्पद् 4 A. 2 जीव् 1 P, प्रण् 2 P. 3 स्था 1 P, प्रवृत्, आस् 2 A. —ence, s. अस्तित्वं, सत्ता, सत्त्वं, अवस्था, भावः, सद्भावः, संभवः, वर्तनं. 2 जीवितं, जीवनं, वृत्तिः f., प्राण-असु-धारणं; 'worldly e.' संसारः, भवः. —ent, a. सत्, विद्यमान, वर्तमान, जीवित्; 'self-e.' आत्मभूः, स्वयंभूः.

Exit, s. निष्क्रमः-मणं, निर्याणं; अपक्रमः, अपगमः, निर्गमः. 2 (In dramas) निष्क्रांत a.; 'exeunt omnes' निष्क्रांताः सर्वे.

Exonerate, v. t. Exculpate, q. v. 2 भारं अपनी 1 P or अवनु c.

Exorable, a. अनुनेय, प्रसादनीय, सांत्वनीय; 'not e.' निरनुक्रोश.

Exorbitant, a. अमर्याद, अमित, अपरिमित, अतिरिक्त, सातिशय, अतिमात्र, अत्यधिक; See Excessive. —Exhorbitance,—cy, s. अतिरेकः, मर्यादातिक्रमः, उद्रेकः, आधिक्यं.

Exorcise, v. t. (भूतं) दूरीकृ 8 U, निःसृ c., भूताविशाद् मुच् c. —Exorcism, s. भूतापसारणं.

Exordium, s. प्रस्तावः, वाङ्मुखं, आमुखं, मुखबंधः, उपोद्घातः.

Exoteric, a. साधारण (णी f.).

Exotic, a. विदेशीय, विदेशज, अन्यदेशोद्भव, वैदेशिक (की f.).

Expand, v. t. विस्तृ c., प्र-वृध् c., वि-तन् 8 U, प्र-वि-सृ c.; 'e. itself' व्याप् 5 P, व्यश् 5 A. 2 वि-वृ 5 U, प्र-वि-काश् c., प्रपंचयति (D.). 3 (As flowers &c.) विकाश् c., वि-कस् c., भिद् 7 P or c., स्फुट् c.; वि-स्फुर् c. (स्फारयति). —v. i. वि-प्र-सृ 1 P, प्र-,वृध् 1 A, pass. of roots above. 2 विकस् 1 P, स्फुट् 6 P, फुल् 1 P, भिद् pass.; See Blossom; विस्फुर् 6 P; 'whose boyhood gradually e. ed into youth (manhood)' क्रमाद्यौवनाभिव्यक्तशैशवः (R. III. 32); 'with his eyes e. ed through joy' हर्षोत्फुल्लनयनः. 3 विजृंभ् 1 A. —Expanse, s. प्र-वि-तानः, प्रसरः, विस्तारः, आभोगः, (आभोगस्तपोवनस्य S 1); 'in the e. of ocean' विस्तीर्णे सागरे; 'in this e. of universe' महति जगज्जाले. —ion, s. विस्तारः, प्रसारः, वितति f., प्रसरः, विस्तरः, प्रसरणं, व्याप्तिः f. 2 प्रपंचः, विवरणं. —ive, a. व्यापक, वि-प्र-सारिन्, विस्तारिन्; विश्वत्वर, विश्वंभर.

Expatiate, v. i. Enlarge (upon), q. v. 2 परिश्रम् 1, 4 P.

Expatriate, See Exile.

Expect, v. t. अपेक्ष् 1 A, उद्-ईक्ष् 1 P, आशंस् 1 A, उदीक्ष्; प्रति-पा c. (पालयति); प्रति-इ 2 P, प्रतीक्ष् (wait for); 'I am e.ing my brother' मम भ्रातुरागमनं प्रतीक्षे; वर्त्म अवलोकयामि (Ka. 220); सखि एवन्ती प्रतीच्छति (V. 2). —ant, a. अपेक्षिन्, अपेक्षक, प्रत्याशिन्, आकांक्षिन्, सप्रत्याश. —ation, s. अपेक्षा, आशा, प्रत्याशा, उदीक्षणं, आशंसा, प्रतीच्छा, प्रतीक्षा-क्षणं. —ed, a. अपेक्षितं, आकांक्षितं, समर्थितं, तर्कितं; 'un-e. call' अतर्कितावाहनं.

Expectorate, v. t. (श्लेष्माणं) उद्-गृ 6 P or निःसृ c., निष्ठिव् 1, 4 P. —ion, s. निष्ठ्यूति f., निष्ठीवनं, श्लेष्मोद्गारः.

Expedient, a. युक्त, उचित, योग्य, उपपन्न, उपयुक्त, हित, हितावह. —s. उपायः, कल्पः, साधनं, गतिः f., उपक्रमः, उपकरणं, योगः, गुणः; षड् गुणाः 'six e.s.' —ly, adv. युक्तं, उपपन्नं, यथोचितं. —Expedience,—ce, s. औचित्यं, युक्तता, उपपत्तिः f., उपयोगः, हितावहत्वं.

Expedite, v. t. त्वर् c. (त्वरयति), शीघ्रं संपद् c. or प्रवृत् c. or साध् c. or वि-धा 3 U. 2 शीघ्रं प्रेष् c. or प्रेर् c. —ion, s. त्वरा, शीघ्रता, क्षिप्रता, जवः, वेगः, अविलंबः, शीघ्रनिर्वाहणं, क्षिप्रकारित्वं. 2 यात्रा, प्रयाणं, प्रस्थानं, यानं, अभिषेणनं, अवपातः; 'to send an e.' सैन्यं प्रस्था c. (स्थापयति). 3 Enterprize, q. v. —ious, a. त्वरित, शीघ्र-क्षिप्र-कारिन्, सत्वर, अदीर्घसूत्र, अविलंबित, द्रुत, लघु. —iously, adv. शीघ्रं, सत्वरं, द्रुतं, &c.

Expel, v. t. Exile, q. v. 2 निष्कस् c., बहिष्कृ 8 U, अपा-निरा-कृ, निःसृ c., अपध्वंस् c., निर्धू 5, 9 U; See Drive, Dispel. 3 (From society) अपपात्रयति (D.), अपांक्तीकृ 8 U. —led, a. निष्कासित, अवकृष्ट, अपध्वस्त, निर्धूत, धिक्कृत. —Expulsion, s. अपसारणं, निष्कासनं, निराकरणं; विवासनं, प्रव्राजनं.

Expend, v. t. व्यय् 10 (व्यययति), उद्-विसृज् 6 P, त्यज् 1 P, विनि-युज् 7 A, 10, प्र-उपयुज्. 2 क्षि 1 P, क्षै c. (क्षपयति), अप-चि 5 U, क्षयं-व्ययं-कृ 8 U. —Expense, Expenditure, s. व्ययः, विसर्गः, उत्सर्गः, त्यागः, विनियोगः; धनत्यागः—व्ययः, अर्थोत्सर्गः. 2 क्षयः, अपचयः, अपहारः. —ive, a. बहुमूल्य, महार्घ, बहुव्ययः; बहुव्ययसाध्य, महामूल्य. —ively, adv. बहुव्ययेन, बहुमूल्येन.

Experience, v. t. अनुभू 1 P, उप-भुज् 7 U, आश् 5 A, प्राप् 5 P, आसद् c., ज्ञा 9 U, विद् 2 P, परीक्ष् 1 A. 2 Suffer, q. v. —s. अनुभवः, परीक्षणं, वेदनं, प्रतीतिः f., ज्ञानं, बोधः, भोगः, भुक्तिः f. 2 बहुदर्शित्वं, अनुभवजन्यं ज्ञानं, बुद्धिपरिपाकः. 3 अभ्यासः, आचरणं. —ed, a. बहुदर्शिन्-, अनुभविन् (f. नी), बहुदृश्वन् (f. री); परिणतमनस्, प्रबुद्धबुद्धि, बहुज्ञ, बहुगण;

'I am an e. teacher (of the art)' दत्त-प्रयोगोहम् (M. 1). —EXPERIMENT, *s.* प्रयोगः, परीक्षा-क्षणं, अनुभवः. —*v. t.* परीक्ष् 1 A, अनुभू 1 P; प्रयुज् 7 A, 10. —AL, *a.* अनुभवलब्ध-प्रात, अनुभूतिमूल. 2 परीक्षक, परीक्षार्थं कृत. —ALLY, *adv.* परीक्षणार्थं, अनुभूत्यर्थं. 2 परीक्षापूर्वं, अनुभवेन-भवात्. —ER,—ALIST, *s.* परीक्षकः.

EXPERT, *a.* दक्ष, प्रवीण, पटु, विज्ञ, निपुण, चतुर; विद्-ज्ञ in comp.; विचक्षण, विशारद; *See* SKILFUL. —LY, *adv.* सपाटवं, सकौशलं. —NESS, *s.* पाटवं, कौशलं, नैपुण्यं, दक्षता, लाघवं, विज्ञता, विदग्धता, &c.

EXPIATE, *v. t.* वि-सं-परि-शुध् c., निष्कृ 8 U, निराकृ, शम् c. (शमयति), अपानुद् 6 P, प्रमृज् 2 P or c., प्रायश्चित्तेन पू 9 U or मुच् c. or शुध् c., पापनिष्कृतिं कृ. —ION, *s.* शोधनं, पावनं; प्रायश्चित्तं, पापनिष्कृति *f.* -मार्जनं-विशुद्धि *f.* -क्षालनं-मार्जनं, शुद्धिः. —ORY, *a.* पावन, पापनाशक-शन, अघमर्षण (णी *f.*), विशोधक, पापघ्न (घ्नी *f.*).

EXPIRE, *v. t.* निश्वस् 2 P, श्वासं उत्क्षिप् 6 P or निर्गम् c. (गमयति). 2 उद्-गू 6 P; *See* EXHALE. —*v. i.* प्रणान् हा 3 P or त्यज् 1 P, मृ 6 A, उत्क्रांतवायु *a.* भू, उपरम् 1 P, संस्था 1 A; *See* DIE. 2 समाप् pass., अवसो pass., निवृत् 1 A, विरम्, अवसद् 1 P, क्षि pass. —ATION, —Y, *s.* प्राणत्यागः; निश्वासः-सनं, उपरमः. 2 निवृत्ति *f.*, समाप्ति *f.*, विरामः, अत्ययः, क्षयः, अंतः, अवसानं, शेषः, विच्छेदः. —ING, *a.* कंठगतप्राण, आसन्नमृत्यु, मुमूर्षु.

EXPLAIN, *v. t.* व्या-ख्या 2 P, व्याचक्ष् 2 A, निरूप् 10, विवृ 5 U, द्युत् c., व्यंज् 7 P or c., स्फुटी-विशदी-कृ 8 U, व्या-कृ, प्र-वच् 2 P, प्रकाश् c., स्पष्टीकृ, प्रबुध् c. 2 वर्ण् 10, कथ् 10, प्रवद् 1 P, प्रकृत् 10. —ER, व्याख्यातृ *m.*, प्रकाशकः, प्रवक्तृ *m.*, वादिन् *m.* —EXPLANATION, *s.* व्याख्यानं, विवरणं, व्याकरणं, प्रकाशनं, स्पष्टीकरणं, विवृति *f.*, निरूपणं. 2 समाधानं, शोधनं. —EXPLANATORY, *a.* अर्थव्यंजक-द्योतक-प्रकाशक, वाचक, विवरणकृत्.

EXPLETIVE, *s.* पादपूरणं, वाक्यालंकारः.

EXPLICATE, *See* EXPLAIN.

EXPLICIT, *a.* स्पष्ट, व्यक्त, परिस्फुट, भिन्नार्थ, सुप्रकाश. —LY, *adv.* व्यक्तं, स्फुटं, स्पष्टं.

EXPLODE, *v. i.* महाशब्देन विद्-विभिद् pass., महाशब्दपूर्वं स्फुट् 6 P, or विदल् 1 P. —*v. t.* कर्कशध्वनिस्वनेन निंद् 1 P or असंतोषं दृश् c. or सूच् 10. 2 निरस् 4 U, खंड् 10, विलुप् c., अप्र-कृ 8 U. —EXPLOSION, *s.* सशब्दभंगः-स्फोटनं, महाशब्दपूर्वं विदारणं. —EXPLOSIVE, *a.* क्षिप्रदाह्य, विदारणक्षील.

EXPLOIT, *s.* पराक्रमः, अद्भुतं कर्म, आश्चर्य-अद्भुत-कर्म, विक्रमः, विक्रीडितं.

EXPLORE, *v. t.* अन्विष् 4 P, निरूप् 10, द्युत् 10 A, निरीक्ष् 1 A, अनुस्-धा 3 U, मार्ग् 10. —ATION, *s.* अन्वेषणं, निरूपणं, मार्गणं, जिज्ञासा. —ER, *s.* अन्वेष्टृ *m.*

EXPORT, *v. t.* विदेशं नी 1 P or प्र-हि 5 P, बहिर्देशं प्रेर् c. or वह् 1 P or c. —*s.* निर्यातं द्रव्य-भांडं. —ATION, *s.* विदेशनयनं, निर्गमनं.

EXPOSE, *v. t.* (lit.) उच्छद् 10, अपा-वृ 5 U, विवृ-कृ 8 U, प्रकाश् c., प्रदृश् c. 2 व्यक्तीकृ, प्रत्यक्षीकृ, आविष्कृ, सत्यस्वरूपं आविष्कृ; *See* EXPLAIN also. 3 (Make liable) पदं नी 1 P or कृ 8 U, स्थानं-आस्पदं कृ; 'e. ed yourself to trouble' भवतात्मा क्लेशस्य पदमुपनीतः (S. 1); 'e. ed to the charge of cowardice' कातर इति वाच्यतां गतः-,दौष्प्रधर्ष जातः; 'e. ed to hundreds of calamities' व्यसनशतशरव्यतामुपगताः (Ka. 107); 'e. to contempt' तिरस्कारस्थानं कृ; 'e. to the sun' आतपे दा 3 U or शुष् c., आतपाय उज्झ् 6 P; 'e. for sale' क्रयार्थं प्र-सृ c. —ED, *a.* अनाच्छादित, अनावृत, &c.; 'e. for sale' क्रय्य. —ITION, *s.* विवरणं, व्याख्यानं, प्रकाशनं, स्पष्टीकरणं. —ITOR, *s.* विवृतिकारः, वृत्तिकारः, व्याख्यातृ *m.*, अर्थप्रकाशकः. —URE, *s.* विवृति *f.*, प्रदर्शनं, प्रकाशनं, व्यक्तीकरणं, स्वरूपाविष्करणं; 'e. to heat' आतपलंघनं (S. 3).

EXPOSTULATE, *v. i.* प्रत्यादिश् 6 P, (अपथात्) व्यावृत् c., निवारयितुं-नियंतुं उद्यम् 1 P or प्रयत् 1 A; *See* DISSUADE. —ION, *s.* प्रत्यादेशः, निवर्तनवाक्यं, निषेधः, निवारणं, प्रबोधवचनं.

EXPOUND, —ER, *See* EXPLAIN, —ER.

EXPRESS, *a.* व्यक्त, स्फुट, परिस्फुट, सुप्रकाश, भिन्नार्थ, असंदिग्ध; 'in e. terms' भिन्नार्थं, स्पष्टं. 2 विशिष्ट. —*s.* (Messenger) जंघाकारिकः, जांघिकः. 2 जंघालः, अतिजवः, प्रजविन्-वेगिन् *m.*, जवनः, त्वरितः, तरस्विन् *m.* —*v. t.* व्यंज् 7 P or c., आविष्कृ 8 U, प्रदृश् c., सूच् 10, द्युत् c., प्रकटीकृ, निर्दिश् 6 P, लक्ष् 10, प्रकटयति (D.). 2 वच् 2 P, उच्चर् c., उदीर् c., कथ् 10, शंस् 1 P, वद् 1 P, उदाह् 1 P, व्याह्, आ-नि-विद् c., ख्या 2 P, प्रकाश् c., बुध् c., ज्ञा c. (ज्ञापयति), अभि-धा 3 U; 'e. oneself' मनोगतं शंस्, वाचं उदीर्; 'e. by gesticulation' नट् 10, निरूप् 10, सूच्, अभिनी 1 P. 3 निष्पीड् 10, निष्कृष् 1 P, निर्दुह् 2 U, निह् 1 P. —ION, *s.* व्यंजनं, प्रकाशनं, बोधनं, आ-नि-वेदनं, ज्ञापनं, आविष्करणं, कथनं, उदाहारः-हरणं, ख्यापनं. 2 निष्पीडनं, निष्कर्षणं. 3 वदनं, आस्यं; 'he had a smiling e.' हास्यवदन आसीत्; 'wore an angry e.' कुपित इव बभौ. 4 वचनं, उक्ति *f.*; वाक्यं, पदं, शब्दः, वचस् *n.*, वाच् *f.*; 'authoritative e.' आप्तवचनं, प्रमाणं. 5 रीति *f.*, मार्गः, पद्धति-सरणि *f.* —LY, *adv.* स्पष्टं, व्यक्तं, परिस्फुटं, भिन्नार्थं. —IVE, *a.* व्यंजक, आ-

वक, सूचक, द्योतक, अभिधायक, गमक, दर्शक. 2 सार्थ, साकूत, पूर्णार्थ, अर्थवत्. -IVELY, *adv.* सार्थ, साकूतं. 2 स्पष्टं, सुव्यक्तं, भिन्नार्थं, परिस्फुटं, व्यंजकतया. -IVENESS, *s.* व्यंजकत्वं, अर्थवत्ता, साकूतता.

EXPUGN, *v. t.* (दुर्ग) लंघ् 1 A, 10, वशीकृ 8 U, आक्रम् 1 U, 4 P, वि-जि 1 A.

EXPUNGE, *v. t.* वि-,लुप् c., व्या-अप-मृज् 2 P or c., व्यामृज् 6 P or c., उच्छिद् 7 P, विनश् c. -EXPUNCTION, *s.* वि-,लोपः, व्यामर्षः, उच्छेदः, नाशः.

EXPURGATE, *v. t.* पू 9 U, शुध् c, पवित्रीकृ 8 U. -ION, *s.* पावनं, शोधनं. -ORY, *a.* पावक-न.

EXQUISITE, *a.* अत्युत्तम; विशिष्ट, उत्कृष्ट, परम; *See* CHOICE; 'e. beauty' अतिमनोहरं-अतिरम्यं-लावण्यं; 'e. delight' परमानंदः. 2 सूक्ष्म. 3 तीक्ष्ण, तीव्र, उग्र (of pain). -LY, *adv.* परमं, उत्तमं, अति-परम- in comp. -NESS, *s.* विशिष्टता, उत्तमता, &c.

EXSICCATE, *v. t.* शुष् c., उच्छुष् c.; *See* DRY. -ION, *s.* उच्छोषणं, शोषः. -IVE, *a.* शोषक.

EXTANT, *a.* विद्यमान, उपलब्ध, वर्तमान.

EXTEMPORARY, -RANEOUS, *a.* तत्क्षणकृत, अचिंतितपूर्व, अयत्नकृत, अकल्पितपूर्व. 2 प्रस्तावोपयुक्त, समयोचित. -LY, -EXTEMPORE, *adv.* पूर्वचिंतां विना, अयत्नपूर्वं, पूर्वकल्पनां विना.

EXTEND, *v. t.* तन् 8 U, वि-प्र-°; विस्तृ-स्तॄ 5, 9 U or c., प्र-सृ c., आ-यम् 1 P, वृध् c., दीर्घीकृ 8 U, प्रथ् 10. 2 प्रदा 3 U, वितॄ 1 P. -*v. i.* वितन्-विस्तृ pass., व्याप् 5 P; प्र-सह् 1 P, आयम् pass., प्र-सृ-सृप् 1 P, प्रथ्-वृध् 1 A, वृत् 1 A; 'the age of man e. ed to 10,000 years' दशसहस्रवर्षायुषो नरा आसन्; 'e. as far as' ex. by आ with abl. or in comp.; 'whose sovereignty the earth e. ed as far as the sea' आसमुद्रक्षितीशानां (R. I. 5). -EXTENSION, *s.* विस्तारः, वितति *f.*, विस्तृति *f.*, आयामः, प्रसारणं, प्रसरः, व्याप्ति *f.*, विस्तीर्णता. 2 वृद्धि *f.*, प्रपंचः, विपुलता. -EXTENSIVE, *a.* विस्तीर्ण, विपुल, प्रचुर, विशाल, पृथु, आयत, असंबाध, महत्. 2 व्यापक, व्यापिन्. -LY, *adv.* बहुशः, प्रचुरं, अतीव, आत्तिमात्रं, बाहुल्येन, भूयसा. -NESS, *s.* विस्तारः, &c. -EXTENT, *s.* विस्तारः, आयामः, आभोगः, विशालता, आयति *f.*, परिणाहः. 2 परिमाणं, प्रमाणं; 'the city is 100 yojanas in e.' विस्तीर्णा योजनशतं (पुरी); 'to a great e.' अतिमात्रं, अतीव; 'to some e.' कियत्परिमाणेन, स्तोकं, ईषत्, मनाक्; 'to such e.' एतावत्, इयत्; 'to the fullest e.' सर्वांशेन, सर्वथा; 'to what e.' कियत्प्रमाणं, कियत्पर्यंतं.

EXTENUATE, *v. t.* Emaciate, q. v. 2 लघयति (D.), उन् 10, -हस् c., अल्पीकृ 8 U, लघूकृ, शम् c. (शमयति); अपह्नु 10, मृज् 2 P (a crime &c.). -ION, *s.* उपह्नवः, लघूकरणं. 2 पापमार्जनं-प्रक्षालनं.

EXTERIOR, *a.* बाह्य, बहिःस्थ, बहिर्भव; gen. ex. by बहिः-in comp. -*s.* बहिराकारः, बाह्याकारः, बाह्यरूपं. 2 बाह्यभागः, बहिर्देशः-भागः.

EXTERMINATE, -ION, *See* ERADICATE, -ION.

EXTERNAL, *a.* बाह्य, बहिर्भव, बहिःस्थित-वर्तिन्, बहिः in comp.; 'without e. aid' विना बाह्यसाधनं, बाह्योपाधिं विना. -LY, *adv.* बहिः, बाह्यतः.

EXTINGUISH, *v. t.* निर्वा c. (अपयति); प्र-उप-शम् c. (शमयति) (as thirst &c.). 2 वि-नश् c., वि-लुप् c., अव-उन्-सद् c., उच्छिद् 7 P. -ED, EXTINCT, *a.* शांत, निर्वापित, निर्वाण. 2 नष्ट, उच्छिन्न, लुप्त, निर्गत, क्षीण, अवसन्न, निवृत्त; 'his family became e.' स निर्वंशो जातः; 'almost e.' निर्वाणभूयिष्ठ; 'to become e.' शम् 4 P, निर्वा 2 P. -MENT, EXTINCTION, *s.* निर्वाणं, निर्वापणं. 2 उच्छेदः, विलोपः, विनाशः, संहारः, क्षयः; 'final e.' निर्वाणं; मोक्षः; 'e. of family' कुलोच्छेदः, निर्वंशता.

EXTIRPATE, *See* ERADICATE.

EXTOL, *v. t.* वर्ण् 10, कृत् 10, प्रशंस् 1 P, श्लाघ् 1 A, स्तु 2 U, प्र-वि-ख्या 2 P; *See* PRAISE. -LER, *s.* प्रशंसकः, स्तावकः.

EXTORT, *v. t.* बलात्-अन्यायेन आदा 3 A or ग्रह् 9 P, दा c. (दापयति), आहृ c., निष्कृष् 1 P, बाधित्वा ग्रह्; बाध् 10, उपपीड् 10. -ER, -IONER, *s.* बलेन परस्वापहारकः, बाधकः, औपधिकः, उपपीडकः, उपद्रविन् *m.* -ION, *s.* बलादादानं, अन्यायेन परस्वापहरणं, उपद्रवः, बाधः-धा, बलात्कारः, विप्रवः. 2 हठः, बलं; 'by e.' बलात्, अन्यायेन, प्रसभं, प्रसह्य.

EXTRA, *a.*, *s.* अधिक, अतिरिक्त, अति pr.; (in comp.) ex. by व्यतिरिक्त, भिन्न, अधिक, अतिरिक्त.

EXTRACT, *v. t.* निष्कृष् 1 P, आकृष्, निः-उद्-हृ 1 P, उद्-ग्रह् 9 P; निर्दुह् 2 U, निष्कुष् 9 P, निः-सं-पीड् 10 (by squeezing); निर्गम् c. (गमयति), उत्पद् c. -*s.* रसः, निर्यासः, निर्यूहः, कषायः, निष्कर्षः, उद्धारः. 2 सारः, संग्रहः, संक्षेपः, उद्धृतभागः, निष्कर्षः, पिंडितभागः. -ION, *s.* निष्कर्षः-र्षणं, उद्धरणं, निर्हरणं. 2 कुलं, वंशः, उत्पत्ति *f.*, अन्वयः, जन्मन् *n.*, संभवः, उद्भवः; 'of high e.' अभिजात, महाकुल, कुलीन; 'of royal e.' राजवंश्य, राजकुलप्रसूत.

EXTRA-JUDICIAL, *a.* व्यवहारविषयातिक्रांत.

EXTRA-MUNDANE, *a.* अतिसंसार, लोकबाह्य.

EXTRANEOUS, *a.* बाह्य, बहिर्भव. 2 भिन्न, असंगत, व्यतिरिक्त, विदेशीय, असंबद्ध.

EXTRAORDINARY, *a.* असाधारण (णी *f.*), लोकोत्तर, असामान्य, अलौकिकसामान्य, अपूर्व, अद्भुत, चित्र, अदृष्टपूर्व, विलक्षण, आश्चर्य. -LY, *adv.* अपूर्व, अद्भुत,

चर्यं. '-NESS, *s.*, वैलक्षण्यं, आश्चर्यत्वं, लोकोत्तरता.

EXTRAVAGANT, *a.* अतिव्ययकर, अतिव्युत्कहस्त, व्ययशील, अमितव्ययं, अतिव्ययिन्. 2 अनियंत्रण, अमर्याद, अपरिमित, मर्यादातिक्रामिन्, उल्लंघितमर्याद. -LY, *adv.* अतिव्ययेन, मुक्तहस्तेन. 2 अतिमात्रं, सातिशयं, अमितं. -EXTRAVAGANCE, *s.* अति-अमित-व्ययः, मुक्तहस्तः, धनोत्सर्गः, व्ययापरिमितता. 2 मर्यादातिक्रमः, अतिक्रमः, अतिशयः, अमितता, अत्याचारः, नियमोल्लंघनं.

EXTRAVASATED, *a.* शिरा-नाडि-बहिर्गत. -EXTRAVASATION, *s.* (Of blood) रक्तमोक्षणं, रक्तनिर्गमः.

EXTREME, *a.* पर, परम, निरतिशय, अत्यंत, महत्, अति pr.; 'e. limit'; परमावधिः. 2 बाह्य. 3 अंत्य, अंतिम, शेष in comp. -*s.*, -ITY, *s.* परा कोटिः-काष्ठा, अत्यंतता, अतिभूमि *f.*, परमावधिः, अतिशयः. 2 अंतः-तं, पारः, पर्यंतः, अग्रं, प्रांतः, सीमा, अवधिः, उत्तमावधिः; 'this is the e. of delightful things' इयं प्रीतिजननानां सीमांतलेखा-परिसमाप्तिः-अवसानभूमिः (Ka. 124); "e. s are ever bad' अति सर्वत्र वर्जयेत्. 3 विषमावस्था, अतिकृच्छ्रं, अत्यंतक्लेशः-दुःखं, दुःस्थिति *f.*, दुर्दशा, कष्टावस्था. -LY, *adv.* अत्यंतं, अतिभृशं; *See* EXCEEDINGLY.

EXTRICATE, *v. t.* उद्धृ 1 P, मुच् 6 P or c., मोक्ष् 10, परि-,त्रै 1 A, रक्ष् 1 P, सं-उत्-निः-तॄ c. -ION, *s.* उद्धारः, विमोचनं, मुक्ति *f.*, मोक्षः-क्षणं, निस्तारः, त्राणं, रक्षणं.

EXTRINSIC,-AL, *a.* बाह्य, बहिर्भव, असहज, आगंतुक (की *f.*). -ALLY, *adv.* बाह्यतः, असहजं.

EXTRUDE, *v. t.* उत्सृ c.; *See* DRIVE.

EXTUBERANCE, *s.* अधिमांसं, गंडः, स्फोटः, श्वयथुः.

EXUBERANT, *a.* प्रचुर, बहुल, समृद्ध, स्फीत, परिपूर्ण, उद्रिक्त, अतिरिक्त, भूरि, पुष्कल, उत्सिक्त. -LY, *adv.* प्रचुरं, बहुशः, बाहुल्येन. -EXUBERATE, *v. i.* प्रचुरीभू 1 P, वृध् 1 A, समृध् 5 P. -EXUBERANCE, *s.* प्राचुर्यं, समृद्धि *f.*; स्फीति *f.*, उद्रेकः, उपचयः, वृद्धि *f.*, अतिशयः, आधिक्यं; 'in e. of joy' हर्षेनिर्भरं.

EXUDE, *v. i* प्र-स्रु 2 P, स्विद् 1 A, 4 P; स्वेद इव प्र-स्रु 1 P or निस्पंद् 1 A. -*v. t.* (स्वेदं) निःस्रु c. or निःसृ c. 2 उद्-गॄ 6 P, उद्गम् 1 P, निष्ठिव् 1, 4 P. -ATION, *s.* प्रस्रवः, स्वेदः, स्वेदस्रावः. 2 स्रवः-वणं, स्वेदनं, निर्यासः, स्रावः. 3 निष्ठीवनं, उद्गारः, उद्गमनं.

EXULCERATE, *v. t.* व्रणं उत्पद् c., क्षतं कृ 8 U; क्षण् 8 P. -ION, *s.* व्रणोत्पत्ति *f.*, क्षतोत्पादनं.

EXULT, *v. i.* प्र-मुद् 1 A, उत्सिक्त pass., अत्यंतं आनंद् 1 P or हृष् 4 P or दृप्त् 1 P. -ANT, *a.* उत्सिक्त, मुदित, परमहृष्ट, उल्लसित, प्रगल्भ, दृप्त, सदर्प. -ATION, *s.* प्रमोदः, उत्सेकः, उल्लासः, परमानंदः, परमहर्षः, गर्वः, दर्पः, अवलेपः. -INGLY, *adv.* सगर्वं, सोल्लासं, सोत्सेकं, सगर्वं, सदर्पं.

EXUSTION, *s.* विदहनं, भस्मीकरणं.

EYE, *s.* चक्षुस् *n.*, वि-,लोचनं, नेत्रं, नयनं, अक्षि *n.*, दृश् *f.*, दृष्टि *f.*, ईक्षण-णा, दृक्. 2 (View) दृष्टिः; 'in the e. s of the public' लोकदृष्ट्या. 3 Of, छिद्रं. 4 Bud, q. v.; 'corners of the e.' अपांगः-गं, नयनोपांतः; 'mind's e.' ज्ञानचक्षुः, मनोमयं ज्ञानं; 'before one's e. s' समक्षं, साक्षात्, प्रत्यक्षतः; oft. by पश्यत्; 'before my very e. s' पश्यतोपि मम; 'in my e. s' मम दृष्ट्या, मां प्रति. -*v. t.* निरीक्ष् 1 A, आ-अव-लोक् 1 A, 10, दृश् 1 P; *See* SEE; 'e. pupil' तारा, कनीनिका, तारका; 'e. beam' नयन-दृष्टि-पातः; 'e.-drop' नेत्रजलं, बाष्पबिंदुः, अश्रु *n.*; 'e.-brow' भ्रूः, भ्रूलता; 'e.-glass' उपनेत्र-नयनं; 'e.-lash' पक्ष्मन् *n.*, 'e.-let, e.-hole' गवाक्षः, छिद्रं, रंध्रं; 'e.-lid' नेत्र-नयन-च्छदः; 'e. reach (shot)' चक्षुर्विषयः, नयनगोचरः-रं, दृक्पथः; 'e.-sore' अक्षिशूलं, चक्षुःपीडा; आक्षिगतः, द्वेष्यः; 'I am an e.-sore to him' अक्षिगतोहमस्य; 'e.-wink' नयनसंज्ञा-संकेतः, कटाक्षः; 'e. witness' प्रत्यक्षसाक्षिन् *m.*, दर्शिन् *m.*, साक्षाद्द्रष्टृ *m.* -LESS, *a.* चक्षुर्हीन, अनयन, दृष्टिविकल. 2 अच्छिद्र.

F.

FABLE, *s.* कथा, आख्यायिका, उपाख्यानं, काल्पितकथा, पुराकृत्ताख्यानं, प्रबंधकल्पना. -*v.* मनसा सृज् c. or रच् 10 or सृज् 6 P. -FABULOUS, *a.* ऐतिहासिक (की *f.*), कथानिबद्ध, आख्यानकीर्तित. 2 अलीक, मनःकल्पित, मनसा सृष्ट, काल्पनिक (की *f.*), कृत्रिम. -FABULIST, *s.* कथारचकः, ऐतिहासिकः.

FABRIC, *s.* भवनं, गृहं, हर्म्यं, मंदिरं, प्रासादः, धामन् *n.*, शाला. 2 निर्माणं, रचनं. 3 ऊति *f.*, पटाकारः. 4 Cloth, q. v. —FABRICATE, *v. t.* निर्मा 3 A or 2 P or c. (मापयति), विरच् 10, कृ 8 U, सृज् c., वि-धा 3 U, सृज् 6 P. 2 मनसा सृज् or कृप् c., कपटेन-मिथ्या कृप् c.; 'to f. evidence' कूटप्रमाणं निर्मा, कपटसाक्ष्यं कृ; *See* COUNTERFEIT. -ION, *s.* कपटरचना, अलीकं, कृत्रिमनिर्माणं, मनःकल्पना, कूटं. 2 निर्माणं, कल्पना-नं, रचना. -OR, *s.* निर्मातृ *m.*, रचकः. 2 कूटकृत् *m.*

FACE, *s.* मुखं, वदनं, आनन, वक्त्रं, आस्यं, तुंडं. 2 तलं, पीठं, पृष्ठं. 3 अवस्था, स्थितिं *f.*, दशा; 'before one's f.' अग्रे, अग्रतः, पुरतः, समक्षं, पुरस्तात्, संमुखं-खे; 'long f.' विषण्णवदनं; 'f. to f.' मुखामुखि, संमुखं; 'in the f. of' अनादृत्य, अविगणय्य; *See* 'in spite of'; 'in the f. of so

many difficulties' एवंविधान्यपि कृच्छ्राण्यविगणय्य; 'turn away the f.' विमुखीभू; 'stand f. to f.' संमुखी-अभिमुखी-भू. —*v. t.* संमुखयति-अभिमुखयति (D.); प्रतिमुखी-संमुखी-अभिमुखी-भू 1 P (with gen.), संमुखं स्था 1 P, अभिमुखं गम् 1 P; पर्यवे-स्था 1 A. 2 संमुख-अभिमुख-प्रतिमुख- *a.* भू 1 P, or by मुख-अभिमुख in comp.; 'a house f.-ing the east' पूर्वाभिमुखं गृहं; 'stand f.-ing the east' प्राङ्मुखास्तिष्ठ; 'one who boldly f.s the enemy' अभ्यमित्रयः; अभ्यमित्रीणः-यः. —ED, *a.* (*s.*) in comp.; 'moon-f.' चंद्राननः, इंदुमुखी. 2 पटाच्छन्न, अधिवस्त्राण्वित. —LESS, *a.* निर्मुख, आननहीन.

FACET, *s.* कणः, मुखं.

FACETIOUS, *a.* विनोदिन्, परिहासशील, नर्मभाय, सरस, रसवत्, हासोत्पादक, नर्म in comp. —LY, *adv.* सरसं, विनोदार्थं, परिहासपूर्वं. —NESS, *s.* परिहासशीलता.

FACILE, *a.* सुकर, सुसाध्य, अनायास; *See* EASY. 2 अनुकूल, अनुवर्तिन्. —ITY, *s.* Ease, q. v. 2 लाघवं; 'f. of hand' हस्तलाघवं, क्षिप्रता, सहजता. —FACILITATE, *v. t.* सुकर *a.* कृ 8 U, विघ्नान् अपनी 1 P or नश् c., निर्विघ्नीकृ; better ex. by words for 'Easy' q. v.; 'this will f. their communication' अनेन तेषामन्योन्यव्यवहारोऽयत्नसाध्यो भवेत्-सुकरो भवेत्. —ED, *a.* निर्विघ्न, हतप्रत्यूह, सुकरीकृत.

FACSIMILE, *s.* प्रतिलिपि *f.*, प्रतिरूपं.

FACT, *s.* तथ्यं, यथार्थता, सत्यं, तत्त्वं, भूतार्थः; 'it was a statement of f.s' भूतार्थव्याहृतिः सा (R. x. 33). 2 वृत्तं, वस्तु *n.*, अर्थः, कर्मन् *n.*; 'in fact' वस्तुतः, तत्त्वतः; 'as a matter of f.' वस्तुस्थ्येव, परमार्थतः, तत्त्वतः.

FACTION, *s.* दलं, पक्षः, शाखा. 2 भेदः, विरोधः, विप्रतिपत्ति *f.*, द्वेषं, द्वैधं, पक्षभेदः. —FACTIOUS, *a.* कलहप्रिय, भेदकारिन्, उपजापिन्, उपजापक, भेदिन्. 2 पक्ष्य (स्त्री *f.*). —LY, *adv.* सोपजापं. —NESS, *s.* उपजापः, भेदकारिता.

FACTITIOUS, *a.* कृत्रिम, कृतक, कल्पित, रचित, शिल्पनिर्मित.

FACTOR, *s.* नियोगिन् *m.*, प्रतिनिधिः; 'three is a f. of six' षट् त्रिभिर्भाज्याः.

FACTORY, *s.* शिल्प-कर्म-शाला-गृहं, पण्यनिर्माणस्थानं.

FACTOTUM, *s.* सर्वकर्मकरः.

FACULTY, *s.* शक्तिः *f.*, क्षमता, प्रभावः, सामर्थ्यं. 2 अधिकारः. 3 गणः, समाजः.

FADE, *v. i.* म्लै-ग्लै 1 P, वि-शु pass., विशीर्ण् 1 P, विच्छायतां गम् 1 P, विवर्णीभू 1 P. 2 अवसद् 1 P, क्लम् 4 P, नश् 4 P, क्षि pass., ध्वंस् 1 A, म्र-ली 4 A, अवसीद् pass. —*v. t.* Causal of roots above. 2 तेजो हृ 1 P, वर्णं नश् c. or विलुप् c., विवर्णीकृ 8 U. —ED, *a.* नष्ट, क्षीण, अपचित. 2 म्लान, विवर्ण, विच्छाय, गतवर्ण, वीतराग. —ING, *s.* म्लानिः *f.*, क्षयः, ध्वंसः, अवसादः, हानिः *f.*; 'f. of colours' वर्णोच्छेदः, वर्णहानिः, वर्णिकोच्छ्रासः.

FAG, *s.* दासः, निरंतरायासिन् *m.*, व्रातीनः. —*v. i.* Drudge, q. v.

FAG-END, *s.* अंतः, अवसानसमयः. 2 शेषः-षं, उच्छिष्टं, अवशेषः.

FAGOT, *s.* काष्ठानि (pl.); दारुखंडः, काष्ठभारः, इंधनदारु *n.*

FAIL, *v. i.* अव-वि-सद् 1 P, ध्वंस् 1 A, नश् 4 P, विलुप् pass., क्षि pass.; 'whose talent f.s not in difficulties' संकटेष्वविषण्णधीः. 2 भग्नाश *a.* भू 1 P; (of efforts) व्या-प्रति-हन् pass., व्यर्थ-मोघ-*a.* भू, न सिध् 4 P, विफलीभू. 3 प्रमद् 4 P (with abl.), (स्वाधिकारात् प्रमत्तः Me. 1); विस्मृ 1P, उपेक्ष् 1 A, न आद् 6 A. 4 न्यूनीभू, क्षि-अपचि pass. 5 विसं-वद् 1 P; 'f.s to give the fruit' फले विसंवदति (V. 2); 'a good appointment was made to f. by Fate' रमणीयोऽवधिर्विधिना विसंवादितः (S. 6). —*v. t.* त्यज् 1 P, हा 3 P; 'whose courage does not f. him' यस्य धैर्यं न हीयते, न स्खलति; 'f. ing male issue' पुत्राभावे; 'his memory f. ed him' तस्य स्मृतिलोपः संजातः. —*s.* उपेक्षा, अननुष्ठानं; 'without f.' अवश्यं, नियतं, नूनं, सुनिश्चितं, असंदेहं. —ING, *s.* दोषः, अपराधः, अगुणः, छिद्रं, न्यूनता, वैकल्यं. —*a.* मोघ, व्यर्थ; 'un-f. source' अक्षयः प्रभवः. —URE, *s.* अभावः, विरहः, लोपः, हानिः *f.*, न्यूनता, वैकल्यं. 2 भंगः, अनिष्पत्तिः *f.*, असिद्धिः *f.* 3 अवसादः, क्षयः, ध्वंसः, नाशः, भ्रंशः, उच्छेदः, ह्रासः, क्षीणता, लोपः; 'f. of issue' संततिच्छेदः. 4 उपेक्षा-क्षणं, अननुष्ठानं, प्रमादः, उपात्ययः, अतिपातः, व्यतिक्रमः, लोपनं.

FAIN, *adv.* प्रकामं, सकामं, सानंदं; *See* GLADLY.

FUEL, *s.* इंधनं, एधस् *n.*, एधः, इध्मं, समिध् *f.*, समिधनं; 'add f. to the flames' *See* under OIL.

FUGACIOUS, *a.* पलायनशील, पलायनपर; अस्थिर, चपल, लोल.

FUGITIVE, *s.* कृतपलायनः, पलायिन् *m.*, कांदिशीकः. -*a.* प्रपलायिन्, पलायनपर-शील. 2 चपल, तरल, चंचल, अस्थिर.

FULCRUM, *s.* आधारः, उपस्तै(ष्ट)भः, आलंबः, आश्रयः.

FULFIL, *v. t.* सं-परि-पूर् 10, साध् 5 P or c., निर्वह् c., निः-सं-पद् c., समाप् c., निर्वृत् c., सफलीकृ 8 U, निस्तृ c., तीर् 10; 'f. a promise' प्रतिज्ञां निर्वह् c. or तीर् or शुध् c. or पा c. (पालयति) or अप-वृज् 10; gen. in pass. constr. ex. by पूर्ण, कृत, आप्त, लब्ध, in comp.; 'whose desires are f.ed' समवाप्त-लब्ध-मनोरथः-कामः, कृतार्थः, पूर्णमनोरथः-कामः, कृती; 'who has f.ed his promise' पूर्णप्रतिज्ञः, पालितसंगरः, सत्यप्रतिज्ञः, सत्यव्रतः-संधः. -LER, *s.* निर्वाहकः, साधकः, पूरयितृ *m.* -MENT, *s.* पूरणं, सिद्धि *f.*, निष्पत्ति *f.*, साधनं, निर्वाहः; 'f. of desires' कृतार्थता, कामसिद्धिः, इच्छापूरणं, इष्टावाप्तिः.

FULGENT, *a.* उज्ज्वल, दीप्ति-द्युति-मत्; *See* BRIGHT. -FULGENCY, *s.* तेजस् *n.*, प्रभा, कांति-दीप्ति-द्युति *f.*

FULL, *a.* (of) सं-परि-पूर्ण, आ-सं-कीर्ण, आ-सं-कुल, संभृत, व्याप्त, निर्भर, पूरित, मय (यी *f.*) in comp. 2 अशेष, अन्यून, सकल, निखिल, कृत्स्न, समग्र, अविकल, अखंड, संपूर्ण; 'f. year' पूर्ण वर्षं; 'f. speed' पूर्णवेगः; 'f. 8 months old' पूर्णाष्टमास. 3 परिणत, परिपक्व, पक्व, कठोर,

प्रौढ, संपन्न. —*s.* पूर्णता, साकल्यं; 'in f.' सविस्तरं, साकल्येन. —*adv.* कृत्स्नशः, सर्वथा, साकल्येन, अशेषतः—षेण, पूर्णं; 'f.-blown' प्रफुल्ल, विकच, विकसित, प्रस्फुट, प्रस्फुटित; 'f.-bodied' स्थूलकाय, सञ्जाङ्ग, पुष्टदेह; 'f.-bosomed' पीनस्तन (नी *f.*), पीनकुचकुड्मल; 'f.-fed' पुष्टांग, हृष्टपुष्ट; 'f.-grown' प्रवृद्ध, प्रौढ, कठोर, परिणत, प्ररूढ; गतशैशव, प्राप्तयौवन, यौवनारूढ, समारूढयौवनारंभ (of men); 'f.-growth' प्रौढि *f.*, प्रौढता, प्रवृद्धि *f.*; 'f.-laden' पूर्णभार, सुभाराक्रांत; 'f. moon' पूर्णेंदुः, सकलेंदुः; 'f. moon day' पौर्णिमा, पूर्णिमा, राका. —ER, *s.* रजकः, निर्णेजकः. —LY, *adv.* अशेषेण, सविस्तरं, अशेषतः, सर्वशः-था, साकल्येन, कृत्स्नशः, निरवशेषं, विस्तरेण-रशः, पूर्णतया. —NESS, *s.* पूर्णता, निर्भरता, पूर्तिं *f.*, संभारः. 2 बाहुल्यं, प्राचुर्यं. 3 परिणामः, परिपाकः, सिद्धि *f.*, प्रौढि *f.*, संपद् *f.*

FULMINATE, *v. t.* विकटं रस् or स्तन् 1 P, स्फूर्ज् 1 P. —*v. t.* वज्रनिर्घोषेण इव प्रेर् c. or उदीर् c. —ION, *s.* स्फूर्जनं, वज्र-मेघ-निर्घोषः, स्तनितं.

FULSOME, *a.* गर्हित, कुत्सित, गर्ह्य, बीभत्सजनक, विरस. —NESS, *s.* विरसता, गर्ह्यता.

FUMBLE, *v. i.* परामृश् 6 P, समालभ् 1 A, अदक्षं कार्यं वि-धा 3 U. —ING, *a.* संभ्रांतं परामृशत्, अदक्षतया कार्यविधायिन्. —*s.* अदक्षं कार्यविधानं.

FUME, *s.* धूमः-मिका, बाष्पः, धूपः. 2 धूमोद्गारः. 3 क्रोधः, संरंभः. —*v. t.* धूमयति (D.), धूप् 1 P (धूपायति). —FUMIGATE, *v. t.* धूप् 10, धूप 1 P (धूपायति), धूपेन वास् 10 or भू c.; 'a thing f.ed' वासितं, भावितं. —*v. i.* धूमाम्बे (D.), बाष्पं उद्गृ 6 P. 2 Angry, to be, q. v. —ION, *s.* वासनं, भावनं, अधिवासनं. —FUMY, *a.* सधूम, सधूप.

FUN, *s.* परि(री)हासः, नर्मन् *n.*, क्रीडा, खेला, केलि *f.*, प्रहसनं, क्रीडाकौतुकं; 'said in f.' नर्मभाषितं, नर्मालापः. —FUNNY, *a.* हासजनक, विनोदनशील, रसिक, कौतुककारिन्, नर्म-परिहास- in comp. 2 उपहास्य, अपरूप.

FUNCTION, *s.* व्यापारः, कर्मन् *n.*, कार्यं, कृत्यं, चेष्टा, क्रिया, चेष्टितं, व्यवसायः, व्यवहारः, वृत्ति *f.*, प्रवृत्तिः. 2 नियोगः, अधिकारः, पदं. 3 आचरणं, अनुष्ठानं, करणं. 4 गुणः, धर्मः स्वभावः. 5 इंद्रियं, शक्ति *f.*, कर्मेंद्रियं. —ARY, *s.* नियोगिन् *m.*, अधिकारी, कार्यनिर्वाहकः, नियुक्तः, अधिकृतः.

FUND, *s.* संचयः, पुंजः, राशिः, समुदायः, निचयः, संयोगः, संनिपातः; *See* COLLECTION. 2 मूलधनं, नीवि-वी *f.* —*v. t.* सं-चि 5 U, संग्रह् 9 P, पुंजीकृ 8 U, राशीकृ.

FUNDAMENT, *s.* गुदं, मायुः, अपानं, मलद्वारं. 2 अधोभागः, तलं.

FUNDAMENTAL, *a.* प्रधान, सार, सारभूत, गुर्वर्थ, मौलिक, मूल in comp.; 'f. cause' मूलकारणं; 'f. principle' मूलतत्त्वं. —*s.* प्रधान—मूल-तत्त्वं, मूलं, तत्त्वं, सारः.

FUNERAL, *s.* और्ध्वदेहिकक्रिया, अंत्येष्टि *f.*, प्रेतकार्यकृत्यं, प्रेतनिहारः, अंत्यक्रिया, उत्तरक्रिया-कर्म, और्ध्वदेहिकं, श्राद्धादि कर्म. —*a.* और्ध्वदेहिक, और्ध्वदेहिक (की *f.*), better by (*s.*); 'f. pile' चिता, चिति-ती *f.*, चित्या.

FUNGUS, *s.* विड्जं, गोमयजं, शिलीध्रं, शा(सा)लेयः, शीतशिवः, छत्रा, मधुरिका, मिसि-शि-सी-शी-*f.*, मिश्रेया.

FUNICLE, *s.* क्षुद्ररज्जु *f.*, क्षुद्रगुणः, सूत्रं.

FUNNEL, *s.* धूममार्गः-पथः-द्वारं. 2 नाली, प्रणाली-लिका, नाडि-डी *f.*

FUR, *s.* रो(लो)मन् *n.*, तनुरुहः-हं, पशुलोम; 'f. on the tongue' कुलुकं, मलं. —RED, *a.* लोमावृत, लोमान्वित. 2 समल.

FURBISH, *v. t.* तिज् c., निः-तप् c., प्रमृज् 2 P or c., धाव् 10, परिष्कृ 8 U. —ED, *a.* निर्धौत, प्रमृष्ट, निष्टप्त. —ER, *s.* तेजकः, मार्जकः, निर्णेजकः; 'f. of weapons' शस्त्रमार्जः, असिधावकः. —ING, *s.* धावनं, परिष्कारः, तेजनं.

FURCATED, *a.* द्व्यग्र.

FURL, *v. t.* सं-वेष्ट् c., सं-वृ 5 U, संपुटीकृ 8 U, सं-हृ 1 P.

FURLONG, *s.* नल्वः.

FURMENTY, *s.* क्षीरान्नं, परमान्नं, पायसं.

FURNACE, *s.* अग्निकुंडं, अधिश्रयणी, अंति(दि)का, दह्मानं; 'a portable f.' *See* HEARTH.

FURNISH, *v. t.* (उपकरणैः) संयुज् 10 or सनाथीकृ 8 U; (उपस्करं) उप-कृप् c., उप-पद् c., सं-भृ 3 U, वि-धा 3 U; gen. ex. by स or सनाथ in comp.; 'f. ed with arrows' सशरं धनुः; मणिशिलापट्टसनाथं लतागृहं (V. 2); 'f. ed with a marble slab'; 'to f. with arms' शस्त्रास्त्रैः संनह् 4 P or सज्जीकृ. —ED, *a.* सं-युक्त, समन्वित, उपेत, उपपरि-कृत, सनाथ, संभृत, स in comp. 2 सोपस्कर, सोपकरण, उपस्करादियुक्त. 3 सन्नद्ध, सज्जीकृत. —FURNITURE, *s.* उपस्करः, उपकरणं, परिच्छदः सामग्री, सज्जा, संभारः, उपचारः, परिवर्हः; 'on sofas with all f.' उपचारवत्सु मंचेषु (R. VI. 1); परिवर्हवंति वेश्मानि (R. XIV. 15); 'household f.' गृहोपस्करः, पारिणाह्यं.

FURROW, *s.* सीता, हलिः, लांगलमार्गः-पद्धति *f.*, हलरेखा. 2 रे(ले)खा, सुषिरं. 3 वदनरेखा, वलि-ली *f.* —*v. t.* (हलेन) कृष् 1 P, (लांगलेन) लिख् 6 P or रेखाः कृ 8 U. —ED, *a.* सीत्य, कृष्ट, हल्यवत्.

FURTHER, *a.* दूरतर, दूरस्थ, दवीयस्. 2 अधिक, अपर, अभिकतर, पर. —*adv.* दूरतरं, अधिकदूरं, अग्रे-

अतः, पुरतः, अग्रेतरां, पुरस्ताद्; 'a little f. on' स्तोकार्तरं, अग्रतः, किंचिदग्रे; 'f. and f.' अधिकाधिकं, उत्तरोत्तरं. 2 अपरं, अन्यच्च, अपरं च, किं च, अपि च, अपरं तु. —*v. t.* प्र-सं-वृध् c., अनुग्रह् 9 P, उपकृ 8 U, त्वर् c. (त्वरयति), पुरस्कृ, प्रवृत् c., साहाय्यं दा 3 U, उत्कृष् 1 P, उन्नति-उत्कर्ष-नी 1 P. —ANCE, *s.* सं-प्र-वर्धनं, प्रवर्तनं, अभि-प्र-वृद्धि *f.*, अनुग्रहः, उपकारः, साहाय्यं, उत्कर्षः. —ER, *s.* उपकारकः, प्रवर्धकः. —MORE, *See* (*adv.*).

FURTHEST, *a.* दविष्ठ, दूरतम. —*adv.* सुदूरं, दविष्ठं.

FURTIVE, *a.* चौर्येण गृहीत, अपहृत, छलापहृत, निभृतं कृत. —LY, *adv.* चौरवत्, उपांशु, रहसि, निभृतं, छलेन.

FURY, *s.* मत्तता, उन्मत्तता, चंडता, उग्रता, औत्कटयं. 2 संरंभः, कोपः, क्रोधः, रोषः, आवेशः, अमर्षः. 3 महावेगः, अत्यंतवेगः-जवः, बलं, आपातः. 4 चंडी, दुर्गा. —FURIOUS, *a.* प्र-,चंड, तीव्र, उग्र, प्रबल, महावेगवत्. 2 उन्मत्त, मत्त, मदोत्कट, मदकल, समद, उदग्रमद, उन्मादसंरब्ध, उत्कट. 3 कोपाकुल, संरब्ध, क्रोधाविष्ट, कोपपरीत, रोषण, इद्धकोप, जातामर्ष. —LY, *adv.* उग्रं, चंडं; महावेगेन, संरंभेण. —NESS, *s.* संरंभः, उग्रता, उन्मादः, कोपाकुलत्व.

FUSCOUS, *a.* आकृष्ण, आनील.

FUSE, *v. t.* वि-द्रु c., वि-ली c., जलसात् कृ 8 U. 2 एकरूप *a.* कृ, संमिश्र् 10, सायुज्यं कृ, संयुज् 10, सदृशीकृ. —*v. i.* वि-द्रु 1 P, वि-ली 4 A, द्रवीभू, गल्-क्षर् 1 P. 2 सदृशीभू, सायुज्यं प्राप् 5 P, एकरूप *a.* भू. —IBLE, *a.* द्राव्य, विलयनीय, द्रवशील, क्षरणशील. —ION, *s.* द्रावः, विलयनं, विलयः, द्रवत्वं, क्षरणं. 2 एकरूपता, सदृशीभावः, एकभावः, संमिश्रणं, संकरः, संयोगः.

FUSS, *s.* आडंबरः, तुमुलं, कोलाहलः, संभ्रमः. —Y, *a.* संभ्रमकारिन्.

FUST, *s.* स्तंभः, स्तंभदंडः. 2 उग्र-पूति-गंधः, दुर्गंधः. —FUSTY, *a.* पूति, पूतिगंधि, उग्रगंध. —NESS, *s.* पूति *f.*, दुर्गंधः.

FUSTIAN, *s.* स्थूलशाटकः, वराशिः, स्थूलपट्ट-वस्त्र-कार्पासं. 2 अतिशयोक्ति *f.*, गर्वोक्तिः, दर्पवचनं, सदर्पा वाचायुक्तिः. —*a.* स्थूलकार्पासिक (की *f.*). 2 अतिगर्वित, दर्पोद्भात, सगर्व.

FUTILE, *a.* निरर्थक, मोघ, व्यर्थ, निर्गुण. 2 असार, लघ्वर्थ, निःसार, निःसत्त्व, फल्गु, तृणप्राय, तुच्छ. —ITY, *s.* मोघता, लाघवं, असारता, &c.

FUTURE, *a.* भविष्यत्, उत्तर, अनागत, आगामिन्, भावि, उत्तरकालीन, श्वस्तन (नी *f.*); 'f. time' अनागतवेला, उत्तरकालः, आयति *f.* 2 पारलौकिक-पारत्रिक-आमुष्मिक (की *f.*), अमुत्रत्य, परलोकगत. —*s.*, —ITY, *s.* भावि-उत्तर-कालः, भविष्यत्-आगामि-कालः, भाविन् *m.*, अनागतं, अनागत कालः, आयतिं *f.*, उदर्कः; 'past, present and f.' समतीतं च भवच्च भावि च (R. VIII. 78); 'ignorant of the f.' अश्वस्तनविद्, उदर्कानभिज्ञ.

G.

GABARDINE, *s.* वराशिः, स्थूलशाटकः.

GABBLE, —ER, *See* BABBLE, -ER.

GABEL, *s.* करः, राजस्वं, शुल्कः-ल्कं, बलिः.

GABLE, *s.* गृह-प्रासाद-शिखरं.

GAD, *s.* बाणाग्रं, शूलाग्रं; अग्रं, कर्णः. 2 कीलः, लोहकीलः. —*v. i.* अट् 1 P, परिभ्रम् 1, 4 P. —DING, *s.* परि-,अटनं-भ्रमणं.

GAD-FLY, *s.* दंशकः, गोमक्षिका, दंशः-शी, वनमक्षिका.

GAFFER, *s.* वृद्धजनः; अशिष्टाचारः.

GAG, *s.* मुखबंधनी-पिधानं, रोधनं. —*v. t.* मुखं बंध् 9 P or निरुध् 7 U or पि-धा 3 U.

GAGE, *s.* पणः, आधिः, परिपणनं. 2 मानं, प्र-परि-माणं. 3 मापनयंत्रं. 4 आह्वानं. —*v. t.* पण् 1 A, प्रति-ज्ञा 9 U, अंगीकृ 8 U, प्रतिपद् 4 A, सशपथं प्रतिज्ञा.

GAGGLE, *v. i.* कलं रु 2 P; कूज् 1 P.

GAIN, *v. t.* लभ् 1 A, अर्ज् 1 P or c., आप् 5 P, आ-समा-सद् c.; *See* GET; 'g. ground' उप-वि pass., प्रवृध् 1 A; प्ररुह् 1 P; 'g. over' साध् c., वशं नी 1 P (धनदानादिना); अनुरंज् c., ग्रह् 9 P; 'g. over to one's side' स्वपक्षं ग्रह् c.; 'g. a battle' युद्धे जयं लभ्; 'g. the day' जयं प्राप्, विजयिन् *a.* भू; 'g. upon one's steps' समासद् c.; *See* OVERTAKE. —*v. t.* क्रमशः प्रलप् or प्रगम् 1 P. —*s.* लाभः, प्राप्ति *f.*, फलं, आयः, अर्थः, उत्पश्र, फलोदयः, अर्जनं. —ER, *s.* अर्जकः; प्राप्तलाभः; फलप्रापकः. —FUL, *a.* फलद; लाभजनक, अर्थोत्पादक. —LY, *adv.* दक्षं, चतुरं, सपाटवं.

GAINSAY, *v. t.* विरुध् 7 U; वि-प्रति-विध् 1 P, प्रत्या ख्या 2 P, प्रत्यादिश् 6 P, अपवद् 1 U, अपलप् 1 P, अधरीकृ 8 U, निरा-कृ, बाध् 1 A, निरस् 4 U. —ER, *s.* अपवादकः, निषेधकः.

GAIRISH, *a.* अतिशोभन, रूपगर्वित. —NESS, *s.* अतिशोभा, रूपगर्वः, दंभः.

GAIT, *s.* गतिं *f.*, गमनं, गतं, चारः; 'graceful in g.' हंसगति, चारुगामिन्.

GALA, *s.* उत्सवः, उत्सवदिवसः, पर्वदिनं.

GALAXY, *s.* सुरनदी, आकाशगंगा, स्वर्गंगा, वियद्गंगा. 2 सुवस्तुमंडलं.

GALE, *s.* वातः, वायुः, पवनः; 'strong g.' वात्या, वातालीं, चंडवातः, जवानिलः, वेगानिलः, प्रकंपनः, वाजि *f.*

GALL, *s.* क्षतं, विषं; दंशः; (*fig.*) पीडा, दुष्टभावः, संबाधा. **2** पित्तं, मायुः. **3** कटुता, तिग्मता, कठोरता, अरुंतुदत्वं. —*v. t.* चर्म घृष् 1 P or कृष् 1 P. **2** संपरि-तप् c., पीड् 10, बाधृ 1 A, क्लिश् 9 P, अर्द् 1 P, मर्माणि कृत् 6 P or भिद् 7 P. —*v. i.* आत्मानं तप् c. —ING, *a.* परुष, मर्माच्छिद्-भिद्, अरुंतुद.

GALLANT, *a.* शोभन, सुभगदर्शन; सभ्य, सभ्याचार, सुशील; दक्षिण; अभ्युपचारपर-दक्ष. **2** वीर, शूर, विक्रांत, महावीर्य; *See* BRAVE. —*s.* वल्लभः, रमणः, कामुकः, कामिजनः, कामिन् *m.*, नायकः, दयितः. **2** जारः, विटः, उपपतिः. **3** सभ्याचारः, सुजनः; अभ्युपचारशीलः-परः. —RY, *s.* दाक्षिण्यं; कामचेष्टा, शृंगारविलसितं, अभ्युपासना, अभ्युपचारः. **2** वीर्यं, शौर्यं, धामन् *n.*, विक्रमः, पौरुषं. **3** उदारता, माहात्म्यं. —LY, *adv.* सविक्रमं, सवीर्यं, शूर-वीर-वत्. **2** रमणवत्.

GALLERY, *s.* मंचाः (*pl.*), मंचसनाथः कोष्ठः. **2** छन्नपथः-मार्गः. **3** अलिंदः-दकः.

GALLINACEOUS (fowl), *s.* कुक्कुटः, ताम्रचूडः, चरणायुधः.

GALLINULE, *s.* दात्यूहः, कालकंठकः.

GALLOP, *v. i.* वल्ग् 1 P, द्रुतगत्या चल् or धाव् 1 P, प्लु 1 A. —*s.* प्लुतं, वल्गितं, प्लवनं.

GALLOWS, *s.* वधस्तंभः, वध्यशिला-काष्ठं; वध-घातस्थानं, वध्यस्थलं; 'met his death on the g.' शूलमारोपितः.

GALOCHE, *s.* काष्ठपादुका, पादुका.

GALVANIZE, *v. t.* विद्युच्छक्त्या आकृष् 1 P or उपहन् 2 P.

GAMBLE, *v. i.* दिव् 4 P (अक्षैः अक्षान् वा); अक्षैः क्रीड् 1 P. —ER, *s.* द्यूतकारः, देवित् *m.*, द्यूतकृत् *m.*, धूर्तः, अक्षदेविन् *m.*, कितवः, अक्षधूर्तः. —ING, *s.* द्यूतं, दुरोदरं, पणः, अक्षवती, अक्षक्रीडा-द्यूतं, कैतवं, देवनं, द्यूतसेवा; 'g.-house' द्यूतशाला-सभा; 'he who keeps a g.-house' सभिकः, द्यूतकारकः.

GAMBOL, *v. i.* क्रीड् 1 P, नृत् 4 P, इतस्ततः वल्ग् 1 P, प्लु 1 A. —*s.* नृत्यं, क्रीडा, लास्यं, लीला, केलि *f.*, खेला.

GAME, *s.* क्रीडा, खेला, केलि *f.*, लीला, विलासः, परि-(री)हासः. **2** वन्यपक्ष्यादि, जांगलः, वन्यपक्षिन् *m.* **3** मृगया. **4** संकल्पः, व्यवसायः; कल्पना, संदिग्धव्यवसायः. —*v. i.* क्रीड् 1 P, दिव् 4 P; 'G.-cock' चरणायुधः, योधकुक्कुटः; 'g.-keeper' वन्यपक्षिपालकः; 'g.-leg' पंगुपादः. —ING, *s.* द्यूतं. —STER, *s.* धूर्तः; *See* under GAMBLE. —SOME, *a.* क्रीडा-लीला-पर, विलासशील, विलासिन्, परिहासशील, उल्लासिन्, परिहासिन्, विनोदिन् नर्मालपिन्.

GAMMON, *s.* वक्रं, उत्तमं, सूकरशुष्कमांसं. **2** चर्मपट्टारि-क्रीडा. **3** Deceit, q. v. —*v. t.* सूकरमांसं लवणीकृ 8 U. **2** Cheat, q. v.

GAMUT, *s.* ग्रामः.

GANDER, *s.* हंसः, चक्रांगः, चक्रवाकः, चक्रः; श्वेतगरुत् *m.*, मानसौकस् *m.*, राजहंसः (white).

GANESH, *s.* गणेशः, गणपतिः, विनायकः, विघ्नेशः, विघ्नराजः, द्वैमातुरः, गणाधिपः, एकदंतः, हेरंबः, लंबोदरः, गजाननः, गजास्यः, गजदंतः.

GANG, *s.* गणः, संघः, निवहः; *See* COLLECTION.

GANGES, *s.* गंगा, मंदाकिनी, त्रिपथगा, ह्वर्णदी, सुरदीर्घिका, जाह्नवी, जह्नुतनया-कन्या, भागीरथी, अमरापगा, सुरनदी, त्रिस्रोतस् *f.*, त्रिपथगा.

GANGLION, *s.* शिरास्फोटः.

GANGRENE, *s.* पूतिमांसं; मांसपाकः; कोथः. —*v. i.* कोथीभू 1 P, पूतीभू.

GANGWAY, *s.* आरोहावरोहपथः.

GAOL, —ER, *See* JAIL, —ER.

GAP, *s.* छिद्रं, भंगः, विच्छेदः, भेदः, रंध्रं, छेदः, विवरं, गर्तः-र्तो.

GAPE, *v. i.* वि-प्र-जृंभ् 1 A; जभ्-जंभ् 1 A, मुखं व्यादा 3 A. **2** वि,-दल् 1 P, स्फुट् 1 P. —*s.*, -ING, *s.* जृंभः-भा, जृंभणं, जृंभिका, जृंभितं, हर्मन् *n.*, हाकिका, मुखव्यादानं. —ING, *a.* जृंभिन्, जृंभित, व्यात्तमुख.

GARB, *s.* वेशः-षः, वस्त्रं, वसनं, वासस् *n.*, परिधानं, प्रसाधनं; 'putting on the g. of virtue' धर्मैकचुकप्रवेशिनः (S. 5).

GARBAGE, *s.* उच्छिष्टं, मलं.

GARBLE, *v. t.* साधीकृ 8 U; सत्यं गुह् 1 U, विकृ, वक्रीकृ.

GARDEN, *s.* उद्यानं, उपवनं; 'g. near a house' गृहारामः, निष्कुटः, गृहवाटिका; 'pleasure-g.' क्रीडोपवनं, आरामः, प्रमदवनं, आक्रीडः; 'flower-g.' पुष्पवनं-वाटः-वाटिका, कुसुमाकरः; 'fruit-g.' फलवृक्षवाटिका; 'vegetable g.' शाकवाटिका, शाकशाकटं, शाकशाकिनं; 'g.-wall' उद्यानपरिसरः-प्राकारः. —ER, *s.* उद्यानपालकः-रक्षकः, मालाकारः, मालिकः, मालिन् *m.* —ING, *s.* उद्यानकर्मन् *n.*, उद्यानसेवनं-कर्षणं, फलोत्पत्तिकर्म.

GARGLE, *v. i.* (जलं) आचम् 1 P, उप-स्पृश् 6 P, जलेन मुखं मृज् 2 P or धाव् 1 P. —*s.* आचमनीयं, आचाम्यं.

GARLAND, *s.* माला, स्रज् *f.*, माल्यं, आपीडः; शेखरः, हारः; 'g. worn in the hair' मौलकः; 'g. hanging from the crest' प्रग्रथकं, शिखालंबि माल्यं; 'g. worn straight' प्रालंबः-बिका; 'worn sideways' वैकक्षिकं; 'g. of pearls' हारः, मुक्तावली, मौक्तिकसरः.

GARLIC, *s.* लशुनं, रसोनः-नकः, महौषधं, गृंजनं, अरिष्टः, महाकंदः, सोनहः.

GARMENT, *s.* वस्त्रं, वासस् *n.*, वसनं, पटः, परिधानं, परिच्छदः, अंबरं, प्रच्छादनं; वेशः-षः; 'under or

lower g.' अंतरीयं, अधोंशुकं, उपसंव्यानं, परिधानं, अधोवासः-सनं; 'upper g.' उत्तरीयं, प्रावा(व)रः, उत्तरासंगः, वृहतिका, संव्यानं; 'g. as a protection from wind and cold' नीवारः.

GARNER, *s.* कुशू(सू)लः, धान्यागारं, धान्यकोष्ठः, कंडोलः-लकः, पिटः. -*v. t.* कंडोले निविश् c. or नि-धा 3 U.

GARNISH, *v. t.* भूष् 10, मंड् 10, अलंकृ 8 U, परिष्कृ, शुभ् c. -*s.*, -MENT, -GARNITURE, *s.* प्रसाधनं, भूषणं, अलंकारः, मंडनं, आभरणं; उपकरणानि (pl.), सज्जा.

GARRET, *s.* शिरोगृहं, चंद्रशाला, अट्टः, अट्टालः.

GARRISON, *s.* दुर्गरक्षकाः (pl.); दुर्गसैन्यं-बलं; रक्षिणः-रक्षकाः (pl.); रक्षिवर्गः. -*v. t.* रक्षापुरुषैः युज् 10, (दुर्गे) रक्षिणः निविश् c. or स्था c. (स्थापयति).

GARRULOUS, *a.* अतिवक्तृ, वावदूक; बहुभाषिन्-वादिन, वाचाल, वाग्मिन्, जल्पाक, मुखर. -NESS, GARRULITY, *s.* वाचालता, वावदूकता, अतिवादः, बहुभाषित्वं, अतिजल्पनं.

GARTER, *s.* पादावरणबंधनी, जंघाबंधनी.

GARUDA, *s.* गरुडः, गरुत्मत् *m.*, तार्क्ष्यः, वैनतेयः, खगेश्वरः, नागांतकः, विष्णुरथः, सुपर्णः, पन्नगाशनः, भुजगद्वारणः, भुजगरिपुः.

GAS, *s.* वायुः. -EOUS, *a.* वायुरूप.

GASH, *s.* दीर्घच्छेदः, दीर्घ,-गंभीर-क्षतं.

GASOMETER, *s.* वायुमापनयंत्रं.

GASP, *v. i.* कृच्छ्रेण श्वस् or अन् 2 P, दुःखेन श्वस्, स्थूलस्थूलं निश्वस्. -*s.* उच्छ्वासः, निश्वासः, कृच्छ्रोच्छ्वासः, कष्टश्वासः.

GASTRIC, *a.* जाठर (री *f.*), उदरीय, जठरीय, उदर-जठर in comp.; 'g. juice' जठराग्निः.

GASTRONOME, *s.* औदरिकः, उदरंभरिः, कुक्षिंभरिः, उदरपरायणः; *See* GLUTTON. -GASTRONOMY, *s.* उदरपरायणता, उदरसेवा.

GATE, *s.* द्वारं, प्रतिहारः, द्वार् *f.*; 'g.-way' तोरणः-णं, गोपुरं; निर्गमः; द्वारपथः; for other comps. *See* DOOR.

GATHER, *v. t.* चि 5 U, सं-अव-प्र-आ-°; समा-ह 1 P, समा-नी 1 P, संग्रह् 9 P, सं-भृ 1, 3 U, एकीकृ 8 U; *See* COLLECT; 'g. flowers' पुष्पाणि चि or लू 9 U: 2 ज्ञा 9 U, अनु-मा 3 A, 2 P, उह् 1 A, अवगम् 1 P. 3 उद्-वृ 5 U, उद्धृ 1 P. -*v. i.* संगम् 1 A, सं-इ 2 P, संमिल् 6 P, साकं-पत् 1 P, एकत्र मिल्, एकस्थ *a.* भू 1 P, एकीभू. 2 उपचि pass., प्रवि-वृध् 1 A, पुष् 1 A. 3 पूयं बंध् 9 P, पूय् 1 A. -*s.* पुटः, चूर्णः. -ER, *s.* अवचायिन् *m.*, संग्राहकः; 'g. of taxes' शौल्किकः, करग्राहकः. -ING, *s.* चयः, अव-सं-चयः, संग्रहणं. 2 समूहः, गणः, संघः, समागमः, निवहः, संघातः; जनसमूहः, लोकनिवहः-संघः.

GAUDY, *a.* उज्ज्वल, शोभन, नानावर्ण, चित्र; 'having a g. dress' उज्ज्वलवेशधारिन्, आर्ये-उदारनेपथ्यभृत्. -*s.* FESTIVAL, q. v. -NESS, *s.* अतिशोभा, औज्ज्वल्यं, चित्रता, नानावर्णता.

GAUGE, *See* MEASURE.

GAUNT, *a.* क्षाम, कृश, क्षीण, शुष्कमांस, क्षुत्क्षाम, कृश-क्षीण-देह.

GAUNTLET, *s.* हस्तत्राणं; 'throw down the g.' युद्धार्थं आह्वे 1 A; 'take up the g.' युद्धाह्वानं स्वीकृ or उरीकृ 8 U.

GAWK, *s.* मूर्खः; *See* FOOL. 2 Cuckoo, q. v.

GAWKY, *a.* स्थूल-दीर्घ-देह, स्थूल.

GAY, *a.* प्रमोदिन्, प्रहृष्ट, आनंदित, उल्लासित, प्रमुदित, सानंद, प्रफुल्ल, अनुत्सुक, सोल्लास. 2 विलासिन्, परिहासशील, विनोदन-शील-पर, केलिपर. 3 Gaudy, q. v. -GAIETY, *s.* प्रमोदः, उल्लासः, प्रहर्षः, आनंदः, आह्लादः. 2 उत्सवः; *See* FESTIVAL. -GAILY, *adv.* सहर्षं, सोल्लासं, सानंदं, प्रफुल्लतया. 2 उज्ज्वलं, शोभनं.

GAZE, *v. i.* निर्-ईक्ष् 1 A, निर्वर्ण् 10, निध्यै 1 P, बद्ध-स्थिर-दृष्ट्या दृश् 1 P or आलोक् 1 A, 10; दृष्टिं or लक्षं बंध् 9 P (loc.); 'g. ing up to heaven' नभोदत्तदृष्टिः; 'g. ing in all directions' दिक्षु दृष्टिं क्षिप्त्वा. -*s.* निरीक्षणं, निर्वर्णनं, आ-अव-लोकनं; दृष्टिः *f.*, प्रेक्षणं, दर्शनं; बद्ध-स्थिर-अनिमेष-दृष्टिः; 'with a fixed g.' अनिमेषनयन-बद्धदृष्टि *a.*

GAZETTE, *s.* वार्ताहरः, वार्तापत्रं.

GEAR, *s.* उपकरणं, सामग्री, सज्जा, प्रसाधनं. 2 कार्यं, व्यापारः; 'out of g.' विलग्न, असंगत, असंबद्ध.

GELATINOUS, *a.* सांद्र, क्षीण, श्यान, संलग्नशील.

GELD, *v. t.* वृषणौ छिद् 7 P or कृत् 6 P or उत्पट् 10. -ING, *s.* छिन्नमुष्कः (अश्वः).

GELID, *a.* अतिशीत, हिम, शिशिर.

GEM, *s.* रत्नं, मणि *m. f.* 2 Bud, q. v. -*v. t.* रत्नैः शुभ् c. -MED, *a.* रत्नखचित, मणिभूषित, रत्नानुविद्ध. -MY, *a.* मणिमय (यी *f.*), रत्नभासिन्, रत्नोज्ज्वल.

GEMMATE, *a.* मुकुलित, बद्धपल्लव.

GEMINI, *s.* मिथुनं, द्वंद्वं, युगुलं, युगं, युग्मं, द्वयं, यमकं; यमौ, यमजौ -लौ. -GEMINATE, -GEMINOUS, *a.* द्विगुण, द्विरावृत्त, द्विक; यम, यमज-ल.

GENDER, *s.* लिंगं, प्रकृति *f.* -*v. t.* Beget, q. v. -*v. i.* Copulate, q. v.

GENEOLOGY, *s.* वंशावलि-ली *f.*, वंशक्रमः, वंशश्रेणी-परंपरा-वृक्षः; oft. ex. by वंशः, अन्वयः. -ICAL, *a.* (*s.*) in comp. -IST, *s.* अन्वयज्ञः, वंशक्रमज्ञः, वंशावलिरचकः.

GENERAL, *a.* सामान्य, साधारण, सर्वजनीय-न,सार्वत्रिक-सार्वलौकिक-औत्सर्गिक-(की *f.*), सर्व-बहु-सामान्य, व्यापक, सर्वव्यापिन्, अविशेषक, प्रायिक, सर्वत्र प्रचलित; 'a g. rule' उत्सर्गः; 'a g. practice' लोकाचारः, जनरूढि *f.*, जनव्यवहारः, लोकः; 'against g. practice' लोकविरुद्धं; 'g. opinion' बहुमतं; 'g. reader' चुंबकः. -*s.* सेनापतिः, सेनाध्यक्षः, चमूपतिः, सेनानीः, बलाध्यक्षः-नायकः. -ITY, *s.* बहुतरभागः, मुख्यांशः, प्रधानभागः; better by 'g. ly'; 'the g. of beasts' प्रायः सर्वे पशवः. 2 सामान्यता, साधारण्यं. -IZE, *v. t.* जातीः निर्दिश् 6 P, जातिज्ञः गणीकृ 8 U, साधारणधर्मं प्रदृश् c., वर्गीकृ. 2 सामान्यतः वद् 1 P, उन्मुर्गरूपेण कथ् or निरूप् 10. -IZATION, *s.* जातिनिर्देशः, गणीकरणं, सामान्यधर्मैककथनं, सामान्यवादः. -LY, *adv.* 'in g.' प्रायः, प्रायेण, प्रायशः, सामान्यतः, बहुशः, भूयसा, भूयिष्ठं, साधारण्येन; oft. ex. by हि. -NESS, *s.* व्यापकत्वं, सामान्यता. -SHIP, *s.* सैनाप्तत्यं, सेनाध्यक्षत्वं. 2 रणकौशलं, युद्धनैपुण्यं, बलविन्यासकौशलं.

GENERATE, *v. t.* उत्पद् c., प्र-सू 2, 4 A, आवह् 1 P, सं-उद्-भू c., जन् c. (जनयति); *See* CAUSE also. -ION, *s.* उत्पादनं, प्रसवः, जननं, जन्मन् *n.*, उत्पत्ति *f.*, प्रसूति *f.*, संभवः, उद्भवः. 2 अन्वयः, कुलं, वंशः, जाति *f.*, संतानः, संतति *f.* 3 पुरुषाः, पुरुषपरंपरा, वंशश्रेणी; 'former g. s.' पूर्वे पुरुषाः; 'a pair, one g. removed from the creator' स्रष्टुरेकांतरं (द्वंद्वं) (S. 7). 4 समकालीनपुरुषाः. -IVE, *a.* उत्पादक, जनक; 'g. organ' उपस्थः; योनि *f.* -OR, *s.* जनयितृ *m.*, जनकः, उत्पादकः,जन्मप्रदः-दाता.

GENERIC,-AL, *a.* जातिगत, सामान्य, साधारण, व्यापक, वर्गीय; 'g. property' जातिधर्मः-लक्षणं-स्वभावः, जातित्वं, सामान्यधर्मः-लक्षणं. -ALLY, *adv.* जातिमुद्दिश्य, सामान्यतः.

GENEROUS, *a.* उदार, वदा(द्)न्य, त्यागशील, अवदात, दानशील, दानरत, दानशौंड, स्थूललक्ष्य, बहुप्रद. 2 महात्मन्, उदारधी-चेतस्, महामनस्, उदारचरित, महेच्छ, महाशय. 3 कुलीन, महाकुल. अभिजात. -NESS, -GENEROSITY, *s.* औदार्यं, त्यागिता, त्यागः, दानशीलं, वदान्यता. 2 उदारात्मता, महात्मता, माहात्म्यं.

GENIAL, *a.* सुखप्रद, आनंदद, सुखावह, रम्य, रमणीय, मनोहर-रम, रुचिर, प्रसन्न, सुखकर (री *f.*), उत्साहवर्धक, जीवद. 2 प्रसवकारिन्, जनक. 3 प्रसन्नचित्त, सोल्लास, उदार. -LY, *adv.* प्रसन्नं, सानंदं, सहर्षं, सोल्लासं, प्रफुल्लं. -NESS, *s.* रम्यता, उल्लासः, प्रसादः, प्रसन्नता.

GENICULATED, *a.* ग्रंथिल.

GENITAL, *a.* जननसंबंधिन्, जनन in comp.; 'g. organ' जननेंद्रियं, उपस्थः, योनि *f.*, शिश्नं.

GENITIVE, *s.* षष्ठी विभक्तिः.

GENITOR, *See* GENERATOR.

GENIUS, *s.* धीशक्ति *f.*, मति *f.*, बुद्धि *f.*, धीः, मतिबुद्धि-प्रभावः-सामर्थ्यं, मतिप्रकर्षः. 2 धीसंपन्नः, धीमत् *m.*, धीशक्तियुतः, गुणवत् *m.* 3 कल्पना-निर्माण-शक्तिः. 4 प्रकृति *f.*, स्वभावः, शीलं. 5 लक्षणं, विशेषचिह्नं, वृत्ति *f.*, स्वधर्मः. 6 भूतः, पिशाचः, वेतालः; *See* DEMON; 'dramatic g.' नाट्यशक्तिः-कल्पना; 'good g.' सुदैवं; 'evil g.' दुर्दैवं.

GENTEEL, *a.* विनीत, दक्षिण, सभ्य, सुजन, सुशील, आर्य, आर्य-साधु-वृत्त, शिष्टाचार, आर्यचरित, सदाचार. 2 कुलीन, अभिजात, कुलोत्पन्न. 3 चारु, ललित, सुभग. -LY, *adv.* आर्यवत्, सुजनवत्. -NESS, -GENTILITY, *s.* विनयः, दाक्षिण्यं, आर्यता, सौजन्यं, सुशीलता, सभ्यता, साधुता. 2 आभिजात्यं, कुलोत्कर्षः. 3 लालित्यं, चारुता.

GENTIAN, *s.* किरातः, चिर(रा)तिक्तः, भूनिंबः, हिमकः, किराततिक्तः, अनार्यतिक्तः.

GENTILE, *a.*, *s.* अन्य-भिन्न-देशीय, दैवार्चक. 2 सगोत्र, गोत्रज, ज्ञातीय.

GENTLE, *a.* भद्र, कल्याण (णी *f.*), शिव, सुख. 2 कोमल, मृदु, मसृण, अपरुष, सुकुमार, अचंड, मृदुल, मंद, सौम्य; 'a g. laugh' मंदस्मितं, ईषद्धासः; 'g. breeze' मंदानिलः, मृदुपवनः; 'g. means' सामोपचारः, सामन् *n.*, मृदूपायः; 'g. words' प्रिय-मृदुवचनं. 3 महाकुल, कुलीन, अभिजात, सुजन्मन्, साधु-आर्य-वंशज, कुल in comp.; 'a girl of g. blood' कुलकन्यका, कुलप्रसूता. 4 (In addressing) अयि, भद्र, सौम्य, आर्य; 'g. lightning' अयि विद्युत्; 'g. folk' आर्यमिथाः, आर्याः, साधुजनाः. 5 शांत, दांत. -NESS, *s.* मृदुता, कोमलता, सौम्यता, सौकुमार्यं, मंदता; 'g. of manners' आचारसौजन्यं, आर्यवृत्तिः. -GENTLY, *adv.* मृदु, सदयं, अजातव्यथं, यथासुखं; 'shall rub g.' यथासुखं संवाहयामि (S. 3). 2 मंदं मंदं, शनैः शनैः, शनैः, अपरुषं, अचंडं. 3 निभृतं, अलक्षितं, मंदं. -GENTLEMAN, *s.* आर्यः, सुजनः, साधुजनः, आर्यवृत्तः, कुलीनः; सुविनीतः, महाजनः, आर्य-कुलीन-जनः, भद्रः, महानुभावः; oft. by श्री in comp. -LIKE,-LY, *a.* सभ्य, विनीत, शिष्ट, सुशील, आर्य; 'g. manner' आर्यवृत्तिः, सौजन्यं; 'in a g. manner' नागरिकवृत्त्या (S. 5).

GENTRY, *s.* विशिष्टजनाः, आर्याः, आर्यलोकाः-जनाः, कुलीनवर्गः-जनाः, सुजनता.

GENUFLECTION, *s.* जानुभ्यां आनतिः *f.*, जानुनतिः.

GENUINE, *a.* अकृतक, अकृत्रिम, अकल्पित, निर्व्याज, निर्व्यलीक, अकपट, निष्कपट, अवितथ, सत्य, यथार्थ. -LY, *adv.* सत्यं, निष्कपटं, निर्व्याजं. -NESS, *s.* सत्यता, यथार्थता, निर्व्याजत्वं, अकृत्रिमता.

GENUS, *s.* जातिः *f.*, गणः, वर्गः.

GEOGRAPHY, *s.* भूगोलविद्या-शास्त्रं, भूवृत्तविद्या. -ER, *s.*

भूगोलज्ञानज्ञः, भूपृष्ठविद्याज्ञः. -ICAL, *a.* भूगोलज्ञानविषयक.

GEOLOGY, *s.* भूतत्त्वं, भूगर्भशास्त्रं, भूतत्त्वविद्या. -ICAL, *a.* भूतत्त्वविषयक. -IST, *s.* भूतत्त्वज्ञः.

GEOMETRY, *s.* ज्यामिति *f.*, रेखागणना-गणितं, भूमितिः. -IC,-ICAL, *a.* (*s.*) in comp.; 'g. proof' रेखागणितेन उपपत्तिः. -ICIAN, *s.* भूमितिज्ञः.

GERM, *s.* अंकुरः, अभिनवोद्भिद् *m.* 2 बीजं, मूलं, योनि *f.*, आदिः, प्रभवः, बीजकारणं. -GERMINATE, *v. i.* उद्भिद् pass., प्ररुह् 1 P, स्फुट् 6 P, विकस् 1 P. -ING, *a.* उद्भिद्-द्-ज्ज, अंकुरित. -ION, *s.* उद्भेदः, स्फुटनं.

GERMANE, *a.* सनाभि, संपर्किन्, संपृक्त.

GESTICULATE, *v. i.* अंगानि विक्षिप् 6 P or संचल् c. -*v. t.* अभि-नी 1 P, नि-,रूप् 10, सूच् 10, नट् 10; *See* ACT. -ION, *s.* अभिनयः, अंगविक्षेपः, चेष्टा, सूचना, अंगहारः, हावः, संकेतसूचनं. -OR, *s.* अंगविक्षेपकः.

GESTURE, *s.* चेष्टा, व्यापारः, इंगितं, भावः, अभिनयः, विलासः, विभ्रमः, अंगविक्षेपः, हावः, हस्तादिचालनं.

GET, *v. t.* लभ् 1 A, आप् 5 P, अर्ज् 1 P or c., आ-समा-सद् c., विद् 6 U, प्रति-आ-पद् 4 A, अश् 5 A, अधिगम् 1 P, ग्रह् 9 P, आ-दा 3 A. 2 (To be produced) जन् 4 A, उत्पद् 4 A, सं-उद्-भू 1 P, प्र-सू 2, 4 A, (with genitive of person); 'I have got a pain in my teeth' दंतपीडा मे उत्पन्ना-जाता. 3 भू 1 P, 10, भृ 3 U; धा 3 U; 'I have got that book with me' तत्पुस्तकं मत्सकाशे वर्तते; *See* BEAR also. 4 (Cause) ex. by causal; 'g. it done by him' तं तत्कारय; oft. by अनुज्ञा 1 P, प्रोत्सह् c., प्रवृत् c.; 'g. ahead' अग्रेसरीभू; 'g. clear of' मुच् pass.; 'g. rid of' आत्मानं मुच् c., (with abl.); by निर् in comp.; 'g. abroad' प्रस्-प्रसृप् 1 P, बहुलीभू 1 P; *See* under ABROAD. -among, मध्ये प्रविश् 6 P or गम्. -at, प्राप्, आगम्, आ-या 2 P, उप-स्था 1 U. -away, अपसृ 1 P, अप-इ 2 P, अपक्रम् 1 U, 4 P; चल् 1 P, अप-या-गम्; 'g. away, you fool' अपेहि रे मूर्ख. -back, प्रतिलभ्, प्रत्या-दा, &c. -beyond, तृ 1 P, अति-इ, अतिक्रम्. -down, अवतृ, अवरुह् 1 P, अधो गम्, नि-अव-पत् 1 P; (*v. t.*) अवतृ c., अवरुह् c., &c. -in, प्रविश् 6 P. -into, पत्; संकटे पतितः 'got into troubles'; आरुह् 1 P (a car &c.); 'he got into debt' ऋणग्रस्तो बभूव; 'g. ing into deep mud' पंकपूरमासाद्य. -off, (*v. i.*) निः-इ, निर्गम्, अप-या, अपक्रम्, निस्तृ. 2 अवतृ, अवरुह्; (*v. t.*) निरस् 4 U, अप-नी 1 P. -on, प्रवृत् 1 A, प्रचल्, प्र-इ; 'they long got on well' चिरं ते सुखेन अवर्तंत or कालं निन्युः. -out, निर्गम्, अप-इ, निः-सृ. 2 त्यज् 1 P, मुच् 6 P; 'g. out of bed now' अधुना मुंच शय्यां. -over, -through, संतृ; पारं-अंतं-गम्, अतिक्रम्, निस्तृ, तीर् 10; आरुह्. 2 समाप् c.; *See* COMPLETE. -together, संचि 5 U; समा-नी, संग्रह्; *See* COLLECT. -up, उद्-स्था; प्रबुध् 4 A, शयनं त्यज् 1 P or मुच्; (*v. t.*) सज्जीकृ 8 U, विरच् 10; उपकृप् c. -upon, अधि-आ-रुह्. -TER, *s.* प्रापकः, लम्भ् *m.*, अर्जकः. -TING, *s.* लाभः, अवाप्ति *f.*, अर्जनं, अधिगमः-मनं, आगमः, आसादनं.

GEWGAW, *s.* क्रीडनकं, अल्पमूल्यं द्रव्यं or आभरणं. -*a.* निःसार, बहिरेव मनोहर.

GHASTLY, *a.* प्रेत-शव-तुल्य, विवर्ण, शवसरूप-सवर्ण. 2 कराल, विकट, भीम, उग्र, दारुण, भयानक, भीमदर्शन, करालवदन, घोराकृति. -NESS, *s.* प्रेतसारूप्यं, वैवर्ण्यं; विकटत्वं, दारुणत्वं.

GHEE, *s.* घृतं, आज्यं, हविस् *n.*, सर्पिस् *n.*, तनूनपं.

GHOST, *s.* भूतः, पिशाचः, वेतालः, निशाचरः, प्रेतनरः. 2 आत्मन् *m.*; 'give up the g.' मृ 6 A; *See* DIE. -LIKE, *a.* प्रेत-भूत-सरूप, प्रेततुल्य. -LY, *a.* भूतविषयक-संबंधिन्. 2 पारत्रिक (की *f.*), आत्मविषय, पारमार्थिक (की *f.*).

GIANT, *s.* महापुरुषः, विकटविग्रहः, बृहच्छरीरः, भीमविग्रहः, बृहत्कायः, अतिशक्त्युपेतः, राक्षसः. 2 दैत्यः, दानवः; *See* DEMON. -*a.*,-LIKE, *a.* अतिस्थूल, प्रकांडदेह, स्थूलप्रमाण, अतिमहत्, बृहत्काय, महाशरीर, विकट. -ESS, *s.* राक्षसी, बृहच्छरीरा. -GIGANTIC, *a.* अतिमानुष (षी *f.*), राक्षसपरिमाण, भीमविग्रह, अतिमहत्-बृहत्, स्थूलकाय, विकट.

GIBBER, *v. i.* *See* BABBLE. -ISH, *s.* असंबद्धवचनं, प्रलापः, प्रजल्पितं, मृषार्थकं वाक्यं -*a.* मृषार्थकं, अनर्थकं.

GIBBET, *s.* वध्यकाष्ठ-शिला, वध-घात-स्थानं. -*v. t.* वधं आदिश् 6 P, उद्-बंध् 9 P.

GIBBOUS, *a.* न्युब्ज, वक्र, आभोगवत्, विवाकार.

GIBE, *See* ABUSE.

GIDDY, *a.* भ्रमिन्, भ्रामररोगिन्, विभ्रांत, भ्रमणशील; better ex. by भ्रम् 1, 4 P. 2 भ्रमकारिन्, मत्त, उन्मादिन्. 3 (Fig.) चपल, चंचल, लोल, अस्थिर; *See* FICKLE. 4 उद्धत, उन्मत्त, उत्सिक्त, गर्वित. -LY, *adv.* अविचार्य, लौल्यात्, चापल्येन. -NESS, *s.* भ्र-(भ्रा)मरं, भ्रमः-मि *f.*, घूर्णनं, घूर्णि *f.* 2 चापल्यं, लौल्यं, अस्थैर्यं, &c.

GIFT, *See* under GIVE.

GIG, *s.* भ्रमरं. 2 लघुयानं-रथः. 3 क्षुद्र-लघु-नौका.

GIGGLE, *v. i.* मूर्खवत् हस् 1 P.

GILD, *v. t.* स्वर्णेन रंज् c., हेमरसेन-द्रवेण लिप् 6 P, सुवर्णयति (D.); बाह्यतेजसा रंज् c. 2 प्रकाश् c. विद्युत् c., विराज् c. -ING, *s* स्वर्णरंजनं, स्वर्णच्छदः.

-ED,-GILT, *a.* सुवर्णित, हेमरसलक्षित, स्वर्णमंडित, स्वर्णप्रतिबद्ध. 2 रंजित, विराजित.

GILL, *s.* घ्राणेंद्रियं, अधोगंडः.

GIMCRACK, *s.* क्रीडनकं, क्रीडावस्तु *n.*

GIMLET, *s.* वेधनिका, आस्फोटनी.

GIN, *s.* Liquor, q. v. 2 पाशः, उन्नाथः, कूटयंत्रं, बंधनं, वागुरा.

GINGER, *s.* आर्द्रकं, शृंगवेरं, गुल्ममूलं; 'dry g.' शुंठि-ठी *f.*, विश्व-श्वा *f.*, नागरं, विश्वभेषजं, महौषधं; 'g. beer or wine' आर्द्रकासवं, आर्द्रकमद्यं-पानं; 'g.-bread' आर्द्रकपिष्टकः.

GINGERLY, *adv.* असहसा, सावधानं, शनैः.

GINGLE, *See* JINGLE.

GIPSY, *s.* यक्षिणी, विप्रश्निका, ईक्षणिका.

GIRAFFE, *s.* खिन्नोष्टुः.

GIRD, *v. t.* परि-अधि-वेष्ट् c., परि-वृ 5 U or c. 2 आ-बंध् 9 P, परि-धा 3 U, सं-पि-नह् 4P; 'g. round the body' शरीरं प्रावृ or आच्छद् 10, परि-बंध् or परि-धा; 'g. up one's loins' परिकरं बंधु; 'girt by the (golden) lightning, as by a yellow garb' विद्युत्प्रभारक्षितपीतपटोत्तरीयः (Mr. 5). -*s. See* CRAMP. -ED,-GIRT, *a.* बद्ध, आनद्ध, परिवेष्टित, परिवृत; वलय-मेखला-रसना in comp.; 'sea-g. earth' समुद्ररसना-उदधिवलया-पृथ्वी.

GIRDLE, *s.* मेखला, रश(स)ना, कांचि-ची *f.*, सप्तकी, सारसनं (of women); कटिसूत्रं, कटिवलयं, कट्याक्षा, परिकरः, काटिबंधनी, शृंखलः-ला-लं (of men). 2 वेष्टनं, परि-आ-वेष्टनं, मंडलं, वलयः-यं, चक्रवालं. 3 राशिचक्रं. -*v. t.* परि-वेष्ट् c., परि-वृ 5 U, मेखलया बंध् 9 P; *See* GIRD.

GIRL, *s.* कन्या, बाला, बालिका, कुमारी, दारिका, वासूः, *See* DAUGHTER also; 'one born from a g.' कानीनः; कन्यकाजातः. -HOOD, *s.* बालभावः, बाल्यं, कुमारीत्वं. -ISH, *a.* कन्यानुरूप, बालेय.

GIRTH, *s.* वरत्रा, नद्धी, वध्री; दू(चू)ष्या, कक्षा-क्ष्या.

GIST, *s.* फलितार्थः, निष्कर्षः, भावः, फलितं, परमार्थः, पिंडितार्थः.

GIVE, *v. t.* दा 1 P, 3 U, क्र c. (अर्पयति), प्रति-पद् c., दद् 1 A, विश्राण् 10, उत्-वि-सृज् 6 P, (with dat. of person); निक्षिप् 6 P, संक्रम् c. (with loc.); त्यज् 1 P, दिश् 6 P. 2 (Produce) ex. by भू 1 P, संपद् 4 A, जन् 4 A; '3 repeated 2 times g. s 6' द्विरावृत्तात्रयः षड् भवंति-संपद्यंते; 'g. chase' अनुसृ-अनुधाव् 1 P; 'g. ear' अवधा 3 U, कर्णं दा, श्रु 5 P; 'g. ground' अपक्रम् 1 U, 4 P; अपसृ, परा-नि-वृत् 1 A; त्यक्त्वा गम् 1 P; 'g. one's self up to' सेव् 1 A, भज् 1 A; आसंज् pass., आसक्त-निरत-निविष्ट-*a.* भू, (with loc.); 'g. offence' अपराध् 4, 5 P, विप्रियं-अति-क्रमं-कृ 8 U or आचर् 1 P; 'g. utterance' उदीर् 10, उच्चर् c., उदाह् 1 P. -away, (in marriage) प्रतिपद् c., उत्सृज्, प्र-दा. 2 विश्रण्, दानेन क्षे c. (क्षपयति). -back, प्रतिदा, प्रति-क्ष c., निर्यम् 10. -forth, प्रथ् 10, प्रकाश् c., निविद् c., ख्या c. (ख्यापयति). -in, अनुमन् 4 A, अनुमुद् 1 A; स्वामहं त्यज्. -off, Abandon, q. v. -out, निविद् c., प्रकाश् c., घुष् 10, प्रथ् 10, प्र-ख्या c. 2 मुच् 6 P, विसृज्, उद्गम् 1 P, उद्-गृ 6 P, निःसृ c.-over, त्यज्, उत्सृज्; निवृत् 1 A, विरम् 1 P, (with abl.). 2 असाध्य *a.* इति मत्वा त्यज्; आशां त्यज्; (*v. i.*) शम् 4 P, पत् 1 P; 'when the winds g. over' शांते पवने. -up, त्यज्, हा 3 P, उत्-वि-सृज्. 2 निवृत्, विरम्; 'g. up for lost' नष्टप्राय *a.* मन् 4 A. -way, शम् 4 P, निवृत्, विरम्, शिथिलीभू. 2 भंज् pass., अवसद् 1 P; 'the cord gave way' रज्जुर्भग्ना; 'the wall gave way' भित्तिरवसन्ना. 3 अव(प)ह, अप-इ, मार्गं दा or त्यज्, अपक्रम्, अप-या. 4 वशं गम्-इ-या, अधीन-वश-आयत्त *a.* भू; 'do not g. way to grief' शुचो वशं मा गमः, शोकाधीनो मा भूः, वैक्लव्यं मावलंबस्व. -ER, *s.* दातृ *m.*, त्यागिन् *m.*; gen. ex. by दायक, द, प्रद, दायिन्, in comp.; 'g. of milk' पयोदायिनी, दुग्धप्रदा, &c. -ING, *s.* दानं, विसर्जनं, उत्सर्गः, त्यागः, वितरणं, अर्पणं, प्रतिपादनं, विश्राणनं. -GIFT, *s.* दानं, प्रतिपादनं; *See* above. 2 दानं, उपहारः, उपायनं, उपदा, प्रीतिदानं, प्राभृतं, प्रदेशनं, उपग्राह्यं; 'one deserving a g.' दक्षिणीय, दक्षिणार्ह, दक्षिण्य; 'marriage-g.' यौतकं, सुदायः. 3 गुणः, शक्ति *f.* -ED, *a.* उपेत, सं-उप-पन्न, विशिष्ट, युक्त, अन्वित, शालिन् in comp. 2 गुणोपेत, गुणसंपन्न, गुणिन्, गुणवत्.

GLACIAL, *a.* हिमरूप, हैम (मी *f.*), हिम.

GLACIER, *s.* हिमानी, हिमसंहति *f.*

GLACIS, *s.* प्रवण-निम्न-भूमि *f.*

GLAD, *a.* प्र-,सं-,हृष्ट, आनंदित, प्रीत, सानंद, प्रमुदित, तृप्त, सोल्लास, उल्लसित, प्रसन्न. 2 हर्षजनक, हर्ष-आनंदकर (री *f.*); नंदक, रमणीय, प्रमोदिन्; 'I am g.' हंत, दिष्ट्या. -DEN, *v. t.* आ-,नंदू c., भी 9 P, 10; *See* DELIGHT. -DENING, *a.* हर्षद, प्रीतिप्रद, हर्षकर, प्रमोदिन्. -LY, *adv.* सहर्षं, सानंदं, सप्रमोदं, हृष्टमनसा, संतोषेण, प्रीत्या, साह्लादं. -NESS, *s.* हर्षः, प्रमोदः, आह्लादः, संतोषः, प्रीति *f.*, उल्लासः, चित्तप्रसादः, तुष्टि *f.* -SOME, *See* (*a.*).

GLADE, *s.* वन-गुल्म-पथः-मार्गः, तरुगहनमार्गः.

GLADIATOR, *s.* असिक्रीडकः, आसिकः, मल्लः. -GLADIATURE, असिक्रीडा-युद्धं.

GLAIR, *s.* अंडसृक्कं.

GLANCE, *s.* दृष्टिपातः, ईक्षणं, वीक्षितं, नयनपातः-वि-

क्षेपः, दृक्पातः, आलोकितं; 'side-long g.' नयनोपांतविलोकितं; साचिविलोकितं, अपांगदर्शनं-दृष्टि f., कटाक्षः; 'at the very first g.' सकृद्दृष्टिपातेन, प्रथममेव; 'good at the first g.' आपाततो रमणीय, आपातरमणीय. 2 अर्धवीक्षणं, ईषद्दृष्टिः. 3 स्फुरितं, स्फुरणं, द्युति f. —v. i. दृष्टिं क्षिप् 6 P, चक्षुः-दृष्टि-दा 3 U or पत् c. (with loc.); 'g.-ing at the antelope' कृष्णसारे ददच्चक्षुः (S. 1). 2 लघु निर्धृष् 1 P, लघु हत्वा अति-इ 2 P. 3 (जवेन) धरिस्फुर् 6 P or विलस् 1 P. —INGLY, *adv.* लघु, ईषत्, अल्पमात्रं, स्तोकं. 2 दृक्पातेन, तिर्यक्, साचि, कटाक्षेण.

GLAND *s.* अधिमांसं, मांसपींडः, पिंडः.

GLANDERS, *s.* क्षयथुः.

GLARE, *s.* तेजस् *n.*, दीप्तिः *f.*, द्युतिः *f.*, प्रखर-अतितेजः, अतिप्रभा-द्युतिः-दीप्तिः, नेत्रप्रतिघातिनी प्रभा. 2 उग्रदृष्टिः *f.*, क्रोधोद्धदृष्टिः —v. i. संदीप् 4 A, प्रद्युत् 1 A, उज्ज्वल् 1 P, अतितेजसा स्फुर् 6 P or दृष्टिं प्रतिहन् 2 P or संतप् c.; दीप् freq. (देदीप्यते). 2 उग्रदृष्टिं पत् c., कोपेन दृश् 1 P or ईक्ष् 1 A. —ING, *a.* संदीप्त, उज्ज्वल, अतिभास्वत्, देदीप्यमान. 2 सुस्पष्ट, सुप्रकाश, प्रत्यक्ष, पुरःस्फुरत्. —INGLY, *adv.* सुस्पष्टं, सुप्रकाशं.

GLASS, *s.* काचः, स्फटिकः, क्षारः. 2 (Cup) चषकः-कं, काचपात्रं-भाजनं. 3 आदर्शः, दर्पणः, मुकुरः. —*a.* काचमय (यी *f.*), काचनिर्मित, काच in comp.; 'g.-blower' काचधमकः; 'g.-grinder' काचपरिष्कारकः; 'g.-house' काचनिर्माणशाला-स्थानं; 'g.-man' काचविक्रयिन् *m.*; 'g.-work' काचनिर्माण-कर्म. —LIKE, *a.* काचोपम, काचतुल्य. —Y, *a.* स्फटिकोपम, काचवत्स्वच्छ, काचविमल, स्फटिकप्रभ, स्फाटिक (की *f.*), सुप्रसन्न. 2 श्लक्ष्ण, स्निग्ध. —GLAZE, *v. t.* काचयति (D.), काचेन आच्छद् 10. 2 श्लक्ष्णीकृ 8 U, स्निग्धीकृ, श्लक्ष्णयति (D.). —*s.* स्निग्धता, श्लक्ष्णता. —GLAZIER, *s.* काचसंधातृ *m.*, काचबंधकः.

GLAUCOUS, *a.* घनश्याम, मेघनील, समुद्रवर्ण.

GLEAM, *v. i.* परि-,स्फुर् 6 P, विलस् 1 P, क्षणमात्रं प्रकाश् 1 A or उज्ज्वल् 1 P; *See* SHINE also. —*s.* प्रभा, कांति *f.*, तेजस् *n.*, औज्ज्वल्यं. 2 स्फुरणं, स्फुरितं, क्षणप्रभा-कांतिः, अचिरप्रभा, क्षणज्योतिस् *n.* 3 रश्मिः, करः, किरणः, अंशुः; 'not a g. of hope' न आशालवोपि. —Y, *a.* क्षण-अचिर-प्रभ, चलद्युति, कंपितप्रभ, क्षणद्योतिन्.

GLEAN, *v. t.* (bits &c.) उंछ् 6 P, शिल् 6 P, उद्-ध्रस् 9 P or c., अवशेषं चि 5 U or संग्रह् 9 P. 2 संकल् 10, संग्रह्, उद्धृ 1 P. —*s.* धान्यशेषः, शेषधान्यसंचयः. —ER, *s.* उंछशीलः-वृत्तिः, उंछनकृत् *m.* 2 संग्रहीतृ *m.* —ING, *s.* उंछः, शिलं, उंछशिलं, ऋतं. 2 संग्रहः, संकलनं, उद्धारः.

GLEBE, *s.* मृद् *f.*, मृत्तिका; स्थलं-ली, भूमि *f.*

GLEE, *See* DELIGHT.

GLEET, *s.* इक्षु-मधु-मेहः, मेहविकारः.

GLEN, *s.* दरी, कंदरः-रा; अद्रिद्रोणी, उपत्यका.

GLIB, *a.* वाक्चपल, त्वरित-द्रुत-वाच्, चपल, लोल. 2 पिच्छिल, मसृण, स्निग्ध, श्लक्ष्ण, चिक्कण. —*v. t.* Castrate, q. v. 2 श्लक्ष्णीकृ 8 U. —LY, *adv.* चपलतया, वाक्चापल्येन. 2 श्लक्ष्णं. —NESS, *s.* वाक्चापल्यं, चापल्यं 2 श्लक्ष्णता, मसृणता.

GLIDE, *v. t.* सृप् 1 P, सं-वि-प्र°, प्र-वि-द्रु 1 P; मंदं इ-या 2 P or गम् 1 P, शनैः प्रसृ or चल् 1 P; अलक्षितं-निभृतं गम् or या or अति-इ; *See* STEAL. 2 वह् 1 P, स्रु 1 P, स्रंद् 1 A, री 4 A. —ING, *s.* संसर्पः-र्पणं, स्रदणं, निस्यंदः-दनं.

GLIMMER, *v. i.* मंदं मंदं ज्वल् 1 P or दीप् 4 A; मंदप्रभया-अचिरप्रभया प्रकाश् 1 A or द्युत् 1 A or स्फुर् 6 P. —*s.*, GLIM, *s.* मंदप्रभा-तेजस् *n.*, मंद-अचिर-द्युति *f.*-दीप्ति *f.*, स्फुरणं, स्फुरितं. —ING, *a.* मंदप्रभ-द्युति-तेजस, ईषत्स्फुरित, पांडुद्युति-किरण, मंदच्छाय. 2 मंद, असुप्रकाश, अव्यक्त, अस्पष्ट.

GLIMPSE, *s.* क्षण-मुहूर्त-दर्शनं; ईषद्दृष्टि *f.*, अर्धवीक्षणं, अल्पो दृक्पातः. 2 क्षण-अचिर-प्रभा; *See* GLEAM.

GLISTEN, GLISTER, *v. i.* स्फुर् 6 P, प्रकाश् 1 A, द्युत् 1 A. —ING, *a.* मसृण, चिक्कण, श्लक्ष्ण, स्निग्ध.

GLITTER, *v. i.* द्युत्-प्रकाश् 1 A; भास् 1 A, भा 2 P; स्फुर् 6 P; *See* SHINE. —*s.* दीप्ति-द्युति-रुचि-कांति *f.*, प्रभा, तेजस् *n.*, ज्योतिस् *n.*, वर्चस् *n.*, आभा. —ING, *a.* प्रभावत्, उज्ज्वल, भासमान, विद्योतिन्, भासुर.

GLOAT, *v. i.* संतृप् 4 P, संतुष् 4 P; आत्मानं संतृप् c. or संतुष् c., लोभाद् निरीक्ष् 1 A or निर्वर्ण् 10.

GLOBE, *s.* गोलः-लं; वर्तुलः-लं; मंडलं; चक्रं. 2 भूमंडलं, भूगोलः, क्षितिमंडलं-तलं. —GLOBATE, -GLOBULAR, *a.* वर्तुल, गोलाकार, गोलाकृति, वृत्त, निस्तल, मंडलाकार, गोल. —LY, *adv.* मंडलरूपेण, मंडलवत्, गोलाकारेण. —GLOBULE, *s.* बिंदुः, लघुगोलः, गोलकः.

GLOMERATE, *v. t.* मंडलीकृ 8 U, गोलीकृ, पिंडीकृ.

GLOOM, *s.* अंधकारः, तमस् *n.*, तमिस्रं-स्रा, तिमिरं, ध्वांतं; अवतमसं, ईषत्तमः (partial g.). 2 निष्प्रभत्वं, विषादः, छाया. —*v. t.* Darken, q. v. —GLOOMY, *a.* सतिमिर, तमोवृत, सांधकार, तिमिरावगुंठित. 2 दुर्दर्शन, मलिनप्रभ, अप्रभ, निष्प्रभ, निरालोक, मलिन. 3 विषण्ण, दीन, अवसन्न, सविषाद, निरानंद, म्लान, खिन्न, उद्विग्न. —LY, *adv.* निष्प्रभं, सांधकारं. 2 सविषादं, सखेदं, सोद्वेगं. —NESS, *s.* निष्प्रभत्वं, &c. 2 विषादः, दैन्यं, अवसादः, चित्तोद्वेगः, खेदः, म्लानता, उद्वेगः.

GLORY, *s.* कीर्ति *f.*, यशस् *n.*, ख्याति *f.*, विश्रुति *f.*, महिमन् *m.*, प्रतापः, ओजस्विता. 2 श्रीः, तेजस् *n.*,

शोभा, द्युति *f.*; 'g. of youth' यौवनश्रीः. 3 माहात्म्यं, गौरवं, प्रतिष्ठा, पूजा, मानः. 4 प्रशंसा, स्तुति *f.*, श्लाघा, स्तवः, स्तुतिवाक्यं. 5 रत्नं, अवतंसः, तिलकः, ललामं. 6 Absolution, q. v.; 'vain g.' अहंकारः, विकत्थनं-ना, दर्पः, गर्वः, आत्मश्लाघा; 'g. to you, Oh king' जयतु जयतु देवः; 'g. of victory' जयोदाहरणं. —*v. i.* अत्यंतं प्रभुद् 1 A or आनंद् 1 P, उल्लस् 1 P; 'you g. in disobeying your father' पितुरवज्ञानं आत्मगौरवं मन्यसे. 2 विकत्थ् 1 A, दृप् 4 P, आत्मानं श्लाघ् 1 A; 'I do g. in that name' तन्नामधारी कृतिनमात्मानं मन्ये खलु. —GLORIFY, *v. t.* उत्-सं-कृष् 10, प्रशंस् 1 P, श्लाघ्, स्तु 2 U; गुणान् वर्ण् 10 or कृत् or प्रकाश् c., कीर्तिं नी 1 P. 2 स्वर्गं आरुह् c., परमपदं प्राप् c. —ICATION, *s.* गुणवर्णनं-ना, प्रशंसा, स्तुतिवादः, गुणकीर्तनं, यशःख्यापनं. —GLORIOUS, *a.* यशस्वत्, कीर्तिमत्, महायशस्, प्रथित, विश्रुत, ख्यात, यशस्विन्, उदग्रयशस्. 2 कीर्तिकर-यशस्कर (री *f.*), श्लाघावह, प्रशस्य. 3 तेजस्विन्, महत्, महोज्ज्वल, श्रीमत्, प्रतापवत्, महोदय, अतिशोभन, ओजस्विन्, सुप्रभ, वर्चस्विन्. 4 विशिष्ट, परम, उत्तम, उत्कृष्ट, प्रशस्ततम, श्रेष्ठ. —LY, *adv.* सप्रतापं, कीर्तियुक्तं, परमं, उत्कृष्टं.

GLOSS, *s.* टीका, टिप्पनी, भाष्यं, व्याख्यानं, वृत्ति *f.*, विवरणं. 2 बाह्यशोभा-कांति-रुचि *f.*, बहिराभा, कृत्रिमच्छवि *f.*, कल्पितशोभा. —*v. t.* टीकया व्या-ख्या 2 P or वि-वृ 5 U; भाष्यं लिख् 6 P. 2 बाह्यतः शुभ् c.; स्निग्धी-मसृणी-कृ 8 U; बाह्यशोभां दा 3 U or उत्पद् c. —Y, *a.* स्निग्ध, चिक्कण, श्लक्ष्ण, मसृण. 2 बाह्यप्रभ, बाह्यतः शोभित, आपातरुचिर, बहीरमणीय.

GLOSSARY, *s.* कोशः-षः, शब्दसंग्रहः-कोशः, निघंटुः, अभिधानं, समाम्नायः; पशुसमाम्नायः 'g. of words relating to beasts.' —IST, *s.* कोशलेखकः; संकलयितृ *m.*

GLOTTIS, *s.* प्रति-अलि-उप-जिह्वा.

GLOVE, *s.* करच्छदः, हस्तत्राणं-परिधानं, हस्ताच्छादनं.

GLOW, *s.* तापः, आतपः, दाहः, उष्मन् *m.*, दीप्ति-द्युति *f.*, तेजस् *n.*, उत्तापः. 2 रक्तता, रक्तिमन् *m.*, रागः, अरुणिमन् *m.* —*v. i.* दीप् 4 A, प्रकाश् 1 A, ज्वल् 1 P, तप् 1 P, 4 A, दह् pass.; अरुणीभू 1 P, रंज् pass., रक्तीभू; 'g. ing with rage' क्रोधेद्ध, रोषसंतप्त, प्रदीप्तक्रोध; ज्वलन्निव ब्रह्ममयेन तेजसा (K. v. 30) 'as if g. ing with Brahmanic lustre.' —ING, *a.* सं-प्र-,दीप्त, ज्वलित, उत्तप्त, देदीप्यमान, उज्ज्वल, चंड; रक्त, अरुण; 'in g. colours' उज्ज्वलरूपेण, हृदयहारितया, हृदयंगमं, मनोरमं; 'with g. eyes' दीप्ताक्ष *a.* —INGLY, *adv.* तेजसा, उत्तापेन, चंडं, दीप्त्या. —GLOW-WORM, *s.* खद्योतः, ज्योतिरिंगणः; प्रभाकीटः.

GLOZE, *See* FLATTER.

GLUE, *s.* संश्लेषणद्रव्यं, लेपः. —*v. t.* सं-श्लिष् c., संयुज् 7 U, 10, संलग्नीकृ 8 U. —Y, *a.* स्यान, सांद्र, चिक्कण.

GLUM, *a.* प्रतीप, वाम-वक्र-शील.

GLUT, *v. t.* भक्ष् 10, ग्रस् 1 A, निगृ 6 P; अतिमात्रं तृप् c., अत्यंतं पूर् 10, सौहित्यं जन् c. (जनयति). —*s.* अतितृप्ति *f.*, अतिसौहित्यं, निर्वेदः. 2 अतिरेकः, उद्रेकः, अतिबाहुल्यं, प्राचुर्यं.

GLUTINATE, *v. t.* लेपेन संश्लिष् c. or संयुज् 7 U, 10.

GLUTINOUS, *a.* स्यान, सांद्र, चिक्कण, स्निग्ध, संलग्नशील.

GLUTTON, *s.* औदरिकः, उदरंभरिः, घस्मरः, आशूनः, कुक्षिंभरिः, अत्याहारिन् *m.*; *See* below. —OUS,-ISH, *a.* औदरिक (की *f.*), अत्याहारिन्, बहुभोजिन्, अत्याहारप्रिय, भक्षक, घस्मर, अक्षर, आशून, कुक्षिंभरि, उदरंभरि, गृध्नु, लोलुप-भ, अतिलुब्ध, अतृप्त. —OUSLY, *adv.* अत्याहारेण, लोलुपतया. —Y, *s.* अत्याहारः, घस्मरता, गृध्नुता, जिह्वालौल्यं, अतृप्तिः *f.*, औदरिकता.

GNARL, *v. i.* गर्ज् 1 P.

GNARLED, *a.* ग्रंथिल, ग्रंथि-पर्व-विशिष्ट.

GNASH, *v. t.* (The teeth) दंतैर्दंतान् निष्पीड् 10 or विघट्ट् c. or घृष् 1 P, निष्पिष् 7 P or सं-दंश् 1 P, क्षिप् 1 P. —ING, *s.* दंतनिष्पेषः-घर्षणं, क्ष्वेडनं.

GNAT, *s.* मशकः, दंशः, प्राचिका, वनमक्षिका.

GNAW, *v. t.* दंश् 1 P, चर्व् 1 P or c., अल्पशः भक्ष् 10 or खाद् 1 P; चर्वणेन कृत् 6 P. —ING, *s.* चर्वणं, दंशनं.

GNOMON, *s.* शंकुः; कीलः-लकः.

GO, *v. i.* गम् 1 P, या-इ 2 P, व्रज् 1 P, चल्-चर् 1 P, पद् 4 A, कृ 1, 3 P; सृ 1, 3 P; क्रम् 1 U, 4 P; (as water) वह् 1 P, स्रु 1 P, स्यंद् 1 A. 2 (Fare) वृत् 1 A, स्था 1 P; 'how g. es it with her' कस्तस्या वृत्तांतः. 3 (As prospective future) ex. by fut. part., मनः or काम with inf. or desid. forms; *See* ABOUT; 'g. astray' भ्रम् 1, 4 P; उत्पथं या, सन्मार्गात् च्यु 1 A or भ्रंश् 1 A, 4 P; उत्क्रम्, अति-व्यभि-चर्; 'g. on foot' पद्भ्यां व्रज्; 'g. on horse-back' अश्वेन संचर्; 'as the story g. es' किल; 'g. for nothing' (go to dogs) विफलीभू; 'g. to bed' शय्यां भज्-सेव् 1 A; 'she is far gone in love' दूरगतमन्मथा सा (S. 3), अतिभूमिं गतीस्या अनुरागः; 'g.-between' मध्यस्थः, मध्यपुरुषः; (female g.) शंभली, कुट्टिनी; सुरतदूती; 'g.-by' निर्गमः, पलायनं, व्यपदेशः; 'g.-cart' क्रीडाशकटः. —about, परिगम्-इ &c. 2 यत् 1 A, उद्यम् 1 A, व्यव-सो 4 P, आरभ् 1 A, उपक्रम् 1 A. 3 अनु-ष्ठा, वि-धा 3 U; *See* EXECUTE. —away, अप-इ, अपसृ-क्रम्-गम्-या-सृप्, प्र-इ,

स्था 1 A. -between, मध्ये स्था or वृत्, अंतः-इ. -by,अति-इ, समीपतः गम्. 2 अनुगम्, अनुवृत्, अनुरुध् 4 A, अनु-इ; 'he g. es by the name of' इति ख्यातः or ज्ञातः; ऽमाख्यां सुमुखी अगाम (K. I. 26) 'went by the name of' &c. -down, अधो गम्. 2 अस्तं गम्-या; (fig.) नाश-क्षयं-या; प्र-लीं 4 A, धंस् 1 A. -forth,-forward, निर्गम्, निःस-क्रम्, प्र-इ, प्र-स्था, प्र-या. -in, प्र-आ-विश् 6 P, अंतर्गम्-या. 2 (for) संमन् 4 A, डरी-अंगी-कृ 8 U, प्रति-पद् 4 A. -off, अपगम् &c. 2 प्र-इ, मृ 6 A; परलोकं या. -on, प्र-वृत्, प्रगम्-या-द्रुप्. 2 प्र-स्तु 2 U, प्रारभ् 1 A; 'g. on with your study' प्रवर्ततां-प्रस्तूयतां-अध्ययनं. -out, निर्गम्, निःस, &c., बहिर्गम्. 2 (Of light) निर्वा 2 P or c. pass.; शम् 4 P. -over, दभ् c., अधि-इ 2 A; (to one's self) अनुदभ् c. 2 परि-ईक्ष् 1 A. 3 आक्रम्, लंघ् 1 A, 10. 4 अन्यपक्षं सं-आ-श्रि 1 U; स्वपक्षाद् भ्रंश् 1 A, 4 P. -round, परि-इ-गम्; प्रदक्षिणीकृ. -through, अनुभू, उपागम्, वि-धा, अनु-ष्ठा, कृ, निर्वह् c.; सेव् 1 A, आचर्. 2 पारं गम्, समाप् c.; अव-सो 4 P. 3 प्र-निर्-विश्, निर्भिद् 7 P; भित्त्वा निर्गम्; व्यध् 4 P. -to, up to, उप-सृ-इ-गम्-या, उप-स्था, प्रति-पद् &c. 2 (*Interj.*) धिक्, अपेहि, अपसर. -up, उद्-इ, उत्पत्, ऊर्ध्वं गम्. -ER, *s.* गामिन्-गंतृ *m.*, चरः, यायिन् *m.* in comp. -ING, *s.* गमनं, यानं, सरणं, चलनं, व्रजनं, गतिः *f.*, अयनं, &c.

GOAD, *s.* अंकुशः, सृ(शृ)णिः *f.* -*v. t.* अंकुशेन नुद् 6 P or प्रणुद् 10. 2 प्रणुद्, प्रणुद् c., प्रोत्सह् c., प्रेर् c., प्रवृत् c., उद्युज् 10, उत्तिज् c.

GOAL, *s.* अंतः, अंतस्थानं, अवधिः, अवसानभूमिः *f.*; 'g. of ambition' आशावधिः. 2 आशयः, अभिप्रायः, उद्देशः.

GOAT, *s.* अजः, छागः, छगलकः, बस्तः, शुभ्रः; 'she-g.' अजा, छागी; 'g.-herd' अजाजीवः, जाबालः, अजपालः-लकः, छागपोषकः; 'a flock of g.s' आजकं. -ISH, *a.* अजगंध.

GOBBLE, *v. t.* सत्वरं ग्रस् 1 A or भक्ष् 10.

GOBLET, *s.* चषकः-कं, पानपात्रं-भाजनं, कंसः-सं.

GOBLIN, *s.* भूतः, वेतालः, पिशाचः, राक्षसः, निशाचरः, रात्रि(त्रिं)चरः.

GOD, *s.* देवः, सुरः, अमरः, निर्जरः, विबुधः, सुपर्वा, सुमनाः, त्रिदिवेशः, दिवौकाः, आदितेयः, दिविषद्, लेखः, अदितिनंदनः, आदित्यः, ऋभुः, अस्वप्नः, अमर्त्यः, अकृतांधाः, बर्हिर्मुखः, क्रतुभुक्, गीर्वाणः, दानवारिः, वृंदारकः, दैवतः-तं; 'great g.' परमेश्वरः, परमात्मा; 'goddess' देवी, भगवती, सुरांगना, देवपत्नी; in comp. words ex. by धर्म; 'g.-father' धर्मपिता; so धर्ममाता, धर्मपुत्रः-त्री, धर्मकन्या-सुता, &c. -LESS, *a.* निरीश्वर, नास्तिक, अनीश्वरवादिन्. -LESSNESS, *s.* मिथ्यादृष्टि *f.*, नास्तिकता. -LIKE, *a.* देवतुल्य-रूप, दैवीयम, दिव्य. -LY, *a.* धार्मिक (की *f.*), धर्मनिष्ठ-परायण, पुण्यशील, पुण्यात्मन्, ईश्वरभक्त-पूजक. -LINESS, *s.* धर्मसेवा, पुण्यशीलता, ईश्वरभक्ति *f.*, श्रद्धा, &c. -SHIP, *s.* देवत्वं, देवभावः. -GODSEND, *s.* ईश्वरप्रेरित *a.* इव, ईश्वरप्रसादः, सौभाग्यं, लक्ष्मीदत्तं.

GOGGLE, *v. i.* नयने विक्षिप् 6 P or लुल् c.; 'g. eye' लोलनयनं; 'g.-eyed' लोलनयन, वक्र-तिर्यक्-दृष्टि.

GOITRE, *s.* गडुः.

GOLD, *s.* सुवर्णं, स्वर्णं, कनकं, कांचनं, हेमन् *n.*, चामीकरं, जातरूपं, हिरण्यं, हाटकं, तपनीयं, ज्ञातकुंभं, गांगेयं, भर्मन् *n.*, कर्बुरं, महारजतं, रुक्मं, कार्तस्वरं, जांबूनदं, अष्टापदः-दं; 'g. for ornaments' शृंगिः, शृंगीकनकं; 'g.-beater or drawer' सुवर्णोद्वर्तनकृत् *m.*; 'g.-dust' कांचनभूः, कनकरागः; 'g.-smith' स्वर्ण-सुवर्ण-कारः, कलादः, नाडिंधमः, रुक्मकारकः; 'g.-thread,' कनकसूत्रं. -*a.*, -EN, *a.* हैम (मी *f.*), सौवर्ण (र्णी *f.*), (*s.*) in comp., or by मय (यी *f.*) affixed to (*s.*).

GOLF, *s.* कंदुकक्रीडा-लीला.

GONORRHŒA, *s.* शुक्रदोषः.

GOOD, *a.* भद्र, साधु, प्रशस्त, प्रशस्य, शुभ, कल्याण (णी *f.*), सत्, वर, शोभन, गुणवत्, निर्दोष; oft. by सु or सत् in comp. 2 धर्मशील, साधु-आर्य-वृत्त, सदाचार, सच्चरित, सुकृतिन्, पुण्य, पुण्यात्मन्, पुण्यशील, धार्मिक (की *f.*). 3 योग्य, उचित, युक्त, उपयुक्त, हित; gen. ex. by pot. pass. part. 4 सुजन, हितकाम, प्रियकारिन्, उपकारक, हित, प्रियकर. 5 अन्यून, अदूषित, अक्षत, संपूर्ण. 6 बहु, प्रचुर, महत्, अनल्प, भूरि, सु or अति pr.; 'a g. fellow' भद्रः, सौम्यः; 'my g. sir' भद्र, सौम्य; 'g. quality' गुणः, सद्गुणः; 'g. wishes' आशिस् *f.*, आशीर्वादः-वचनं; 'g. and bad' शुभाशुभ; 'so g. as' अनुग्रहपूर्वकं, कृपया; 'for g.' अत्यंतं, असन्निवृत्त्यै; 'a g. deal' भृशं, अतीव, सु or अति pr.; 'g. morning to you' (अपि) शुभस्ते प्रभातकालः; 'it will be g. for you' तव कल्याणाय भवेत्, कल्याणमावहेत्; 'is g. unto weariness' आयासजनकमेव, श्रममात्रदायकं; 'g. for nothing' निरुपयोगि, निर्गुण, निष्फल; 'as g. as' समं -*s.* उपकारः, उपकृतिः *f.* 2 हितं, भूतिः *f.*, भद्रं, शुभं, कल्याणं, कुशलं, श्रेयस् *n.*, क्षेमं; oft. by अर्थः; 'for the g. of the people' प्रजार्थं, लोकहिताय, प्रजाभूतये, &c. 3 उपयोगः, लाभः, फलं; oft. ex. by किं, अर्थः, अलं, with inst.; 'what is the g. of seeing her' किं तया दृष्टया S. 2), कोऽर्थस्तस्या दर्शनेन; 'what g. do you get by weeping' अलं परिदेवनेन. 4 सुकृतं, पुण्यं, धर्मः, सुचरित, साधुवृत्तं, सदाचारः; 'to do g.' उपकृ 8 U; हितं-कल्याणं-कृ; क्षेमं आवह् 1 P; 'g. and

evil (bad) ' शुभाशुभ, हिताहितं. —*interj.* साधु, सुष्ठु, सम्यक्, बाढं, कामं, भवतु, तथास्तु, तथेति; युज्यते, अनुमतं मम (V. 2). ' G.-breeding ' साधुता, सौजन्यं, विनयः, सभ्यता, ' possessed of g.-breeding ' सुशील, सुविनीत, सुजन, अभिजात; ' g.-conditioned ' सुस्थ, सुस्थित; ' g. fortune or luck ' *See* FORTUNE ; ' g.-humour ' सद्भावः, उल्लासः, चित्तप्रसादः, उल्लासवृत्ति *f.*, आनंदः, प्रमोदः; ' g.-nature ' सद्भावः, सुस्वभावः, सौजन्यं, सुशीलता ; सुप्रकृति *f.*; ' g.-humoured or g.-natured ' हृष्टचित्त, प्रसन्नचित्त, सोल्लस, सानंद, सुस्वभाव, सुशील, सुप्रकृति, सुजन, सद्भाववत्, साधुशील, धर्मात्मन्, पुण्यात्मन्, सुहृदय; ' g.-looking ' दर्शनीय, सुरूप, सुदर्शन, सुभग, प्रियदर्शन, प्रेक्षणीय, रम्याकार, सुवदन; ' g.-manners ' विनयः, विनीतता, मर्यादा, सुनीति-रीति *f.*; सभ्यता, शिष्टाचारः, सुशीलता, सौजन्यं, सु-सत्-चरित्रं, सदाचारः, साधुवृत्तं; ' g.-sense ' विवेकः, ज्ञानं, प्रज्ञता, प्रबुद्धता, प्रबोधः, सौजन्यं, सद्भावः, सुशीलता; ' g.-will ' हितेच्छा, हितकाम्या, प्रीति *f.*, प्रियता, अनुकूलता, भक्ति *f.*, अनुरागः. —LY, *a.* चारु, सुंदर (री *f.*), सुरूप, सुदृश्य, प्रेक्षणीय, लावण्यवत्, रम्य, रमणीय, मनोरम-हर, रुचिर. 2 अनल्प, महत्, प्रचुर, बहु, अल्पेतर. —NESS, *s.* साधुता, प्रशस्तता, गुणवत्ता, श्रेष्ठता, विशिष्टता. 2 साधुशीलता, सदाचारता, धार्मिकत्वं. 3 सुशीलता, दया, कृपालुत्वं, सद्भावः, सौजन्यं, सुजनता; ' tendency to g.' सत्त्वगुणः.

GOODS, *s.* द्रव्यं, द्रव्यराशिः, विभवः, सामग्री, वस्तुजातं, द्रव्याणि-वस्तूनि (pl.). 2 भांडकं, भांडसमुदायः, पण्यं, भांडानि (pl.); ' house-hold g. ' गृहोपस्करः, गृहोपकरणानि.

GOOSE, *s.* हंसः (सी *f.*), चक्रांगः (गी *f.*), वरटः-टा; कलहंसः (सी *f.*); *See* GANDER; ' ruddy g. ' चक्रवाकः (की *f.*), चक्रः, रथांगः, कोकः, द्वंद्वचरः. 2 Fool, q. v.

GORBELLIED, *a.* महोदर, बृहत्कुक्षि, तुंदिल, स्थूलोदरः *See* CORPULENT.

GORE, *s.* रक्तं, शोणितं, रुधिरं, असृज् *n.*, लोहितं. 2 रक्तगुल्मः, रक्तपिंडः. 3 संधितवस्त्रखंडः. —*v. t.* व्यध 4 P, निर्भिद् 7 P, छिद् 7 P, वि-दृ 10, क्षण् 5 P, लिख् 6 P. —ED, *a.* छिन्नत्वच्, क्षतचर्मन्. —Y, *a.* रक्ताक्त, असृद्दिग्ध. 2 रुधिरप्रिय, मारात्मक.

GORGE, *s.* कंठः, गलः. 2 रंध्रं, दुर्गमार्गः, संकट-संबाधपथः, संचारः, संकटं, गिरिकंदरः. —*v. t.* उद्-प्रस 1 A, गृ 6 P. 2 (One's self) कुक्षिं पूर् 10, अत्यंतं तृप् c., अन्नादिना परिपृ 3 P.

GORGEOUS, *a.* शोभन, उज्ज्वल, अतिशोभन, विभ्राजमान, तेजस्विन्, सुभग, एकांतरमणीय-चारु, महाभ-द्रश्रीक, श्रीमत्. —LY, *adv.* अतितेजसा, उज्ज्वलं. —NESS, *s.* औज्ज्वल्यं, अति-प्रभा-तेजस् *n.*, सुभगा.

GORGET, *s.* ग्रीवा-गल-त्राणं.

GORMAND,-IZER, *See* GLUTTON.

GOSLING, *s.* हंसशिशुः-शावकः.

GOSSIP, *s.* वावदूकः, प्रलापिन् *m.*, जल्पकः. 2 पानमित्रं, सहपायिन् *m.* 3 वार्ता, जनप्रवादः, जल्पः, जल्पितं, प्रलापः, प्रजल्पः, वृथाकथा-संलापः. —*v. i.* प्रजल्प् 1 P, प्रलप् 1 P.

GOUGE, *v. t.* (नयनं) उत्पट् 10, उद्धृ 1 P.

GOURD, *s.* अ(आ)लाबु-बू *f.*, तुंबि-बी *f.*, लाबु-बू *f.*, तुंबा. 2 (Vessel of g.) कमंडलुः; ' bitter g.' इक्ष्वाकु *f.*, कटुतुंबी.

GOURMAND, *See* GLUTTON.

GOUT, *s.* वातरक्तं, वातशोणितं. —Y, *a.* वातग्रस्त, वातरोगोपहत, वातरोगिन्, वातकिन्.

GOVERN, *v. t.* प्र-शास् 2 P, परि-पा c. (पालयति), ईश् 2 A (with gen.) ; गुप् 1 P, तंत्र् 10 A, नियम् 1 P; *See* RULE. 2 वि-धा 3 U, वि-नी 1 P, निग्रह् 9 P, सं-नि-यम्, आ-वृ 5 U, वशीकृ 8 U, दम् c. (दमयति), सं-ह 1 P, नि-येत्र् 10; *See* CONTROL. 3 (In grammar) अनु-ह 2 P, वि-धा; ' g. ed by another ' परायत्त, पराधीन, परतंत्र, विधेय. —MENT, *s.* नियमनं, सं-नि-यमः, निग्रहः. 2 शासनं, परिपालनं; ' during the g. of Rāma ' रामे महीं शासति. 3 प्रभुत्वं, ईशत्वं, ऐश्वर्यं, आधिपत्यं, स्वामित्वं. 4 राज्यं. 5 (Rulers) राजन् *m.*, प्रभुः, ईशाः, राजमंत्रिणः-सचिवाः; ' g. affairs ' राज्यकार्याणि; ' form of g. ' राज्यरीति-पद्धति *f.* —OR, *s.* शासितृ *m.*, शासकः, ईशः, अधिपतिः, अधिष्ठातृ *m.*, अधिपः, अधिकृतः. 2 (Of a province) भौगपतिः. —ORSHIP, *s.* आधिपत्यं, प्रभुत्वं.

GOWN, *s.* शाटः-टी, शाटकः, कटिवस्त्रं; ' girl's g. ' अधोरुकं, चंडातकः-कं.

GRAB, *s.* ग्रहः, धरणं, संग्रहः.

GRABBLE, *v.* स्पृश्-परामृश् 6 P, 2 भूमौ देहं क्षिप् 6 P.

GRACE, *s.* प्रसादः, अनुग्रहः, दया, कृपा, अनुकंपा, आनुकूल्यं. 2 सौंदर्यं, श्रीः, चारुता, शोभा, लावण्यं; *See* BEAUTY. 3 गुणः, भूषणं. 4 क्षमा, पापमार्जननिष्कृति *f.* 5 (As a title) देवः-वी, अत्र-तत्र-भवान्-भवती. —*v. t.* अलंकृ 8 U, शुभ् c., भूष् 10, उद्-गुण् c. (जाते पुनरप्युद्योतयोःसंगं U. 4); संमन् c. सं-भू c.; ' g. the ceremony with your presence ' संनिधानेन इमं विधिं संभावयतु-अलंकरोतु-भवान्. —FUL, *a.* ललित, चारु, सुंदर (री *f.*), सुभग, लावण्यवत्, मुग्ध, सविलास; ' g. movement ' मुग्धचेष्टा, विलासः, विभ्रमः, ललितं, हेला, लीला, हावः, विब्बोकः, शृंगारचेष्टा-क्रिया; ' g. speech ' वाग्विलासः; ' g. gait ' खेलगतिः *f.*, विलासगतं. —FULLY, *adv.* सविलासं, ललितं, सुंदरं, चारुतया. —FULNESS, *s.*

लावण्यं, श्रीः, शोभा, लालित्यं, सुन्दता ; *See* BEAUTY. -LESS, *a.* रूपहीन. 2 निर्लज्ज, दुराचार, दुर्वृत्त, अतिदुष्ट, दुष्टभाव. -GRACIOUS, *a.* प्रसन्न, सदय, दयाशील, अनुकूल, अनुकंपिन्, दयालु, अनुकंपाशील, अनुग्राहिन्, कृपाल, सानुक्रोश, हितबुद्धि, सानुकंप; 'to be g.' प्रसद् 1 P, अनु-कंप् 1 A. -LY, *adv.* सानुग्रहं, सदयं, सानुकंपं, दयया, कृपया, प्रसन्नतया, सप्रसादं. -NESS, *s.* प्रसादः, अनुकंपा, दयालुत्वं, अनुग्रहः, दया, कृपा, &c.

GRADATION, *s.* क्रमः, आनुपूर्व्यं, पर्यायः, अनुक्रमः; परंपरा, समन्वयः; परिपाटि-टी *f.*; 'in regular g. यथाक्रमं, क्रमशः, अनुपूर्वेशः, पर्यायेण.

GRADE, *s.* श्रेणि-णी *f.*, प्रकारः, वर्गः, परिपाटि-टी *f.*, क्रमः, परंपरा, आनुपूर्व्यं. 2 पदं, अवस्था, आस्पदं, पदवि-वी *f.*, कोटि *f.*, काष्ठा (highest g.). -GRADUAL, *a.* क्रमिक, आनुक्रमिक, अनुपूर्वं, उत्तरोत्तर; better ex. by 'g. ly'. -LY, *adv.* क्रमशः, शनैःशनैः, क्रमतः, क्रमेण, यथाक्रमं, अनुक्रमं, अल्पाल्पशः, उत्तरोत्तरं, प्रति-अनु-पदं, पदे पदे, अनुपूर्वशः, आनुपूर्व्येण. -GRADUATE, *v. t.* क्रमचिह्नैः अंक् 10. 2 उपपदं प्राप् 5 P. -*s.* उपपद-उपाधि-पद-युक्तः. -ION, *s.* क्रमचिह्नांकनं. 2 Gradation, q v.

GRAFT, *v. t.* (fig.) निविश् c., नि-धा 3 U.

GRAIN, *s.* धान्यं, शस्यं, व्रीहिः, स्तंबकरिः, बीजग्रहः, जीवसाधनं. 2 बीजं. 3 कणः-णिका, लवः, लेशः, अणुः. 4 काष्ठरेखा-शिरा; 'fried g.' लाजाः, भ्रष्टयवाः; पृथुकः, चिपिटकः; 'against the g.' प्रतिलोमं, विरुद्धं, विप्रतीपं, निरुत्साहं, कथमपि; 'with the g.' अनुलोमं; 'chaffless g.' धान्यास्थि. -Y, *a.* धान्य-शस्य-मय (यी *f.*).

GRAMINEOUS, *a.* तृणमय (यी *f.*), शाद्वल.

GRAMINIVOROUS, *a.* तृण-शष्प-भोजिन्, तृणभुज्.

GRAMMAR, *s.* व्याकरणं, व्याकरणशास्त्रं-विद्या, शब्दशास्त्रं. -IAN, *s.* वैयाकरणः, व्याकरणज्ञः, शब्दशास्त्रविद् *m.* -GRAMMATICAL, *a.* व्याकरणविषय, व्याकरणानुसारिन्; gen. (*s.*) in comp.

GRANARY, *s.* कुशूलः, धान्यकोष्ठः, धान्यागारं, कंडोलः, पिटः.

GRAND, *a.* महत्, बृहत्, गुरु. 2 उत्तम, प्रधान, मुख्य, भव्य, अग्र्य, विशिष्ट. 3 सुभग, भव्य, प्रतापवत्, तेजस्विन्, उज्ज्वल; 'g.-child' पौत्रः-त्री; 'g.-daughter' पौत्री, पुत्रसुता, दौहित्री; 'great g.-daughter' प्रपौत्री; 'g.-father' पितामहः, मातामहः (maternal); 'great g.-father' प्रपितामहः, प्रमातामहः; 'g.-mother' पितामही, मातामही; वृद्धा, स्थविरा; 'g.-nephew' भ्रातृपौत्रः, स्वसृपौत्रः (त्री *f.*); 'g.-son' पौत्रः, पुत्रसुतः, नप्तृ *m.*, दौहित्रः, पुत्रिकासुतः; 'great g.-son' प्रपौत्रः, &c.; 'great great g.-son' परप्रपौत्रः. -LY, *adv.* वैभवेन, तेजसा, ऐश्वर्येण, महाप्रतापेन, उज्ज्वलं, सुप्रभं, उत्कृष्टं, परमं, श्रेष्ठतया. -NESS, -GRANDEUR, *s.* महत्त्वं, महिमन् *m.* 2 माहात्म्यं, औदार्यं, उत्कर्षः, श्रेष्ठता, प्राधान्यं. 3 वैभवं, तेजस् *n.*, विभूति *f.*, प्रतापः, शोभा, उज्ज्वलता, प्रभावः, ऐश्वर्यं, संपद् *f.* -GRANDEE, *s.* कुलीनः, कुलीनजनः, अभिजनः, महाजनः.

GRANDILOQUENT, *a.* गर्वितवाच्, सदर्पवादिन्. -GRANDILOQUENCE, *s.* अतिशयोक्ति *f.*, दर्पवाक्यं, सालंकारं वचनं, दर्पोद्भातं वचनं.

GRANGE, *s.* क्षेत्रं, क्षेत्रभूमि *f.*

GRANIVOROUS, *a.* शस्याद, शस्यभक्षक.

GRANT, *v. t.* दा 1 P, दे 3 U, 1 P, प्रति-पद् c.; *See* GIVE. 2 अनुमन् 4 A, अनु-ज्ञा 9 U, अनु-मुद् 1 A. 3 ग्रह् 9 P, अंगीकृ 8 U, उरीकृ, स्वीकृ, प्रतिपद् 4 A, अभ्युपगम् 1 P, अभ्युप-इ 2 P; 'I g.', 'g. ed' gen. ex. by कामं followed by तु, तथापि or पुनः; or by imp.; 'well it is g. ed' भवतु, एवमस्तु, गृहीतमिदं. -*s.* प्रदानं, दानं, उत्सर्गः, दायः, विहापितं, उपायसं; *See* GIFT; 'g. of property' निबंधः; 'royal g.' (gifts of land, &c.) शासनं, पट्टः, शासनपत्रं; 'a written g.' लेखपत्रं. -EE, *s.* प्रतिग्रहीतृ *m.*, दानभोगिन् *m.*, आदाता. -OR, *s.* दातृ *m.*

GRANULE, *s.* काणिका, लवः; बीजकं, अणुः. -GRANULAR, *a.* बीजाकार, बीजमय (यी *f.*), कणमय. -GRANULATE, *v. t.* घनीकृ 8 U, संहतीकृ; सूक्ष्मकणान् बंध् 9 P. -ION, *s.* पोथकी.

GRAPE, *s.* द्राक्षा, मृद्वीका, गोस्तना-नी, स्वाद्वी, मधुरसा; (fruit) द्राक्षाफलं, &c.; 'g.-stone' द्राक्षाबीजं, अष्ठीला, आष्ठि *f.* -GRAPERY, *s.* द्राक्षावाटिका.

GRAPHIC, *a.* स्पष्ट, अर्थवत्, सुलिखित, सुचित्रित, सुनिर्दिष्ट.

GRAPNEL, *s.* क्षुद्रलंगरः. 2 आकर्षणी.

GRAPPLE, *v. t.* धृ 1 P, 10, संग्रह् 9 P, आकृष् 1 P; नि-सं-बंध् 9 P, संश्लिष् c. -*v. i.* युध् 4 A, संघट्ट् 1 A, बाहूबाहवि or हस्ताहस्ति युध्; अभिसं-पत् 1 P. -*s.* संग्रहः, धरणं. 2 बाहुयुद्धं. 3 आकर्षणी.

GRASP, *v. t.* ग्रह् 9 P, धृ 1 P, 10, (fig. also), आकल् 10, आकृष् 1 P, मुष्टिना ग्रह्; अवलंब् 1 A, परामृश्-स्पृश् 6 P. 2 ग्रस् 1 A, आक्रम् 1 U, 4 P; आ-मा 1 P, आ-अव-लिह् 2 U; 'g.-ed by death' कालग्रस्त; 'g. ed by a tiger' व्याघ्राघ्रात, &c.; 'he quickly g. ed what I meant' मदाशयं झटिति गृहीतवान्. 3 (at) ग्रह् desid. (जिघृक्षति), हृ desid. (जिहीर्षति); आप् desid. (ईप्सति), लंघ् 1 A, 10; *See* ASPIRE. -*s.* ग्रहः-हणं, धरणं, परामर्शः, मुष्टिग्राहः, संग्राहः, हस्तग्राहः, आक्रमः, ग्रसनं; gen. ex. by गोचरः, वशः, विषयः, मुखं; 'is within the g. of death'

मृत्योर्मुखे वर्तते, कालालीढः, मृत्युग्रोचरं गतः, &c.; 'and this g. over every (kind of) learning' इदं च अशेषविद्याग्रहणसामर्थ्यं (Ka. 96); 'firmness of g.' दृढमुष्टिता, निबिडमुष्टिः.

GRASS, *s.* तृणं, शस्यं, शादः; 'young g.' शष्पं, बालतृणं, घासः; 'meadow g.' य(ज)वसः; 'sacrificial g.' दर्भः, कुशः-शौ; 'g.-green' शादहरित, शाद्वल; 'g.-hopper शल(र)भः; 'g.-plot' शाद्वलं, तृणभूमि *f.* -Y, *a.* तृणावृत, बहुतृण, तृणपूर्ण, सतृण, बहुघास, शाद्वल, घास-तृण-मय (यी *f.*). 2 हरित, शादहरित.

GRATE, *s.* खलि-ली *f.*, अधिश्रयणी; *See* FIRE-PLACE. 2 लोहजालं. -*v. t.* घृष् 1 P, निष्पिष् 7 P, मृद् 9 P, संघट्ट् c. 2 बाध् 1 A, पीड् 10, व्यथ् c. (व्यथयति), संतप् c.; मर्माणि छिद् 7 P or स्पृश्-तुद् 6 P. 3 घर्षणेन चूर्ण् 10, पिष्, क्षुद् 7 P. 4 लोहजालेन युज् 10; 'g. the teeth' दंतैर्दंतान् निष्पीड् or घृष्. -ING, *a.* कर्कश, परुष, निष्ठुर, खर, कटु, मर्मस्पृश्-छिद्, अरुंतुद; 'g. to the ear' श्रवणकटु. -*s.* अन्योन्यघर्षणं, कर्कशध्वनिः. 2 लोहजालं, लोहशलाकासनाथः गवाक्षः. -INGLY, *adv.* कर्कशं, निष्ठुरं, कटु.

GRATEFUL, *a.* सुखकर (री *f.*), रम्य, रमणीय, आनंदावह, सुखावह, हृद्य, सुभग, मनोरम. 2 कृतज्ञ, कृतवेदिन्, उपकृतिज्ञ, कृतविद्, उपकारज्ञ. -LY, *adv.* कृतज्ञतया. 2 सुभगं, रम्यतया. -NESS,-GRATITUDE, *s.* कृतज्ञता, उपकारस्मरणं, उपकृतज्ञता, कृतवेदित्वं.

GRATER, *s.* घर्षणी, घर्षणयंत्रं.

GRATIFY, *v. t.* तुष् c., सं-परि°, आनंद् c., प्री 10, तृप् c., प्रमुद् c., हृष् c, रम् c., आह्लाद् c.; *See* DELIGHT also. 2 अनु-वृत् 1 A, अनुरुध् 4 A, लल् 10, प्र-सद् c., आराध् c., अनुरंज् c., सांत्व् 10. 3 शम् c. (शमयति), पुष् c. or पूर् 10, साध् c., निर्वृत् c.; 'having all desires g. ed' पूर्णकाम, कृतार्थ, कृतिन्, सिद्धार्थ, निवृत्तकाम; 'g. ed at heart' प्रीत-हृष्ट-चित्त. -ICATION, *s.* सं-,परि-,तोषः, आनंदः, तृप्ति *f.*, तुष्टि *f.*, प्रीति *f.*, सुखं, हर्षः, आह्लादः, प्रमोदः. 2 आराधनं, अनुरोधः, अनुवर्तनं, प्रसादनं, तर्पणं, तोषणं. 3 शांति *f.*, शमनं, सिद्धि *f.*, साधनं, पूरणं, निर्वर्तनं; 'g. of desire' मनोरथसिद्धिः, इष्टसाधनं; 'g. of another's whim' छंदोनुवृत्ति *f.*-वर्तनं. -ING, *a.* सं-परि-तोषक, तुष्टि-प्रीति-द, सुखावह, आनंदप्रद, सुख-प्रीति-कर (री *f.*).

GRATIS, *adv.* विना मूल्येन, धर्मार्थं, निर्मूल्यं.

GRATUITOUS, *a.* अमूल्यवत्, निर्मूल्य, मूल्यं विना दत्त, कामतः दत्त. 2 अमूलक, निष्कारण, निर्निमित्त, अहेतुक. -LY, *adv.* निर्मूल्यं.

GRATUITY, *s.* प्रदानं, दायनं; *See* GIFT.

GRATULATE, *See* CONGRATULATE.

GRAVE, *a.* गुरु, महत्, अलघु. 2 ग(गं)भीर, धीर, अचपल. 3 (Sound) मंद्र, घन, गंभीर, धीर, मंद्र, मंथर; 'g. matter' गुर्वर्थः. -*s.* प्रेत-शव-स्थानं; समाधिः, श्मशानं, अवटः. 'g.-clothes' प्रेतवासस् *n.*, शववस्त्रं; 'g.-stone' चित्यं, चैत्यं, समाधिप्रस्तरः. -*v. t.* तक्ष् 1, 5 P, त्वक्ष् 1 P. -LY, *adv.* गंभीरतया, धीरं, सगौरवं, गांभीर्येण. 2 मंद्रं, धीरं, गंभीरं. -NESS, *s.* गुरुता-त्वं, गौरवं, महत्त्वं. -GRAVITY, *s.* गुरुत्वं, भारः. 2 गौरवं, गुरुत्व-ता, महिमन् *m.*, गांभीर्यं; अलाघवं, धीरता, मंद्रता. 3 आकर्षणशीलता, आकर्षणशक्ति *f.*—GRAVITATE, *v. i.* आकृष् pass., अधः गम् or पत् 1 P. -ION, *s.* आकर्षणं, अधःपतनशीलता.

GRAVEL, *s.* शर्करा, वालुका, शिला-पाषाण-खंडः-चूर्णं. 2 (Disease) अश्मरी, मूत्रकृच्छ्रं, मूत्रशर्करा. -*v. t.* शर्करावृत *a.* कृ 8 U. 2 मुह् c., सं-वि-भ्रम् c. (भ्रमयति). -LY, *a.* सशर्कर, शर्करित, शर्करावृत, शर्करावत्, शार्करीय.

GRAVEOLENT, *a.* दुर्गंध, पूतिगंधि.

GRAVID, *See* PREGNANT.

GRAVY, *s.* मांससारः, मांसजूषं.

GRAY, *a.* आपांडु, धूमर, पांशुवर्ण, आशुक्ल. 2 शुक्ल, धवल, श्वेत, पक्व, पलित (hair); 'g. beard' जीर्णकूर्चं; 'g. head' पलितं शिरः; 'g.-haired' पलित, धवल-शुक्ल-केश; 'g.-headed' पलितशिरस्. 3 जीर्ण, परिणत, पक्व, वृद्ध. -*s.* धूसरः, धूसर-पांशु-वर्णः. -ISH, *a.* आपांडु, पांडुर, आधूसर; 'g. with dust' धूलिधूसर. -NESS, *s.* धूसरता, पलितता, केशधावल्यं, पक्वता, जीर्णता.

GRAZE, *v. t.* चर् c., तृणं भुज् c. or खाद् c. 2 निर्घृष् 1 P, लघु तड् 10, लघुप्रहारेण अति-हन् 2 P. -*v. i.* चर् 1 P, तृणं खाद् 1 P or भक्ष् 10 or भुज् 7 A; 'a place g. ed by cattle' आशितगवीनं. -ER, *s.* तृणभक्षकः. -ING, *s.* चरणं; 'g. ground' गोचरः, गोप्रचारः. -GRAZIER, *s.* गोचारकः, पशुपालः, गोपालकः.

GREASE, *s.* वसा, मेदस् *n.*, वपा, मांसस्नेहः-सारः. 2 स्नेहः, तैलं, घृतं. -*v. t.* वसया-स्नेहेन लिप् 6 P or अंज् 7 P or दिह् 2 U. -Y, *a.* मेदस्विन्, वसामय (यी *f.*), चिक्कण, प्र-स्निग्ध, वसाक्त, स्नेहाभ्यक्त, सस्नेह, वसा-स्नेह-युक्त.

GREAT, *a.* महत्, गुरु, बृहत्, विशाल, विपुल, विस्तीर्ण, उरु, पृथु, स्थूल, महाप्रमाण. 2 (In number) बहु, भूरि, प्रचुर, बहुल, बहुसंख्याक. 3 उत्कृष्ट, उत्तम, परम, विशिष्ट, विश्रुत, श्रेष्ठ, लब्धप्रतिष्ठ, प्रसिद्ध, महायशस्क. 4 महेच्छ, महाशय, महात्मन्, उदार, उदारचित्त. 5 प्रधान, मुख्य, परम, अग्र्य, गुरु. 6 अत्यंत, अतिमात्र, गाढ, अधिक, भृश, परम, एकांत, निरंत, अतिरिक्त,

oft. by महत्, सु, अति, in comp.; 'to a g. distance, सुदूरं, अतिदूरं; 'to a g. degree' भृशं, अतिमात्रं, अत्यंतं, निर्भरं, गाढं. -LY, *adv.* भृशं, अत्यंतं, सातिशयं, सु-नि-तरां, एकांतेन, परं, बलवत्, गाढं, परमं, सु-अति-अतिशय in comp.; *See* EXCEEDINGLY; oft. ex. by कोटि *f.*, काष्ठा; 'he was g. delighted' आनंदस्य परां कोटिं-काष्ठां-अधिगतवान्. -NESS, *s.* महत्वं, माहात्म्यं, महिमन् *m.*, गुरुत्वं; विपुलता, विशालता, &c. 2 विस्तारः, परिमाणं. 3 विभूति *f.*, उत्कर्षः, विशिष्टता, परमता, आधिक्यं, प्रतिष्ठा, गौरवं. 4 वैभवं, शोभा, ऐश्वर्यं; *See* GRANDEUR; 'g. of mind' औदार्यं, माहात्म्यं; 'g. of rank' कुलीनता, आभिजात्यं, कुलोत्कर्षः.

GREAVES, *s.* जंघा-उरु-त्राणं, मंक्षुक्षणं.

GREED, *s.* लोभः, गृध्नुता, अतिस्पृहा, लौल्यं, लुब्धता, अत्यभिलाषः, अतिलिप्सा, अत्याकांक्षा, लोलुपत्वं, अतृप्ति *f.*, अपरितोषः. 2 (Of food) अत्याहारः, घस्मरता, अग्रता, उदरंभरित्वं. —GREEDY, *a.* लुब्ध, लोलुप, लोलुभ, गृध्नु, लोभाविष्ट, अत्यभिलाषिन्, अत्याकांक्षिन्, सतृष्ण, अतितृष्णाकुल, अतिलोभिन्. 2 आहारलुब्ध, अत्याहारप्रिय, घस्मर, अग्रर, अतिभोजिन् बहुभुज्, औदरिक, उदरंभरि, कुक्षिंभरि, बहुभक्षक; 'to be g.' गृध् 4 P, लुभ् 4 P. -LY, *adv.* अतिलोभिन, सलोभं, सतृष्णं, लोलुपतया, जिह्वालौल्यात्, अत्यभिलाषेण, अतिस्पृहया. -NESS, *s.* लोभः; *See* (*s.*).

GREEN, *a.* हरित, हरिन्, हरिद्वर्ण; प(पा)लाश. 2 नव, प्रत्यग्र, अभिनव. 3 अपरिपक्व, अपरिणत; 'g.-headed' अपरिणतप्रज्ञ, अपक्वधी. -*s.* हरिद्वर्णः, हरितः, हरित् *m.*, पालाशवर्णः. 2 हरितस्थानं, शाद्वलं, शाद्वलस्थली, तृणावृता भूमिः; 'g.-leaved' हरित्पर्णः; 'g.-room' नेपथ्यशाला; 'g.-sward' हरितभूमिः, तृणावृतं स्थानं, हरितकं, शाकादि. -ISH, *a.* ईषद्धरित, हरिदाभ, ईषत्पलाश. -NESS, *s.* हरितत्वं, पलाशत्वं. 2 अपरिणतत्वं, अपरिपाकः, अपक्वता.

GREET, *v. t.* अभिनंद् 1 P or c., सभाज् 10, वंद् 1 A, अभिवद् c. (A), अर्च् 1 P, 10, सं-भू c., सत्कृ 8 U, पूज् 10; नमस्कृ, प्रणम् 1 P; 'g. in return' प्रतिनंद्, प्रत्याभि-वद् c. -ING, *s.* प्रणामः, प्रणति *f.*, अभिवंदनं, अभिनंदनं, नमस्कारः, अभिवादः-वादनं, कुशलवादः-प्रश्नः.

GREGARIOUS, *a.* यूथचारिन्, संघचारिन्.

GREY, *See* GRAY.

GRICE, *s.* शूकरशावकः-शिशुः.

GRIDELIN, *s.* चित्ताहरणः.

GRIEVE, *v. t.* दुः 5 P, पीड् 10, बाध् 1 A, क्लिश् 9 P, व्यथ् c. (व्यथयति), उप-सं-परि-तप् c., आयस् c., द्रह्, c., दुःखयति (D.), क्रुच् c., खिद् c., 'it g. s me to see you in this condition' इतदवस्थं त्वां वीक्ष्य दुःखितोस्मि. -*v. i.* शुच् 1 P, व्यथ् 1 A, दुर्मनायते (D.), उत्तप् 4 P, उत्कंठ् 1 A, पीड्-खिद्-क्लिश्-दु-तप् pass., दुःखायते (D.), द्रह्यि 6 A, उत्सुक-उत्क-*a.* भू. -ANCE, *s.* दुःखं, क्लेशः, कष्टं, बाधा, पीडा, पीडाहेतुः, दुःखमूलं-बीजकारणं. -ED, *a.* दुःखित, दून, पीडित, व्यथित, संतप्त, शोकार्त, दुःखाकुल, शोकातुर, खेदित, क्लिष्ट, उद्विग्न, आतुर, आर्त, कष्टापन्न, उत्सुक, उत्क. -INGLY, *adv.* सशोकं, सोद्वेगं, सदुःखं. -OUS, *a.* दुःखकर-व्यथाकर-कष्टकर (री *f.*), पीडावह, क्लेशप्रद, पीडाजनक, शोच्य, शोचनीय, दुस् pr. 2 घोर, उग्र, दारुण, महत्, गुरु. -OUSLY, *adv.* घोरं, दारुणं, सशोकं; 'g. hurt' बलवत् पीडित, घोरक्षत, &c. -GRIEF, *s.* शोकः, दुःखं, शुच् *f.*, क्लेशः, खेदः, सं-परि-तापः, व्यथा, मन्युः, पीडा, अ-आर्ति *f.*, उद्वेगः, आधिः, वेदना, मनस्तापः, चित्तव्यथा, औत्सुक्यं, उत्कंठा.

GRILL, *See* FRY.

GRIM, *a.* उग्र, दारुण, घोर, भयानक, रौद्र (द्री *f.*), विकृत, विकट. 2 (In appearance) उग्रदर्शन, घोराकृति, रौद्ररूप, कदाकार, दुर्दर्शन, कु-अप-रूप. -LY, *adv.* उग्रं, घोरं, विकटं. -NESS, *s.* घोरता, रौद्रता, &c.

GRIMACE, *s.* वदनविकारः-विकृति *f.*; मुख-वक्त्र-भंगः, मुखविरूपता, वक्रमुखं, विकृतास्यं.

GRIME, *s.* मलः-लं; *See* DIRT. -*v. t.* मलिनयति (D.), दुष् c. (दूषयति).

GRIN, *v. i.* सस्मितं दंतान् दृश् c.; कु-स्मि 1 A or हस् 1 P, विकृतं-मुखविकारेण हस् or स्मि. -*s.* कु-स्मितं, कुहासः, विकृतहासः-स्मितं, दंतदर्शनं. -NER, *s.* कु-विकृत-हासिन् *m.*, विकृतहासः.

GRIND, *v. t.* पिष् 7 P, क्षुद् 7 P, मृद् 9 P, चूर्ण् 10, चूर्णीकृ 8 U; चूर्णपेषं पिनष्टि; 'g. s to powder'. 2 (As a gem) उल्लिख् 6 P, उल्लिह् 2 U; सं-कारोल्लिखितः-शाणोल्लीढः-मणिः; 'a gem ground on a polishing or touch-stone'; घर्षणेन नि-शो 4 P or उल्लिख् c. 3 घृष् 1 P; 'g. ing the teeth in rage' रोषाद् दंतैर्दंतान्निष्पिष्य. 4 उप-पी 1 A, बाध् 1 A, पीड् 10, अर्द् 1 P or c.; 'ground by heavy taxes' करभारेण चूर्णित-पीडित, &c. -ER, *s.* पेषकः. 2 (g.-stone) पेषण-णी, पेषणयंत्र. 3 चर्वणदंतः, दंष्ट्रा. -ING, *s.* पेषणं, चूर्णीकरणं, संमर्दनं, घर्षणं, उल्लिखनं; 'g. stone' पेषण-णी, पेषणशिला, शाणः, निकषशिला.

GRIPE, *v. t.* ग्रह् 9 P, मुष्टिना ग्रह् or धृ 1 P; *See* GRASP. 2 पीड् 10, सं-नि°. 3 मुष्टिं बंध् 9 P. -*s.* मुष्टिग्राहः, हस्तग्रहः, संग्राहः, दृढग्रहः, मुष्टिबंधः, मुष्टि *m.*, *f.* 2 निपीडनं. 3 (g. s) अंत्रशूल-वेदना, उदरशूल-व्यथा. -ER, *s.* ग्राहकः. 2 पीडकः, बाधकः.

GRISLY, *a.* उग्रदर्शन, करालवदन, विकटाकार, घोरा-

कृति, भीमविग्रह, उग्र, घोर, दारुण, भयानक, क्रूर, कराल, भयावह.

GRIST, *s.* गोधूमचूर्णं, पिष्टधान्यं.

GRISTLE, *s.* तरुणास्थि *n.*, कोमलास्थि.

GRIT, *s.* Gravel, q. v. -GRITTY, *a.* सशर्कर, शर्करिल, शर्करामय (यी *f.*).

GRIZZLE, *s.* धूसर-पांशु-वर्णः. -GRIZZLY, *a.* ईषद्धूसर, आपांडुवर्ण.

GROAN, *v. i.* दुःखवशात् क्रण्-स्वन् 1 P or नद् 1 P or रु 2 P or आक्रुश् 1 P, सशब्दं निश्वस् 2 P, आर्तरवं-दीर्घनादं-कृ 8 U. -*s.* दीर्घनिश्वासः, आर्तरवः-नादः, सनिश्वासं क्रणितं, सीत्कारः, ससीत्कारं परिदेवनं.

GROCER, *s.* वणिज् *m.*, नैगमः; *See* MERCHANT. -Y, *s.* वाणिज्यं, वणिक्कर्मन् *n.*

GROG, *See* LIQUOR.

GROIN, *s.* ऊरुसंधिः.

GROOM, *s.* परिचारकः, भृत्यः, किंकरः;, (strictly) अश्वपालः-रक्षकः-सेवकः.

GROOVE, *s.* रेखा, प्रणाली. 2 सुषिरं, दीर्घसुषिरं.

GROPE, *v. i.* अंधकारे परा-मृश् 6 P, तमसि निरूप् 10 or अन्विष् 4 P or परीक्ष् 1 A.

GROSS, *a.* स्थूलकाय, बृहत्, पीन, पीवर, मेदस्विन्. 2 घन, स्थूल, असूक्ष्म; 'g. measurement' स्थूलमानं. 3 गाढ, निबिड, निरंतर, अविरल, सांद्र. 4 अश्लील, ग्राम्य, नीच, अवाच्य, अशिष्ट, असभ्य, गर्ह्य, निंद्य, अशुद्ध, कुत्सित, नि-अप-कृष्ट, अपवित्र, मलीमस, अमेध्य, अयशस्कर (री *f.*). 5 जड, मूढ, मंद. 6 अविनीत, अमर्यादः. 7 अत्यंत, अतिमात्र, महत्, सु- अति pr.; 'g. fault' महापराधः; 'g. body' स्थूल-जड-देहः; 'g. darkness' संतमसं, अंधं तमः. -*s.* स्थूलांशः, प्रधानभागः, प्रधानांशः, साकल्यं, सामग्र्यं, समासः; 'in the g.' स्थूलमानेन, साकल्येन. -LY, *adv.* स्थूलं, घनं, असभ्यं, गर्ह्यतया, नीचं; अत्यंतं, अतिमात्रं, अति-सु pr.; 'g. corrupted' अतिदुष्ट. -NESS, *s.* स्थूलता, पीनता; निबिडता, अशिष्टता, ग्राम्यत्वं, अविनयः, अमर्यादा, अत्यंतता, आतिरेकः, गाढता, आधिक्यं.

GROT, GROTTO, *s.* कुहरं, गह्वरं, गुहा, कंदरः, शैलविवरं; 'natural g.' देवखातं, देवखातबिलं; 'artificial g.' क्रीडाकुटीरः, कृत्रिमकंदरः.

GROTESQUE, *a.* वि-अप-रूप, विलक्षण, हास्यरूप, कदाकार, असंगताकार; हास्य, असंगत, असंबद्ध, विषम. -LY, *adv.* असंगतं, विलक्षणतया, हास्यरूपेण.

GROUND, *s.* भूमि *f.*, भूः, क्षिति *f.*, मही, धरणी, पृथ्वी; *See* EARTH. 2 भूतलं-पृष्ठ-पीठं. 3 स्थलं, स्थली. 4 उपष्टंभः, वास्तु *m. n.*, गृहभूमिः-प्रतिष्ठा. 5 आधारः, मूलं, कारणं, निमित्तं, हेतुः, निदानं, प्रयोजनं. 6 मृत्तिका, मृद् *f.*, क्षेत्रं; 'gain g.' उप-चि pass., प्र-वृध् 1 A, एध् 1 A, वृद्धिं गम् 1 P; 'lose g.' क्षि-अवचि- pass., ह्रासं गम्; शनैः परा-नि-वृत् 1 A. -*v. t.* मूलं न्यस् 4 P or प्रतिष्ठा c. (प्रतिष्ठापयति); oft. by मूल in comp.; 'devotion g. ed on faith' श्रद्धामूला भक्तिः. 2 आरंभ-उपक्रमे शिक्ष् c. or अधि-इ c. (अध्यापयति); 'well g. ed in grammar' स्वधीतव्याकरणः; 'g.-floor' गृहतलं, कुट्टिमं, अधःकोष्ठः; 'g.-work' मूलकर्मन् *n.*, प्रारंभः, उपक्रमः; मूलं. -LESS, *a.* निर्मूल, निष्कारण, अहेतुक, अनिमित्त, निराधार, अमूलक; मिथ्या in comp. -LESSLY, *adv.* निष्कारणं, मिथ्या. -LESSNESS, *s.* अकारणं, निर्मूलत्वं.

GROUNDS, (pl.) *See* DREGS.

GROUND-SIL, *s.* देहली, गृहावग्रहणी.

GROUP, *s.* संघः, निवहः, समुदायः; गणः; *See* MULTITUDE; 'in g.s' गणशः, संघशः. -*v. t.* एकीकृ 8 U, वर्गी-गणी-कृ, सं-चि 5 U; (Collect, q. v.).

GROVE, *s.* उपवनं, वनराजि-जी *f.*, वृक्षवाटिका, वनांतः; *See* FOREST also.

GROVEL, *v. i.* नीचतया भूमौ पत् 1 P or सृप् 1 P, अधमवत् आचर् 1 P, धूलिं स्पृश् 6 P. - ING, *a.* नीच, अपकृष्ट, अधम, तुच्छ, अतिक्षुद्र.

GROW, *v. i.* स्फुट् 6 P, विकस् 1 P, फुल्ल् 1 P, उद्भिद् pass. (generally of plants). 2 रुह् 1 P, ऋध् 4, 5 P, एध् 1 A; पुष् 4 P, वृध् 1 A, उपचि pass., स्फाय् 1 A, प्यै 1 A, वृद्धिं या-इ 2 P. 3 सं-,जन् 4 A, भू 1 P; 'the beard having begun to g.' उद्भियमानश्मश्रुराजितया (Ka. 29). 4 जन्, उत्पद् 4 A; उद्-इ 2 P, भू, उत्-सं-प्र.° 5 विस्तृ pass., व्याप् 5 P; 'g. up' संवृध्, एध्, प्रौढीभू; 'bad boys g. to be bad men' कुबालाः कुनरा एव निष्पद्यंते-भवंति; 'he was grown up', 'he grew up to man's estate (majority)' यौवनपदवीमारूढः, समारूढयौवनारंभः, प्रौढः, प्राप्तयौवनः, यौवनदशामापेदे, अतीत-गत-शैशवः; 'g. old' जृ 4 P. -*v. t.* वृध् c., रुह् c. -ING, *a.* वर्धमान, उपचीयमान, वर्धिष्णु. 2 रोहिन्, रुह, रुह्य, भव, उद्भव, प्रभव, ज, जात, उत्थ, समुत्थ, भू, in comp.; 'g.-ing in size' प्र-उपचीयमान-अवयवः. -GROWTH, *s.* वृद्धि, आगमः, वर्धनं, उपचयः, ऋद्धि *f.*, स्फीति *f.*, अभ्युदयः, विस्तारः. 2 उत्पत्ति *f.*, सं-प्र-भवः, जननं, जन्मन् *n.* 3 प्रौढि *f.*, प्रवृद्धता.

GROWL, *v. i.* भष् 1 P, गर्ज् 1 P, रै 1 P, घुर्घुररवं कृ 8 U. -*s.* भषणं, गर्जितं, घुर्घुररवः.

GRUB, *See* DIG. -*s.* कीटः, कृमिः, कोशस्थः. 2 वामनः, खर्वः, ह्रस्वः.

GRUDGE, *v.* ईर्ष्य् 1 P, द्रुह् 4 P, असूयति (D,), (with dat.); न सह् 1 A, न मृष् 4 P, 10; *See* ENVY. 2 अकामतः-अनुत्साहं-अनिच्छया-कृ 8 U or दा 3 U or यच्छ् 9 P. 3 परि-देव् 1 A, परिदेव

10 A, विलप् 1 P; *See* COMPLAIN. -*s.* असूया, मत्सरः, मात्सर्यं, ईर्ष्या. 2 वैरं, वैरभावः, विद्वेषः, चिरदीर्घ-द्वेष-वैरं. -INGLY, *adv.* असूयया, साभ्यसूयं, सेर्ष्यं. 2 अकामतः, अनिच्छया, अनुत्साहं, कृच्छ्रेण, दुःखेन.

GRUEL, *s.* यवागूः, उल्लिका, भाणा, विलेपी, तरला; 'sour g.' आरनालकं, सौवीरं, कुल्माषाभिषुतं, अवंतीसोमं, धान्याम्लं, कुंजलं, कांजिकं.

GRUFF, *a.* कर्कश, परुष, निष्ठुर, रूक्ष, कठोर, कटु, कर्कशस्वभाव. 2 (Voice) गंभीर, मंद्र.

GRUMBLE, *v. i.* खिद् pass., अंसंतोषाद् विलप् 1 P or परिदेव् 1 A or परिदिव् 10 A, विषण्ण-*a.* भू 1 P, न तुष् 4 P, विषद् 1 P. 2 गर्ज् 1 P, स्तन् 1 P. -ING, *s.* विलापः, विलपनं, परिदेवनं-देवितं, असंतोषोद्गारः, विषादः. 2 गर्जनं, स्तनितं, गंभीरनादः-ध्वनिः-शब्दः.

GRUME, *See* CLOT.

GRUNT, *v. i.* गर्ज् 1 P. -*s.*, -ING, *s.* गर्जितं, शूकरनादः-गर्जितं. -LING, *s.* बालशूकरः;, शूकरशावकः.

GUARANTEE, *s.* प्रत्ययः, विश्वासः, प्रातिभाव्यं. 2 प्रतिभूः, लग्नकः, बंधकः. -*v. t.* EX. by (*s.*); प्रातिभाव्यं दा 3 U, प्रतिभूः स्था 1 P; 'I g. you the security of your property' त्वद्वित्तरक्षणेहं प्रतिभूस्तिष्ठामि.

GUARD, *v. t.* सं-,परि-,रक्ष् 1 P; पा 2 P; पा c. (पालयति), त्रै 1 A, अव् 1 P, गुप् 1 P; *See* PROTECT. 2 वृ c., वार् 10, नि°; 'g. against' अव-धा 3 U; सावधान-अवहित-*a.* भू; *See* BEWARE. -*s.* रक्षा, रक्षणं, गुप्तिः *f.*, गोपनं, पालनं, त्राणं. 2 रक्षकः, रक्षिन् *m.*, रक्षिवर्गः, रक्षाधिकृतः, सैनिकः, परिचरः; वारणं, त्राणं, -, in comp.; 'finger-g.' अंगुलित्रं, तनुत्राणं, &c.; 'arm-g. in shooting' गोधा, तलं, ज्याघातवारणं; 'on one's g.' सावधान-अप्रमत्त-अवहित-*a.*; 'off one's g.' प्रमत्त *a.*; 'g.-room' रक्षकनिवासः; उद्घाटः. -ED, *a.* रक्षित, त्राण-ड, &c. 2 (g.-ful) अवहित, सावधान, स्ववहित, समीक्ष्यकारिन्, समीक्ष्यकृत्. -EDLY, *adv.* सावधानं, विमृश्य, अवधानेन, स्ववहितं. -ER, *s.* पालकः, रक्षकः, गोप्तृ *m.*, त्रातृ *m.*, पालः-लकः in comp. -IAN, *s.* रक्षकः, रक्षिता, गोप्ता, नाथः; 'orphan's g.' पितृस्थानीयः; 'g. deity' लोकपालः, दिक्पालः. -IANSHIP, *s.* पालकपदं, रक्षा, रक्षणं.

GUERDON, *See* REWARD.

GUESS, *v. t.* ऊह् 1 A; अनु-मा 3 A, 2 P; आशंक् 1 A, तर्क् 10. -*s.* वि-,तर्कः, ऊहा, अभ्यूहः-हनं; अनुमानं, अनुमितिः *f.*; शंका; 'your g. is plain' प्रसक्तस्ते तर्कः.

GUEST, *s.* अतिथिः, अभ्यागतः, प्राघूर्णकः, प्राघुणकः आगंतुः, आवेशिकः, गृहागतः, आगंतुकः; 'friendly to g.s' आतिथेय (यी *f.*).

GUIDE, *v. t.* नी 1 P, पंथानं-मार्गं (way, q. v.) दृश् c. or आ-उप-दिश् 6 P. 2 प्र-अनु-शास् 2 P, निर्-उप-दिश्, विनि-यम् 1 P, प्र-णी 1 P, वि-धा 3 U; अधिष्ठा 1 P. -*s.* अध्वदर्शिन् *m.*, पुरोगः, मुखरः, मार्गोपदेशकः, नेतृ *m.*, नायकः, मार्गदर्शकः, उपदेशकः, निर्देशकः. 2 शास्ता, अध्यक्षः, अधिष्ठाता. -ANCE, *s.* नयः, नीतिः *f.*, मार्गदर्शनं, अध्वोपदेशः. 2 अनुसरणं, अनुवर्तनं.

GUILD, *s.* श्रेणि-णी *f.*, निगमः, वणिक्समाजः-संसर्गः. 2 संघातः, समाजः, गणः.

GUILE, *s.* माया, कपटः-टं, छलं, व्याजः, कैतवं, शाठ्यं, छद्मन् *n.*; *See* FRAUD. -FUL, *a.* मायिन्, वंचनशील, शठ, धूर्त, कापटिक (की *f.*), सव्याज, वंचक, मायाविन्, कितव. -FULLY, *adv.* सव्याजं, सकपटं, छद्मना, मायया. -LESS, *a.* निष्कपट, अकपट, अव्याज, अनुपधि, सरल, निर्व्यलीक, विमलात्मन्; *See* FRANK. -LESSLY, *adv.* अमायया; निष्कपटं, निर्व्याजं, &c.

GUILT, *s.* अपराधः, दोषः, पापं, पातकं, अघं, एनस् *n.*, पापकर्म, दुष्कृति *f.*, आगस् *n.*, दुरितं. 2 सदोषता, पापत्वं, अपराधिता. -LESS, *a.* निरपराध, अनपराधिन्, अनागस्, अपाप, निष्पाप; अकृतदोष, निर्दोष अनघ, शुद्ध, पाप-दोष-हीन. -LESSLY, *adv.* निरपराधं, पापं-दोषं-विना. -Y, *a.* पापिन्, अपराधिन् सापराध, अपराद्ध, सपाप, पापकर्मन्, सदोष, कृतागस् कृतापराध, दोष-पाप-वत्, पातकिन्, दुष्कृतिन्, पापात्मन्, पाप.

GUINEA-WORM, *s.* स्नायुकः.

GUISE, *s.* वेशः-षः, वस्त्रं, परिधानं, रूपं, आकारः, स्थान *n.*; *See* DISGUISE.

GUITAR, *s.* वीणा, वल्लकी, विपंची; सारंगी, पिनाकं 'seven-stringed g.' परिवादिनी.

GULF, *s.* अखातं, समुद्रवंकः, पुटभेदः. 2 अगाधं-अतलस्पर्शं-खातं, रंध्रं. 3 Whirlpool, q. v.

GULL, *v. t.* वंच् 10, प्रतृ c.; *See* CHEAT. -*s.* सुप्रतार्यः, सुखं वंचनीयः. 2 जलकुक्कुटः, विश्वकः; 'g.-catcher' वंचकः, प्रतारकः. -ERY, *s.* प्रतारणा, वंचनं-ना, छलं, कपटं.

GULLET, *s.* गलः, गलस्रोतस् *n.*, निगरणः.

GULLY, *s.* प्रणालः-ली, कुल्या, जलमार्गः, परि(री)वाहः.

GULOSITY, *s.* अतिभोजनं, घस्मरता, अत्याहारः.

GULP, *v. t.* नि-गृ 6 P, ग्रस् 1 A. 2 उद्-गृ, उत्क्षिप् 6 P. -*s.* निगरणं, ग्रसनं. 2 उद्गिरणं, उद्गमः-मनं.

GUM, *s.* निर्यासः, रसः. 2 (Of teeth) दंतमांसं, दंतमूलं. 3 श्यान-सांद्र-द्रव्यं; 'g.-boil' दंतव्रणः-विस्फोटः. -MY, *a.* श्यान, सांद्र, निर्यासमय (यी *f.*),

GUN, *s.* लोहसुषि *f.*, गुलि-गुलिका-प्रक्षेपिणी, लोहनाडिः-डी *f.*; अग्न्यस्त्रं; 'g.-powder' आग्नेयचूर्णं.

GURGE, *See* WHIRLPOOL.

GURGLE, *v. i.* घर्घरत् कृ 8 U, गद्गदं नद् 1 P, (कुहरेषु गह्वरनदद्गोदावरीवारायः U. 2).

GUSH, *v. i.* निष्पत् 1 P; बहुशः स्रु 1 P or नि-स्यंद् 1 A or क्षर् 1 P; वेगात् निः-सृ 1 P or प्रवृत् 1 A; तस्यास्तु मद्दर्शनादेव आबद्धधारमश्रु प्रावर्तत (D. K. II. 3) 'tears g. ed forth from her eyes in torrents &c.', उद्बाष्पे नयने जाते. —*s.* जलप्रपातः, उत्पीडः, वेगेन निःसरणं, प्रवृत्ति *f.*

GUST, *s.* चंडवातः, वात्या, प्रकंपनः, जवानिलः, वायुवेगः, तीव्र-प्रबल-वातः-वायुः. 2 रुचि *f.*, आस्वादः, रसः. —FUL, *a.* सरस, रुचिर. —LESS, *a.* विरस, अस्वादु. —Y, *a.* पवनक्षिप्त, वातुल, वातमय (यी *f.*).

GUT, *s.* अंत्र, पुरीतत् *n.*; शिरा, अंतर्व्रंडी. 2 उदरं, जठरः-रं. —*v. t.* अंत्राणि बहिष्कृ 8 U or निष्कृष् 1 P. 2 सर्वस्वं अपहृ 1 P.

GUTTER, *s.* जलमार्गः, परि(री)वाहः, प्रणालः-ली.

GUTTLER, *See* GLUTTON.

GUTTURAL, *a.* कंठ्य, कंठस्थ-स्थानीय.

GUZZLE, *v. t.* अतिमात्रं पा 1 P or ग्रस् 1 A or नि-गृ 6 P.

GYMNASIUM, *s.* व्यायामभूमि *f.* -शाला. —GYMNASTIC, *a.* व्यायामशील-पर-सेविन्. 2 व्यायामसंबंधिन्; 'g. s' व्यायामः, व्यायामविद्या, मल्लक्रीडा.

GYRATE, *See* REVOLVE.

GYRE, *s.* मंडलं, आवृत्ति *f.*, चक्रगति *f.*

GYVES, *s.* निगडः-डं, शृंखला-लं, पाशः, बंधनं.

H.

HA, *interj.* हा, अहो, अयि, बत, हंत.

HABERDASHER, *s.* क्षुद्रपण्यविक्रायिन् *m.*

HABERGEON, *s.* वक्षत्राणं, उरश्छदः.

HABILIMENT, *See* DRESS.

HABIT, *s.* Dress, q. v. 2 शीलं, भावः, प्रकृति *f.*, स्थिति *f.*, वृत्ति *f.*, अवस्था, दशा, स्वभावः. 3 अभ्यासः, नित्यप्रवृत्तिः, आचारः, नित्यक्रिया, व्यवहारः, रीति *f.*, प्रचारः, क्रमः, आवृत्तिः, अनुशीलनं; 'in the h. of' शील or वृत्ति in comp.; 'in the h. of stealing' चौर्यवृत्ति; मृगयाशील, &c; 'bad h.' व्यसनं, दुर्गुण; 'having bad h.s' दुर्वृत्त, दुराचार, पापवृत्ति, भ्रष्टचारित्र. —*v. t.* Dress, q. v. —ABLE, *a.* वासक्षम, वसतियोग्य. —ATION, *s.* वासः, धामन् *n.*, वसति *f.*, आलयः, गृहं, गेहं, आगारं; *See* HOUSE. —UAL, *a.* अभ्यासज, नित्य, सतत, अनुशीलित, आभ्यासिक-व्यावहारिक-स्वाभाविक (की *f.*); 'a h. drunkard' नित्यपानासक्तः; 'a h. worker' क्रियावान्, कर्मसु उद्यतः, कार्मः, कर्मशीलः. —UALLY, *adv.* नित्यं, सततं, यथाभ्यासं, यथारीति, यथाव्यवहारं. —UATE, *v. t.* अभ्यस् 4 U, अनुशील् 10, शिक्ष् c., परिचि c., अभ्यस्त-परिचित-*a.* कृ 8 U; 'h. ed to distress' ज्ञातदुःख, परिचितक्लेश; दुःखशील, दुःखाभिज्ञ.

HACK, *v. t.* खंडशः कृत् 6 P or छिद् 7 P, बहुलवशः भञ्ज् 6 P or विधू 10, व्यवच्छिद्. —*s.* प्रहारः, छेदः, आघातः. 2 पण्याश्वः, कदश्वः, जीर्णः अश्वः, सर्वप्रयोज्यः-सर्वसाधारणः-अश्वः. 3 हीनवृत्तिः, नीचकर्मकारिन् *m.*, ज्ञातीनः, सर्वप्रयोज्यः, पण्यः.

HACKLE, *s.* उमामार्जनी-शोधनी.

HACKNEY, *s.* *See* HACK (*s.*). 2 पण्यस्त्री, सर्वोपभोज्या. —*v. t.* हीनकर्मणि नियुज् 7 A, 10; 'h.-coach' पण्यवाहनं, पण्य-साधारण-रथः. —ED, *a.* जीर्ण, साधारण, बहुप्रयुक्त, सर्वसाधारण.

HADES, *s.* पाताललोकः, पातालं, अधोलोकः-भुवनं.

HAFT, *See* HANDLE.

HAG, *s.* जरती, स्थविरा, कुरूपिणी. —HAGGARD, *a.* परिक्लिश, क्षाम, क्षीण, क्षाम-शुष्क-वदन, रूक्ष, भयदर्शन. 2 जरठ, स्थविर.

HAGGLE, *v. i.* क्रयविक्रयकाले विलंब् 1 A or विवद् 1 A.

HAIL, *interj.* नमः, स्वस्ति, (with dat.); oft. ex. by जि 1 P; जयतु जयतु देवः 'h. to your Majesty'; कुशलं भूयात्, अभिवादये. —*s.* शिलावृष्टि *f.*, करकानिपातः; 'h.-stone' करका, वर्षोपलः, वर्षशिला, पयोघनः, घन-मेघ-कफः; 'h.-storm' करकासारः, शिलावर्षः. —*v. i.* उपलान् वृष् 1 P or निपत् c., करकासारं पत् c. —*v. t.* वंद् 1 A, अभिवंद् 10 A, संबुध् c., आमंत्र् 10 A, आ-अभि-भाष् 1 A, आ-ह्वे 1 P. 2 (fig.) प्रीत्या-मुदा-अंगीकृ 8 U; अभिनंद् 1 P.

HAIR, *s.* केशः, कचः, बालः, चिकुरः, कुंतलः; 'h. on the head' शिरोरुहः, मूर्धजः, शिरसिजः. 2 (Of the body gen.) रो(लो)मन् *n.*, तनूरुहः-हं, तनुजः; 'quantity of h.' कैश्यं, कैशिकं. 3 केश(स)रः; 'whole collection of h.' केशकलापः-पक्षः-हस्तः-पाशः; 'h. hanging on the forehead' भ्रमरकाः; 'lock of h.' काकपक्षः, शिखंडकः; 'matted h.' जटा, सटा; 'a braid of h.' कबरी, केशवेशः; 'curled h.' अलकः, चूर्णकुंतलः; 'braided h.' वेणि-णी *f.*, धम्मिल्लः; 'crest-h.' शिखा, चूडा, केशपाशी; 'clean h.' शीर्षण्यः, शिरस्यः; 'h.-broom or brush' केशमार्जनी-शोधनी; 'h.-dressing' केशरचना-संस्कारः; 'even a h.'s breadth' रेखामात्रमपि; 'a h.-breadth escape' कथमपि लब्धा मुक्तिः. —LESS, *a.* अकेश, केशहीन, विकेश. —Y, *a.* लोमश, लोमावृत, प्रचुर-बहु-लोमन्, लोममय (यी *f.*), लोमवत्, लोमपूर्ण, केशव, केशिन्, केशिक.

HALBERDIER, *s.* प्रासिकः, शाक्तीकः.

HALCYON, *s.* मत्स्यरंगः. —*a.* शांत, निरुद्वेग, निराकुल, प्रसन्न, अक्षुब्ध, निर्वात.

HALE, *a.* सुस्थ, नीरोग, कल्य, निरामय, नीरुज्-ज, आधिव्याधिरहित. —*v. t.* आकृष् 1 P; *See* PULL.

HALF, *a.* अर्ध, सामि in comp.; 'h. done' सामिकृतं. —*s.* अर्धः-र्धं, अर्धभागः, अर्धांशः; in comp. ex. by अर्ध; अर्धांगं, पूर्वार्धः, &c.; 'a year and a h.' सार्धवत्सरः; 'h. eaten' अर्धभुक्त; अर्धविवृत, अर्धच्छिन्न, &c.; 'h.-brother' वैमात्रेयः, सापत्नः, अन्योदर्यः, वैमात्रः; 'h.-blood' भिन्नोदर, भिन्नगर्भ, अन्योदर्य; 'h. dead' मृतकल्प-प्राय, मरणोन्मुख, आसन्नमृत्यु, मुमूर्षु, कंठगतप्राण; 'h.-hearted' निरुत्साह, उत्साहहीन, आस्थारहित; 'h. moon' अर्धेंदुः, चंद्रार्धः; 'h.-sister' वैमात्रेयी, वैमात्री, अन्योदर्या; 'h. starved' क्षुधार्तसन्नप्राय, क्षुत्क्षामकल्प; 'h. way' अर्धमार्गे-पथे, मध्यमार्गे; 'h. year' अर्धवर्षं; 'h. yearly' षाण्मासिक-आर्धवार्षिक (की *f.*); 'h. a bread is better than no loaf' सर्वनाशे समुत्पन्ने अर्धं त्यजति पंडितः or अर्धेन कुरुते कार्यं.

HALLOO, *interj.* हहो, अहो, अरे, अये, भोभोः. —*v. t.* डयैः शब्दायते (D.), दूराद् उत्क्रुश्-आह्वे 1 P or उद्-घुष् 10.

HALLOW, *v. t.* पवित्रीकृ 8 U, पूज् 10, मह् 1 P, 10, अर्च् 1 P, 10. 2 संस्कृ, प्रोक्ष् 1 P, अभिषिच् 6 P.

HALLUCINATION, *s.* मतिविभ्रमः; माया, मोहः, भ्रमः, व्यामोहः, वंचना, इंद्रजालं.

HALM, *s.* पलालः-लं, तृणं.

HALO, *s.* प्रभा-तेजो-मंडलं, परिवेषः-शः, परिधिः, द्युति-दीप्ति-मंडलं-चक्रं-माला; 'h. crown of silver light' रजतधवलप्रभामंडलं; 'with a h. of brilliant lustre' स्फुरत्प्रभामंडल *a.*

HALSER, *s.* नौगुणः-रज्जु *f.*

HALT, *v. i.* निविश् 6 P, अव-स्था 1 A, प्रयाणभंगं कृ 8 U, अध्वमध्ये स्था. 2 विरम् 1 P, विश्रम् 4 P. 3 लंग् 1 P. —*a.* पंगु, गतिविकल, श्रोण. —*s.* निवेशः, अवस्थितिः *f.*, अवस्थानं, प्रयाणभंगः, यानवृत्ति-विरतिः *f.*, विश्रामः; 'h. ing place' निवेशस्थानं. 2 लंगनं.

HALTER, *s.* पाशः, गुणः, रज्जु *f.*, कंठपाशः. —*v. t.* कंठपाशेन बंध् 9 P or संयम् 1 P.

HAM, *s.* जंघा, प्रसृता. 2 वक्षूरं-रः. 3 मंदिरं.

HAMADRYAD, *s.* वन-तरु-देवता.

HAMLET, *s.* ग्रामः, क्षुद्रग्रामः, कुग्रामः, पल्लि-ल्ली *f.*

HAMMER, *s.* मुद्गरः, घनः, अयोघनः, दुघणः-नः. —*v. t.* ताडेन-ताडनेन-अभिष् c. 2 मुद्गरेण तड् 10 or प्र-हृ 1 P. —*v. i.* सोद्योगं यत् 1 A or परिश्रम् 4 P. —ING, *s.* मुद्गराघातः.

HAMMOCK, *s.* प्रेंखा, दोला, प्रेंखोलनं.

HAMPER, *s.* पेटिका, पेटकः, करंडः, पिटः, कंडोलः. —*v. t.* प्रति-नि-वि-रुध् 7 U, प्रति-वि-हन् 2 P, कुंठ् 10, बाध् 1 A, विघ्नयति (D.), स्तंभ् 9 P, प्रतिबंध् 9 P. —ED, *a.* कुंठित-निरुद्ध-गति, प्रतिहत, निरुद्ध, बाधित, कुंठित, प्रतिबद्ध.

HAMSTRING, *s.* मंदिरशिरा.

HAND, *s.* हस्तः, पाणिः, करः, शयः, पंचशाखः, भुजादलः. 2 पार्श्वः, भागः, पक्षः. 3 करणं, विधानं, चेष्टा, क्रिया, व्यापारः. 4 वशः-शं, अधिकारः, शक्ति *f.*, प्रभुत्वं. 5 कर्तृ *m.*, कारः-कारकः in comp.; कर्मकरः. 6 प्रदेशिनी, सूचिनी; कीलः; सूचि *f.* 7 लिपि *f.*, लिबि *f.*, अक्षरसंस्थानं, लिखितं; 'h. to hand' हस्ताहस्ति, बाहुबाहवि, मुष्टीमुष्टि; 'h. to h. fight' नियुद्धं, बाहुयुद्धं; 'on the one h.-on the other h.' एकतः-अन्यतः, इतः-इत, एकंच-अपरंच; oft. by च-च; 'on the other h.' विपर्यये, प्रत्युत, तु, तावत्; 'if on the other h.' अथ, यदि; 'on all h. s' सर्वथा, सर्वत्र; 'at h.' प्रत्यासन्न, समीपवर्तिन्, आसन्न, संनिहित, समीपं-पे; 'in h.' हस्ते, हस्तगत, हस्तवर्तिन्, करतलगत; 'subject in h.' प्रकृतं, प्रस्तुतं; 'h. in h.' एकत्र, समवायसंबंधेन; सह, सहितं, समं, संभूय; 'to give a helping h.' हस्तावलंबं दा 3 U; 'given a helping h.' दत्तहस्तावलंब; 'living from h. to mouth' उत्पन्नभोजिन्, दुर्गत, कृच्छ्रगत; 'on h.' अनुपयुक्त, अव्यापृत; (of books &c.) अविक्रीत; 'sword in h.' खड्गहस्त, कृपाणपाणि; 'off-h.' आशु, अविचार्य, अविलंब; आकस्मिक-प्रत्युत्पन्न-अचिंतितपूर्व-*a.*; 'out of h.' सपदि, तत्क्षणात्; 'to take in h.' आरभ् 1 A, प्रस्तु 2 U, उपक्रम् 1 A; 'lend a h.' उपकृ 8 U, अनुग्रह् 9 P, साहाय्यं कृ; 'lay h. s on' धृ 1 P, ग्रह्, आधृष् c., परामृश्-स्पृश् 6 P; 'to have a h. in' सहकारिन् *a.* भू, सहायः भू; 'have or get the upper h.' अभि-भू, प्र-भू, अतिरिच् pass.; 'under-h.' वैय, छलेन, सकपटं; 'clap the h. s' करतालं वद् c.; 'to support with the h.' करेण अव-आ-लंब् 1 A, हस्तावलंबं दा; 'the open or extended h.' चपेटः, चपेटः, प्रहस्तः, प्रतलः; 'hollow of the h.' करपुटं, हस्तकोषः; 'two open h. s joined together' संहततलः, प्रतलः; 'folded h.' प्रसृतिः; 'folded h. s joined' अंजलिः; 'clenched h.' मुष्टि *m. f.*; 'h. with the fist clenched' रत्निः. —*v. i.* हस्ते-करे-निक्षिप् 6 P or दा 3 U or कृ c. (अर्पयति); 'h. down' परंपरया-क्रमेण-संक्रम् c. or संक्रमय्; 'to be h. ed down' परंपरया आगम् 1 P; उप-,संक्रम् 1 U, 4 P, (यानि भगवतः कृष्णाश्चात्कौशिकमृषिमुपसंक्रांतानि U. 1); (in sacred texts) आ-समा-म्ना pass.; 'h.-book' हस्तलेखं पुस्तकं, लघुग्रंथः; 'h.-cuff' हस्तपाशः-निगडः; करबंधनं;

(*v. t.*) पाणेन हस्तौ बंध् 9 P or संयम् 1 P or यंत्र् 10; ' h.-kerchief ' करवस्त्रं; ' h.-maid ' चेटी, दासी, परिचारिका ; ' h.-mill ' हस्तचालिता पेषणी; ' h.-weapon ' हस्तायुधं, करशस्त्रं ; ' h.-writing ' लिखितं, लिपि-वि *f.*, अक्षरसंस्थानं ; ' one's own h.-writing ' हस्तलेखः, स्वहस्ताक्षरं. -FUL, *s.* मुष्टि *m. f.* ; ' a h. of grass ' तृणमुष्टिः. 2 अल्प-स्तोक-संख्या, oft. by अल्प-स्तोक-*a.* -HANDICRAFT, *s.* शिल्पं, हस्तलाघवं, हस्त-शिल्प-कर्म, शिल्पविद्या ; ' h. s-man ' शिल्पिन् *m.*; शिल्प-कारः, कर्मकरः. -HANDIWORK, *s.* हस्तकृतं कर्म. —HANDY, *a.* दक्ष, लघुहस्त, करदक्ष, सुप्रयोगवत्, कुशल, निपुण, चतुर, पटु, क्षिप्रकारिन्. 2 सुखनेय, लघुभार, अदुर्वह. 3 आसन्न, निकट, प्रत्युत्पन्न. -LY, *adv.* हस्तलाघवेन, दक्षतया, सपाटवं, युक्त्या, चतुरं, दाक्ष्येण. -NESS, *s.* दक्षता, हस्तलाघवं, करदक्षता, कौशलं, चातुर्यं, नैपुण्यं.

HANDLE, *s.* मुष्टि *m. f.*, दंडः, कर्णः, वारंगः, तलः-लं. 2 (Of swords) त्सरुः, सरुः. 3 (Of ploughs) ईषादंडः; ' to give h. ' अवसरं-अवकाशं-दा 3 U; ' serve as a h. ' उपकरणीभू 1 P. -*v. t.* (A subject) विचर् c., विमृश् 6 P, निरूप् 10, परीक्ष् 1 A, पर्यालोच् 10; *See* EXAMINE. 2 प्रयुज् 7 A, 10; वृत् 1 A, व्यव-हृ 1 P, आचर् 1 P (with loc.). 3 प्र-णी 1 P, वि-धा 3 U, निर्वह् c. 4 हस्तेन स्पृश्-परामृश् 6 P or आ-समा-लभ् 1 A.

HANDSEL, *s.* प्रथमव्यवहारः-विक्रयः.

HANDSOME, *a.* कांतिमत्, सुंदर (री *f.*), रूपवत्, सुरूप, चारु, शुभ, शोभन, कांत, वाम, सुगात्र (त्री *f.*), सुदृश्य, सु in comp.; *See* BEAUTIFUL. 2 विपुल, यथेष्ट, प्रचुर. 3 उदार, वदान्य, स्थूललक्ष्य ; ' h. is that h. does ' आचारसौष्ठवमेव परमार्थतः सौष्ठवमित्युच्यते. -LY, *adv.* चारुतया, शोभनं, सु pr. -NESS, *s.* कांति *f.*, रूपं, लावण्यं, शोभा.

HANG, *v. t.* बंध् 9 P, नि-धा 3 U, अनु-वि-संज् (षंज्) 1 P, आ-अव-लंब् c., आंदोलयति (D.); ' hung by a loop ' काचित, शिक्यित. 2 उद्-बंध्, उद्बध्य व्या-पद् c. or हन् c. (घातयति). 3 आ-अव-नम् c. (नमयति), नम् c., नम्रीक् 8 U, नम्रतां नी 1 P; *See* BEND; ' with his lotus-like face hung down ' अवनतमुखपुंडरीकः; ' h.-ing the head ' अवनतमुख-शिरस्, नतमूर्धन्. 4 आच्छद् 10; वि-भूष् 10, प्र-साध् c., मंड् 10, अलंकृ 8 U, परिष्कृ. -*v. i.* प्र-अव-लंब् 1 A, लुल् 1 P, 6 P, 1 A, चंच् 1 P, दोलायते (D.), झेंख् 1 P, उद्-बंध् pass., ' h. between ' विशंकुरिवांतरा तिष्ठ (S. 2). 2 (Stick) आसंज् pass., लग् 1 P, अनुबंध् pass., संलग्नीभू 1 P. 3 (On, upon) अव-लंब्, आ-श्रि 1 U, उप-अनु-जीव् 1 P; *See* DEPEND; ' thereby h. s a tale ' तदनुविद्धा, काचिदाख्यायिका वर्तते; ' h. over ' उन्नस् 1 P, उप-स्था 1 U, प्रत्यासद् 1 P. -ER, *s.* उद्बंधकः; ' h. on ' आश्रितः, पादसेविन् *m.*, पीठमर्दः, अनु-उप-जीवी, पराधीनः, परपिंडादः. -ING, *s.* उद्बंधनं. 2 परिच्छदः, वसनं; जवनिका, प्रच्छदपटः, चित्रयवनिका. -HANGMAN, *s.* घातकः, दंडपाशिकः, वध्यपुरुषः.

HANK, *s.* काष्ठवलयः. 2 Cheat, q. v.

HANKER, *v. i.* अभिलष् 1, 4 P, स्पृह् 10, वांछ् 1 P, उत्कंठ् 1 A; लुभ् 4 P; *See* LONG; oft. by उत्क, उत्सुक, पर्युत्सुक, पर, तत्पर, परायण, in comp. -ING, *s.* अभिस्पृहा, उत्कंठा, औत्सुक्यं, अत्यभिलाषः.

HAP, *s.* दैवं, दैवयोगः-घटना, यदृच्छा. -LESS, *a.* अधन्य, मंदभाग्य, दुर्दैव. -LY, *adv.* दैवात्, दैवयोगात्, दैववशात्.

HAPHAZARD, *a.* असमीक्ष्य, अविचार्य; दैवायत्त, दैवाधीन.

HAPPEN, *v. i.* वृत् 1 A, भू 1 P, घट् 1 A; संवृत्, सं-भू, सं-समा-पद् 4 A, स्था 1 P, आ-सं-पत् 1 P, प्रसंज् pass. 2 अकस्मात्, यदृच्छया, दैवात्, दैववशात् with verbs; *See* CHANCE.

HAPPY, *a.* सुखिन्, प्रीत, हृष्ट,, सानंद, सुखित, सुखभाज्, प्रमुदित, आह्लन्न, निर्वृत, निर्वित, तृप्त, संतुष्ट. 2 भाग्यवत्, शुभान्वित, शुभंयु, समृद्ध, श्रीमत्, निरापद्, कुशलिन्, निर्वृतिमत्, क्षेम; धन्य, कृतिन्, कृतार्थ; ' h. is it for me that &c. ' इदमेव तावन्मम परमभाग्यं मन्ये. 3 शुभ, शिव, कल्याण (णी *f.*), मंगल, पुण्य, भद्र, भव्य, आनंदप्रद, भावुक, प्रशस्त; ' a h. result ' सुफलं, कल्याणोदर्कः. -LY, *adv.* सुखेन, सुखं, निर्विघ्नं, स्वास्थ्येन, यथासुखं. 2 दिष्ट्या, दैवात्, अकस्मात्, यदृच्छया, दैववशात्, सौभाग्येन, पुण्योदयात्. -NESS, *s.* सुखं, सौख्यं, आनंदः, धन्यता, हर्षः, कृतार्थता, शर्मन् *n.*, संतोषः, निर्वृति *f.*, श्रीः, संपद् *f.*, पुण्योदयः. 2 कल्याणं, भद्रं, क्षेमः-मं, शिवं, स्वास्थ्यं, कुशलं.

HARANGUE, *s.* उच्चैः वचस् *n.*, तारस्वरेण भाषणं, सालंकारं वचनं. -*v. i.* सालंकारं-सदर्पं-वद् 1 P or भाष् 1 A. -ER, *s.* वागीशः, प्रवचनपटुः, वाक्पटुः.

HARASS, *v. t.* अर्द् 1 P or c., व्यथ् c. (व्यथयति), पीड् 10, क्लिश् 9 P, दु 5 P, सं-परि-तप् c., उपहन् 2 P, विप्र-कृ 8 U, नि-कृ, उपसृ 1 A, बाध् 1 A, प्रतिरुध् 7 U. 2 खिद् c., श्रम् c., क्लम् c., आयस् c., ग्लै c (ग्ल-ग्ला-पयति). -ER, *s.* पीडकः, उपसर्जकः, खेदकः आयासकः. -ING, *a.* दुःख-क्लेश-कर (री *f.*), पीडाप्रद, क्लेशावह.

HARBINGER, *s.* अग्रे(प्र)सरः, अग्रदूतः, अग्र-पुरोगः-गामी; वार्ताहरः, संदेशहरः (of news); ' h. of spring ' वसंतागमदूतः; ' antecedent good omens are the h. s of the coming happiness

आवेदयंति प्रत्यासन्नमानंदं अग्रजातानि शुभानि निमित्तानि (Ka. 65).

HARBOUR, *s.* खातं, क्रोडः, नौकाश्रयः, 2 शरणं, गतिं *f.*, आश्रयः, संश्रयः, अवकाशः, वासस्थानं. —*v. t.* वस् c., आश्रयं-वासस्थानं-दा 3 U, सत्कृ 8 U. 2 धृ 1 P, 10, मनसि कृ or उपलभ् 1 A or ग्रह् 9 P or नि-धा 3 U. 3 आश्रि 1 U, निवस् 1 P. —AGE, *s.* आश्रयः; *See* (*s.*). —LESS, *a.* निराश्रय, अगतिक, अशरण.

HARD, *a.* दृढ, घन, संहत, कठिन, दृढसंधि, कठोर, कर्कश, कीकस; 'becoming h. (solid)' कठिनतामापद्यमान. 2 उग्र, दारुण; निर्घृण, निर्दय, क्रूर, नृशंस, निष्ठुर, कठोर; 'oh h. fate' अहो दारुणो दैवदुर्विपाकः, अहो वामता-वक्रता-विधेः, अहो वक्रं विधेः क्रीडितं. 3 (Lesson) दुर्बोध, असुगम, दुर्ज्ञेय, गहन. 4 क्लेशावह, दुःखद, व्यथा-पीडा-कर (री *f.*), क्लेशिन्. 5 (Sound) ककेश, कठोर, रूक्ष, परुष. 6 अननुकूल, वाम, विरुद्ध, प्रतिकूल, प्रतीप, वक्र. 7 असुकर, दुष्कर, कष्ट, दुःसाध्य, कठिण, दुर्-दुःख-कष्ट in comp.; *See* DIFFICULT. 8 शुष्क, अम्ल. —*adv.* प्रयत्नतः, आयासेन, सोद्योगं, बलेन, बलवत्, सोत्साहं, प्रसभं, तीक्ष्णं, सप्रयत्न, सोद्यमं. 2 दुःखेन, कष्टेन, कृच्छ्रेण, प्रयासेन, दुर् pr. 3 त्वरितं, शीघ्रं; 'h.-pressed by hunger' क्षुधया नितरा-बलवत्-पीडित, प्रबल-क्षुधावसन्न; 'h. by' समीपे-पं, अनतिदूरं-रे, निकटं-टे, उपांते, आरात्; 'h.-drinker' पानरतः, अतिपानासक्तः; 'h.-earned' कष्टोपार्जित, श्रमेण लब्ध; 'h.-featured' दुर्मुख, कदाकार; 'h.-fisted' दृढ-बद्ध-मुष्टि, अमुक्तहस्त, व्ययपराङ्मुख; 'h.-hearted' कठोर, नृशंस, क्रूर, निर्दय, निर्घृण, कठोर-कठिण-हृदय, पाषाण-वज्र-हृदय, अयोहृदय, वज्रमय (यी *f.*), निरनुक्रोश; 'h.-ware' लोहभांडानि (pl.). —EN, *v. t.* कठिनीकृ 8 U, दृढीकृ, घनीकृ, कृ with (*a.*). —LY, *adv.* कथं कथमपि, कष्टेन, दुःखेन, कष्टं, कृच्छ्रेण, नैव. —NESS, *s.* काठिन्यं, दृढता, कठोरता, निष्ठुरता, दुर्बोधता, दुष्करत्वं, उग्रता, &c. —SHIP, *s.* कष्टः-ष्टं, क्लेशः, दुःखं, पीडा, बाधा, काय-देह-क्लेशः, कृच्छ्रं, आयासः, खेदः. —HARDY, *a.* साहसिन्, प्रगल्भ, शूर, वीर, धीर, निर्भय; प्रतिभानवत्, साहसिक (की *f.*), विक्रांत, निःशंक. 2 दृढ-कठिन-देह-शरीर-काय; 'of a h. frame' सिंहसंहनन, वज्रदेह. —HOOD, *s.* वीर्यं, शौर्यं, साहसिकता, प्रागल्भ्यं, साहसं; धृष्टता, प्रतिभा, निर्लज्जता. —NESS, *s.* शौर्यं, वीर्यं, देहकाठिन्यं.

HARE, *s.* शशः, शशकः; 'h.-brained' अविमृश्यकारिन्, चपलबुद्धि, अनवस्थितचित्त, साहसपर.

HAREM, *s.* अवरोधः-धनं, शुद्धांतः, अंतःपुरं, अवरोधगृहं, स्त्रीगृहं; 'women of the h.' अवरोधः, परिग्रहः, अंतःपुरं.

HARK, *interj.* ननु, शृणु, आकर्णय, अवधीयतां.

HARLEQUIN, *s.* वैहासिकः, भंडः, विदूषकः.

HARLOT, *s.* वेश्या, पण्यस्त्री, वारस्त्री-योषित्-योषा, पण्यांगना, गणिका, वारांगना, रूपाजीवा; बंधकी, पुंश्चली, कुलटा. —RY, *s.* वेश्यावृत्ति *f.*, वेश्यासेवा.

HARM, *s.* क्षति *f.*, हिंसा, अपायः, नाशः, पीडा, बाधा, अपचयः, अपकृति *f.*, विरोधः, अपकारः, हानि *f.*, उपद्रवः. 2 दोषः, अपराधः, पापं, नियमव्यतिक्रमः. —*v. t.* दु 5 P, क्लिश् 9 P, अर्द् 1 P or c., हिंस् 7 P, उपद्रु 1 P, पीड् 10, बाध् 1 Á, अपकृ 8 U, उपहन् 2 P, द्रुह् 4 P (with dat.), क्षण् 1 P, वि-प्र-कृ. —FUL, *a.* हिंस्र, अपकारिन्, उपद्रविन्, हिंसक, अपकारक, हिंसात्मक, क्षतिकारक; घातुक, शारुः, शारुक (animals). —LESS, *a.* अनपकारिन्, अहिंस्र, निरुपद्रव, अहिंसक, अघातुक. 2 निर्दोष, निरपराध, निष्पापं. —LESSNESS, *s.* अहिंसा, अद्रोहः, अनपकारः, हिंसात्यागः. 2 निरपराधता.

HARMONY, *s.* तालैक्यं, स्वरैक्यं, स्वरसंगः, एकतालः-नः; 'the triple h.' तौर्यत्रिकं. 2 कलता, सुभाव्यता, स्वरमाधुर्यं, सुस्वरता. 3 संवादः, अविरोधः, ऐक्यं, एकता, संगः, संयोगः, आनुरूप्यं, सादृश्यं; 'h. of thought or mind' चित्तैक्यं, संमतिं *f.*, एकचित्तता, मतसंवादः. 4 स्नेहभावः, प्रीतिं *f.*, मैत्र्यं, स्नेहः. —IC, —ICAL, *a.* एकताल-न, सम-एक-स्वर, सुस्वर. —IZE, *v. t.* सदृशीकृ 8 U. 2 स्वरैक्यं-तालैक्यं-उत्पद् c. —*v. i.* सदृशीभू 1 P, एकी-तुल्यी-भू, सं-वद् 1 P, न विरुध् pass. —OUS, *a.* एकताल-न, एक-सम-स्वर, एकस्वन, संगतस्वर-स्वन, एकलय. 2 मधुरस्वर-स्वन, सुस्वर, सुखश्रव, श्रोत्राभिराम, सुभाव्य, श्रुतिसुख, कल, श्रवणसुभग. 3 संवादिन्, सदृश (शी *f.*), अविरुद्ध, अनुगुण, अनुरूप. —OUSLY, *adv.* एकस्वरेण-स्वनेन. 2 मधुरस्वरेण-स्वनेन, कलं, मधुरं, सुस्वरं. 3 चित्तैक्येन, अविरोधेन.

HARNESS, *v. t.* सज्जीकृ 8 U, सन्नह् 4 P or c., सज्ज *a.* कृ. 2 (रथं) युज् 7 U, 10, नि-आ-सम्°. —*s.* सज्जा, सन्नाहः, प्रसाधनं, परिच्छदः, आभरणं. 2 अश्वसज्जा.

HARP, *s.* वल्लकी, वीणा, सारंगी, विपंची. —*v. i.* वीणां वद् c.; 'praise by h.ing' उपवीणयति (D.); 'h. on' पुनरुक्त्या-पौनःपुन्येन-वद् 1 P, प्रपंचयति (D.). —ER, *s.* वीणावादकः.

HARPOON, *s.* तिमिवेधनी. —EER, *s.* तिमिवेधकः.

HARRIDAN, *s.* वृद्धवेश्या, जरती गणिका.

HARROW, *v. t.* अत्यंतं पीड् 10 or तुद् 6 P, संतप् c., प्रबाध् 1 A; *See* GRIEVE. 2 लोष्टानि भिद् 7 P or विद् 10. —*s.* कोटि(टी)शः, लोष्टभेदनः. —ING, *a.* हृदय-मर्म-च्छिद्, अरंतुद्, हृदिस्पृश्, अतिदुःखावह.

HARRY, *See* HARASS.

HARSH, *a.* कर्कश, परुष, रूक्ष, निष्ठुर, कठोर, उग्र, कठिन, क्रूर, कटु; 'h. to the touch' अमसृण, दुःस्पर्श, रूक्ष; 'h. to the taste' शुष्क, कषाय;

'h. to the ear' विस्वर, कर्णकटु, दुःश्राव्य, परुष, कर्कश. -LY, *adv.* निष्ठुरं, परुषं, रूक्षं; क्रौर्येण, उग्रं. -NESS, *s.* पारुष्यं, कार्कश्यं, रूक्षता, काठिन्यं.

HARSLET, *s.* शूकरांत्राणि (pl.).

HART, *s.* मृगः, हरिणः, एणः, कुरंगः-गमः.

HARUM-SCARUM, *a.* प्रमादिन, असावधान, साहसिन्.

HARVEST, *s.* लवः, शस्यसंग्रहकालः, शस्यलवन-संचय-समयः. 2 शस्यानि, संगृहीत-लून-शस्यं. -*v. t.* शस्यं लू 9 U or संग्रह् 9 P or संचि 5 U; 'h.-lord' शस्यसंग्राहकः; 'h.-man' शस्यसंग्राहकः-छेत्ता.

HASH, *See* HACK.

HASTE, *s.* त्वरा, वेगः, जवः, तूर्णि *f.*, संभ्रमः, शीघ्रता, क्षिप्रता, तरस् *n.*, रभसः-सं, त्वरित-आशु-गति *f.*-गमनं. -*v. i.*, -EN, 'make h.' त्वर् 1 A, सत्वरं-आशु-गम् or चल् or धाव् 1 P; 'h. towards' अभिद्रु 1 P. -*v. t.*, -EN, त्वर् c. (त्वरयति). -HASTY, *a.* सत्वर, त्वरित, क्षिप्र, तूर्ण, शीघ्र, त्वरावत्, द्रुत, अविलंबिन्, आशुकारिन्. 2 साहसिन्, अविमृश्य-असमीक्ष्य-कारिन् or-कृत्. 3 शीघ्रकोपिन्, सुलभकोप. -HASTILY, *adv.* शीघ्रं, क्षिप्र, सत्वरं, अविलंबं, त्वरितं, आशु, झटिति, द्रुतं. 2 सहसा, सरभसं, ससंभ्रमं, वेगेन. 3 कोपेन, संरंभेण.

HAT, *s.* शिरस्त्राणं, मस्तकावेष्टनं, शिरोभूषणं.

HATCH, *v. t.* उत्पद् c., उद्भू c., जन् c., निर्गम् c. 2 घट् c. (घटयति), चित् 10, निरूप् 10; *See* CONTRIVE, -*s.* पक्षिशावकगणः. 2 चिंतनं, घटनं-ना. 3 नौमुखं.

HATCHEL, *s.* अतसीमार्जनी-शोधनी.

HATCHET, *s.* परशुः, कुठारः, वृक्षादनी, परश्वधः, वृक्ष-भेदी; 'h. for cutting stones' टं(तं)कः, पाषाणदारणः.

HATE, *v. t.* वि-,द्विष् 2 U, गुप् desid. (जुगुप्सते) (with abl.), गर्ह् 1, 10 A, वि-प्र-°, कुत्स् 10 A, द्रुह् 4 P (with dat.), अभिद्रुह् (with acc.). -*s.* -HATRED, *s.* वि-,द्वेषः, जुगुप्सा, गर्हा, कुत्सा, घृणा, अप्रीति *f.* -ER, *s.* द्वेष्टृ *m.*, द्विष्-द्वेषिन् *m.*, द्वेषणः. -FUL, *a.* विद्विष्ट, गर्हित, घृणार्ह, गर्ह्य, विद्वेष्य, अक्षिगत, कुत्सित.

HAUGHTY, *a.* उद्धत, उत्सिक्त, मत्त, सगर्व, गर्वित, मानिन्, मानवत्, दृप्त, सदर्प, साटोप, साहंकार, अवलिप्त, मदोद्धत, मदोदग्र; 'to be h.' दृप् 4 P. -LY, *adv.* सगर्वं, सदर्पं, सावलेपं, उद्धतं. -NESS, *s.* उत्सेकः, दर्पः, औद्धत्यं, गर्वः, मदः, अहंकारः, अवलेपः, मानः, अभिमानः, आटोपः, प्रागल्भ्यं.

HAUL, *v. t.* कृष् 1 P, ह 1 P, आनी c. -*s.* आकर्षः, हरणं.

HAULM, HAUM, *s.* पलालः-लं.

HAUNCH, *s.* जघनं, नितंबः, काटि-टी *f.*, श्रोथः, श्रोणि-णी *f.* 2 उत्संगः, अंकः.

HAUNT, *v. t.* सदा-नित्यशः (Frequently, q. v.) आ-धि 1 U or सेव् 1 A or अभिगम् 1 P; जुष् 6 A, उपसृज् pass.; आक्रम् 1 U, 4 P; 'h. ed by devils' भूतोपसृष्ट, पिशाचसेवित-जुष्ट. -*s.* नित्यस्थानं, नित्यागमनस्थानं; आश्रयः, निलयः.

HAUTEUR, *s.* दर्पः, गर्वः, आटोपः; *See* HAUGHTINESS.

HAVE, *v. t.* Ex. by भू 1 P, अस् 2 P, वृत् 1 A, विद् 4 A (with gen. of possessor); भृ 1 P, 10, धा 3 U, भृ 3 U; 'I h. two sons' मम पुत्रौ स्तः-विद्येते, &c.; 'he had many sons by Gangâ' गंगायां स बहून् पुत्रानुदपादयत्. 2 (With inf.) by pot. pass. part.; 'I h. to go' मया गंतव्यं. 3 प्राप् 5 P, लभ् 1 A, आ-सद् c.; *See* GET; 'h. one's own way' स्वातंत्र्यमवलंब् 1 A, यथाकामं-स्वरुच्या-वृत्, कामचारीभू. 4 (Make) Ex. by causal of verbs; 'I would h. you go' त्वं गच्छेरित्यहमिच्छामि or त्वां गमयेयं. -ING, *a.* Ex. by the terminations वत्, मत्, मिन्, इन्, विन्, वल, &c. or by उपेत, धारिन्, युक्त, अन्वित, सनाथ, उपपन्न, भूत् in comp.; or by Bah. comp.; 'h. three eyes' त्रिलोचनः; धनवत्, रजस्वल, गुणोपेत, &c. -*s.* भोगः, भुक्ति *f.*, स्वत्वं, सत्ता, अधिकारः, वशः-शं, धरणं.

HAVEN, *See* HARBOUR.

HAVOC, *s.* प्रमाथः, निर्दलनं, निर्मथनं, विनाशः, वि-प्र-ध्वंसः, संहारः, उच्छेदः, महाप्रलयः, महाविप्लवः, संक्षयः. -*v. t.* उच्छिद् 7 P; *See* DESTROY.

HAWK, *s.* श्येनः, पत्रिन् *m.*, शशादनः, कपोतारिः, खगांतकः, 'h.-eyed' सूक्ष्म-दूर-दृष्टि. 2 उत्कासनं, श्लेष्मोत्क्षेपः. -*v. i.* उत्कास् 1 A, श्लेष्माणं उत्क्षिप् 6 P. 2 पक्षिणः ग्रह् 9 P or धृ 1 P. -*v. t.* घोषणा-पूर्वं विक्री 9 A. -ER, *s.* श्येनपालकः-पोषकः.

HAY, *s.* शुष्कतृण-शर्ष-घासः; 'make h. while the sun shines' अनुकूलेऽवसरे स्वकार्यसिद्धिं कुरु, इष्टसिद्धिं संपादय; 'h.-cock or-stack' शुष्कतृणराशिः-उत्करः-चिति *f.*; 'h.-market' तृणविक्रयस्थानं.

HAZARD, *s.* संकटं, संशयः, शंका, संदेहः, विकल्पः. 2 दैवं, दैवयोगः-घटना, दैवगति *f.*; 'h. of life' जीवितसंशयः; 'at any h.' समुपस्थितेपि संशये. -*v. t.* संकटे-संशये-निक्षिप् 6 P or पत् c., संशयस्थ-संदेहदोलास्थ-दैवाधीन-*a.* कृ 8 U; 'he who h. s his life' संशयितजीवितः. -OUS, *a.* संदिग्ध, संशयस्थ, संशयाक्रांत, सांशयिक (की *f.*), ससंदेह, दैवाधीन दैवसृग; 'a h. position' संशयस्थानं, शंकास्पदं

HAZE, *s.* धूमिका, कुज्झटिका, कुहेडिका. -HAZY *a.* धूमिक, सांधकार, साभ्र, कुज्झटिकाच्छन्न. 2 अस्पष्ट अव्यक्त; संकुल, संकीर्ण.

HAZEL, *a.* ईषत्कपिशवर्ण, आताम्र.

HE, *pron.* सः, एषः, असौ, अयं.

HEAD, *s.* शिरस् *n.*, शीर्ष, शीर्षक, मूर्धन् *m.*, मस्तकः-कं, मौलि *m. f.*, वरांग, उत्तमांग, मुंड-ड. **2** अग्रणीः, अध्यक्षः, धौरेयः, धुर्यः, पूर्वहः, धुरीणः, पुरोगः, पतिः, नायकः, अधिपः-पतिः, मुखरः, भेडः, आधिष्ठातृ *m.*, मुख्य-प्रधान in comp. **3** विषयः, पदं, स्थानं, अधिकरणं. **4** अग्रं, शिरस्, चूडा, शिखरं. **5** मूलं, प्रभवः, उद्गमः, उद्भवः, आदिहेतुः. **6** मति *f.*, बुद्धि *f.*, धीः; 'to be placed at the h. of' धुरि कीर्तनीय-or प्रतिष्ठापयितव्य-*a.*; 'h. merchant' श्रेष्ठिन् *m.*, विट्-पतिः; 'the h. of a family' कुलपतिः, कुटुंबभारवाहकः; 'at the h.' ex. by आदि-प्रमुख in comp. or धुरि-मूर्धनि-स्था, &c.; 'with Indra at their h.' इंद्रादयः-इंद्रप्रमुखाः (देवाः); 'he stands at the h. of all' स सर्वेषां धुरि-मूर्धनि-तिष्ठति; 'h. over ears in debt' ऋणराशौ निमग्न or ऋणग्रस्तः; 'to get a-h. of' अतिक्रम् 1 U, 4 P, अतिरिच् pass., अभि-भू; 'make h. against' प्रत्यवस्था 1 A, विरुध् 7 U, प्रतिकूलयति (D.). -*v. t.* नी 1 P, अधिष्ठा 1 P, अग्रे-मूर्धनि-पुरः-गम् or स्था 1 P; 'h. ed by Vasishtha' वशिष्ठाधिष्ठितः; gen. ex. by प्रमुख-पुरोग-पुरस्सर- in comp.; 'h.-ache' शिरोवेदना, शीर्षव्यथा-पीडा, शिरः-शूलं-रोगः; *See* ACHE; 'h.-band' शिरोवेष्टनं-बंधनं, ललाटपट्टः; 'h.-dress' शिरोभूषणं, किरीटः-टं, मुकुटः; 'h.-land' अंतरीपः-पं, भूशिरः, भूनासिका; 'h.-long or h. foremost' अवाक्शिरस्, अधोमुख-अवाङ्मुख (स्त्री *f.*), अवाच्, साहसिक, सरभस, साहसिन्, क्षिप्र-अविमृश्य-कारिन्-कृत्; प्रवण, पातुक, पतयालु; (*adv.*) अवाक्, अधोमुखेन, सोत्पातं, सवेगं; 'h.-most' अग्रच, प्राग्रच, प्रमुख, मुख्य, वर, वरेण्य, उत्तम, प्रधान, in comp.; 'h.-piece' शिरत्रं, शिरस्त्राणं, शिरस्कं; 'h. s-man' घातकः, वधाधिकृतः, वध्यपुरुषः, मृतपाः; 'h.-strong' दुर्दांत, अप्रतिविधेय, अवश्य, दुर्दम, उच्छृंखल, अविधेय, प्रमत्त, अस्थिर, चंचल. -LESS, *a.* मस्तकहीन, अशिरस्. -Y, *a.* साहसिन्, साहसिक, क्षिप्रकारिन्. **2** संरंभिन्, क्षिप्र-सुलभ-कोप, अमर्षण.

HEAL, *v. t.* शम् c. (शमयति), साध् c., समुत्था c. (समुत्थापयति), व्याधेः मुच् c.; *See* CURE; 'to h. a wound' व्रणं वि-रुह् c. (रोपयति); 'sore-h.-ing oil' व्रणविरोपणं तैलं (S. 4). **2** समा-सं-प्रतिसमा-धा 3 U, शम् c. -*v. i.* रुह् 1 P. **2** प्र-शम् 4 P. -ER, *s.* रोगहरः, चिकित्सकः. -ING, *s.* उप-शमः-शांति *f.*, रुक्प्रतिक्रिया, चिकित्सा, प्रतीकारः, समुत्थानं. **2** विरोपण-रोहणं. -*a.* शांतिद, रोगहर, शांतिकर (री *f.*), विरोपण.

HEALTH, *s.* कुशलं, अरोगः, सुस्थता, वार्त्त, रोगाभावः, निरामयत्वं, सुस्थिति *f.*, आरोग्यं, स्वास्थ्यं, अनामयं, समस्त-सं-आ-वारिष्यमाणं. आरोग्यिमा. **2** प्रकृति *f.*, शरीरावस्था, शरीरस्थितिः-प्रकृतिः; 'of a delicate h.' प्रकृतिकोमल-दुर्बल; 'he is in good h.' सुस्थोसौ, कुशलमस्य. -FUL, -Y, *a.* आरोग्यवत्, अरोगिन्, नीरोग, नीरुज-ज्, स्वस्थ, व्याधि-रहित, निरामय, वार्त्त, सुस्थ, कल्य, कुशलिन्, निर्व्याधि; 'became as h. as before' पूर्ववद् प्रकृतिस्थः समजायत. **2** आरोग्य-सुख-कर (री *f.*), पथ्य, हित, स्वास्थ्यजनक, सुखावह. -FULNESS, *See* (*s.*).

HEAP, *s.* राशिः, नि-सं-चयः, चिति *f.*, निकरः, स्तोमः, पुंजः, गणः, ओघः, संभारः; *See* COLLECTION. -*v. t.* राशीकृ 8 U, सं-आ-प्र-चि 5 U, एकीकृ, समाक्षिप् 6 P, संभृ 3 U, पिंडीकृ, आ-समा-स्तृ 5 U; *See* COLLECT; 'why do you h. accusations (calumnies) upon us' किमस्मान् संभृतदोषैराधिक्षिपथ (S. 5).

HEAR, *v. t.* श्रु 5 P, समा-आ-कर्ण् 10, निशम् 4 P or c. (शामयति); 'h. cases' व्यवहारान् दृश् 1 P, कार्याणि अवेक्ष् 1 A or विचर् c. or अनुसं-धा 3 U. -*v. i.* वार्तां श्रु; 'I have not heard from him for a long time' चिरं तद्वार्तां मया न श्रुता. -ER, *s.* श्रोतृ *m.*, श्रावकः, आकर्णयिता. -ING, *s.* श्रवणं, श्रुति *f.*, आकर्णनं, निशामनं. **2** (In law) दर्शनं, अवेक्षणं, अनुसंधानं; 'the organ of h.' श्रवणेंद्रियं, श्रोत्रं; 'within h.' श्रवणगोचरे, श्रुतिपथ-वर्तिन्. -HEARSAY, *s.* जनश्रुति *f.*, कर्णपरंपरा, जनवादः-प्रवादः, किंवदंती; 'know it by h.' इति कर्णपरंपरया श्रुतं.

HEARKEN, *See* HEAR.

HEARSE, *s.* प्रेत-शव-यानं-वाहनं.

HEART, *s.* हृदयं, हृद् *n.* **2** (The substance) बुक्का, अग्रमांसं, बुक्काग्रमांसं. **3** (Mind) चित्तं, मनस् *n.*, चेतस् *n.*, मानसं, हृदयं, अंतःकरणं, आत्मन् *m.*, अंतरात्मा, स्वांतं. **4** उरस् *n.*, वक्षस् *n.*, वक्षःस्थलं. **5** मर्मन् *n.* **6** स्नेहः, प्रणयः, रागः, भावः. **7** उदरं, गर्भः, अभ्यंतरं, अंतर् in comp. **8** सत्त्वं, धैर्यं, पौरुषं, तेजस् *n.*; 'take h.' आ-समा-श्वस् 2 P; धैर्यं, अवलंब् 1 A or अवष्टंभ् 9 P; 'learn or get by h.' कंठस्थ *a.* कृ 8 U, अभ्यस् 4 P; 'keep in the h.' चित्ते कृ, अवधृ 10; 'out of h.' दीन-खिन्न-चित्त; 'at h.' अंतः; 'with all one's h.', 'h. and soul' प्रकामं, कामं, सोत्साहं, सर्वात्मना; 'he has applied himself to the work h. and soul' सर्वात्मना तस्मिन्कर्मणि स व्याहृतः; 'to one's h.'s content' यथेच्छं, पर्याप्तं, आत्मितोषं, कामं, प्रकामं, निकामं, इष्टं, यथेप्सितं; 'from the h.' निर्व्याजं, सोत्साहं, निर्व्यलीकं; 'h.-ache' हृदयसंतापः, मनोव्याधिः, हृदयव्यथा-पीडा-वेदना, मनस्तापः, मानसी व्यथा; 'h.-broken' भग्नमानस, अंतर्भिन्न, भिन्नहृदय; 'h.-burn'

हृदयवेदना, मनस्तापः; हृल्लासः, अम्लपित्तं; 'h.-ease' हृदयस्वास्थ्यं-सुखं, चित्तशांति-निर्वृति *f.*; 'h.-felt' अव्याज, निर्व्याज, वास्तविक (की *f.*), अकृत्रिम; 'h.-breaking,-rending,-wounding' मर्मभिद्-स्पृच्-च्छिद्, हृदय-मर्म-भेदिन्-च्छेदिन्, हृदिस्पृश्, अरुंतुद, चित्तोद्वेगजनक; 'h.-robbing' मनोहर, चित्तहारिन्; 'h.-sick' दुर्मनस्, उद्विग्नचित्त, खिन्न-विषण्ण-हृदय; *See* DEJECTED; 'h.-struck,-wounded' विद्धमर्मन्, क्षत-विद्ध-हृदय; 'h.-whole' अक्षत-अभिन्न-हृदय. —LESS, *a.* निर्वीर्य, निस्तेजस्; भीरुहृदय, निस्सत्त्व, निष्पौरुष, क्लीब. 2 निर्दय, क्रूर, कठोरहृदय, निर्घृण. —LESSLY, *adv.* निर्वीर्यं, क्लीबवत्. 2 निर्दयं, क्रूरतया. —LESSNESS, *s.* अपौरुषं, क्लीबता, निर्वीर्यत्वं. 2 निर्दयत्वं, कठोरता. —HEARTY, *a.* सरल, निर्व्यलीक, निष्कपट, निर्व्याज, शुद्धांतःकरण; *See* FRANK. 2 अकृत्रिम, अकृतक, सोत्साह, उत्सुक, सोल्लास, सस्नेह, हृद्य; हृदयंगम; स्नेहनिर्भर; 'a h. friend' हृदयंगमः सखा. 3 वीर्यवत्, सपौरुष; कल्य, सुस्थ. —LY, *adv.* निर्व्यलीकं, निष्कपटं, निर्व्याजं. 2 सोल्लासं, सोत्साहं, प्रकामं, सर्वात्मना, संतुष्टचेतसा, कामतः, सानंदं, साह्लादं, चित्तसंतोषेण. 3 सवीर्यं. —NESS, *s.* सारल्यं, अकृत्रिमता, अव्याजत्वं; उत्साहः, औत्सुक्यं, वीर्यं, तेजस् *n.*, पौरुषं.

HEARTH, *s.* अग्निकुंडं, चुल्लि-ल्ली *f.*, अंतिका, अंदिका, उद्धानं, उध्मानं, अधिश्रयणी. अग्नमंतं. 2 (Portable fire-place) अंगारधानिका, अंगारशकटी, हसनी, हसंती.

HEAT, *v. t.* तप् c., परि-प्र-सं°; उद्-;दीप् c.; ज्वल् c., संधुक्ष् 10; दह् 1 P. —*s.* तापः, सं-उत्-परि-तापः, दाहः; उष्णता, उष्मः, तिग्मता, प्रखरत्वं, ऊ-उष्मन् *m.*, चंडता. 2 आतपः, घर्मः, निदाघः; 'affected by h.' उष्णालुः; 'expose to the sun's h.' सूर्यातप दा 3 U. 3 (Summer) ग्रीष्मः, निदाघः, घर्मकालः, उष्णकालः, निदाघसमयः. 4 उत्तापः, संक्षोभः, चंडता, तीक्ष्णता, तीव्रता, उग्रता, व्यग्रता. 5 संरंभः, मदः, क्रोधः, उद्दीपनं, संधुक्षणं; आवेशः, आक्रमः; 'in the h. of excitement' रोषावेशेन. 6 कपोलरागः; 'h. of youth' यौवनगर्वः-दर्पः, यौवनोन्मादः, तारुण्यमदः. —ING, *s.* तापनं, दीपनं. —*a.* तापक, दीपन.

HEATH, *s.* जंगलभूमि *f.*, वनभूमिः. 2 प्रचारः.

HEATHEN, *s.* मूर्ति-प्रतिमा-पूजकः-उपासकः-अर्चकः. —*a.*,-ISH, *a.* प्रतिमापूजकानुरूप. 2 Barbarous, q. v. —ISM, *s.* मूर्तिपूजा-अर्चनं-उपासना.

HEAVE, *v. t.* उन्नम् c. (नमयति), उन्नी 1 P, उच्छ्रि 1 U, उद्-ह्-धृ 1 P, उद्यम् 1 A, उत्था c. (उत्थापयति), उत्क्षिप् 6 P, उत्नुद् 10; 'h. a sigh' निश्वस् 2 P, दीर्घं निश्वस्; 'h. ing deeply' दीर्घं-स्थूलस्थूलं-निश्वस्य. —*v. i.* स्पंद् 1 A, स्फुर् 6 P, कंप् 1 A, वेप् 1 A. 2 निश्वस्, कृच्छ्रेण उच्छ्वस्. 3 उत्लप् 1 P, प्र-लुठ् 6 P, 1 A. लल् 1 P. तरंगायते (D.), उन्नम् 1 P. —*s.* उन्नमनं, उत्क्षेपः, उल्लोलनं, उच्छ्रणं. —ING, *s.* स्पंदनं, स्फुरणं, कंपनं, वेपथुः. 2 निश्वासः, कृच्छ्रेण उच्छ्वासः, दीर्घनिश्वासः. 3 उत्सर्पणं, प्रलोठनं, लोलनं, उन्नमनं. —*a.* स्पंदमान, उत्सर्पिन्, लोल.

HEAVEN, *s.* दिव् *f.*, द्यो *f.*, स्वर्गः, त्रिदिवः-वं, सुरलोकः, त्रिदशालयः, त्रिविष्टपं, नाकः, स्वर् *ind.*; 'h. of Vishnu' वैकुंठं; 'this is a h. on earth' भूस्वर्गोयमानमेतत्स्थलं, स्थानांतरगतः स्वर्गः (V. 2). 2 आकाशः-शं, नभस् *n.*, गगनं-णं; *See* SKY. 3 God, q. v.; परमेश्वरः, विधिः, ईश्वरः; 'h. and earth' द्यावापृथिव्यौ, द्यावाभूमी, रोदसी-स्यौ, द्यावाक्षमे; 'h.-born' दिविज, स्वर्गीय, स्वर्गोत्पन्न. —LY, *a.* दिव्य, स्वर्गीय, अपार्थिव (वी *f.*), स्वर्ग्य, त्रिदिवस्थ, दिविष्ठ; 'h. body' नक्षत्रं; 'h. voice' आकाशवाणी, अशरीरिणी वाक्; 'h. nymph' सुरांगना, स्वर्योषित्, दिव्यांगना. 2 परम, उत्तम. —WARDS, *adv.* स्वर्गाभिमुखं, अभिगगनं.

HEAVY, *a.* गुरु, भारवत्. 2 गाढ, दीर्घ, गुरु, तीक्ष्ण, महत्, तीव्र, अत्यंत, उग्र, दारुण, उद्दंड, महा-सु-अति- in comp.; 'h. shower' महासारः, अतिवृष्टिः. 3 आकुल, क्षुब्ध; 'h. sea' सागरक्षोभः, क्षुब्धसागरः, ऊर्मिमालाकुलः सागरः. 4 अवसन्न, खिन्न, दीन, चिंताकुल, विषण्ण. 5 मंद, स्थूल, जड, मंथर, अलस, मंद-धी-मति, जड-स्थूल-बुद्धि-धीः; 'h.-headed' मंद-स्थूल-धीः; 'h.-laden' गुरुभाराक्रांत, सुभारवत्. —LY, *adv.* गुरुभारेण गुरुतया. 2 भृशं, तीव्रं, बलवत्, अत्यंतं, सु-अति pr. *See* EXCEEDINGLY. 3 सविषादं, मंदं, शनैःशनैः. —NESS, *s.* गुरुता, गुरुत्वं, भारः; गरिमन् *m.*, विषादः दैन्यं, मांसं, स्थूलता, &c.

HEBETATE, *v. t. See* BLUNT, DULL.

HECATOMB, *s.* शतबलिदानं.

HECTIC, *a.* संतत, अविरत. 2 ज्वरसूचक, अंतर्दाहसूचक

HECTOR, *s.* विकत्थिन् *m.*, आत्मश्लाघी, पिंडीशूरः शूरमन्यः. 2 कलहकारः, भर्त्सकः. —*v. i.* विकत्थ् 1 A प्रगल्भ् 1 A; *See* BOAST. 2 तर्ज्-भर्त्स् 10 A.

HEDGE, *s.* वृति *f.*, प्राचीरं, प्राकारः, आवरणं, वेष्टनं, आवारः, क्षेत्रावरोधकं, क्षेत्रवेष्टनं; 'h.-born' अंत्यहीनजाति-वर्ण, अधम-नीच-जातीय; 'h.-hog' शल्य, शल्यकंटः; 'h.-sparrow' कलविंकः, चटकः. —*v.* वृत्या परिवेष्ट् c. or आवृ 5 U or अवरुध् 7 U.

HEED, *v. t.* आद् 6 A, अवेक्ष् 1 A, गण् 10, मन् अभिनंद् 1 P; सेव् 1 A. 2 अव-धा 3 U, मनो दा 3 सावधान *a.* भू, भु 5 P; *See* HEAR. —*s.* अवधा अवेक्षा, सावधानता, मनोयोगः; 'take h.' सावधा भव. —FUL,-LESS, *a. See* CAREFUL,-LESS.

HEEL, *s.* पार्ष्णि *m. f.*, पादतलं-मूलं; 'to be one's h. s' पार्ष्णि ग्रह् 9 P, अनुव्रज्, पदं अनुगम् 1 'I shall be close upon your h. s' अहमनुप मागत एव (S. 3); 'to take to or show h.

पलायृ 1 A, अपक्रम् 1 U, 4 P; 'betake to h. s' जंघाबलमवलंब् 1 A; 'h. s over head' अवाक्शिरस् *a.*, ऊर्ध्वपाद *a.* -*v. i.* एकपार्श्वे पत् 1P or परिवृत् 1 A or प्र-लंब् 1 A.

HEFT, *s.* उद्योगः, यत्नः, उत्साहः. 2 मुष्टि *m. f.*, त्सरुः.

HEIFER, *s.* वत्सतरी, वत्सा; 'h. one year old' एकहायनी; so द्विहायनी, त्रिहायणी.

HEIGH-HO, *interj.* हंहो, अहो, भो भोः, रे रे.

HEIGHT, *See* under HIGH.

HEINOUS, *a.* घोर, दारुण, अतिनिंद्य, गर्ह्यतम, अतिदुष्ट, महत्, अतिपापिन्, अतिघोर, पापिष्ठ. -LY, *adv.* घोरं, दारुणं. -NESS, *s.* घोरता, दारुणत्वं.

HEIR, *s.* दायादः, रिक्थहरः, अंशहरः-हारिन् *m.*, रिक्थभागी, रिक्थिन् *m.*, धनाधिकारी, उत्तराधिकारी, अंशभाक्, अंशी; 'sole h.' समग्रधनभाक्; 'h.-apparent' युवराजः; 'h.-loom' क्रमायातं जंगमद्रव्यं. -ESS, *s.* धनाधिकारिणी, &c. -LESS, *a.* दायादशून्य हीन. -SHIP, *s.* धनाधिकारित्वं.

HELIOTROPE, *s.* सूर्यकमलं, श्रीहस्तिनी.

HELL, *s.* नरकः, निरयः, नारकः, दुर्गति *f.* 2 पातालं, रसातलं, अधोलोकः, अधोभुवनं; 'h.-tortures' कारणा, यातना, तीव्रवेदना; 'river of h.' वैतरणी. -ISH, *a.* नारक (की *f.*), नरकीय, नारकीय (यी *f.*), नरकस्थ. 2 Cruel, q. v. 3 अतिनिंद्य, दुष्टतम.

HELM, *s.* कर्णः, केनिपातः-तकः, अरित्रं. 2 Helmet, q. v.; 'placed at the h. of (royal) affairs' राज्यधुरायां स्थापित. -HELMSMAN, *s.* कर्णधारः, नाविकः.

HELMET, *s.* शिरत्रं, शिरस्कं, शिरोभूषणं, शिरस्त्राणं, शीर्षकं-र्ण्यं.

HELP, *s.* साहाय्यं, उपकारः, उपकृतं-कृति *f.*, साहित्यं, अनुग्रहः, आनुकूल्यं. 2 गति *f.*, आश्रयः, शरणं; 'help! help!' परित्रायध्वं, परित्रायध्वं. -*v. t.* साहाय्यं कृ 8 U, सहायः भू, अनुग्रह् 9 P, उपकृ (gen.); न हि दीपौ परस्परस्योपकुरुतः (S. B. 420); तान्यपि तत्त्वज्ञानायोपकुर्वंति (S. B. 447) 'h. a right understanding'. 2 संवृध् c., प्रवृत् c., पुरस्कृ, उद्युज् 10; 'h. ed him on his legs' उत्थातुं तस्य साहाय्यं चकार; 'God h. s those who h. themselves' दैवमुपमायत्तं, विना पुरुषकारेण दैवं न सिध्यति; दैवं पुरुषकारेण साध्यसिद्धिनिबंधनं; न स्वयं दैवमादत्ते पुरुषार्थमपेक्षते (S. R. 104); 'can't h.' का गतिः, किमन्यच्छरणं; 'to h. himself to a mouthful' ग्रासग्रहणेन आत्मानं तर्पयितुं; 'a h. ing hand' हस्तावलंबः-बनं; दैवेनेत्थं दत्तहस्तावलंबे प्रारंभे (Rat. 1); 'he could not h. laughing' हासं निग्रहीतुं न शशाक; 'I cannot h. going' मयावश्यं गंतव्यं; 'to h. at table' परिविष् 10. -ER, *s.* उपकारकः, उपकर्तृ *m.*, सहायः. -FUL, *a.* उपयोगिन्, सहाय, उपकारक, साहाय्यकारिन्. -LESS, *a.* अनाथ, निराश्रय, अगतिक, अशरण, गतिहीन, निरवलंब, असहाय. 2 अप्रतिकार्य, अपरिहार्य, अप्रतिविधेय, निरुपाय; 'we are simply h. in that matter' तस्मिन्विषये अस्माकमन्या गतिरेव नास्ति. -HELPMATE, *s.* सहधर्मिणी. 2 सहायः, सहकारिन् *m.*

HELVE, *s.* दंडः, मुष्टि *m. f.*

HEM, *s.* अंचलः, वसनप्रांतः, वस्तयः-दशाः (pl.). 2 उत्कासनं. -*v. t.* अंचलं सिव् 4 P. 2 (in) परिवेष् 1 A or c., परि-वृ 5 U or c., निरुध् 7 U.

HEMICRANIA, *s.* अर्धविभेदकः.

HEMICYCLE, *s.* गोलार्धं.

HEMIPLEGY, *s.* पक्षाघातः, पक्षवायुः.

HEMISPHERE, *s.* गोलार्धं, अर्धगोलः.

HEMISTICH, *s.* श्लोकार्धं, अर्धश्लोकः.

HEMORRHAGE, *s.* रक्त-रुधिर-स्रावः, रक्तक्षरणं.

HEMORRHOIDS, *s.* अर्शस् *n.*, गुदकीलः.

HEMP, *s.* शणं, भंगा, मातुलानी. -EN, *a.* शाण (णी *f.*), शण in comp.

HEN, *s.* कुक्कुटी; 'h.-hearted' भीरु, भीरुहृदय, कातर, कापुरुष; 'h.-house' कुक्कुटपालिका; 'h.-pecked' स्त्रीवश, स्त्रीविधेय, स्त्रीजित, स्त्रीवश्य, स्त्रीवशवर्तिन्, भार्याटक; 'h.-roost' कुक्कुटालयः.

HENCE, *adv.* इतः, अस्मात् स्थानात्. 2 अतः, एतस्मात् कारणात्, तस्मात्, अत एव. 3 (From h.) अतः परं, अतः-इतः-परं-ऊर्ध्वं, अद्यप्रभृति; 'hence!' अपेहि, अपयाहि, अपसर; 'h.-forth,-forward' अतः-इतः-परं-ऊर्ध्वं, अद्यप्रभृति, अद्यारभ्य, अद्यावधि.

HEPTAGON, *s.* सप्तभुजा-सप्तकोणा-आकृतिः.

HERALD, *s.* घोषकः, बंदिन् *m.*, राजदूतः. 2 (fig.) अग्रदूतः, प्रथमवार्ताहरः, अग्रेसरः. -HERALDRY, *s.* वंशावलीज्ञानं.

HERB, *s.* ओषधि-धी *f.*, शाकः, शाकलता, हरितकं. -HERBAGE, *s.* तृणं, शस्यं, घासः, यवसं. -HERBAL, *s.* वृक्षायुर्वेदः.

HERCULEAN, *a.* भगीरथ in comp.; 'h. efforts' भगीरथप्रयत्नाः. 2 अतिप्रबल, अतिशक्तिमत्.

HERD, *s.* यूथं, गणः, संघः, वृंदं, कदंबः, कुलं, समूहः, व्रजः, निवहः; 'h. of cattle' गोकुलं, पाशवं, गोवृंदं, गोघा; 'h. of oxen' औक्षणं; 'h. of calves' वात्सकं; 'h. of elephants' हास्तिकं. -*v. i.* यूथेन चर् 1 P, यूथशः संमिल् 6 P or संगम् 1 A, एकीभू, एकत्र भू or मिल्. -HERDSMAN, *s.* गोरक्षकः, गोपालः, गोपः, गोधुक्, आभीरः, गोसंख्यः, बल्लवः.

HERE, *adv.* अत्र, इह (gen. in this world). 2 इह लोके. ex. by demon. pron.: 'h. comes

your mother' एषागच्छति ते माता; 'h. am I' अयमस्मि. —*Interj.* भो भोः; 'h. and there' इतस्ततः; अंतरांतरा, असमग्रं, असंपूर्णं; 'h. about' इतो नातिदूरे, इह समीपे; 'h.-after' इतः परं-ऊर्ध्वं, अतः, परतः, परस्तात्, अनंतरं, पश्चात्, उत्तरतः, उत्तरत्र, अग्रे, उपरिष्टात्, अतः परं; (in the next world) परत्र, अमुत्र, परलोके; (*s.*) उत्तरकालः, पर-भावि-आगामि-कालः; 'h.-at' अत्रांतरे, अथ; 'h.-by' अनेन, तस्मात्; 'h.-in' अत्र, अत्र-स्थाने-विषये; 'h.-before' इतः पूर्वं, पूर्वकाले, पुरा, प्राक्, अतीत-गत-काले; 'h.-upon' ततः, अनंतरं, तदुपरि, तच्छ्रुत्वा.

HEREDITARY, *a.* पितृपैतामह (ही *f.*), पित्र्य, पैतृक (की *f.*), परंपरीण-य, परंपरागत, परंपराप्राप्त, क्रमायात, क्रमागत, कुलक्रमागत, अन्वयागतं; 'h. disease' संचारी रोगः; 'h. servant' मूलभृत्यः, मौलैः; 'h. succession' क्रमागतत्वं. —LY, *adv.* कुलक्रमेण, वंशक्रमेण, परंपरया, पारंपर्येण.

HEREDITAMENT, *s.* दायः, रिक्थाधिकारः.

HERESY, *s.* पाषंडमार्गः, नास्तिकता, मिथ्यादृष्टिः *f.*; विधर्मः, विधर्मसेवा, परधर्माश्रयः, अपथं, विपथः. —HERETIC, *s.* पाषं(खं)डः, नास्तिकः, विधर्मसेविन् *m.*, परधर्मावलंबी, देवनिंदकः, उपधर्मसेवी, स्वधर्मभ्रष्टः-च्युतः, पतितः. —AL, *a.* धर्मविरुद्ध, विपथ-विधर्म-गामिन्. —ALLY, *adv.* पाषंडवत्, नास्तिकवत्.

HERITAGE, *s.* दायः, पैतृकं धनं, रिक्थं, पैतृकद्रव्याधिकारः.

HERMAPHRODITE, *s.* स्त्रीपुरुषलक्षणान्वितः.

HERMETICALLY, *adv.* सुदृढं, गाढं.

HERMIT, *s.* यतिः, तापसः, तपस्विन् *m.*, मुनिः, आरण्यकः, वन-अरण्य-वासी, वानप्रस्थः, वैखानसः. —AGE, *s.* आश्रमः, उटजः-जं, पर्णशाला.

HERNIA, *s.* अंत्रवृद्धि *f.*; अंत्रस्रंसः.

HERO, *s.* वीरः, शूरः, भटः, विक्रांतपुरुषः, प्र-महा-वीरः, जेतृ *m.*, रथिन् *m.*, अतिरथः, शौटीरः. 2 (In dramas &c.) नायकः, कथापुरुषः; 'h. s of Râmâyana' रामायणकथापुरुषाः or -नायकाः. —IC, -ICAL, *a.* वीर, शूर, प्रवीर, विक्रांत, वीर्यवत्, अमितौजस्, महावीर्यः; 'a h. deed' पराक्रमः, विक्रमः, अवदातं कर्म. 2 वीर-चरित्र-विषयक, वीररसप्रधान. —ICALLY, *adv.* सविक्रमं, सवीर्यं, शूरवत्. —ISM, *s.* वीर्यं, शूरत्वं, शौर्यं, परा-वि-क्रमः, धामन् *n.*, ओजस् *n.*, रणोत्साहः, पौरुषं, साहसं, वीर्यवत्त्वं, शौटीर्यं. —HEROINE, *s.* नायिका.

HERON, *s.* बकः, सारसः, लोहपृष्ठः. क्रौंचः.

HERPES, *s.* *See* ITCH.

HESITATE, *v. i.* वि-आ-शंक् 1 A, दोलायते (D.), विचर् c., विकृष् 1 A or c., विलंब् 1 A, चिर-(रा०)यति-आंदोलयति (D.); *See* DOUBT also. 2 Falter, q. v. —INGLY, *adv.* संशय्य, सविकल्पं, सशंकायं, साशंकं. 2 स्खलनपूर्वकं. —ION, *s.* शंका, संशयः, विकल्पः, आ-वि-परि-शंका, विचारः, संदेहः, वितर्कः, द्वापरः, अनिर्णयः, विचिकित्सा. 2 (In speaking) स्खलनं, स्वरभेदः-भंगः, स्खलद्वचनं, गद्गदवाच् *f.*

HETEROCLITE, *a.* विधिविरुद्ध, निपातित.

HETERODOX, *a.* भिन्न-मत-धर्मन्, धर्मविरुद्ध, विपरीत, विधर्मिन्, द्वैधर्मिक (की *f.*), अपथवर्तिन्-गामिन्. —Y, *s.* विधर्मः, भिन्नमते-धर्मः.

HETEROGENEOUS, *a.* भिन्न, विजातीय, पृथग्विध, भिन्नजातीय, विरुद्ध; *See* DIFFERENT.

HEW, *v. t.* छिद् 7 P, कृत् 6 P, लू 9 U; *See* CUT. —ER, *s.* छेदकः, छेदिन् *m.*, छिद् in comp. —HEWN, *a.* छिन्न, दात, वृक्ण, लून, कृत्त, दित, छात.

HEXAGON, *s.* षट्कोणः, षडस्रः.

HEXAMETRE, *s.* षट्पदी चरणः.

HEY, *interj.* अहो, ननु, हाहा.

HEYDAY, *interj.* नमः, स्वस्ति (with dat.); अहो, भोः. —*s.* उल्लासः, प्रमोदः, हर्षः, मुदा, परिहासः; 'h. of youth' नवं-प्रथमं-यौवनं.

HIATUS, *s.* भंगः, भेदः, छेदः, विच्छेदः.

HIBERNAL, *a.* हैमंत (ती *f.*), हैमंतिक (की *f.*).

HICCOUGH, HICCUP, *s.* हिक्का, हिध्मा. —*v. i.* हिक्क् 1 U.

HIDE, *s.* चर्मन् *n.*, अजिनं, वृतिः, कृत्ति *f.*, पशुचर्मत्वच् *f.*; 'h.-bound' दृढमुष्टि, कृपण; अवश्य, अविनय, कठोर, कठिन. —*v. t.* प्रच्छद् 10, गुह् 1 U, गुप् 1 P, अंतर्धा 3 U, तिरोधा, स्थग् 10, अपवृ c.; *See* CONCEAL. —*v. i.* गुह्-गुप् pass., गुप्त-निलीन-*a.* भू 1 P, नि-ली 4 A, तिरोभू, तिरोधा pass.; 'h. s behind the bushes' विटपांतरितस्तिष्ठति-भवति. —HID, —HIDDEN, *a.* गूढ, गुप्त, प्रच्छन्न, छादित, अंतर्हित, तिरोहित, अंतरित, अपवारित, निभृत, स्थगित, लीन, निलीन. —ING, *s.* गोपनं, गुप्ति *f.*, प्रच्छादनं, स्थगनं, तिरोधानं; 'h.-place' निभृत-गूढ-स्थानं, गुप्तिः, निभृतं.

HIDEOUS, *a.* बीभत्स, विकृत, घोर, भीषण, कराल, उग्रदर्शन, कराल-मुख-वदन, कदाकार, भीम-घोर-दर्शन-आकृति, उग्र-घोर-रूप, दुर्दर्शन; 'Oh! this is indeed a h. spectacle' इंत बीभत्समेषामतो वर्तते (Mal. 5). —LY, *adv.* उग्रं, घोररूपेण, बीभत्सं. —NESS, *s.* घोरता, करालता, उग्रता.

HIE, *v. i.* त्वर् 1 A, सत्वरं गम् 1 P.

HIERARCH, *s.* पुरोहितेश्वरः, आचार्यवरः. —Y, *s* आचार्याधिपत्यं, धर्माध्यापकप्रभुत्वं.

HIEROGLYPH, -IC, *s.* गूढाक्षरं, बीजाक्षरं.

HIGGLE, *v. i.* पण् 1 A, व्यव-ह 1 P. 2 Haggle, q. v.

HIGH, *a.* उच्च, उन्नत, उच्छ्रित, समुच्छ्रित, सोच्छ्राय तुंग, प्रांशु, उद्गम, उत्तुंग, उन्नत, उन्नम, ऊर्ध्व. 2 उत्तम

विशिष्ट, मुख्य, श्रेष्ठ, परम, अग्र्य, महा-प्रधान- in comp.; *See* PRINCIPAL. **3** प्रचंड, तीक्ष्ण, तांत्र, बलवत्, तरस्विन्, प्रबल; *See* STRONG. **4** उदात्त, उत्ताल; 'a h. tone' उदात्तः, उच्च-तार-स्वरः, तारः. **5** (Of h. rank) विशिष्ट, उत्कृष्ट, उत्कृष्ट-विशिष्ट-पदस्थ, उत्तम-परम-पदभाज्, लब्धप्रतिष्ठ, प्रतिपत्तिमत्, सगौरव. **6** (Of h. family.) कुलीन, महाकुल, अभिजात, अभिजनवत्, कुलज, महाकुलप्रसूत. **7** गर्वोद्धत, दर्पोद्भात, सावलेप, गर्वित, अवलिप्त, उत्सिक्त. **8** गहन; 'h. water' प्रवृद्धा वेला; 'it is h. noon' (नभसः) मध्यमलंकरोति भानुः; 'h. and low' उच्चावच, अधरोत्तर, उत्तमाधम, उन्नतानत, नतोन्नत, निम्नोन्नत; 'h.-er and h.-er' अधिकाधिकं, उत्तरोत्तरं; 'h. price' महामूल्यं; 'h. ground' उन्नतभूः; 'as h. as' मात्र (त्री *f.*), द्वयस (सी *f.*), दघ्न (घ्नी *f.*) in comp.; 'he has a h. opinion of you' स त्वां बहु मन्यते. —*adv.* उच्चैः, ऊर्ध्वं, अति-सु pr.; ऊर्ध्वं, उपरि, उत्तमं, परमं; 'on h.' ऊर्ध्वं, उपरि; 'from on h.' उपरिष्टात्; 'the sea runs h.' बलवत्क्षुब्धः सागरः. 'H.-birth' कुलीनता, कुलोत्कर्षः, आभिजात्यं; 'h.-blest' अतिपुण्यवत्, महाभाग, अतिधन्य, परमसुखभाज्; 'h.-blown' अत्युच्छून, अतिस्फीत; 'h.-born' कुलीन, महाकुलजात-प्रसूत, अभिजात, सुजात, अभिजनवत्, सद्वंश्य, श्रेष्ठ-उत्तम-कुलोद्भव; 'h.-bred' कुलीन, शिष्टाचार, सुजन, सुशील, सद्भावविशिष्ट, सौजन्योपेत, सदाचार, साधुवृत्त; 'h.-built' सोच्छ्राय, उच्च; 'h.-day' उत्सवदिनं, उद्धर्षदिवसः; 'h.-fed' अतिपुष्ट, हृष्टपुष्ट; 'h.-flying' अपरिमित; 'h.-hand' औद्धत्यं, गर्वः, उद्दामत्वं, नियंत्रणत्वं; 'h.-handed' उद्धत, सगर्व, उद्दाम, अनियंत्रण, उच्छृंखल, स्वैरिन्; 'h.-hung' ऊर्ध्वबद्ध; 'h.-land' अधित्यका, उन्नतभूमि *f.*; (*a.*) पर्वतीय, उन्नत; h.-lander' पर्वतीयः, पर्वतवासिन् *m.*; 'h.-mettled' महासत्त्व, उरुसत्त्व, ओजस्विन्, अदीनचित्त, तेजस्विन्; गर्वित, अतिमदान्वित; 'h.-minded' महात्मन्, महामनस्क, उदार-धी-चेतस्-चरित, महेच्छ, महाशय; 'h.-principled' साधुचरित्र, पुण्यात्मन्, पुण्यशील; 'h.-priest' पुरोहिताध्यक्षः; 'h.-prized' महामूल्य, महार्घ, बहुमत; 'h.-red' घनारुण, अतिरक्त; 'h.-road, -street, -way' राजमार्गः-पथः, महापथः-मार्गः, घंटापथः, संसरणं, रथ्या, विशिखा, प्रतोली; 'h.-seasoned' सुवासित; 'h.-spirited' महा-उरु-सत्त्व, अदीनवृत्ति, ओजस्विन्, ऊर्जित, महेच्छ; 'a h.-spirited speech' ऊर्जिताश्रयं वचनं (KI. II. 1); 'h. treason' राजद्रोहः, राजापथ्यकारित्वं; 'h.-wrought' यत्नसंस्कृत, प्रयत्नपरिष्कृत; 'h.-wayman' परिपंथिन् *m.*, दस्युः, वाटपाटच्चरः, पादविकमः. —**EST**, *a.* उच्चैस्तम, तुंगतम, उत्तम, परम. —**LY**, *adv.* उच्चैः. **2** भृशं, अत्यंतं, नितांतं, परमं, परं, अतीव, अति-सु pr.; *See* EXCEEDINGLY; 'h. pleased' परमानंदभाज्, हर्षकाष्ठां गत. —**NESS**, *s.* देवः (वी *f.*), अग्रतन्त्र-भवत् (ती *f.*). —**HEIGHT**, *s.* उच्छ्रायः, उच्छ्रयः, उत्सेधः, आरोहः, उन्नयः, तुंगता, उन्नता; उत्कर्षः, उन्नति *f.* **2** उच्चस्थानं, उत्सेधः, उन्नतभूभागः, गिरिः, पर्वतः. **3** शिखरं, अग्रं, शृंगं, शिखा, चूडा. **4** (परा) काष्ठा, कोटिः; अतिभूमिः, परमावधिः, उत्तमावधिः; 'being in the h. of joy' आनंदकोटिमधिगत. **5** कुलोत्कर्षः, परमपदं, श्रेष्ठत्वं, विशिष्टता; 'the h. of winter' शिशिरमध्यं, कठोरीभूतः शिशिरः. —**EN**, *v. t.* उच्ची 1 P, उत्कृष् 1 P. **2** वृध् c., उपचि 5 U, चि c., स्फाय् c. (स्फावयति); *See* ADD to.

HILARITY, *s.* आनंदः, उल्लासः, प्रमोदः, कौतुकं, आह्लादः, उत्सवः; *See* DELIGHT.

HILL, *s.* गिरिः, पर्वतः, अद्रिः, शैलपादः; 'h. near a mountain' पादः, प्रत्यंतपर्वतः. —**OCK**, *s.* वप्रः, उन्नतभूभागः; वामलूरः, वल्मीकः-कं, नाकुः, मृत्तिकाचयः. —**Y**, *a.* पर्वतमय (यी *f.*), सपर्वत, पर्वतीय, उन्नतानत, विषम.

HILT, *s.* त्सरुः, मुष्टि *m. f.*, खड्गमुष्टिः.

HIND, *s.* मृगी, हरिणी, कुरंगी, एणी, पृषती. **2** ग्राम्यजनः, ग्रामिकः, वृषलः.

HINDER, *a.* पश्चिम, जघन्य, पश्चात् in comp., चरम, अपर, अवर; 'h. part' पश्चाद्भागः, पृष्ठदेशः-भागः, पृष्ठं, नितंबः, पश्चिमभागः.

HINDER, *v. t.* नि-विनि-वार् 10 or वृ c., नि-प्रति-विध् 1 P, रुध् 7 U, नि-उप-अव-सं-प्रति°, स्तंभ् 9 P, बाध् 1 A, वि-प्रति-हन् 2 P, प्रतिबंध् 9 P. —**ANCE**, *s.* प्रतिषेधः, निवारणं, प्रतिबंधः, विघ्नः, अंतरायः, प्रत्यूहः, प्रतिरोधः, व्याघातः, बाधा, विघ्नः. —**ER**, *s.* निवारकः, प्रतिबंधकः, विघ्नकृत् *m.*

HINGE, *s.* कैवं, द्वारसंधिः-ग्रंथिः. —*v. i.* (upon) अवलंब् 1 A, अपेक्ष् 1 A; *See* DEPEND.

HINT, *s.* इंगितं, आकूतं, सूचना, संज्ञा, भावः, संकेतः, आशयः. **2** उपन्यासः, उपक्षेपः. — *v. t.* इंगितेन सूच् 10, उपन्यस् 4 U, सच्, उपक्षिप् 6 P, दर्शिष् 6 P, साकूतं निर्दिश् or उपन्यस्.

HIP, *s.* कटि-टी *f.*, नितंबः, श्रोणि-णी *f.*, कटः, प्रोथः, जघनं, श्रोणिफलकं.

HIPPOPOTAMUS, *s.* करियादस् *n.*

HIRE, *v. t.* वेतनेन-मूल्यदानेन नि-प्र-युज् 7 A, 10 or व्या-वृ c. or उप-भुज् 7 P or सेव् 1 A or ग्रह् 9 P, परिक्री 9 A, भट् 1 P or c., भृतिं दा 3 U; 'h. labourers' कर्मकरान् उपनी 1 A or कर्मणि व्याप c.; 'a h.ed labourer' भृतिभुक्, भरण्यभुक्, भृतकः; 'a person h.ed' कृत-कल्पित-वेतनः. —*s.* वेतनेन ग्रहणं or व्यापारणं, वेतनदानं. **2** भृतिः *f.*, मूल्यं,

भरण्यं, वेतनं, भाटकं, मूल्यं, कर्मण्या, विधा, भर्मन् n., निर्वेशः, पणः, निष्क्रयः; 'for h.' पण्य, वेतनेन ग्राह्य, साधारण; 'a woman for h.' पण्यांगना, पण्यस्त्री; 'a teacher for h.' भृतकाध्यापकः. -LING, s. 'worker for h.' भृतकः, भृतिभुक्, भरण्यभुक्, वैतनिकः; कर्मकरः, भृत्यः.

HIRSUTE, a. लोमश, प्रचुरलोमन्.

HISS, v. i. फूत्कारं कृ 8 U or उद्-गृ 6 P, सीत्कारं कृ, सर्पवत् श्वस् 2 P; 'h. off' सीत्कारेण असंतोषं सूच् 10, or दृश् c. -s., -ING, s. फूत्कारः, सीत्कारः, सर्पश्वासः-नादः.

HIST, adv. तूष्णीं भव, वाचंयम. a. भव.

HISTORY, s. इतिहासः, पुरावृत्तं, पुराभूतं, पुराणोपाख्यानं, उपाख्यानं, चरित्रवर्णनं. 2 वृत्तांतः, ऐदंतः, समाचारः, वार्ता. -IC, -ICAL, a. ऐतिहासिक (की f.), पुरावृत्तविषयक, पौराणिक (की f.). -ICALLY, adv. इतिहासानुसारेण. -HISTORIAN, -HISTORIOGRAPHER, s. इतिहास-पुरावृत्त-लेखकः-रचकः, पुराणरचकः, चरित्रलेखकः, ऐतिहासिकः.

HISTRIONIC, -AL, a. नाटकीय, रंग-नाट्य-योग्य, रंगानुरूप.

HIT, v. t. प्र-हृ 1 P, तड् 10; अभि-नि-आ-हन् 2 P, तुद् 6 P, व्यध् 4 P. 2 (Upon) (दैवात्) आ-सद् c., प्राप् 5 P, अधिगम् 1 P, लभ् 1 A; 'arrows h. a moving mark' इषवः सिध्यंति लक्ष्ये चले (S. 2). -v. i. संघट्ट् 1 A, समा-प्रति-हन्, अभि-सं-पत् 1 P. -s. प्रहारः, आघातः, ताडनं, घातः. 2 दैवघटना, संगति f., दैवं.

HITCH, v. t. ग्रह् 9 P, धृ 1 P, 10, आकृष् 1 P. -v. i. ग्रह्-धृ -pass. 2 HOP, q. v. -s. अंतरायः, प्रत्यूहः; See OBSTACLE.

HITHE, s. घट्टः, तरस्थानं.

HITHER, adv. अत्र, इह, इतः. -MOST, a. आसन्नतम, नेदिष्ठ, अत्यंतिक. -WARD, adv. इतः, अत्र. -HITHERTO, adv. अद्ययावत्, आवर्तमानकालात्, अद्यावधि, एतत्कालपर्यंतं.

HIVE, s. मधुकोषः, करंडः, छत्रकः, चषालः. -v. t. मधुकोषे निधा 3 U or निविश् c.

HOAR, a. धवल, शुभ्र, सित, श्वेत, शुक्ल; See WHITE; 'h.-frost' तुषारः, अवश्यायः; See FROST.

HOARD, s. संचयः, निचयः, निवहः, पुंजः, राशिः, गणः, संघः, संग्रहः, निधिः; See MULTITUDE. -v. t. संचि 5 U, संग्रह् 9 P, समा-हृ 1 P, राशीकृ 8 U, पुंजीकृ.

HOARSE, a. रूक्ष, परुष, कर्कश; भग्न, सगद्गद. -LY, adv. रूक्षस्वरेण, स्वरभंगेन, सगद्गदं. -NESS, s. भंगः, भेदः, रूक्षता; स्वरभंगः-रूक्षता.

HOARY, a. सित, धवल, श्वेत, शुक्ल, गौर (री f.), शुभ्र. 2 पलित, पक्व-पलित-केश.

HOAX, s. वंचनं-ना, प्रतारणं-ना, छलं, कपटं, विप्रलंभः. -v. t. वंच् 10, प्र-तृ c., विप्र-लभ् 1 A.

HOB, s. वृषलः, ग्राम्यः, जानपदः.

HOBBLE, v. i. See LIMP.

HOBBY, s. प्रियवस्तु-द्रव्यं, चिरकार्यं; विर्बंधः, अभीष्टमनोरथः, लहरी, छंदः, अभिरुचि f.; 'h.-horse' क्रीडाधः, क्रीडाद्रव्यं, क्रीडनकं.

HOBGOBLIN, s. भूतः, पिशाचः, वेतालः, राक्षसः; See DEMON, DEVIL.

HOCUS-POCUS, s. मंत्रतंत्रं, कुहकः, इंद्रजालं.

HOD, s. लेपाधारः, सुधाभाजनं.

HODGE-PODGE, s. संकरः, सन्निपातः, नानाद्रव्य-समूहः, प्रकीर्णकं.

HOE, s. खनित्रं, अवदारणः, स्तंबघ्नः. -v. t. खनित्रेण खन् 1 P, भूमिं भिद् 7 P, अव-हृ 10.

HOG, s. वराहः, किरिः, शू(सू)करः; See BOAR; 'village h.' विट्चरः, ग्राम्यः; 'h.-herd' शूकरपालः-पोषकः; 'h.-sty' शूकरस्थानं-वासः. -GISH, a. शूकरोपम, शूकरीय, वाराह (ही f.), सूकरगुणविशिष्ट.

HOGO, s. अति-तीक्ष्ण-स्वादः.

HOG-WEED, s. शोथघ्नी, पुनर्नवा, शोथजित् f.

HOIDEN, s. पुंश्चली, बंधकी, स्वैरिणी, प्रगल्भा.

HOIST, v. t. उन्नम् c. (नमयति), उन्नम् c., उच्छ्रि c., उद्यम् 1 A, उन्नी 1 P, उद्-धृ-हृ 1 P, उन्मुल् 10, उत्था c. (उत्थापयति).

HOLD, v. t. धृ 1 P, 10, अव-लंब् 1 A, आ-दा 3 A, ग्रह 9 P, परामृश् 6 P, हस्तेन धृ or अवलंब्. 2 स्तंभ् 9 P, नि-अव-रुध् 7 U, बलाद् धृ. 3 (Possess) भू 3 U, आ-धा 3 U; See HAVE. 4 (Contain) धृ, परिग्रह्, आ-धा, समाविश् c., भू, आ-दा. 5 पा c. (पालयति), रक्ष् 1 P, न त्यज् 1 P. 6 (As a festival) अनुष्ठा 1 P, सेव् 1 A, पा c. (पालयति), कृ 8 U, सं-पद् c., निर्वह् c., वि-धा, यथाविधि कृ, अभिनंद् c. 7 मन् 4 A, गण् 10; See CONSIDER; 'I h. them of no account' का-कियती-मात्रा तेषां मत्पुरतः, तानहं तृणाय मन्ये or तृणीकरोमि; 'h. an opinion' मतं अवलंब् or आश्रि 1 U, मन्; 'h. one's tongue' जिह्वां धृ or रक्ष्; 'h. your tongue' वाचंयमो भव, वाचं नियच्छ, तूष्णीं-जोषं-आस्स्व; 'h. a meeting' सभां-मिल् c. or समा-हृ 1 P; 'a meeting was held' परिषद् मिलिता; 'h. in esteem' बहु मन्; 'h. in contempt' अवगण्, अवमन्, तृणीकृ, तृणाय मन्; 'h. a council' सभां निमंत्र् 10 A or आह्वे; 'h. a consultation' संमंत्र्, मंत्रणां कृ; 'I h. you responsible for this act' अस्य त्वयोत्तरं दातव्यं. -v. i. स्था 1 P, स्थिरीभू, सं-स्था 1 A; चिरस्थायीभू, स्थायीभू. 2 अनुबंध् 9 P or pass.; सं-सज् pass., संलग्नीभू, आलंब् 1 A. 3 विरम् 1 P, निवृत् 1 A (with abl.);

आत्मानं संयम् 1 A or निग्रह्, परिह् 1 P, त्यज्; 'hold, hold!' विरम विरम, मा मा एवं, मा तावत्. 4 अभिस. भू, आप्रि, अव-आ-लंब्. 5 (As a rule) गम्, न व्यभिचर् 1 P; 'this rule h. s everywhere' सर्वगामी-अव्यभिचारी-अयं नियमः. -s. धरणं, धृति f., ग्रहः-हणं, अवलंबः-बनं, हस्तेन ग्रहणं-धरणं; 'letting go the h.' मुक्त-त्रस्त-हस्त, मुक्तग्रह. 2 कारा, कारागृहं, कारागारं, बंधनस्थानं, गुप्ति f. 3 आधारः, आ-अव-लंबः-बनं, उपस्तंभः, आश्रयः. 4 दुर्ग, कोटः. 5 मुष्टि m. f., वारंगः. 6 आस्पदं, पदं, अधिकारः, वशः-र्षं; 'red colour takes a firm h. on a white cloth' रागः शुक्लपटे स्थायीभवति (P. I. 1); 'had a h. on the mind of the people' स लोकस्य मन आदद्दे (R. IV. 8); 'the advice took no h. on (her) mind' लेभेतरां चेतसि नोपदेशाः (R. VI. 66). -back, नि-वृ c., वार् 10, संहृ 1 P, निग्रह्, विक्लृप् 1 A, विचर् c.; *See* HESITATE. -forth, दृश् c., पुरो निधा. -in, निग्रह्, प्रतिसंहृ, नि-सं-यम्. -off, विलंब् 1 A, विक्लृप्. -on, प्रवृत् c., न विरम्, न मुच् 6 P, न त्यज्, उद्वह् 1 P, निर्वह् c. -out, प्रसृ c., वितन् 8 U, दीर्घीकृ. 2 दृश् c., उपन्यस् 4 U, उपक्षिप् 6 P, उप-स्था c. (स्थापयति); (v. i.) चिरं यावत्सह् 1 A or युध् 4 A or प्रतिकृ. -together, संबंध् pass., संश्लिष् 4 P, संलग् 1 P. -up, उन्नम् c. (नमयति), उयन्, उच्छ्रि 1 U or c., ऊर्ध्वीकृ. 2 उत्तंभ्, अवष्टंभ्, आ-अव-लंब्, भृ, धृ. -ER, s. धारकः, धारयितृ m., ग्राहकः, धरः-आधारः-in comp. -ING, s. धरणं, ग्रहणं, &c. -a. धारिन्, धर in comp.; oft. by हस्त in comp.; 'h. a sword' कृपाणपाणिः. -HOLDFAST, s. ग्राहकः, ग्रहणी, बंधनी, कुडुपः. 2 दृढ-बद्ध-मुष्टिः, अमुक्तहस्तः.

HOLE, s. विवरं, बिलं, छिद्रं, रंध्रं, सुषिः(षि)रं, कुहरं, निर्व्यथनं, रोकं, वपा, सुषि f.; भभ्रं, गर्तः-र्तां, अवटः (in the ground). 2 कंदरः-रं-रा, गुहा, गह्वरं, दरी, खातं (of mountains). 3 (Of garments &c. or fig.) रंध्रं, छिद्रं; 'a rat digs a h. and a snake uses it' एकः परिश्रमं करोति, अन्यस्तत्फलमुपभुंक्ते; 'picking h. s (in the character &c.) of others' छिद्रान्वेषिन्, दोषैकदृश्, पुरोभागिन्, रंध्रानुसारिन्; 'full of h. s' अनेकरंध्र, बहुविवर.

HOLLOW, a. रिक्त-शून्य-गर्भ, अंतःशून्य, शून्यमध्य-उदर; उदराकृति, सुषिर, पुटाकार. 2 असार, निःसत्व, निःसार, फल्गु, शून्य. 3 मोघ, निरर्थक, निष्फल. 4 असत्य, वितथ, मिथ्या, in comp. 5 ग(गं)भीर, मंद्र, मंद. -s. (Of trees) कोटरः-रं, क्रोडः, निष्कुहः. 2 विवरं, गुहा, बिलं, कुहरं, अवटः; *See* HOLE. 3 गर्भः, उदरं, अभ्यंतरं, क्रोडं. 4 खातं, खातभूः, गर्तः-र्तां. 5 दरी, कंदरः, अद्रिद्रोणी, कंदरभूः. 6 कुल्या, प्रणाली; 'h. of the hand' पुटः, करपुटः-कोषः; 'h. of the navel' नाभिगर्तः, नाभ्यावर्तः; 'ground full of h. s' उत्खातिनी भूमिः (S. 1); 'natural h.' देवखातं; 'h. of the ear' कर्णभः; 'h. s in the buttocks' जघनकूपकौ, गर्तौ. -v. t. उत्खन् 1 P, पुटाक्ति 8 U. -NESS, s. शून्यता, असारता, असत्यता, &c.

HOLY, a. पुण्य, पवित्र, परिपूत, साधु, शुचि, विमल; पुण्यात्मन्, शुचिव्रत, धार्मिक (की f.), धर्म-पुण्यशील, धर्मात्मन्, शुद्धमति; 'h. study' वेदाध्ययनं; 'h. wisdom' ब्रह्मज्ञानं; 'h. writing' श्रुतिः, वेदाः, निगमाः; 'h. land' पुण्यभूमिः; 'h. place of pilgrimage' तीर्थं, क्षेत्रं, पुण्यस्थानं-तीर्थं. -LY, *adv.* पुण्यं, पवित्रतया, शुचिवत्. -NESS, s. पवित्रता, पुण्यता, शुचिता, वैमल्यं, पुण्यशीलता, धार्मिकत्वं; 'his or her h.' भगवान्, भगवती. -HOLIDAY, s. पुण्याहं, पुण्यदिनं. 2 अनध्यायः, अनध्यायदिवसः-महोत्सवः. 3 उत्सवः, पर्वन् n., उद्धर्षः, उत्सव-उद्धर्ष-दिनं; 'h. people' यात्राजनः.

HOMAGE, s. नमस्कारः, अभिवंदनं, प्रणामः, प्रणति f., पूजा, अर्चनं, उपासना, प्रणिपातः, सेवांजलिः; सेवा, आदरः, प्रभुभक्ति f.; 'pay or do h.' प्रणम् 1 P, वंद् 1 A, प्रणिपत् 1 P; *See* Bow.

HOME, s. गृहं, वासः, वासस्थानं-भूमि f., स्वगृहं, स्वनिज-गेहं-देशाः-वास-स्थानं-भवनं; *See* HOUSE; 'devoted to h.' गृहासक्तचित्त. -*adv.* गृहं, गृहं प्रति; 'the words went h. to his heart' तद्वचः तस्य हृदयमर्मास्पृशत्; 'touching h.' मर्मस्पृश्-भिद्; 'goes h. to me' मामेव लक्षीकरोति (S. 7); 'h.-born' गृहजात; 'h.-bound' गृहगामिन्; 'h.-bred' गृहज-जात, गृह्य; 'h.-made' गृहनिर्मित, गृहोत्पन्न; 'h.-sick' गृहविरहार्त; 'h.-stall,-stead' गृहं, वासः; वेश्मभूः, वास्तु m. n. -LESS, a. निरालय, निराश्रय, निर्गृह. -LY, a. ग्राम्य, ग्रामीण-य, अशिष्ट, प्राकृत, असभ्य, अश्लील, असंस्कृत. -*adv.* ग्राम्यवत्, असभ्यतया, अशिष्टप्रकारेण. -WARD, *adv.* गृहाभिमुखं, अभिगृहं.

HOMICIDE, s. नृहत्या, मनुष्यवधः. 2 (Person) मनुष्यघातिन् m., नृहंत् m., मनुष्यघातकः. -AL, a. नृघातिन्.

HOMILY, s. धर्मवाक्यं.

HOMOGENEAL, HOMOGENEOUS, a. समानजाति-जातीय, स-एक-जाति, सवर्ण, एक-स-धर्मन्, समानभाव, एक-स-जातीय; 'h. vowels' सवर्णाः.

HOMOLOGOUS, a. तुल्य-सम-परिमाण.

HOMONYM, s. भिन्नार्थः शब्दः; 'a collection of h. s' भिन्नार्थवर्गः. -OUS, a. भिन्नार्थ, अनेकार्थ.

HONE, s. शाणः, शाणाश्मन् m.

HONEST, a. शुचि, ऋजु, सरल, अमायिन्, दक्षिण, अ-

कुटिल, अजिह्म, शुद्धमति-भाव, शुद्धात्मन्, अकपट, निष्कपट, निर्व्याज, निर्व्यलीक, अव्याज, विमलात्मन्, दंभहीन, न्याय्य, न्याय्याचार, सच्चरित, न्यायवर्तिन्, साधुवृत्त-शील, साधु, प्रांजल, सत्यवृत्त, सत्यशील, सत्यवादिन्. 2 अवितथ, सत्य, अकृत्रिम, अकृतक; *See* FRANK also; 'h. gains' न्यायार्जितं; 'h. statement' निर्व्याजं वचनं. -LY, *adv.* सरलं, न्यायेन, न्यायतः, शुचितया, निष्कपटं, निर्व्याजं, अमायया, निर्व्यलीकं. -Y, *s.* शुचिता, आर्जवं, निष्कापट्यं, सारल्यं, अकौटिल्यं, दाक्षिण्यं, अमाया, अकपटं, अव्याजः, शुद्धभावः, वैमल्यं, निर्व्यलीकता, अजिह्मता, सत्यता, अकृतकता; 'h. is the best policy' भावशुद्धिः एव साधिष्ठा आचारसरणिः, सारल्यं सत्तमो मार्गः.

HONEY, *s.* मधु *n.*, क्षौद्रं, माक्षिकं, सारघं; 'h. of flowers' पुष्पासवं, पुष्परसः-सारः, कुसुममधु; 'h.-bee' मधुमक्षिका, सरघा; 'h.-comb' मधुकोशः, करंडः; 'h.-moon' आनंदमासः; 'h.-tongued' मधुरभाषिन्, मधुरवाच्. -*v. t.* मधुरीकृ 8 U. -*v. i.* उपलल् 10; *See* FAWN. -ED, *a.* मधुमधुर, सुधास्यंदिन्, मधुर.

HONOR, *v. t.* पूज् 10, अर्च् 1 P, 10, मन् c., संभू c., सत्कृ 8 U, पुरस्कृ, मह् 1 P, 10, आद् 6 A. 2 सेव् 1 A, शु desid. (शुश्रूषते), आराधु c.; 'h. ed the invitation' निमंत्रणमाद्रियत, सगौरवं स्वीचकार. 3 अनुग्रह् 9 P, प्रसद् 1 P (with loc.). -*s.* मानः, संमानः, पूजा, अर्चनं, अर्हणा, संभावना, आदरः, सत्कारः. 2 सेवा, शुश्रूषा, आराधनं. 3 ख्याति *f.*, कीर्ति *f.*, यशस् *n.*, प्रतिष्ठा, गौरवं, प्रतिपत्ति *f.*, उत्कर्षः, उत्कृष्ट-प्रधान-पदं, उन्नति *f.*; कुलीनता, आभिजात्यं, प्राधान्यं, श्रेष्ठत्वं; 'your or his h.' अत्र-तत्र-भवान्; भवत्. -ABLE, *a.* पूज्य, मान्य, माननीय, पूजार्ह, आदरणीय. 2 सु-प्र-विख्यात, विश्रुत, सुप्रसिद्ध, प्रतिपत्तिमत्, महायशस. 3 यशस्कर-कीर्तिकर (री *f.*), प्रतिष्ठावह, श्लाघ्य, प्रशस्य, मानद, गौरवान्वित. 4 कुलीन, अभिजात, महाकुल, उदारचित्त-चरित; *See* NOBLE. 5 शुचि, न्याय्याचार, सच्चरित, साधुवृत्त, पुण्यात्मन्, शुचिव्रत; *See* HONEST. -ARY, *a.* मानद, कीर्तिकर, यशस्कर, प्रशस्य. 2 अलाभकर, मानमात्रदायिन्. -HONORABLY, *adv.* समानं, सगौरवं, श्लाघ्यप्रकारेण, प्रशंसापूर्वं, सुयशसा, प्रतिष्ठापूर्वं. 2 शुचिवत्, धार्मिकतया, ऋजुतया, सरलतया, न्यायतः.

HOOD, *s.* फणा-णः, फटा, स्फोटा; 'expands the h.' फणां कुरुते (S. 6); 'expanded h.' भोगः. 2 फणाकृति शिरस्कं. -*v. t.* शिरस्त्राणेन पिधा 3 U or प्रावृ 5 U.

HOODWINK, *v. t.* (नयने) वस्त्रेण पिधा 3 U or आच्छद् 10 or आवृ 5 U.

HOOF, *s.* खुरः, शफः-फं, क्षुरः, विखः, निघृष्वः. -ED, *a.* खुरिन्, शफवत्, शफयुक्त.

HOOK, *s.* आकर्षणी, ग्रहणी, धरणी; 'fish-h.' बडिशं-शा-शी, मत्स्यवेधनी; 'h. for elephants' अंकुशः, हृ(ह्र)णि *f.* -*v. t.* बडिशेन धृ 1 P or ग्रह् 9 P. -ED, *a.* वक्र, कुटिल, कुंचित, अंकुशाकार, जिह्म; *See* CROOKED.

HOOP, *s.* चक्रं, वलयः-यं. 2 क्रीडाचक्रं. -*v. t.* लोहवलयैः युज् 10. 2 उच्चैः घुष् 10.

HOOT, *s.* घु(घू)त्कारः. 2 धिक्कारः, उच्चैः अपशंसासूचनं, दीर्घघोषः. -*v. i.* घूत्कारवं कृ 8 U, उच्चैः आरट् 1 P or घुष् 10, दीर्घं रु 2 P; 'h. at' उच्चैः अवज्ञां-धिक्कारं-सूच् 10.

HOP, *v. i.* प्लु 1 A, वल्ग् 1 U, एकपादेन नृत् 4 P. -*s.* प्लुतं, वल्गितं, प्लवः, एकपादेन नृत्यं.

HOPE, *v. t.* आशंस् 1 A, उत्-प्रति-अप-ईक्ष् 1 A, स्पृह् 10, प्रत्याकांक्ष् 1 P, वांछ् 1 P, आशां धृ or वह् 1 P; in implied questions, gen. ex. by अपि, कथित् or अपि नाम; 'I h. this lotus-leaf breeze pleases you' अपि सुखायते ते नलिनीपत्रवातः (S. 3); अपि नाम रामभद्रः पुनरपीदं वनमलंकुर्यात् (U. 2), कस्मिन्मृगीणामनघा प्रसूतिः (R. v. 7); 'I h. not' न खलु; न खलु तामभिक्रुद्धो गुरुः (V. 3) 'I h. the preceptor did not get angry with her'; 'I scarcely h. ed to see you here' न खलु मे आसीदाशंसा यदत्र भवंत प्रेक्षिष्ये. -*s.* आशा, प्रत्याशा, आशंसा, आकांक्षा, अपेक्षा, प्रतीक्षा, उदीक्षणं; स्पृहा, मनोरथः, वांछा, इच्छा, आशाबंधः. 2 (Giving h.) आश्वासनं, आश्वासः; 'having h. s fulfilled' पूर्णाशः; 'a vain h.' वृथाभिलाषः, मोघाशा; 'h.ing against h.' अतीव दूरापेतं. -FUL, *a.* आशान्वित, आशावत्, आशायुक्त, आशाबद्ध, स्पृहयालु, अपेक्षिन्, सप्रत्याश, आशाविष्ट. 2 (Giving hopes) आशाजनन (नी *f.*), आशाकारिन्. -FULLY, *adv.* साशंसं, सप्रत्याशं. -LESS, *a.* निराश, आशातीत, आशाहीन, हताश, त्यक्ताश, निरपेक्ष. -LESSLY, *adv.* नैराश्यात्, सनैराश्यं.

HORAL, HORARY, *a.* मौहूर्तिक (की *f.*).

HORDE, *s.* महान् गणः, बृहत्संघः, महौघः, स्तोमः; *See* MULTITUDE.

HORIZON, *s.* क्षितिजं, दिङ्मंडलं, दिक्चक्रं, अंबरांतः; चक्रं, मंडलं; 'the eastern h.' प्राची-ऐंद्री-दिक्, प्राचीमूलं. -HORIZONTAL, *a.* सम, दिगंतसम, अनुप्रस्थ; 'h. plane' समभूभागः, समा भूमिः. -LY, *adv.* समं, अनुप्रस्थं.

HORN, *s.* शृंगं, विषाणः-णं, कूणिका; 'h. of a buffalo' गवलं. 2 काहलः-ला, शृंगः. 3 चंद्रार्धं, चंद्रशिखा. -ED, *a.* शृंगिन्, विषाणिन्, शृंगयुक्त-विशिष्ट. 2 शृंगाकार, शृंगाकृति. -Y, *a.* शार्ंग (र्गी *f.*). 2 कठिन; *See* HARD.

HORNET, *s.* वरटा, बृहद्वोलः.

HOROLOGUE, *s.* घटी, कालमापनयंत्रं.

HOROSCOPE, *s.* जन्मपत्रिका, जन्मपत्रं, जन्मयोगपत्रं.

HORROR, *s.* त्रासः, संत्रासः, साध्वसं, भयकंपः, भयसंहर्षः. 2 बीभत्सता, रौद्रता, घोरता, भैरवं, भयानकं, भीष्मं, भीषणं. -HORRIFIC, *a.* भीषण, उग्र, भयानक, भयावह. -HORRID, HORRIBLE, *a.* घोर, दारुण, भीम, भयानक, उग्र, भीषण, कराल, विकट; *See* FEARFUL. -LY, *adv.* घोरं, दारुणं, रौद्रं, उग्रतया; बीभत्सतया. -HORRIFY, *v. t.* Frighten, q. v. -ED, *a.* साध्वसोपहत, भीत, संत्रस्त, भयसंहृष्ट.

HORRIPILATE, *v. t.* पुलकयति-कंटकयति-रोमांचयति (D.), रोमाणि उद्गम् c. or उद्-हृष् c. -ED, *a.* पुलकित, कंटकित, सपुलक, रोमांचित. -ION, *s.* पुलकः, रोमांचः, रोमहर्षः-र्षणं, रोमोद्गमः-गतत्वं, पुलकोद्भेदः, उद्धर्षणं.

HORSE, *s.* अश्वः, तुरगः, तुरंगः-गमः, हयः, सप्तिः, वाजिन् *m.*, वाहः, अर्वन् *m.*, घोटकः, वीतिः; गंधर्वः, सैंधवः; 'a well-bred h.' आजानेयः, कुलीनः, भूमिरक्षकः, सिंधुवारः; 'a well-trained h.' साधुवाही, विनीतः; 'a white h.' कर्कः; 'a bay h.' उकनाहः, कियाहः; 'a fleet h.' जवनः, जवाधिकः; 'a pack-h.' पृष्ठ्यः, स्थौरी, स्थोरी; 'a h. for a sacrifice' मयुः, अश्वमेधीयः; 'a chariot-h.' रथ्यः; 'h.'s pace' गतिः, धारा; (namely) आस्कंदितं 'full gallop'; धो(धौ)रितकं, धोरितं 'trot or ambling'; रेचितं 'cantering'; वल्गितं 'vaulting'; प्लुतं 'bounding or capering'; 'his nose' घोणा, प्रोथः-र्थं; 'tail hair' वालधिः, वालहस्तः; 'his tail' पुच्छः-च्छं, लूमं, लांगूलं; 'a number of h.'s आश्वं, अश्वीयं; 'relating to a h.' अश्वीय, आश्विक (की *f.*); 'h.-soldiers' आश्वं, आश्विकं, अश्वारोहगणः; 'h.-back' अश्वपृष्ठं; 'go on h.-back' अश्वेन गम् or चर् 1 P; 'going on h.-back' तुरगयायिन्, सादिन्; 'h.-bean' मुद्गः, माषः, शिंबा; 'h.-breaking' अश्वशिक्षा-दमनं-विनयः; 'h.-breaker' अश्वविनेता-शिक्षकः; 'h.-dealer' अश्वव्यापारी, हयज्ञः; 'h.-driving' अश्वसारथ्यं, रथवाहनकौशलं; 'h.-laugh' अट्टहासः, अतिहासः, अतिहसितं, आच्छुरितं; 'h.-man' अश्वारोहः, तुरंगस्थः, सादिन् *m.*, तुरगी, हयारूढः, अश्वारूढः; 'h.-manship' अश्वारोहणकौशलं-विद्या, अश्वविद्या, अश्वहृदयं; 'h.-shoe' अश्वपादत्रं; 'h.-trappings' आदानं, अश्वपरिष्टोमः, अश्वास्तरणं; 'h.-whip' कशा, अश्वताडनी, प्रतिष्कषः-शः, चर्मदंडः; (*v. t.*) कशया तड् 10 or प्र-हृ 1 P.

HORTICULTURE, *s.* उद्यानविद्या, उद्यानपालनं. -IST, *s.* उद्यानविद्याज्ञः.

HOSE, *s.* और्णं पादत्राणं. -HOSIER, *s.* और्णपादत्रविक्रायिन् *m.*

अतिथिपूजक, आतिथ्यकारिन्. -HOSPITABLY, *adv.* सादरं, सप्रश्रयं, सबहुमानं, आतिथेयसत्कारेण, सत्कारातिथ्य-पूर्वं; 'to receive h.' सत्कृ 8 U, पूज् 10, सं-भू c.

HOSPITAL, *s.* आतुरशाला, रुग्णागारं, आरोग्यचिकित्सा-शाला, रुजोपायशाला.

HOSPITALITY, *s.* आतिथ्यं, आतिथ्यकर्मन् *n.*, अतिथिसत्कारः-पूजा-सेवा-क्रिया; सत्कारः, सत्क्रिया, सत्कृति *f.*, उपचारः, पूजा, सेवनं.

HOST, *s.* गणः, संघः, समूहः, ओघः, निवहः; *See* MULTITUDE. 2 चमूः, सेना, अनीकं, वरूथिनी. 3 गृहिन् *m.*, भोजनदायिन् *m.*, निमंत्रणकृत्, निमंत्रकः, आतिथ्यकृत्. -AGE, *s.* विश्वासस्थानं, शरीरबंधकः; 'retaining 4 hares as h. s' चतुरः शशकान् विश्वासस्थाने धृत्वा (P. I. 8). -ESS, *s.* गृहिणी, भोजनदात्री, आतिथ्यकारिणी.

HOSTEL, HOSTELRY, *s.* पथिकाश्रमः, उत्तरण-गृहं-शाला.

HOSTILE, *a.* विपक्ष, विरुद्ध, वैरिन्, प्रत्यर्थिन्, प्रतिकूल, विपरीत, विद्वेषिन्, अहित, प्रतिरोधिन्; 'a h. invasion' शत्रुविग्रहः, शत्रुयानं; 'to be h.' विरुध् 7 U, द्विष् 2 U; पर्यव-स्था 1 A, प्रतिकूलयति-वैरायते (D.), विपक्षी-प्रत्यर्थी-भू. -LY, *adv.* शत्रुवत्, विपक्षवत्. -ITY, *s.* विपक्षता, वैरं, शत्रुता, वैरभावः, विरोधः, प्रतिद्वंद्वं, विद्वेषः; 'in a state of constant h.' सदाबद्धवैर *a.*; 'natural h.' स्वभावजाति-वैरं, शाश्वतिकः विरोधः. 2 विग्रहः, युद्धं, संग्रामः, युद्धभावः.

HOSTLER, *s.* अश्वपालकः.

HOT, *a.* उष्ण, आतपाक्रांत, आतपवत्, तप्त, सं-उद्-तप्त, सोष्ण; प्रखर, उग्र, तिग्म, चंड, खर, तीव्र, तीक्ष्ण. 2 ग्रीष्म, नैदाघ (घी *f.*), घर्म in comp. 3 शीघ्र-सुलभ-कोपिन्, क्रोधिन्, संरंभिन्. 4 साहसिन्, तीक्ष्णकर्मन्; 'h. weather or season' ग्रीष्मः, निदाघः, घर्म-ग्रीष्म-उष्ण-कालः; 'to make h.' तप् c.; 'to be h.' तप् 1 P, 4 A, उष्णीभू; 'h.-bed' उष्णस्थलं, (fig.) क्षेत्रं; 'h.-blooded or -headed' चंडप्रकृति-शील, संरंभिन्, शीघ्रकोपिन्, उत्तप्त, उद्धंड, तीक्ष्णकर्मन्, साहसिक, साहसिन्. -LY, *adv.* तीक्ष्णं, तीव्रं, उद्धंडं, उग्रं, उष्णं; सोत्तापं; व्यग्रं, सोत्साहं, सोत्कटं. -NESS, *s.* उष्णता, तापः, प्रखरता, उग्रता, चंडता, तिग्मता, औष्ण्यं, निदाघः, घर्मता. 2 उत्तापः, तीक्ष्णता, संरंभः, व्यग्रता; 'h. of temper' शीघ्रकोपित्वं, चंडता.

HOTEL, *s.* पतिकाश्रमः, भोजनगृहं.

HOTSPUR, *s.* संरंभिन् *m.*, साहसिकः.

HOUGH, *s.* जंघास्थिशिरा.

HOUND, *s.* विश्वकद्रुः, मृगदंशकः, आखेटिकः, मृगयाकुक्कुरः.

नाडिकाविच्छेदघटः. 2 (H.s) कालः; 'at all h. s' सदा, सर्वदा; 'in an evil h.' अशुभे लग्ने-मुहूर्ते; 'an h. and a half' अर्धयामः. -LY, *a.* प्रतिघटिकं *adv.*

HOURI, *s.* दिव्यांगना, स्वर्गकन्या, दिव्ययोषित्.

HOUSE, *s.* गृहं, गेहं, अ(आ)गारं, सदनं, वेश्मन्-सद्मन् *n.*, निकेतनं, मंदिरं, वासः, आ-नि-वासः, भवनं, आयतनं, नि-आ-लयः, ओकस्-धामन् *n.*, वसति *f.*, निवासस्थानं, आवसथः, उदवसितं, निकाय्यः, निशांतं, व(प)स्त्यं; 'body of a h.' गर्भागारं, वासगृहं. 2 कुलं, अन्वयः, वंशः. 3 गृहजनः, कुटुंबं, परिवारः; 'h.-breaker' कुड्यच्छेदिन् *m.*, भित्ति-संधि-चौरः, कपाटघ्नः, गृहभेदकः; 'h.-dog' गृहकुक्कुरः; 'h.-door' गृहद्वारं; 'h.-hold' परिवारः, कुटुंबं-वर्गः, परिजनः, गृहपरिजनः-परिवारः; (*a.*) गृह्य, ex. by गृह in comp.; 'h.-hold duties' गृहकार्याणि, गृहाचाराः; 'h.-hold gods' कुलदेवताः; 'h.-holder' गृहिन् *m.*, गृहस्थः, गृहपतिः, गृहमेधी, कुटुंबी, गेही; 'h.-hold stuff' गृहोपस्कारः, गृहसामग्री; 'h.-keeper' गृहस्वामिन् *m.*, गृही, गृहाधिकारी, कुटुंबी; 'a female h.-keeper' गृहिणी, कुटुंबिनी; 'h.-keeping' गृहव्यापारः-कार्य-कर्म; 'h.-maid' दासी, गृहदासी-माजैनी; 'h.-room' वासस्थानं, वेश्म; 'h.-warming' गृहप्रवेशः; 'h.-wife' गृहिणी, गेहिनी, गृहकार्यकुशला-दक्षा, गृहमेधिनी; 'h.-wifery' गृहकार्यकुशलता-नैपुण्यं, गृहकर्मानुष्ठानं, परिमितव्ययः. -LESS, *a.* गृहहीन-शून्य, निरालय, अशरण, निराश्रय, निर्गृह.

HOUSING, *s.* परिस्तो(ष्टो)मः, सज्जा, कल्पना, कुथः, आस्तरः, प्रसाधनं.

HOVEL, *s.* उटजः-जं, कुटीरः, कुटी, पर्णशाला, तृणकुटी.

HOVER, *v. i.* परितः विसृप् 1 P or डी 1 A, आकाशे व्यावृत् 1 A or विसृप् or विचल् 1 P, परिभ्रम् 1, 4 P; 'h. about' मंडले चर् 1 P, (दीपस्योपरि मंडले चरति Mr. 3); मंडलाकारेण भ्रम्. 2 (fig.) विशंक् 1 A, विजृष् 1 A, विचर् c. -ING, *s.* परिभ्रमणं. मंडलावृत्ति *f.*

HOW, *adv.* कथं, केन प्रकारेण-रूपेण. 2 कियत् (in 'how long,' 'how far'); 'h. much' कियत्; 'h. many' कति (pl.); 'h. long' कियच्चिरं, कियंतं कालं; 'h. many kinds' कतिविधाः; 'h. many times' कतिकृत्वः; 'h. now' ननु, ननु भोः; 'h. far' कियद्दूरं, कियदवधिं; 'h. much more-less' किमुत, किं पुनः, किमु; 'h. else' अथ किं; with *adj.* ex. by अहो; 'h. pleasing' अहो मधुरं; अहो पापं, &c.

HOWDAH, *s.* वरंडकः.

HOWEVER, HOWSOEVER, *adv.* यथातथा, येनकेन प्रकारेण; (with *adj.*) by अपि, or by नाम with imp. of verb; 'h. industrious a man may be' दीर्घव्यवसायोपि नरः, करोतु नाम व्यवसायं नरः (H. 2). -*conj.* (Howbeit) किंतु, अपि तु, हु, परंतु, तथापि, पुनः.

HOWL, *v. i.* आक्रंद् 1 P, हुंकृञ् 1 P, ह्रेषः रस्-रद् 1 P, गर्ज् 1 P, दीर्घं वि-रु 2 P, रै 1 P. -*s.*, -ING, *s.* उत्क्रोशः-शनं, आक्रंदनं, दीर्घरुतं, आरटनं, र(रा)वः, दीर्घरवः, गर्जनं, रसितं; 'h. of dogs' भषणं, बुक्कनं, रायणं.

HUB, *s.* नाभिः *f.* 2 त्सरुः. 3 लक्ष्यं, शरव्यं.

HUBBUB, *s.* कोलाहलः, कलकलः, तुमुलं, तुमुलरवः-नादः, संकीर्णनादः.

HUCKLEBONE, *s.* श्रोण्यस्थि *n.*

HUCKSTER, *s.* क्षुद्रपण्यविक्रयिन्-विक्रेतृ *m.* -*v. i.* क्षुद्रपण्यानि वि-क्री 9 A.

HUDDLE, *v. t.* पिंडीकृ 8 U, सं-कृ 6 P, संमिश्र् 10, संकुलीकृ, संपिंडयति (D.). 2 संक्षुभ् c.; ससंभ्रमं वि-धा 3 U or कृ. -*v. i.* संकुलीभू 1 P, संमिश्री-संकरी-भू, संकृ pass., पिंडीभू. -*s.* संकुलं, संकरः, संक्षोभः, संकीर्णता.

HUE, *s.* रागः, रंगः, वर्णः, छाया, छवि *f.* 2 आक्रोशः; 'h. and cry' कलकलः, कोलाहलः, जनरवः, संहति *f.*

HUFF, *v. t.* विस्तृ c., धि c., वृध् c. 2 सदर्पं निर्भर्त्स् or तर्ज् 10 A. -*v. i.* धि 1 P, स्फाय् 1 A, वृध् 1 A. 2 दृप् 4 P, विकत्थ् 1 A, प्रगल्भ् 1 A. -*s.* कोपः, रोषः, संरंभः; *See* ANGER. 2 दर्पः, औद्धत्यं, निर्भर्त्सनं. 3 उद्धतः, दर्पाध्मातः, दांभिकः, विकत्थनः. -ER, *s.* दांभिकः, शूरंमन्यः, विकत्थनः. -ISH, *a.* Angry, Arrogant, q. v.

HUG, *v. t.* आलिंग् 1 P, आ-सं-श्लिष् 4 P, परिष्वंज् 1 A, बाहुभ्यां पीड् 10; *See* CLASP. -*s.* आश्लेषः, परिष्वंगः, आलिंगनं, उपगूहनं.

HUGE, *a.* महत्, बृहत्, स्थूल, विशाल, विपुल, गुरु, बृहत्परिमाण, अतिमहत्-बृहत्. 2 (In body) स्थूलकाय-देह, बृहच्छरीर, महाकाय, विपुलांग (गी *f.*). -LY, *adv.* अतिमहत्, अत्यंतं, अतिमात्रं. -NESS, *s.* अतिबृहत्त्वं, स्थूलता, विशालता.

HULK, *s.* जीर्णनौका.

HULL, *s.* (पोतस्य) स्थूलभागः. 2 पुटः-टं, कोशः-षः, त्वच् *f.*, आवेष्टनं, तुषः (of grain).

HUM, *v. i.* गुंज् 1 P, वि,-रु 2 P, हुंकृ 8 U, अस्पष्टं निस्वन् 1 P or ध्वन् 1 P. -*s.*, -MING, *s.* गुंजनं, गुंजितं, कलरवः-स्वरः, वि,-रुतं-रावः, झंकारः, हुंकारः, हुंकृतं, अस्पष्टध्वनिः-निस्वनः-नादः, कलकलः.

HUMAN, *a.* मानुष (षी *f.*), पौरुषेय (यी *f*), मनुष्यजातीय, मानवीय-न; gen. ex. by मनुष्य or नर in comp.; 'in h. accents' मनुष्यवाचा; 'uttered h. accents' मानुषीं गिरमुच्चारयन्वाचः; 'h.

nature' मानुष्यकं, पुरुषत्वं, नरस्वभावः; 'h. form' मानुषी तनुः, नररूपं; 'a h. brute' नरपशुः; 'h. kind' मनुष्य-नृ-जाति *f.*, मनुष्यवर्गः. -IZE, *v. t.* वि-नी 1 P, शिष्टाचारं-सभ्यरीतिं शिक्ष् c. or शास् 2 P. -LY, *adv.* नरवत्, मानुषप्रकारेण. -HUMANE, *a.* दयालु, कृपालु, सदय, परहितकाम, परोपकारशील, अनुकंपिन्, करुणा-दया-शील, दयावत्, करुणार्द्र, दयार्द्र, परहितैषिन्, आपन्न-दीन-अनुकंपिन्; *See* KIND. -ITY, *s.* दया, करुणा, कृपा, दयालुता, आपन्नानुकंपा, दीनवात्सल्यं, दयाशीलता, परहितेच्छा. 2 मानुष्यं-व्यकं, मनुष्यता, मानुषता, मानवत्वं. 3 मनुष्याः, मनुष्यवर्गः-जातिः. -LY, *adv.* सदयं, सकरुणं, परहितेच्छया, सानुकंपं.

HUMBLE, *a.* नीच, अपकृष्ट, अधम. 2 क्षुद्र, अल्पमति. 3 (In good sense) नम्र, विनीत, निरभिमान, विनत, सविनय, निरहंकार, अनुद्धत, दर्प-गर्व-अभिमान-हीन-रहित, नम्रचेतस्, विनयिन्, विनयशील-वृत्ति. 4 निःस्व, दरिद्र, दीन, दुर्गत, निर्धन, आपन्न; 'in h. days' आपत्समये, दरिद्रावस्थायां, आपदि; 'the friends of h. days' आपत्कालीनमित्राणि; 'to eat h. pie' मानं दृष्टे कु 8 U. -*v. t.* अव-नम् c. (नमयति), प्रह्वयति (D.), (सपदि विनयः प्रह्वयति मां U. 6); अभि-परा-भू 1 P, दर्प-गर्व-भंज् 7 P or ह 1 P, नि-अव-पत् c., अप-कृष् 1 P, नम्रीकृ; 'thus completely h.ing the kings' इति राज्ञां शिरसि वामपादमाधाय (R. VII. 70); 'h.-bee' भ्रमरः; *See* BEE. -ED, *a.* अभिभूत, भग्नदर्प, आत्त-गर्व-गंध, हृतगर्व; आनत, नम्रीकृत, पातित, अपकृष्ट. -ING, *s.* दर्प-मान-भंगः, अभिभवः. -NESS, *s.* नीचता, अपकृष्टता, क्षुद्रता. 2 विनयः, नम्रता, अनहंकारः, अनभिमानः, अगर्वः, निरभिमानता, नम्रशीलता. -HUMBLY, *adv.* नीचैः, क्षुद्रतया, कृपणं. 2 सविनयं, नम्रतया, नम्रं, निरभिमानं, गर्वं विना, अनुद्धतं, नम्रचेतसा.

HUMBUG, *v. t.* प्रतु c., वंच् 10; *See* CHEAT. -*s.* प्रतारणं-णा, वंचना, कपटः-टं, छलं.

HUMDRUM, *a.* विरस, जड, मंद, फल्गु. -*s.* मूढः, स्थूलधीः.

HUMERUS, *s.* प्रगंडः.

HUMID, *a.* आर्द्र, क्लिन्न, उन्न, सरस, तिमित. -ITY, *s.* आर्द्रता, क्लेदः, तेमः, सरसता.

HUMILIATE, *v. t.* गर्वं ह 1 P or भंज् 7 P, अभिभू 1 P, अपकृष् 1 P; *See* HUMBLE. -ING, *a.* दर्प-मान-हर. -ION, *s.* गर्व-दर्प-भंगः, अवमानना, मान-भंगः-हानि *f.*, अभिभवः, अपकर्षः; दमनं; विषमनं.

HUMILITY, *s.* विनयः, क्षालीनता, अगर्वः, अदर्पः, नम्रता, अनभिमानः, अनहंकारः, अनौद्धत्यं.

HUMOUR, *s.* भावः, वृत्ति *f.*, मनोवृत्तिः, स्वभावः, शील-लं, प्रकृति *f.*; 'good h.' सद्भावः, सुशीलता, आनंदवृत्तिः. 2 छंदः, छंदस् *n.*, मनोलौल्यं, बुद्धिचापल्यं, लहरी, चित्ततरंगः, चापलं. 3 क्लेदः, तेमः, आर्द्रता; स्नेहः. जलावसेकः. 4 रसः, जलं, धातुः (of the body); 'disorder of the three h. s' दोषत्रयं, त्रिदोषं. 5 वैदग्ध्यं, रसिकता, रसः, सारस्यं, वैचित्र्यं. -*v. t.* (a person) चित्तवृत्तिं अनुवृत् 1 A, (अहं तावत्स्वामिनश्चित्तवृत्तिमनुवर्तिष्ये S. 2), छंदेन or छंदः(दं)अनुवृत्, भावं अनुरुध् 4 A or अनुप्र-विश् 6 P; (inclinations) अनुवृत्, अनुरुध्, अनुप्र-विश्. 2 अनुरंज् c., संतुष् c., आराध् c., प्र-सद् c., भज् 1 U, उपलल् 10, उपच्छंद् 10. -ING, *s.* अनुवर्तनं, अनुरोधः, छंदोनुवृत्तिः, भावानुप्रवेशाः. -IST, *s.* वैहासिकः, हासकरः, विदूषकः, भंडः, परिहासशीलः, नर्मसचिवः. 2 रसज्ञः. -OUS, *a.* हासकर (री *f.*), परिहासवत्, विनोदिन्, सरस, रसवत्, रसिक, हास्य, परिहासशीलः; विनोदनशीलः; oft. by परिहास or नर्म in comp.; 'a h. speech' परिहासः, परिहासजल्पितं, नर्मालापः, नर्मभाषितं. -OUSLY, *adv.* सरसं, विनोदार्थं, परिहासपूर्वं. -SOME, *a.* वक्रभाव-शील, दुःशील, दुष्प्रकृति. 2 चलचित्त, लोलमति, चलप्रकृति-भाव; *See* FICKLE.

HUMP, *s.* ककुद् *f.*, ककुदः-दं (fig. also), अंसकटः (of bulls); गडुः, स्थगुः; 'having a h.' ककुद्मत्, ककुद्मिन्; 'h.-backed' कुब्ज, गडुल-र, कुब्जक, वक्रपृष्ठ, न्युब्ज.

HUNCH, *s.* गडुः. 2 पिंडः. -*v. t.* अरत्निना तड् 10 or प्रह 1 P; 'h.-backed' Hump-backed, q. v.

HUNDRED, *a.* शतं; शतसंख्यक; 'by h. s' शतशः; 'in h. ways' शतधा; 'h.-fold' शतगुण *a.*; 'the life of man extends to h. years' शतायुर्वै पुरुषः. -*s.* शतं. -TH, *s.* शततम (मी *f.*).

HUNGER, *s.* क्षुधा, क्षुध् *f.*, बुभुक्षा, जिघत्सा, अशनाया, अशनायितं; 'h.-starved' क्षुत्क्षाम, क्षुधावसन्न. -*v. i.* क्षुध् 4 P (with dat.), भुज् desid. (बुभुक्षति-ते). 2 Long, q. v. -HUNGRY, *a.* क्षुधित, क्षुधार्त, क्षुधार्दित, क्षुत्पीडित, क्षुधातुर, जिघत्सु, बुभुक्ष, क्षुधाव्याकुल, बुभुक्षित, अन्नार्थिन्, अशनायित; 'h. and thirsty' क्षुत्पिपासित. 2 अवसन्न, क्षीण, क्षाम, कृश.

HUNKS, *s.* *See* MISER.

HUNT, *v.* मृग् 10 A, मृगयां कृ 8 U, (मृगयायां) अनुधाव् 1 P, अनुह 1 P, अनुवृत् 1 A, अनुबंध् 9 P. 2 अन्विष् 4 P, निरूप् 10. -*s.*, -ING, *s.* मृगया, आखेटः, मृगर्क्ष, आच्छोदनं, पापर्द्धि *f.* 2 श्वनुसरणं, अन्वेषणं, मार्गणं, अनुधावनं; लाभेच्छा, लिप्सा; 'h.-dress' मृगयावेषः; 'h.-dog' विश्वकरुः, मृगयाकुक्कुरः. -ER, HUNTSMAN, *s.* व्याधः, लुब्धकः, मृगयुः, आखेटकः, मृगवधाजीवः; श्रौवांतिकः, शाकुनिकः (of birds); वागुरिकः, जालिकः (with nets).

HURDLE, *s.* काष्ठावरणं.

श्राम् 4 U, ईर् c.; प्रेङ् c., प्रह 1 P; 'h. down' नि-अव-पत् c., अव-ध्वंस् c., अधःक्षिप्. —s. क्षेपः पर्ज, पातनं. 2 तुमुलं, कोलाहलः. —ING, s. क्षेपणं; 'h. of stones' शिलावर्षः-आसारः.

HURLY-BURLY, s. तुमुलं, कोलाहलः, तुमुलरवः. कलकलः.

HURRAH, *interj.* जय-हर्ष-निस्वनः-शब्दः-नादः.

HURRICANE, s. प्रकंपनः, महावातः, अतिवातः, प्रभंजनः, वात्या, प्रचंडवातः, वेगानिलः, वातालीं, वात्यावेगः, चक्रवातः, जवानिलः, संझावातः (with showers).

HURRY, *v. i.* त्वर् 1 A, शीघ्रं गम् 1 P, ससंभ्रमं गम्. —*v. t.* त्वर् c. (त्वरयति). 2 सत्वरं आकृष् 1 P or प्रणुद् 6 P, or प्रेर् c.; शीघ्रं सं-नि:-पद् c. or वि-धा 3 U or साध् 5 P. —s. त्वरा, संभ्रमः, रभस् n., रभसः; व्यग्रता, वेगः, आकुलत्वं, आ-सं-वेगः, त्वरितगति f.; 'why are you in such a h.' किमसि संभ्रांतेव (U. 3); 'in a h.' संभ्रांत, व्याकुल, व्यग्र. —ED, *a.* त्वरित, शीघ्र; 'a h. speech' निरस्तं वचः, त्वरितोदितं. —EDLY, *adv.* शीघ्रं, त्वरितं, सत्वरं, ससंभ्रमं, सरभसं, व्यग्रं.

HURT, *v. t* क्षि 5 P, तुद् 6 P, हिंस् 7 P, अर्द् 1 P or c., बाध् 1 A, व्यथ् c. (व्यथयति), व्रुह् 4 P, क्षण् 8 P, पीड् 10, अपकृ 8 U, विप्र-कृ, दु 5 P; 'does not h. one's reputation' यशः न क्षिणोति (R. II. 40). —s. क्षतं, हिंसा, अपकारः, अपकृति f., बाधा, पीडा, व्यथा. 2 अपायः, क्षयः, हानि f., नाशः. —FUL, *a.* पीडाकर (री f.), अपायावह, हिंसात्मक, बाधक, अपकारिन्, अहित-हानि-क्षति-कर. 2 हिंस्र, घातुक, शरारु. —FULLY, *adv.* हिंसापूर्वं, सापकारं. —LESS, *a.* अक्षत. 2 अहिंस्र, अनपकारिन्, अनुपद्रविन्.

HURTLE, *v. i.* संघट्ट् 1 A, अभिसं-पत् 1 P. 2 सरभसं निष्क्रम् 1 U, 4 P or निर्गम् 1 P. 3 Echo, q. v.

HUSBAND, s. पतिः, भर्ता, उपयंता, परिणेता, परिग्रहीता, विवोढा; कांतः, दयितः, धवः, नाथः, स्वामी; इष्टः, प्रियतमः, प्राणेशः, हृदयेशः, (poetical words); 'h. and wife' दं(जं)पती, जायापती, भार्यापती; 'h.'s brother' देवरः, देवा, देवलः; 'a second h.' दिधिषुः; 'h.'s sister' ननांद; 'h.'s brother's wife' यातृः; 'sister's h.' श्यालः, श्यालकः, आवुत्तः, भगिनीपतिः. —*v. t.* परिमितं व्यय् 10 (व्यययति), न विधिवत् 6 P, परिमितव्ययं कृ 8 U. 2 कृष् 1 P, 6 U. —LESS, *a.* विधवा, अनाथा, पतिहीना, गतभर्तृका, निर्णाथा. —RY, *s.* कृषि f. कृषिकर्मन् n., कर्षणं, कृषिविद्या, वैश्यवृत्ति f., हलभृति f. 2 परिमितव्ययः, गृहकर्मनिर्वाहिया. —HUSBANDMAN, *s.* कृष(षि)कः, कर्षकः, कृषीवलः, क्षेत्रिकः, हालिकः; *See* FARMER. 2 वैश्यः, विश् m., ऊरुजः, ऊरव्यः, अर्यः, भूमिस्पृश् m.

HUSH, *interj.* तूष्णीं भव, शांतं, वाचंयम-*a.* भव, निःशब्दो भव. —*v. i.* शम् 4 P, प्र-उप-शम्, तूष्णीं भू, मौनीभू. —*v. t.* शम् c. (शमयति), निभृतं समा-धा 3 U; *See* CONCEAL also.

HUSK, *s.* तुषः, त्वच् f., कोशः, पुटः-टं, आवेष्टनं. 2 कुर्च-सं, कडंगरः. —*v. t.* निस्तुषयति-निस्त्वचयति (D.), त्वचं हृ 1 P, निस्तुषीकृ 8 U. —ED, *a.* निस्तुष, त्वग्हीन. 2 सतुष, त्वग्युक्त. —Y, *a.* सतुष, तुषवत्. 2 रूक्ष, कर्कश; 'in h. tones' रूक्षस्वरेण, बाष्पवृत्तिकलुषं.

HUSSAR, *s. See* CAVALIER.

HUSSY, *s.* बंधकी, पापा, दुष्टा स्त्री.

HUSTLE, *v. t.* Drive away, q. v. 2 संबाध् 1 A, संक्षुभ् c.

HUT, *s.* उटजः-जं, पर्णशाला, कुटीरः, तृणकुटी, कायमानं.

HUTCH, *s.* कुशू(सू)लः, धान्यकोष्ठः.

HUZZA, *s.* जयध्वनिः, हर्षनादः-स्वनः.

HYBRID, *a.* संकीर्णजाति, संकीर्ण, संकरजात, मिश्रज.

HYDRA, *s.* जलव्याल.

HYDRAULICS, *s.* चलज्जलविज्ञानं.

HYDROCELE, *s.* कोष-मुष्क-वृद्धि f., फल-कोष-शोफः.

HYDROCEPHALUS, *s.* मस्तिष्कशोथः, शिरोग्रहः.

HYDROGRAPHY, *s.* समुद्रवेलादिविवरणं.

HYDROMEL, *s.* जलसंसृष्टं मधु.

HYDROPATHY, *s.* जलोपचारः, जलप्रयोगचिकित्सा.

HYDROPHOBIA, *s.* जलसंत्रासः; अलर्कविभवः, आलर्कं.

HYDROPSY, *See* DROPSY.

HYEMAL, *a.* हैमंत (ती f.), शीतकालीन.

HYENA, *s.* तरक्षुः-क्षः, तर्क्षुः.

HYGROMETER, *s.* क्लेदमापकः.

HYMENEAL, *a.* विवाहीय, वैवाहिक-उद्वाहिक (की f.).

HYMN, *s.* स्तोत्रं, सूक्तं, गेयं, गानं, गीतं, स्तुतिगीतं; 'a chanter of h.s' उद्गातृ m., सुम्नयुः. —*v. t.* गै 1 P, वर्ण् 10, गानद्वारेण स्तु 2 U or प्रशंस् 1 P; 'h. praises' उपवीणयति (D.).

HYP, *s. See* DEJECTION.

HYPERBOLE, *s.* अतिशयोक्तिः f., अत्युक्तिः, वागुपचयः, सत्यातिक्रमः. —IC, —ICAL, *a.* अत्युक्तिपूर्ण, सत्यातिक्रामिन्. —IZE, *v. t.* अत्युक्त्या वर्ण् 10 or कथ् 10.

HYPERBOREAN, *a.* उत्तर, उदक्, उदीचीन, उत्तरीय.

HYPERCRITIC, *s.* एकांततः गुणदोषनिरूपकः or ज्ञिद् -वेधिन् m., दोषैकदृश् m.

HYPOCHONDRIA, *s.* पित्तोन्मादः, वायुकोपः. 2 विषादः, उद्वेगः, अवसादः. —CAL, *a.* पित्तोन्मादिन्, विषण्ण

LIFE, *s.* जीवनं, जीवितं, प्राणधारणं, असुधारणं. 2 जीवः, सत्त्वं, जीवितं, चैतन्यं, चेतना, प्राणवायुः, प्राणात्मन्, *m.*, जीवात्मा; 'endowed with I.' जीविन्, प्राणिन्, सजीव, सचेतन; 'love of I.' जीविततृष्णा, जिजीविषा; 'impatience of I.' जीवितद्वेषः-षासः; 'deprived of I.' हतप्राण-जीवित, नष्टप्राण; 'support of I.' प्राणयात्रा-धारणं-रक्षणं; 'reckless of I.' जीवितव्ययिन्, जीवितनिरपेक्ष; 'means of I.' जीवनोपायः. 3 (Life-time) आयुस् *n.*, जीवितं, जीवनं, जीवितकालः, आयुर्मर्यादा, आयुःपरिमाणं; 'possessed of long I.' दीर्घायुस्, आयुष्मत्, चिरायुः; 'for I.,' 'during I.', 'all one's I.' यावज्जीवं, आमरणात्; 'in all one's I.' आजन्म, जन्मतः प्रभृति or आरभ्य; 'my lamp of I. is nearly out' निर्वाणभूयिष्ठो मे जीवितप्रदीपः or अवसितप्रायो मे जीवितावधिः. 4 (fig.) जीवितं, प्राणाः, (त्वं जीवितं मे U. 3). 5 संसारः, भवः, संसृतिः *f.*, लोकयात्रा, भूलोकवासः, इहवासः. 6 वृत्तिः *f.*, आचारः, व्यवहारः, रातिः *f.*, चेष्टितं, प्रवृत्तिः, वृत्तं, आचरणं; 'leading a virtuous I.' साधुवृत्त, सदाचार, पुण्यमार्ग. 7 चरितं, चरित्रं, जीवनवृत्तांतः, चरित्ररचना-कथनं. 8 अवस्था, दशा, स्थितिः *f.*, वृत्तिः, भावः, गतिः *f.* 9 उत्साहः, वीर्यं, तेजस् *n.*, सत्त्वं, रसः; 'bring or restore to I.' उज्जीव् c., सोच्छ्वास-*a.* कृ 8 U, असून् प्राप् c., (परीक्षितं दुर्लभानसून्प्रापितवान् Ka. 175); 'come to I.' उज्जीव् 1 P; 'active I.' प्रवृत्तिः, प्रवृत्ती-संसार-मार्गः, लोकव्यवहारः; 'retired I.' निवृत्तिः, निवृत्तिमार्गः; 'he entered on a military I.' योधवृत्तिमाश्रयत; 'engaging in public I.' लोकव्यवहारप्रवृत्तिः; 'in this I.' इह, इहलोके; 'the vicissitudes of I.' संसारचक्र-परिवर्तनं, दशांतराणि; 'I.-blood' प्राणः, तत्त्वं, सारभूतं द्रव्यं; 'I.-giving' प्राणद, जीवद-दायिन्; वीर्यद, उत्साहकर (री *f.*); 'I.-guard' राजपरिचरः, शरीररक्षकः; 'I.-time' जीवितावधिः, जीवितकालः; 'during one's I.-time' यावज्जीवं. -LESS, *a.* गतजीवित, गतासु, परासु, व्यसु, गत-नष्ट-प्राण, हतजीवित, प्राण-जीव-रहित-हीन, अचेष्ट. 2 अजीव, निर्जीव, वि-अ-चेतन, चैतन्यहीन-रहित, निश्चेतन. 3 निःसत्त्व, निरुत्साह, निस्तेजस्, सत्त्व-रस-हीन.

LIFT, *v. t.* उन्नम् c. (नमयति), उद्गम् c. (गमयति), उच्छ्रि 1 U, उदयम् 1 A, उत्था c. (उत्थापयति), उच्छ्रिष् 6 P, उद्वह् 1 P, उद्वी 1 P, उत्कृष् 1 P, उत्तुल् 10; oft. by उत् in comp.; 'with the neck I.-ed up' उत्कंधरः; उद्बाहुः, उद्ग्रीवः, उन्मुखः, &c. 2 (In rank) उत्कृष्टपदे नियुज् 7 A, 10, मानं संवृध् c., प्रतिपत्ति-प्रतिष्ठां-उत्कर्षं-पदवृद्धि-लभ् c. (लंभयति); 'I. with pride' दृप् c., गर्वेण उद्वह् 2 P, दर्पेण अ-स्मा 1 P; 'to I. up the voice' तारस्वरेण-उच्चैः-आकृश् 1 P. -*s.* उन्नमनं, उच्छ्रयः, उत्कर्षः, उत्थापनं. 2 प्रतिपत्ति *f.*, पदवृद्धि *f.*, उन्नतिः *f.* 3 उपकारः, साहाय्यं.

LIGAMENT, *s.* बंधनं, पाशः, निगडः, शृंखला-लं-लः. 2 संधिबंधः, ग्रंथि-अस्थि-बंधनं.

LIGATURE, LIGATION, *s.* बंधः, बंधनं, वेष्टनं, परि-आ-वेष्टनं, रज्जुः *f.*

LIGHT, *a.* लघु (in all senses); अगुरु, अल्पभार, अल्पप्रमाण, लघुभार, लघुप्रमाण; सुवाह्य, सुखवाह्य, सुसह्य, अदुर्वह, अदुःसह. 2 सुख, सुकर, अकष्ट, सुसाध्य, सुगम, निरायास, अविषम, अकठिन. 3 चपल, लघु, लघुशरीर-गति. 4 सोल्लास, प्रफुल्ल, निश्चिंत. 5 चपल, चंचल, लोल, तरल, अस्थिर, अनवस्थित, लघुचित्त-स्वभाव-चेतस्, गांभीर्यहीन, निर्गौरव. 6 तुच्छ, क्षुद्र, अत्यल्प, तृणप्राय, लघ्वर्थ, अल्पार्थ, अल्प-लघु-प्रभाव; 'I.-armed' लघ्वायुध, लघुशस्त्रभृत्; 'I.-fingered' लघुहस्त, चपलपाणिः; 'I.-footed' लघु-शीघ्र-गति, द्रुतगतिः; 'I.-headed' लघुचित्त-चेतस्, चपल-लोल-मतिः; भ्रांत-विक्षिप्त-बुद्धि-चित्त; बुद्धिभ्रमात् प्रलापिन्; 'I.-headedness' चित्त-बुद्धि-भ्रमः-विप्लवः; 'I.-hearted' लघुचित्त-चेतस्, क्षुद्रमनस्; हृष्ट-प्रसन्न-हृदय, उल्लासिन्, प्रफुल्लचित्त, आनंदित, सोल्लास; 'I.-house' दीपगृहं; 'I.-minded' लघुचेतस्-चित्त, क्षुद्र-कृपण-बुद्धि-मतिः; 'I. spirited' हृष्टहृदय-चित्त, &c. 7 पांडु, श्वेत; oft. ex. by आ, ईषत्; 'I. red' श्वेतारुण, ईषद्रक्त; 'I. blue' श्वेतनील, आबिल; 'I. food' सुपथ्यं-सुपाक्यं-अन्नं; 'to make I. of' लघूकृ 8 U, लघु मन् 4 A, न गण् 10, तृणाय मन्. -*s.* प्रकाशः, आलोकः, भा, प्रभा, आभा, द्युतिः *f.*, कांतिः *f.*, दीप्तिः *f.*, तेजस् *n.*, ज्योतिस् *n.*, रुचिः *f.*, भास् *f.*, त्विष् *f.*; वर्चस् *n.* 2 दीपः, प्रदीपः; दीपिका. 3 ज्ञानं, बोधः, अव-

गमः, प्रकाशः. 4 प्रसिद्धि f., प्रख्याति f., प्राकाश्यं, प्रकाशता, प्राकट्यं. 5 दृष्टि f.; 'see or come to l.' प्रसिद्धि-प्रकाशतां-गम् 1 P, प्रकाशीभू 1 P, आविर्भू, प्रादुर्भू; 'bring to l.' प्रकाश् c., प्रकटीकृ 8 U, स्पष्टीकृ, आविष्कृ, विवृ 5 U, प्र ख्या c. (ख्यापयति); 'to throw l. on' विशदीकृ, विवृ, प्रकाश् c.; *See* EXPLAIN; 'from the l. of utility' उपयोगदृष्ट्या; 'considered in this l.' अनया दृष्ट्या. —*v. t.* दीप् c., उत्-प्र-सं-°; प्र-द्युत् c., प्रकाश् c., अव-वि-भास् c., ज्वल् c., प्र-उत्-सं°; सं,-इंध् 7 A; संधुक्ष् 10; तप् c., सं-प्र-उत्°; 'to be l. ed' दीप् 4 A, ज्वल् 1 P. —*v. i.* आ-पत् 1 P; (अकस्मात्) आ-सद् c., प्राप् 5 P, आ-उपा गम् 1 P. 2 अवतृ 1 P, अव-रुह् 1 P. अव-नि-पत्; अध्यास् 2 A, अधि-शी 2 A (with acc.), निषद् 1 P, नि-ली 4 A. —EN, *v. t.* प्रकाश् c., दीप् c., ज्वल् c., द्युत् c.; *See* (*v. t.*) above. 2 लघूकृ, लघयति (D.); शम् c. (शमयति), प्र-उप°. —*v. i.* स्फुर् 6 P, द्युत् 1 A, प्रकाश् 1 A, विलस् 1 P. —ER, *a.* लघुतर, लघीयस्. —*s.* प्रकाशकः, द्योतकः, दीपकः, द्युतिदः. 2 तरालुः, वह्निः, उडुपं. —LESS, *a.* निष्प्रभ, अप्रभ, निरालोक, निस्तेजस्. —LY, *adv.* लघु, लाघवेन, अल्पप्रमाणेन. 2 सुखेन, अकष्टेन, अनायासेन. 3 निष्कारणं, हेतुं विना. 4 लघुगत्या, चपलं, सत्वरं. 5 लघुचेतसा, चंचलवत्, अस्थिरतया; 'to think l.' लघु मन् 4 A. —NESS, *s.* (lit.) लघुता-त्वं, लाघवं, अल्पभारत्वं, भाराभावः. 2 सुखं, सौकर्यं, अनायासः, सुसाध्यता, अकष्टत्वं. 3 सुबाह्यता, सुसह्यता. 4 लाघवं, चापल्यं, द्रुतगतित्वं, शरीरलघुता. 5 चापल्यं, चांचल्यं, अस्थिरता, लोलता, चपलता, अगौरवं, लघिमा, लाघवं, लघुता. 6 लघुता, तुच्छता, क्षुद्रता. —SOME, *a.* दीप्तिमत्, प्रकाशवत्, सुप्रभ, तेजस्विन्, सुप्रकाश, तेजोमय (यी *f.*). 2 हृष्ट, सोल्लास, प्रफुल्ल, वीतचिंत, सानंद. —LIGHTNING, *s.* तडित्, विद्युत्, सौदामि(म)नी, अचिरप्रभा, क्षणदा, चंचला, चपला, शतह्रदा, ह्रादिनी, शंपा, ऐरावती, क्षणप्रभा-द्युतिः (all *f.*); 'fire of l.' वैद्युतः अग्निः; 'forked l.' तडिल्लता, विद्युल्लता; 'the falling of l.' विद्युत्पातः; 'struck by l.' विद्युता उपहत.

LIGNEOUS, *a.* काष्ठ-दारु-मय (यी *f.*), काष्ठ-दारु-रूप.

LIGNIFEROUS, *a.* काष्ठद, दारुप्रद.

LIGNIFORM, *a.* काष्ठरूप, काष्ठाकृति.

LIKE, *a.* सदृक्ष (क्षी *f.*), तुल्य, सम; समान, सन्निभ, अनुकारिन्, (with gen. or instr.); oft. by उपम, निभ, रूप, विध, प्रतिम, संकाश, नीकाश, प्रतीकाश, भूत, (all in comp.); also by स or अनु in comp.; 'of l. properties' सगुण, अनुगुण-धर्मन्, सम-तुल्य-गुण, समभाव; 'of l. form' सरूप, अनुरूप, तुल्याकृति, तुल्यरूप; 'l. a father' पितृभूतः, पितृस्थानीयः; 'of l. class' सजाति, सजातीय, सवर्ण, सवर्ग, तुल्यवर्ण; 'almost l. Hara' हरकल्प; 'l. this' ईदृश-क्, एतादृश-क्; 'l. that' तादृश-क्; 'l. what' कीदृश-क्; 'l. which' यादृश-क्; 'l. me, us' मादृश, अस्मादृश, &c.; 'l. thee, you' त्वादृश, युष्मादृश, &c.; 'l. your honour' भवादृश; 'to be l.' अनुकृ 8 U (with gen.), संवद् 1 P (with instr.), अनुहृ 1 P (with acc.); *See* RESEMBLE; 'the son was l. his generating cause (father)' न कारणात् स्वाद्विभिदे कुमारः (R. v. 57); 'these and the l.' एवमादि; 'in l. manner' तथा, एवं, तद्वत्, तथैव, एवमेव, एवंविधं. —*s.* समः, तुल्यः, सदृक्षः, तुल्यगुणः, यमकः-लः; 'his l. was and will never be seen' अनेन सदृक्षो न भूतो न भविष्यति. —*adv.* Ex. by वत् in comp., इव, यथा. निर्विशेषं in comp.; 'l. an earthen pot' मृद्घटवत्; often by Karm. or Bah. comp.; 'black l. a cloud' मेघश्यामः; 'having a moon-l. face' चंद्रमुख; 'brought up l. one's own children' अपत्यनिर्विशेषं संवर्धित; 'to act l.' अनुकृ. 2 Likely, q. v. —*v. t.* रुच् 1 A (with dat. of person who likes); अभिनंद् 1 P, अनु-सं-अभि-मन् 4 A, अनुमुद् 1 A, प्रशंस् 1 P, श्री pass., तुष् 4 P; 'does not l. the present' उपायनं नाभिनंदति, उपायनेन न तुष्यति &c., स्निह् 4 P, अनुरंज् pass. (with loc.). —*v. i.* इष् 6 P, अभिलष् 1, 4 P, रुच्; oft. by काम in comp.; 'just as you l.' यस्ते छंदः (V. 3), यद्भवते रोचते; 'doing as one l. s' कामचारः, स्वरवृत्तः, स्वच्छंदः, स्वैरिन्; 'taking what form he l. s' कामरूपः; 'do what you l.' यथाभिलषितं क्रियतां. —ED, *a.* मत, अभि-अनु-सं-° इष्ट, प्रिय, दयित. —EN, *v. t.* उप-मा 3 A, 2 P, सदृक्षीकृ; *See* COMPARE. —ING, *s.* रुचि *f.*, अभिरुचिः, कामः, इच्छा, तोषः, प्रीति *f.*, तुष्टि *f.*, प्रणयः, अनुरागः, अभिलाषः, छंदः, छंदस् *n.*, सं-अनु-मति *f.*; 'he was not to her l.' स न तस्या रुचये बभूव (R. vi. 44); 'of your l.' त्वदभिमत. —NESS, *s.* सादृश्यं, साम्यं, तुल्यत्वं, आनुरूप्यं, सारूप्यं, तुला, उपमा, अनुकारः, संवादः, आनुगुण्यं, औपम्यं, &c. 2 रूपं, आकृति *f.*, आकारः, मूर्ति *f.* 3 प्रतिमा मानं, प्रतिरूप-कृतिः, प्रतिमूर्तिः, प्रतिच्छंदः, चित्रं, आलेख्यं, प्रतिबिंबं; 'a speaking l.' संवादिनी आकृतिः. —WISE, *adv.* तथैव, तथा, तद्वत्. 2 अपि, अपि च, किं च, तथा, अपरं च. —LIKELY, *a.* संभाव्य, संभवनीय, उपपन्न, सत्यसंकाश; अदेय; 'it is l. that' इति संभवति or उपपद्यते. 2 (Probable) ex. by प्रायः, प्रायशः, प्रायेण, with pot. pass. part., or by अपि नाम; 'he is l. to come to-morrow' श्वःकल्येन स आगंतव्यं; अपि नाम स आगः

अभिमतः पाणिग्रहः स्यात् (Mal. 1) 'is it l. that &c.' -HOOD,-NESS, *s.* संभाव्यता, संभवः; better by (*a.*); *See* above.

LILY, *s.* नलिनी, उत्पलं, कुमुदं, पद्मं; *See* LOTUS.

LIMATION, *s.* मार्जनं, लोहमार्जनेन घर्षणं.

LIMATURE, *s.* लोहचूर्णं, लोहजं.

LIMB, *s.* अंगं, अवयवः, (lit. & fig.) ; गात्रं; 'over every l.' प्रत्यंगं, सर्वांगीण-*a.*; 'l. by l.' अवयवशः, गात्रे गात्रे. 2 प्रांतः, कोटि *f.*, सीमा. -ED, *a.* अंगिन्, सावयव; 'large-l.' बृहदवयव, महांग (गी *f.*); 'slender-l.' तन्वंग, कोमल-पेलव-अंग. -LESS, *a.* अनंग, निरवयव, अंगहीन.

LIMBER, *a.* मृदु, कोमल, शिथिल, अदृढ, नम्य.

LIMBO, *s.* नरकः, निरयः. 2 कारा, कारागारं, बंधनागारं.

LIME, *s.* (Tree) जंबीरः; *See* LEMON. 2 (Quick-l.) चूर्णः-र्णं, कर्करः; 'l.-water' सुधा, लेपः (for colouring); 'l.-stone' चूर्णखंडः, चूर्णोपलः, कर्करं. -Y, *a.* चूर्णमय (यी *f.*), सचूर्ण, कर्करमय. 2 श्यान, सांद्र, चूर्णोपम.

LIMIT, *s.* अवधिः, मर्यादा, सीमा, सीमन् *f.*, पर्यंतः, अंतः, प्रांतः, परिच्छेदः, परिमाणं, इयत्ता, अवसानं; वेला (of sea); 'of narrow l. (scope)' अल्पविषय-*a.*; 'set or fix a l. to' परिच्छिद् 7 P; 'no (definite) l. can be set to his fame' तस्य यशः इयत्तया परिच्छेत्तुं नालं (R. VI. 77). -*v. t.* परिच्छिद्, परि-मा 2 P, 3 A; इयत्तया परिच्छिद्, सीमां नि-रूप् 10 or निधृ् 10; *See* DEFINE. 2 सं-नि-यम् 1 P or c., सं ह 1 P, संकुच् 1 P or c., नि-यंत्र् 10, निबंध् 9 P, निग्रह् 9 P. -ATION, *s.* परिच्छेदः, सीमा-मर्यादा-निरूपणं. 2 परिमितता, सावधिकता, समर्यादत्वं, ससीमता. -ED, *a.* परिच्छिन्न, परिमित, मित, समर्याद, सावधिक; नियत, संहृत, अल्पविषय, संकुचित, अध्यापक, संबाध; 'not through the l. nature of (your) merits' न गुणानामियत्तया (R. X. 32); 'l. meaning' नियतार्थः; 'l. knowledge' अल्पविषयं ज्ञानं; 'l. monarchy' नियंत्रितं or संयतं प्रभुत्वं. -ER, *s.* परिच्छेदकः. -LESS, *a.* अमित, अनंत, असीम, निरवधि.

LIMMER, *s.* नीचजनः, अपसदः in comp.

LIMN, *v. t.* लिख् 6 P or चित्र् 10. -ER, *s.* चित्रकरः.

LIMOUS, *a.* सकर्दम, पंकिल.

LIMP, *v. i.* खंज् 1 P, लंग् 1 P, खोर्-खोड्-खोल् 1 P. -*s.* लंगः, लंगगतिः *f.* -*a.* मृदु, शिथिल, कोमल. -ER, *s.* खंजः, लंग-खंज-गतिः. -ING, *a.* खंज, खोर, खोल, खोड, लंगगति, विकलगति. -INGLY, *adv.* खंजवत्, लंगगत्या.

LIMPID, *a.* स्वच्छ, प्रसन्न, विमल, स्वच्छतोय, प्रसन्नवारि, विमलजल. -NESS, *s.* स्वच्छता, विमलता, प्रसादः.

LIN, *s.* पल्वलं, तडागः-गं, जलाशयः.

LINCH-PIN, *s.* अक्षाग्रकीलः, अ(आ)णिः, ध्रुवः.

LINCTURE, *s.* अवलेहः, लेह्यं.

LINE, *s.* रे(ले)खा, रेषा. 2 पंक्तिः, पद्धतिः, सरणिः-णी, राजिः-जी, आवलिः-ली, ततिः, श्रेणिः-णी (all *f.*), माला. 3 सूत्रं, रज्जु *f.*, गुणः, तंतुः. 4 आकारः, आकृति *f.*, रूपं. 5 प्राकारः, वप्रः, परिखा, प्राचीरं. 6 (Of troops) दंडः, व्यूहः, पंक्तिः, बलविन्यासः. 7 क्रमः, अनुक्रमः, पर्यायः. 8 परिपाटि-टी *f.*, श्रेणिः-णी, पंक्तिः, परंपरा, माला, पारंपर्यं, आवलिः-ली; आनुपूर्व्यं. 9 (Of conduct) मार्गः, पथिन् *m.*, रीति *f.*, सरणिः, व्यवहारः. 10 देशः, विषयः, अंगं. 11 दिश् *f.*, दिशा, मार्गः. 12 भूरेखा; *See* EQUATOR; 'ruled l.' रेखा, अंकः; 'in a l.' पंक्तिक्रमेण, पंक्तिशः; 'by l. and rule' यथासूत्रं; 'l. of the face' वदन-मुख-रेखा; 'printed l.' पंक्तिः; 'l. of a stanza' पादः, चरणः-णं; 'in a regular l.' अनुक्रमेण, क्रमशः, आनुपूर्व्येण, अनुपूर्वशः; 'l. of the family' वंशक्रमः-परंपरा-आवलिः; 'a good l. of conduct' सुमार्गः, सुपथः; 'a bad l. of conduct' वि-कु-पथः, विमार्गः, दुर्मार्गः; 'l. of study' अध्ययनक्रमः; 'l. of posterity' वंशावली; 'fishing-l.' वडिशसूत्रं; 'to draw l.s' लिख् 6 P; 'draw l.s on the ground' भूमिं रेखाभिः वि-उत्-लिख् or अंक् 10; 'to draw the l.' वि-विच् 3, 7 U, भेदं दृश् c., or निरूप् 10. -*v. t.* अंतः आ-, छद् 10, अभ्यंतरं छद्. 2 पंक्तिक्रमेण स्था c. (स्थापयति) or नि-विश् c. 3 रेखाभिः अंक्; 'the streets were l.ed with guards' अनरथ्यं पंक्तिक्रमेण रक्षिणः स्थापिताः. -AGE, *s.* अन्वयः, वंशः, कुलं, संतति *f.*, संतानः, गोत्रं, वंशावली, वंशपरंपरा; 'of royal l.' राजवंश्य, राजकुलप्रसूत; 'of high or noble l.' अभिजात, महाकुल. -AL, *a.* रेखारूप-मय (यी *f.*). 2 परंपरागत, परंपरायात-प्राप्त, क्रमप्राप्त-आगत-आयात, अन्वयागत, परंपरीण, कुलक्रमागत; 'l. descent' अन्वयागमः, क्रमागमः, कुलक्रमागमः; 'l. descendant' संतानः, संततिः, अपत्यं. -ALLY, *adv.* परंपरया, पारंपर्येण, वंशक्रमेण, कुलक्रमागमेन, 'l. descended' वंशक्रमायातः; *See* above. -ING, *s.* अंतराच्छादनं, अंतःपटलं-पुटं-वेष्टनं, आस्तरः-रणं. -LINEAMENT, *s.* रेखा, वदन-मुख-रेखा, वदनाकारः, वदनाकृति *f.*, लक्षणं, चिह्नं. -LINEAR, *s.* पंक्ति-रेखा-रूप-मय (यी *f.*).

LINEN, *s.* क्षौमं, क्षौमपटः-वस्त्रं; शाणपटः-वस्त्रं. -*a.* क्षौम-औम (मी *f.*), शाण (णी *f.*), अतसीनिर्मित; 'l.-draper' क्षौमवस्त्रविक्रयिन् *m.*, वस्त्रविक्रयोपजीवी.

LINGER, *v. i.* वि-लंब् 1 A, मंदायते (D.), चिर-(रा)यति (D.), कालं क्षिप् 6 P or हृ 1 P, मंदं मंदं चल्-र् 1 P. 2 विलंबु 1 A, विचर् c. 3 चिरं-दीर्घकालं-स्था 1 P or वृत् 1 A; 'l. ing on a

sick bed' चिररोगिन्. -EE, *s.* विलंबकारिन् *m.*, विलंबी, मंदगामी, मंदगतिः, चिरक्रियः, दीर्घसूत्री. -ING, *a.* दीर्घ, चिरस्थायिन्, चिर-दीर्घ-कालीन, चिरकालस्थ. 2 विलंबिन्, विलंबित, मंदायमान. -*s.* विलंबः, कालक्षेपः-यापनं. -INGLY, *adv.* मंदं मंदं, विलंबेन, सविलंबं, मंदगत्या, कालक्षेपेण.

LINGET, *s.* धातु-लोह-पिंडः.

LINGUAL, *a.* मूर्धन्य, मूर्धस्थानीय.

LINGUIFORM, *a.* जिह्वाकृति, जिह्वारूप.

LINGUIST, *s.* भाषाकोविदः, शाब्दिकः, शब्दव्युत्पन्नः, भाषाप्रवीणः, भाषाज्ञः, बहुभाषाज्ञः, अनेकभाषानिपुणः. -IC, *a.* (*s.*) in comp.

LINIMENT, *s.* प्र-आ-वि-लेपः-पनं, लेपदेहः, अभ्यंजनं, मर्दनौषधं.

LINK, *s.* संधिः, ग्रंथिः. 2 बंधनं, बंधपाशः, शृंखलाः-ला. 3 संयोगः, संबंधः, अन्वयः, संदर्भः, प्रबंधः. 4 उल्का, उल्मुकं; 'l. s of life' जीवितनिबंधनानि; 'l.-boy' उल्काभृत्. -*v. t.* संयुज् 7 U, 10, सं-धा 3 U, संश्लिष् c., संबंध् 9 P, व्यति-यंज् 1 P, संमंथ् 9 P; *See* KNIT. -ED, *a.* संयुक्त, संश्लिष्ट, संबद्ध, अन्वित, सान्वय.

LINSEED, *s.* अतसी, उमा, क्षुमा, उमा-अतसी-बीजं, &c.

LINSEY-WOOLSEY, *a.* क्षौमौर्ण. 2 असार, निःसत्व; क्षुद्र.

LINSTOCK, *s.* ज्वलनकाष्ठं, अग्निदशलाका.

LINT, *s.* क्षौमबंधः, विकेशिका.

LINTEL, *s.* द्वाराग्रकाष्ठं, द्वारोर्ध्ववेदारु *n.*

LION, *s.* सिंहः, हरिः, केसरिन् *m.*, पंचास्यः, पंचाननः, हर्यक्षः, कंठीरवः, मृगरिपुः, मृगाशनः, पुंडरीकः, पंचनखः, चित्रकायः, मृगाद्दिट्; and comp. of इंद्रः, राजन्, पतिः, अधिपः, अधिपतिः with मृग or पशु; मृगपतिः, मृगराजः, मृगाधिपः, पशुपतिः, &c.; 'l.'s part' भूयिष्ठभागः. -ESS, *s.* सिंही. -LIKE, -LY, *a.* सिंहस्वभाव, सैंह (ही *f.*).

LIP, *s.* ओष्ठः (strictly upper), दशन-रदन-छदः, रद-दंत-छदः, दशन-दंत-वासस् *n.*, अधरः (strictly lower); 'a red or cherry l.' बिंबो(बी)ष्ठः, बिंबाधरः; 'a woman having cherry l. s.' बिंबौष्ठी; 'drinking the l.' अधरपानं, अधरामृतसेवनं; 'l.-honeyed' मुखमधु; 'l.-loyalty' मुखभक्ति *f.*, बाह्यदर्शिता भक्तिः. 2 कर्णः, पार्श्वः, कंठः, मुखं, &c. -PED, *a.* ओष्ठ in comp.

LIPOTHYMY, *s.* *See* FAINTING, SWOON.

LIPPITUDE, *s.* क्लिन्नाक्षता, चुक्लत्वं.

LIQUEFY, *v. i.* वि-द्रु 1 P, वि-,ली 9 P, 4 A, जलसात् 1 P, क्षर् 1 P, द्रवीभू. -*v. t.* वि-द्रु c., वि-ली c., द्रवीकृ 8 U, जलसात्कृ. -ACTION, *s.* द्रवीकरणं, द्रावः, विलयः-यनं, क्षरणं, द्रवीभवनं. 2 द्रवत्वं, विलीनता.

LIQUID, *s.* द्रवः, रसः, जलं, द्रववस्तु-द्रव्य-पदार्थः. -*a.* द्रव, द्रुत, द्रवरूप, विलीन, प्रवाहिन्, तरल; 'reduced to a l. state' द्रवतामापन्न, विलीन, जलीभूत, रसतामुपेत (Ka. 122). -ITY, -NESS, *s.* द्रवत्वं, रसता, द्रवभावः, प्रवाहधर्मः.

LIQUIDATE, *v. t.* शुध् c., अपाकृ 8 U, निस्तृ c., अपनी 1 P, अपवृज् 10; मुच् 6 P or c., मोक्ष् 10; 'debt contracted to l. another debt' ऋणार्णं. -ION, *s.* शोधनं, शुद्धि *f.*, अपाकरणं, निस्तारः, मुक्ति *f.*, मोक्षः-क्षणं, अपनयनं.

LIQUOR, *s.* सुरा, मद्यं, हाला, वारुणी, वरुणात्मजा, मदिरा, आसवः, शी(सी)धु *m. n.*, हलिप्रिया, परिस्रुत् *f.*, गंधोत्तमा, प्रसन्ना, इरा, कादंबरी, परिप्लुता, कश्यः 'l.-shop' शुंडापानं, मदस्थानं, शुंडा, पानं; 'round of drinking l.' मधुवारः-क्रमः; 'distilling of l.' संधानं, अभिषवः; 'l.-ferment' किण्वं, नग्नहूः, कारोत्तरः, मंडः; 'company of l.-drinkers' आपानं, पानगोष्ठिका; 'drinking l.' सरकः, अनुतर्षणं, मद्यपानं. 2 Liquid, q. v. 3 पेयं.

LISP, *v. i.* स्खरभंगेन-अस्पष्टं-वद् 1 P or वच् 2 P or उच्चर् c. or उदीर् c., अव्यक्तं वद्; अस्फुटवाचा जल्प् 1 P, स्खल् 1 P. -*s.*, -ING, *s.* गद्गदवाच् *f.*-वाक्यं, अस्फुटोच्चारणं, अव्यक्तवर्णं जल्पितं, स्खलितवाक्. -ER, *s.* अस्पष्टवाक्, गद्गदवाक्, अस्फुटवादिन् *m.* -INGLY, *adv.* अस्फुटवाचा, गद्गदवाचा.

LIST, *s.* आवलि-ली *f.*, पंक्ति *f.*, परिसंख्या, परिगणना, अनुक्रमणिका, सूचि-ची *f.*; 'a l. of names' नामावली; 'a l. of errata' शुद्धिपत्रं. 2 वस्त्रखंडः. 3 वस्त्रप्रांतः, दशाः, वस्त्रयः (pl.). 4 युद्ध-रण-भूमि *f.*, रंगः, रणाजिरं, मल्लभूः-भूमिः; 'enter or take the l. s' रणार्थं सज्जीभू 1 P or सन्नद्ध-*a.* भू. -*v. t.* वस्त्रखंडैः आच्छद् 10. 2 वस्त्रखंडान् संसिव् 4 P. 3 गणनापत्रे नामानि अभिलिख् 6 P or आरुह् c. (रोपयति). 4 Listen, q. v. -*v. i.* इष् 6 P, रुच् 1 A, अभिलष् 1, 4 P; *See* LIKE. 2 आ-अव-लंब् 1 A, प्रवणीभू 1 P; *See* LEAN. -LISTLESS, *a.* अनवहित, निरपेक्ष, उदासीन, प्रमादिन्, अनुत्सुक, निरुत्साह; अनिच्छु, निरीह, निरुद्योग, विरक्त, निःस्पृह. 2 जड, ग्लान; *See* LANGUID. -LY, *adv.* अनवधानेन, निरपेक्षं, उदासीनवत्, निरुत्सुकं, अनपेक्षया, जडवत्, निःस्पृहं. -NESS, *s.* अनवधानं, अनपेक्षा, औदासीन्यं, अनौत्सुक्यं, विरक्ति *f.*, अनिच्छा, अनीहा, अस्पृहा, अनुत्साहः, अनास्था, जडता, मांद्यं.

LISTEN, *v. i.* श्रु 5 P, आकर्ण् 10, नि-शम् c., कर्णं दा 3 U, अव-धा 3 U, अवहित-सावधान-*a.* भू 1 P; 'l. now' अवधीयतामधुना, कर्णं देहि. 2 अनुवृत् 1 A, अनुरुध् 4 A. -ER, *s.* श्रोतृ *m.*

LITERAL, *a.* मूल, मुख्य, प्रकृत, अरूपक; मूलार्थक, मुख्यार्थक, शब्द in comp. 2 यथाशब्द, शब्दार्थानुसा-

रित्र, मूलपदानुसारिन् 3 अक्षरमय (यी *f.*); 'l. meaning' शुक्लतार्थः, शब्दार्थः, मूलार्थः. -ITY, *s.* मुख्यार्थः, प्रकृतार्थः, शब्दार्थः, मूलार्थः, अरूपकं. -LY, *adv.* मूलार्थानुसारेण, शब्दतः, शब्दशः, यथाशब्दं, अक्षरशः.

LITERARY, *a.* विद्या-साहित्य-संबंधिन्, विद्याविषयक, शास्त्र-ज्ञान in comp.; 'l. work' शास्त्रग्रंथः; 'l. dispute' ज्ञानसंघर्षः. 2 (Literate) विद्यावत्, विद्यासंपन्न, विद्याविशिष्ट, विद्यानुरागिन्; विद्या-शास्त्र-in comp.; *See* LEARNED. -LITERATURE, *s.* साहित्यं, विद्या, शास्त्रं; शास्त्रसमूहः; पुस्तकसमुदायः; 'dramatic l.' नाटचपुस्तकसमूहः. -LITERATI, *s.* विद्वत्समाजः, पंडितवर्गः-गणः, विद्वद्वृंदं.

LITHE, *a.* शिथिल, मृदु, भिदेलिम, सुखनाम्य.

LITHOGRAPH, *v. t.* शिलायां रूपं लिख् 6 P, शिलां रेखादिभिः मुद्र् 10 or अंक् 10. -*s.* शिला-पाषाण-लेखः-मुद्रा. -ER, *s.* शिलालेखकः, शिलामुद्राकृत् *m.* -Y, *s.* शिलालेखनविद्या, पाषाणलेखनं.

LITHONTRIPTIC, *a.* अश्मरीहर, अश्मरीघ्न (घ्नी *f.*).

LITHOTOMY, *s.* मूत्राश्मोच्छेदः.

LITHOTRIPSY, *s.* अश्मरीसंघर्षः.

LITIGANT, *a.* विवदमान, विवादार्थिन्, कार्यार्थिन्, व्यावहारिक (की *f.*). -*s.* वादिन् *m.*, कार्यार्थी, व्यवहर्तृ *m.*, अर्थी, विवादार्थी. -LITIGATE, *v. i.* वि-वद् 1 A, व्यव-हृ 1 P. -*v. t.* विवादास्पदीकृ 8 U. -ED, *a.* वादग्रस्त, विवादास्पदीकृत-भूत, वादानुगत. -ION, *s.* वि-,वादः, व्यवहारः. -LITIGIOUS, *a.* विवादप्रिय-शील, विवादार्थिन्, विवादपर-रत-आसक्त.

LITTER, *s.* शिबिका, यान्ययानं. 2 तृणशय्या, तृणसंस्तरः-शयनं. 3 शावकगणः-संघः. 4 द्रव्यसंकरः, व्यस्तता. -*v. t.* शावकगणं सू 2, 4 A, or उत्पद् c. 2 तृणेन आवृ 5 U or आस्तृ 5 U. 3 इतस्ततः विक्ष् 6 P or विक्षिप् 6 P.

LITTLE, *a.* अल्प, अल्पक, क्षुद्र, लघु, अणु, तनु, सूक्ष्म, ह्रस्व, श्लक्ष्ण, दभ्र, अणुक; क्षुद्र-अल्प-लघु-परिमाण; अल्पमात्र, अबहु; स्वल्प, स्तोक, अप्रचुर, ईषत् in comp. 2 क्षुद्रतनु, अल्पकाय-शरीर-तनु. 3 क्षुद्र-लघुमति, कृपणमनस्-चेतस्-बुद्धि; (as a diminutive) ex. by the suffix क; 'a l. girl' बालिका; 'a l. boy' बालकः; 'a l. cottage' कुटिका; 'very l.' अल्पिष्ठ, अत्यल्प; 'a l. wealth' द्रव्यलेशः-लवः, स्तोकं द्रव्यं; 'a l. finger' कनिष्ठांगुलि *f.*; 'for a l. while' कंचित्कालं. -*adv.* 'a l.' ईषत्, किंचित्, स्तोकं, मनाक्, भूरि, अबहु; oft. by आ, दर, ईषत् in comp.; 'a l. split' दरदलितः 'not a l.' भृशं, अत्यंतं; 'a l. distant' अनतिदूर, ईषद्दूर; 'l. less' ईषदून, किंचिन्न्यून, कल्प प्राय-in comp.; 'a l. less than dead' मृतप्राय-कल्प; 'l.-minded' कृपणबुद्धि, क्षुद्र-लघु-चेतस्. -*s.* अल्पं, किंचित्, स्तोकं, अल्प-स्तोक-भागः, अल्पांशः, किंचन, मात्रा, लवः, कणः, लेशः; अल्पमात्रं; 'by l. and l.' अल्पाल्पं, अल्पशः, स्तोकशः. -NESS, *s.* अल्पता, तनुता, लघुता, स्तोकता, &c. 2 (Of mind) दीनता, कार्पण्यं, क्षुद्रता, कदर्यता, दैन्यं.

LITTORAL, *a.* तटस्थ, तीरस्थ.

LITURGY, *s.* प्रार्थनामार्गः, भक्तिमार्गः.

LIVE, *v. i.* वस् 1 P, नि-प्रति-°; अधिवस्, अध्यास् 2 A, अधि-स्था 1 P (with acc.). 2 जीव् 1 P, प्र-अन् 2 P, श्वस् 2 P, धृ pass. or 6A, विद् 4A, वृत् 1A; 'here I l.' एषा क्रिये (U. 3); 'as long as you l.' यावज्जीवं, यावत्प्राणान् धारयसि or असुधारणं करोषि. 3 (On) उप-आ-जीव्, शरीरवृत्ति-प्राणयात्रां-क्रूप् c. or निवृत् c. or कृ 8 U; प्राणधारणं कृ, निर्वह् 1 P; 'l.-ing on fish' मत्स्याजीव, मत्स्योपजीविन्; sometimes by वृत्ति *f.*; 'l. ed on fruits, roots, &c.' फलमूलादिभिः वृत्तिमकरोत्; 'l. ing on the leaves of trees falling down of themselves' स्वयंविशीर्णद्रुमपर्णवृत्तिता (K. v. 28); 'l. s on wild fruits' वन्यफलैः शरीरवृत्तिं निर्वर्तयति. 4 जीवितं-कालं गम् c. (गमयति) or या c. (यापयति) or नी 1 P or अतिवह् c or वृत् c.; 'l. through time' चिरस्थायिन्-अमर-*a.* भू 1 P. -*a.* सजीव; *See* LIVING below; 'l.-long' दीर्घ-चिर-कालीन, चिरस्थायिन्; 'l.-stock' जीवधनं. -ING, *a.* सजीव, जीविन्, प्राणभृत्, सचेतन, प्राणधारिन्, चेतनावत्, सचेष्ट, सप्रमाण; 'a l. being' प्राणी, जीवी, जंतुः, प्राणभृत्, शरीरी, जीवः, देही, चेतनः, सत्त्वं; 'world of the l.' जीवलोकः. 2 वर्तमान, म्रियमाण, विद्यमान; 'a l. poet' वर्तमानकविः. 3 अक्षय, अनश्वर, अनपायिन्, अविनाशिन्; अजर, अमर (spring &c.). 4 आ-उप-जीविन्, आजीव or वृत्ति in comp.; 'l. by arms' शस्त्रोपजीविन्; 'l. by agriculture' कृष्याजीव; 'l. wickedly' दुर्वृत्ति, दुर्वृत्त, पापाचरित, पापवृत्ति; 'l. by beggary' याचकवृत्ति, &c.; 'within l. memory' स्मार्ते काले; 'a l. sacrifice' जीवोपहारः; 'a l. death' जीवितमरणं. -*s.* जीवनं, प्राणधारणं, वासः. 2 जीविका, आ-उप-°; आजीवः, वृत्ति *f.*, जीवनं, वर्तनं, आ-उप-जीवनं, जीवनोपायः, जीवन-जीव-साधनं, प्राण-शरीर-यात्रा, निर्वाहः, प्राण-जीव-निर्वाहः, प्राण-शरीर-स्थिति *f.*; जीवनार्थः. 3 धर्माव्यापकवृत्तिः, धर्मदायः; 'good l.' सुभोजनं, मिष्टाहारः, परमान्नभोजनं; 'bad l.' कदन्नभोजनं. -LIVELIHOOD, *s.* जीविका, वृत्तिः, जीवनं, प्राणयात्रा; *See* LIVING above; 'bare l.' ग्रासाच्छादनमात्रं, अन्नोदकमात्रं, दिननिर्वाहः. -LIVELY, *a.* सोल्लास, उल्लसिन्, आनंदिन्, प्रहृष्ट, उल्लसित, प्रमुदित, आमोद-उल्लास-वृत्ति. 2 स-सत्त्व, सोत्साह, उत्साह-शील, तेजस्विन्, तीव्र, तीक्ष्ण; 'of a l. countenance' प्रफुल्लवदन, हास्यमुख (खी *f.*), सुहास्यवदन, प्रसन्नमुख. -*adv.* सोत्साहं, प्रफुल्लतया, सोल्लासं. -NESS,

s. उल्लासः, प्र-,हर्षः, आनंदः, प्रफुल्लता, उत्साहः, तेजस् n., सत्त्वं.

LIVER, s. यकृत् n., कालखंडं; कालकं, कालेयं.

LIVERY, s. वेषः, कुल-आर्य-वेषः; 'l.-man' कुल-वेशधारी; पौरवेशः; 'l.-stable' अश्वपोषणशाला, अश्वशाला.

LIVID, a. नील, नीलवर्ण, सीसकवर्ण, नीलकृष्ण. -ITY, -NESS, s. नीलवर्णः, नीलिमन् m., सीसकवर्णः.

LIXIVIUM, s. क्षारजलं-अंबु n. -LIXIVIOUS, a. क्षाराक्त, क्षारविशिष्ट.

LIZARD, s. सरटः-टुः, कृक(कु)लासः-शः, प्रतिसूर्यः-येकः; 'house-l.' गृहगोधा-धिका, मुस(श)ली, ज्येष्ठा-ष्ठी, गृहालिका.

LO, *interj.* पश्य, प्रेक्षस्व.

LOAD, s. भारः, भरः; धुर् f., पर्याहारः. 2 बाधा, पीडा, दुःखं; कष्टं; 'the body is a l. (to me)' भारः कायः, भारभूतं शरीरं, कष्टप्रायं शरीरं; 'l.s of gold' सुवर्णभाराः; 'bearing a l.' भारवाहन, भारसह, धूर्वह, धुरंधर. -*v. t.* भारं न्यस् 4 P or नि-धा 3 U or निविश् c. or आरुह् c. (रोपयति), भारेण पूर् 10, भारेण पीड् 10 or आक्रम् 1 U, 4 P, भाराक्रांत-*a.* कृ 8 U; 'trees l.ed with fruits' फलभाराक्रांता वृक्षाः; *See* BEND (*v. i.*). 2 (A gun) आग्नेयचूर्णेन पूर्, आग्नेयचूर्णं निविश् c. -ED, *a.* सभार, भाराक्रांत, भारग्रस्त, भारवत्, आरोपित-निवेशितभार, धृ-णि. 2 गर्भ in comp., पूर्ण, पूरित; 'l with perfume' परिमलाक्रांत, वासगर्भ, वासपूर्ण. -ING, *s.* भारारोपणं. 2 भारः.

LOADSTONE, *s.* अयस्कांतः, अयोमणिः, लोहकांतः, चुंबकः, लोहचुंबकः, चुंबकपस्तरः-मणिः.

LOAF, *s.* अपूपः, पूपः, पिष्टकः, करंभः.

LOAM, *s.* चिक्कण-स्निग्ध-मृत्तिका. -Y, *a.* चिक्कण, मसृण.

LOAN, *s.* ऋणं, ऋणदानं, धनप्रयोगः, आविहितकालात्, द्रव्यप्रयोगः.

LOATH, *a.* अनुत्सुक, अनिच्छु, वि-पराङ्-मुख (स्त्री *f.*), विरक्त, अनिच्छत्, अकाम, निष्काम.

LOATHE, *v. t.* गर्ह् 1, 10 A, गुप् desid. (जुगुप्सते), अत्यंतं द्विष् 2 U; *See* ABHOR. -FUL, -SOME, *a.* बीभत्स, अतिगर्हित, घृणाकारिन्, अतिगद्य, कुत्सित, घृणार्ह, जुगुप्सावह. -ING, *s.* बीभत्सः, जुगुप्सा, घृणा, गर्हा, अतिनिर्वेदः-देषः. -INGLY, *adv.* सबीभत्सं, घृणापूर्वं.

LOB, *s.* स्थूलकायः, स्थूलशरीरः.

LOBBY, *s.* सभोपशाला, उपगृह-शाला.

LOBE, *s.* (कर्णस्य) पालि *f.*, पालिका, लतिका. 2 भागः, अंशः. -ED, *a.* पालिविशिष्ट.

LOCAL, *a.* स्थानिक (की *f.*), स्थानीय, दैशिक (की *f.*), देश्य, देशीय, देश-स्थान-in comp.; 'l. usage' देशाचारः; 'l. news' इहवृत्तं. 2 एक-देशीय-देशिन्-स्थानिक. -ITY, *s.* स्थानं, प्र-,देशः, स्थलं. -LY, *adv.* स्थानं वंषयं, स्थानमुद्दिश्य.

LOCATE, *v. t.* निविश् c., नि-धा 3 U, स्था c. (स्थापयति), वि-यस् 4 U; *See* PLACE. -ION, *s.* स्थापनं, निवेशनं, विन्यासः. 2 स्थानं, प्रतिष्ठानं, अधिकरणं. -IVE, *s.* सप्तमी विभक्तिः, अधिकरणं.

LOCK, *s.* तालः-लकं, तालयंत्रं. 2 (Of hair) पाशः, कलापः, केशकलापः-पाशः, अलकः; शिखंडकः, काकपक्षः (of young persons); चूडा, शिखा. 3 जलस्तंभनी-बंधनी. 4 आलिंगनं, आश्लेषः, उपगूहनं. -*v. t.* तालेन बंध् 9 P or वि-धा 3 U or निरुध् 7 U. 2 रुध्, बंध्, संयम् 1 A. 3 गाढं आलिंग् 1 P, दृढं परिष्वंज् 1 A; *See* CLASP, EMBRACE; 'l.ed in sleep' निद्रालीढ, निद्रानिमालितलोचन; 'l.-jaw', 'l.ed jaw' हनुस्तंभः-ग्रहः. -ER, *s.* तालकस्वनाथः कोष्टः, संपुटकः.

LOCKET, *s.* कुडुपः.

LOCOMOTION, *s.* स्थानांतर-स्थलांतर-गमनं, चलनं, गमनागमनं. 2 चलन-गमनागमन-शक्ति *f.* -LOCOMOTIVE, *a.* चल, चलन, जंगम, चलनशील, गतिविशिष्ट, चलनधर्मक, संचारिन्.

LOCUS, *s.* निधिः, निधानं.

LOCUST, *s.* शलभ(र)भः, शिरिः.

LOCUTION, *s.* वाक्यं, उक्ति *f.*, वचनं.

LODE, *s.* धातुरेखा.

LODH, *s.* लोध्रः, गालवः, शा(सा)वरः, तिरीटः, तिल्वः, मार्जनः.

LODGE, *v. i.* निवस् 1 P, वि-श्रम् 4 P, आ-धि 1U, अव-स्था 1 A, स्था 1 P, वृत् 1 A, लग् 1 P, अनुबंध्-संज् pass. -*v. t.* नि-धा 3 U, न्यस् 4 U, निविश् c., स्था c. (स्थापयति); *See* PLACE. 2 वस् c., आश्रयं दा 3 U, वासस्थानं दा; 'to l. a suit or complaint' राज्ञे निविद् c. -*s.* उपगृहं, उद्यानगृहं. 2 Lodging, q. v. -ING, *s.* वासगृह-स्थानं, वासः, नि-आ-वासः, वसति *f.*, नि-आ-लयः, आ-सं-श्रयः, निकेतनं; *See* HOUSE. -MENT, *s.* निवेशनं, स्थापनं. 2 अव-संस्थिति *f.* 3 निवेशः-शन, समावासः.

LOFT, *s.* अट्टः, चंद्रशाला, शिरोगृहं, उपरिकोष्ठः.

LOFTY, *a.* उन्नत, तुंग, उच्च, उन्नम, उच्छ्रित, पांशु, सोच्छ्राय. 2 उद्धत, मदोद्धत, दृप्त, अवलिप्त, साटोप, मदोद्धत, गर्वोद्धत; *See* HIGH. 3 प्रौढ, प्रगल्भ, धीर, गंभीर, गुरु, महत्. -LY, *adv.* उच्चैः, ऊर्ध्वं. 2 सगर्वं, साटोपं, सदर्पं, उद्धतं. -NESS, *s.* (lit.) उन्नति *f.*, उत्सेधः, उच्छ्रयः, तुंगता, उच्चत्वं, प्रांशुता. 2 औद्धत्यं, आटोपः, अवलेपः, दर्पः, गर्वः, अभिमानः. 3 प्रौढता, प्रागल्भ्यं, धीरता, गुरुत्वं, महत्त्वं, माहात्म्यं, उत्कर्षः, उन्नतत्वं, उन्नतिः.

LOG, *s.* काष्ठं, दारु-काष्ठ-खंडः-डं; स्थूल-बृहत्-काष्ठं. 2 गातपापः.

LOGARITHM, *s.* संवर्गमानं, घातप्रमापकः.

LOGGER-HEAD, *s.* स्थूल-जड बुद्धिः, मूढः, मूर्खः, जडः; 'to be at l. s' विवद् 1 A, कलि-कलहं-प्रारभ् 1 A. -ED, *a.* स्थूल-जड-धी बुद्धि.

LOGIC, *s.* तर्कः, न्यायः, आन्वीक्षिकी, न्याय-तर्क-शास्त्रं-विद्या, युक्तिवादः. -AL, *a.* तार्किक-नैयायिक-यौक्तिक-(की *f.*), तर्कशास्त्रविषयक. 2 तर्के न्याय-युक्ति-सिद्ध, तर्क-न्याय-संमत, न्यायानुसारिन्, तर्कानुरूप; 'a l. conclusion' निगमनं. -ALLY, *adv.* न्यायतः, यथान्यायं, तर्कानुसारेण, न्यायशास्त्रानुरूपं. -IAN. *s.* नैयायिकः, तार्किकः, तार्किन् *m.*, न्यायविद् *m.*, तर्क-न्याय-शास्त्रज्ञः.

LOGOMACHY, *s.* वाग्युद्धं, वाक्कलहः, विवादः. 2 शब्द-विवादः.

LOIN, *s.* श्रोणि-णी *f.*, कटि-टी *f.*, नितंबः, जघनं, श्किः-क्षु *f.* (hip & l. s); श्रोणिफलकं, कटी-श्रोणि-तटं; 'gird the l. s' परिकरं बंध् 9 P, कटिं बंध्; 'born from one's own l. s' अंगज, अंगजात.

LOITER, *v. i.* विलंब् 1 A, मंदायते (D.), कालं क्षिप् 6 P or ह 1 P; 'l. about' मंदं मंदं चल्-र् 1 P, इतस्ततः मंदं भ्रम् 1, 4 P, चिरं अव-स्था 1 A. -ER, *s.* कालक्षेपकः, अलसः, विलंबिन् *m.*, मंदगतिः, चिरक्रियः. -ING, *s.* विलंबनं, मंदगमनं, कालक्षेपः; *See* LINGER, -ER.

LOLL, *v. i.* आलस्येन अवलंब् 1 A or आधि 1 U or संविश् 6 P or शी 2 A. -*v. t.* लल् 10 (ललयति); 'l. the tongue' जिह्वां लल् or बहिष्कृ 8 U. -ING, *s.* ललनं.

LONE, LONELY, *a.* विविक्त, निर्जन, विजन, निर्मनुष्य, निभृत, न्यून-हीन-संचार, एकांत; निर्मानुष (षी *f.*). 2 अनाथ, असहाय, एकाकिन्, एक, केवल. 3 विविक्त-प्रिय, विविक्तसेविन्; 'a l. place' विविक्तं, निर्जनदेशः; 'in a l. place' विविक्ते, विजने, छन्नं, निःशलाकं, रहः, उपांशु. -LINESS, *s.* विविक्तं, निर्जनता, विजनता. 2 एकाकिता, असहायता. 3 विविक्तसेवा-रुचि *f.*-प्रीति *f.* -SOME, *a.* निर्जन, दारुण, निरानंद, घोर.

LONG, *v. i.* (for) (अत्यंतं) स्पृह् 10 (with dat.), इष् 6 P, अभिलष् 1, 4 P, वांछ् 1 P, ईह् 1 A, कांक्ष् 1 P, आशंस् 1 A; *See* WISH; लुभ् 4 P, गृध् 4 P; sometimes ex. by denom. in य or काम्य; 'l. s for a son' पुत्रीयति, पुत्रकाम्यति; पुत्रमीप्सति, &c. 2 दोहदवती भू 1 P, दोहदिनी भू. -*a.* दीर्घ, आयत, आयामवत्, लंब; दीर्घपरिमाण, दीर्घाकार; विस्तृत, विस्तीर्ण. 2 चिर in comp., दीर्घ-चिर-कालीन, दीर्घ-चिर-कालिक (की *f.*), चिरंतन (नी *f.*), चिरस्थायिन् स्थित, चिरकाल-दीर्घकाल-स्थायिन्. 3 दूर, वि-सु-दूर. 4 दीर्घसूत्र, चिरक्रिय, विलंबकारिन्. 5 परिमाण, मात्रा, मित, परिमित in comp.; 'three fingers l.' त्र्यंगुलमात्र-परिमाण, त्र्यंगुलमित, त्र्यंगुल; 'being a l. way off' दूरस्थ, दूरस्थायिन्; 'a l. period' दीर्घ-चिर-कालः; 'for a l. time' चिरं, दीर्घं, चिराय; *See* (*adv.*); 'the l. run' आयतिः *f.*; 'a l. vowel' दीर्घस्वरः. -*adv.* चिरं, चिरेण, चिराय, दीर्घ-चिर-कालं, दीर्घं, बहुकालं, चिरदिवसं. 2 दूरं, दूरपर्यंतं; 'l. absent' चिरप्रवासिन्, चिरगत; 'l. sick' दीर्घ-चिर-रोगिन्; 'living l.' चिरजीविन्, आयुष्मत्; 'l. since left' चिरत्यक्त, &c.; 'how l.' कियच्चिरं, कियंतं कालं, कियत्कालं यावत्; 'how l. after' कियच्चिरेण; 'not very l.' नातिचिरं; 'very l.' सुचिरं; 'l. ago' प्रागेव, पूर्वमेव, अतीतदीर्घकाले; 'not l. ago' नातिचिरात् प्राक्, अनतिपूर्वं; 'ere l.' अचिरेण, अचिरात्; 'as l. as'-'so l.' यावत्-तावत्; 'as l. as one lives' यावज्जीवं; आमरणात्; 'the whole year l.' आवर्षांतात्, वर्षपर्यंतं; 'l. after' बहोः कालात्, दीर्घकालानंतरं. In comp. words ex. by दीर्घ, चिर, लंब, दूर, आयत; 'l.-armed' दीर्घभुज, लंबहस्त; 'l.-bellied' लंबोदर; 'l.-continuing' चिरस्थायिन्; 'l.-eyed' आयताक्ष, आयतनेत्र; 'l.-headed, सूक्ष्म-निपुण-मति, विदग्ध, पटु; 'l.-lasting' चिरस्थायिन्, चिरकालिक; *See* (*a.*); 'l.-legged' दीर्घपाद, ऊर्ध्वजानु, ऊर्ध्वंघ्रि; 'l.-lived' चिर(रं)जीविन्, दीर्घायुस्, चिरायुस्, चिरायुष्य, जैवातृक, आयुष्मत्; 'l. pepper' कृष्णा, उपकुल्या, वैदेही, मागधी, चपला, कणा, उ(ऊ)षणा, पिप्पलिः-ली, शौंडी, कोला; करिपिप्पली, कपिवल्ली, कोलवल्ली, श्रेयसी, वशिरः; 'l. pepper root' ग्रंथिकं, पिप्पलीमूलं, चटकाशिरस् *n.*; 'l.-sighted' दूर-दीर्घ-दृष्टि; 'l.-suffering' सहिष्णु, सहनशील, क्षमिन्, बहुक्षम; (*s.*) क्षमा, सहिष्णुता, सहनशीलता. -ER, *a.* दीर्घतर; 'any l.' अतः परं-ऊर्ध्वं, इतः परं; 'why delay any l.' किमित्यधुना विलंब्यते. -ING, *a.* अत्यभिलाषिन्, अत्याकांक्षिन्; कुतूहलिन्, स्पृहयालु, उत्कंठित; उत्कट, लालस, अत्युत्सुक; 'a l. desire' उत्कटेच्छा; 'a l. woman' श्रद्धालुः, दोहदवती. -*s.* अत्यभिलाषः, अतिस्पृहा-वांछा, अत्याकांक्षा, उत्कंठा, लालसा, औत्सुक्यं, अतिलिप्सा; इच्छा, कामः, मनोरथः, स्पृहा, तृष्णा, आकांक्षा; 'the l. of a pregnant woman' दोहदः, गर्भदोहदः. -INGLY, *adv.* सस्पृहं, सतृष्णं, सोत्सुकं, सोत्कंठं. -LONGANIMITY, *s.* क्षमा, क्षांतिः *f.* -LONGEVAL, -LONGEVOUS, *a.* चिरंजीविन्; *See* LONG-LIVED. -LONGEVITY, *s.* दीर्घायुः, चिरायुः. -LONGIMETRY, *s.* दैर्घ्यमानं. -LENGTH, *s.* दैर्घ्यं, दीर्घता-त्वं, आयामः, द्राघिमन् *m.*, आरोहः, आयतिः *f.*, विस्तारः, आनाहः, विस्तृतिः *f.*, वितति *f.* 2 मात्रा, अवधिः, मर्यादा, पर्यंतः; 'my rudeness (impudence) was carried to the l. of taking up arms' आयुध-

परिग्रहे यावदत्याऋढो दुर्योगः (U. 6). **3** मान, प्र-परिमाणं. **4** चिर-दीर्घ-कालः, कालदैर्घ्यं; 'to such a l.' एतावत्पर्यंतं, यावत् (with acc.); 'for a l. of time' चिरं, चिरकालं; 'to a great l.' अतिमात्रं, अतिमर्यादं; 'at l.' सविस्तरं, विस्तरेण, सुविस्तरं-रेण, विस्तरशः, असंक्षेपतः; अंते, अंततः, शेषे, चिरकालात्, चिरस्य, अतीतदीर्घकाले; 'spread at l.' विस्तीर्णं; 'to lie at full l.' दंडवत् पत् 1 P. **-EN**, *v. t.* दीर्घीकृ 8 U, प्र-वि-तन् 8 U, विस्तृ c., प्र-वि-सृ c., आयम् 1 A, आयती-वितती-कृ. **-***v. i.* विस्तृ-वितन् pass., दीर्घीभू. **-WISE**, *adv.* अन्वायामं, अनुदैर्घ्यं, अनु in comp. **-Y**, *a.* विस्तीर्ण, दीर्घ, आयत, सविस्तर, असंक्षिप्त.

LONGITUDE, *s.* ध्रुवकः, द्राघिमन् *m.* **2** रेखांशः; (of heavenly objects) भोगः; 'circle of l.' रेखांशवृत्तं. **-LONGITUDINAL**, *a.* अनुदैर्घ्यं, अन्वायाम.

LOOBY, *s.* स्थूलजनः, ग्राम्यः, वृषलः, प्राकृतः.

LOOK (at), *v. i.* दृश् 1 P, अव-वि-आ-लोक् 1 A, 10, ईक्ष् 1 A, निरूप् 10, निर्वर्ण् 10, दृष्टिं दा 3 U or क्षिप् 6 P, लक्ष् 10; 'l. intently at' नयनैः-दृष्टिभिः-पा 1 P, निध्यै 1 P, (ता राघवं दृष्टिभिरापिबंत्य: &c. R. VII. 12). **2** भा 2 P, आ-प्रति°-,लक्ष्-दृश्-pass.; oft. by वदन, मुख, आनन in comp.; 'she l.s sad' विषण्णा लक्ष्यते or आभाति, &c.; 'that l.s like wantonness' तत्साहसाभासं (Mal. 2); 'l.ing dejected' विषण्णवदन, म्लानमुख, &c.; 'l. well' शुभ् 1 A; 'l. now' ननु, पश्य. **-about**, परितो वीक्ष्, अन-ईक्ष् 4 P. **-after**, अवेक्ष्, रक्ष् 1 P, पा c. (पालयति); *See* 'Take care' under CARE; योगक्षेमं वह् 1 U, (मुग्धाया मे जनन्या योगक्षेमं वहस्व M. 4). **2** अन्विष्; निरूप् 10, मृग् 10 A. **-down**, अवेक्ष्, अधो दृश्; 'l. down upon' अवमन् 4 A, उपेक्ष्; *See* CONTEMN. **-for**, आशंस् 1 A, अपेक्ष्, प्रति-ईक्ष् 6 P; *See* EXPECT. **2** अन्विष्, मृग्; *See* SEARCH. **-in**, आविर्भू 1 P, आत्मानं दृश् c., प्रकटीभू; 'l. in the face' संमुखी-अभिमुखी-भू (with gen.); *See* FACE. **-into**, अव-सं-निर्-पारे-ईक्ष्, अनुसं-धा 3 U, निरूप्; *See* EXAMINE; 'l. into the matter very closely' अतिनिपुणमवेक्ष्यतां सोऽर्थः. **-on**, प्रेक्ष्, मिष् 6 P; मिषतामाच्छिनत्ति नः (K. II. 46) 'snatches (the oblation), we helplessly l.-ing on'. **2** (Upon) मन् 4 A, गण् 10; *See* CONSIDER. **-out**, अव-धा 3 U, सावधान-*a.* भू 1 P. **-over**, संदृश्-ईक्ष्; निरूप्, निरीक्ष्. **-to**, सं-वि-ईक्ष्, अवधानं दा 3 U; ex. by 'Care' q. v. **2** आ-अव-लंब् 1 A, आधि 1 U. **-up**, ऊर्ध्वं दृश् or ईक्ष्. उदीक्ष्, उन्मुखीभू; 'l.ing up to heaven' नभोदत्तदृष्टि, गगनदृष्टि; 'l. up to' प्रतीक्ष्, उद्-दृश्; मन्, गण्, परिक्रप् c.; 'the people l. up to you as their saviour' आत्मनो रक्षकत्वेन त्वामेवामी जनाः प्रतीक्षंते, गणयंति or परिकल्पयंति. **-***s.* दृष्टि *f.*, दर्शनं, ईक्षणं, वीक्षणं, प्रेक्षणं, वीक्षितं, विलोकितं, आ-वि-अव-लोकनं, दृष्टिपातः, दृक्पातः. **2** रूपं, आकारः, आकृति *f.*, दर्शनं, आलोकः, चर्या, आभा, छाया, वदनाकारः, मुखच्छाया, मुखं, वदनं; 'a l. of displeasure' अकृपादृष्टिः; 'side-l.' कटाक्षः, अपांगदर्शनं; 'l.-out' अवेक्षा, समीक्षा, अवधानं; 'to be on the l.-out' अवेक्ष्, अव-धा 3 U, अवहित-*a* भू. **-ER**, *s.* द्रष्टृ *m.*, दर्शिन्, वीक्षकः. **2** (On) प्रेक्षकः, प्रेक्षमाणः. **-ING**, *a.* पश्यत, दर्शिन्; दृष्टि, नयन in comp.; 'l. in all directions' विश्वग्दृष्टि, सर्वतो दत्तदृष्टि; 'l. up' उन्मुख, ऊर्ध्वदृष्टिः; 'l. well' शुभ्रसु-दर्शन, सुदृश्य, शोभनाकार, प्रेक्षणीय, शुभानन. **-***s.* दर्शनं, विलोकनं, वीक्षणं, निर्वर्णनं, आलोकः, &c.; *See* (*s.*) above; 'l.-glass' आदर्शः, मुकुरः, दर्पणः.

LOOM, *s.* वेमन् *m.*, वेमः, वायं(प)दंडः, तंत्रवापः. **-***v. i.* अस्पष्टरूपेण दृश् pass., दूरे वृत् 1 A or स्था 1 P.

LOON, *s.* दुर्जनः, जाल्मः, कितवः, धूर्तः.

LOOP, *s.* शिक्का, काचः. **2** पाशः; पुटः-टं. **3** छिद्रं, रंध्रं; 'suspended in a l.' काचित, शिक्यित; 'l.-hole' छिद्रं, रंध्रं, गवाक्षः, जालं; निर्गमः, निर्गमद्वारं, अपक्रमः; मुक्ति *f.*, मोक्षः.

LOOSE, *a.* शिथिल, प्र-,ग्रथ, स्रस्त, विगलित, चलित, मुक्त. **2** अबद्ध, उद्ग्रथित, उन्मूत्र, बंधनरहित-शून्य, ढहाम, प्रमुक्त. **3** विरल, असंहत, अदृढसंधि. **4** अव्यवस्थित, अनियत, अनिर्णीत, संदिग्ध, असंक्षिप्त; अस्थिर. **5** असंबद्ध, निःसंग, निरन्वय. **6** उच्छृंखल, निर्मर्याद; अनवस्थ, दुर्वृत्त. व्यभिचारिन्, व्यसनिन्, दुराचार. **7** गर्ह्य, निंद्य, अश्लील; 'l. conduct' दुराचारः; व्यसनं, नीतिभ्रंशः; 'a l. man' लंपटः, व्यसनी; 'a l. woman' बंधकी, पुंश्चली, भ्रष्टा; 'let l.' मुच् 6 P; *See* (*v.*); 'break l.' बंधन भिद् or छिद् 7 P, बंधनात् भ्रंश् 1 A, 4 P. **-***v. t.*, **-EN**, *v. t.* शिथिलयति (D.), शिथिलीकृ 8 U, श्र(श्रं)थ्-ग्रथ् 1 P, 10 (ग्रथयति), स्रंस् c., ग्रथीकृ. **2** मुच् 6 P or c., वि-निर्-उत्°-; मोक्ष् 10. विसृज् 6 P or c., बंधनात् मुच्. **3** उद्-ग्रंथ् 9 P, उद्-अव-मुच्, वियुज् 7 A, 10, विश्लिष् c., विसं-धा 3 U. **-***v. i.*, **-EN**, *v. i.* शिथिलीभू 1 P, श्र(श्रं)थ् 1 A, स्रंस् 1 A, गल् 1 P, शिथिलायते (D.) **-***adv.*, **-LY**, *adv.* शिथिलं, ग्रथं. अदृढं. विरलं, असहनं, अनियतं; दुर्वृत्तवत्, निर्मर्यादं; 'l. hanging matted hair' ग्रथलंबिन्यः जटाः; 'hanging l.' स्रस्त. **-ING**, **-ENING**, *s.* शिथिलीकरणं, मोचनं, मोक्षणं, मुक्ति *f.*, ग्रंथनं. **-NESS**, *s.* शैथिल्यं, प्र-ग्रथः, ग्रंसः, ग्रथता, स्रस्तता, अदृढता, अनियतता, विरलता, व्यसनिता दुराचारः; अनवस्था) लांपट्यं, व्यभिचारः; *See* LAXITY.

LOP, *v. t.* छिद् 7 P, कृत् 6 P, लू 9 P; *See* CUT. 2 आ-अव-लंब् c. —*v. i.* आ-अव-लंब् 1 A. —PER, *s.* Cutter, q. v.

LOPSIDED, *a.* एकपार्श्वे पतयालु.

LOQUACIOUS, *a.* वावदूक, वाचाल-ट, मुखर; *See* GARRULOUS. —LY, *adv.* वाचालतया. —NESS, —LOQUACITY, *s.* वावदूकता, वाचालता, बहुभाषित्वं, जल्पकता, मौखर्यं.

LORD, *s.* ईशः, प्रभुः, ईश्वरः, स्वामिन् *m.*, अधिपः, पतिः, ईशितृ *m.*, अधिभूः, नायकः, नेता, भर्ता; नाथः; ईड्: in comp.; राजा, परिवृढः, इभ्यः, धनी, आढ्यः; 'to be l. of' प्र-भू 1 P, ईश् 2 A, (with gen.); *See* MASTER; 'supreme l.' सर्वेश्वरः, अधिराजः; नरेंद्रः, क्षितिपतिः, स्वर्गाधिपः, जगन्नाथः-नायकः, &c. 2 (Title of address) देवः, महाराजः, स्वामी, आर्यपुत्रः (by wives); भर्ता (by servants &c). 3 परमेश्वरः, भगवान्, प्रभुः, ईश्वरः. —*v. i.* (सदर्पं-सधर्षं) ईश् or शास् 2 P. —LIKE,—LY, *a.* राजोचित, प्रभुयोग्य; राजसदृश (शी *f.*), राजार्हः; ईश्वरीय, ऐश्वर (री *f.*). 2 ओजस्विन्, दीप्तिमत्, तेजस्विन्; *See* MAJESTIC. 3 धृष्ट, अवलिप्त, ऐश्वर्यमत्त, दृप्त, गर्वित, उत्सिक्त; *See* HAUGHTY. —*adv.* सधर्षं, सदर्पं, उद्धतं, ऐश्वर्यमदेन. —SHIP, *s.* देवः, &c.; *See* above; 'his l.' तत्रभवान्; महाराजः; 'your l.' अत्रभवान्, देवः, &c. 2 प्रभुत्वं, स्वामित्वं, ऐश्वर्यं, अधिकारः. 3 राज्यं, विषयः.

LORE, *s.* विद्या, ज्ञानं; *See* LEARNING.

LORICATE, *v. t.* कवचेन-पटलेन आस्तृ 5 U or आ-च्छद् 10. —*a.* सकवच, पटलयुक्त.

LORN, *a.* अनाथ, अशरण; *See* FORLORN.

LOSE, *v. t.* अप-हृ c., न्यज् 1 P, हा 3 P or c. (हापयति). 2 वियुज्-विहा-परिहा-pass., विनाकृ 8 U (with instr.); भ्रंश् 1 A, 4 P, परि-प्र-°, च्यु 1 A, प्र-वि-°, (with abl.); *See* DEPRIVED also; 'he lost his life' प्राणैर्वियुक्तः, विगतासुर्वभूव, प्राण-हीनः; प्राणैरहीयत; 'lost his realm' राज्याद्भ्रष्टः-च्युतः; 'l. s his friends' मित्रैर्वियुज्यते; 'he lost his wife' तत्पत्नी मृता, पत्न्या विरहितः. 3 (Destroy) नश् c., क्षि 1, 5 P or c., अप-चि 5 U, उच्छिद् 7 P, प्र-वि-ध्वंस् c. 4 (Not to find) ex. by नश् 4 P, प्रभ्रंश्; 'have you lost a camel' अपि युष्माकमुष्ट्रो नष्टः; 'the lost ring' नष्टमंगुलीयकं; 'l. the way' मार्गात्-पथः-भ्रंश् or च्यु or विचल् 1 P; 'he lost his way' प्रभ्रष्ट-नष्ट-पथः or उन्मार्गगामी अभूत्; 'lost his caste' जातिभ्रष्टः. 5 पराजि-पराभू-pass. (in battle &c.); 'l. one's wits' बुद्धिहीन-*a.* भू; 'to l. time' कालं व्यर्थं नी 1 P or विक्षिप् 6 P, कालं हृ 1 P or या c. (यापयति), कालहरणं-कालक्षेपं कृ 8 U, विलंब् 1 A; 'l. good name' चारित्र्यं-कीर्तिं कलंकयति or मालिनयति (D.) or दूष् c. (दूषयति); 'l. one's consciousness' मुह् 4 P, मुर्छ् 1 P, चेतनां-संज्ञां हा, नष्टचेतन-लुप्तसंज्ञ-*a.* भू; 'we don't l. any thing (in this way)' न नः किंचित् लिप्यते (S. B. 345), नास्माकं किमपि हीयते; 'to l. oneself in' आसक्त-निरत-*a.* भू; *See* ABSORB. —ER, *s.* प्राणापायः, अपाय-हानि-सहः, पराजितः, लब्धहानिः, प्राणनाशः-क्षयः. —LOST, *a.* नष्ट, भ्रष्ट, च्युत, गत, वीत, हीन, त्यक्त, हृत, हारित, क्षीण, लुप्त; 'who has l. his office' च्युत धिकारः, अधिकारभ्रष्टः; 'who has l. wealth' अर्थहीनः, गतविभवः, नष्टार्थः; 'who has l. his way' पथ-भ्रष्टः, उन्मार्गप्रवृत्तः, दिङ्मूढः; 'who has l. everything' हृतसर्वस्वः; 'who has l. one eye' अक्ष्णा अंधः, एकाक्षिविकलः; 'l. to shame' त्यक्त-निरस्त-लज्ज, व्रीडाहीन; 'l. to sense of freedom' स्वातंत्र्यरसानभिज्ञ; 'l. in meditation' ध्यानपर-परायण-निष्ठ-मग्न, चिंतासक्त; 'the bone fell and was l.' अस्थि निपतितं नयनविषयातीतं च; 'to be l.' नश्, अंतर् इ, तिरोधा pass., तिरोभू. 2 मोहित, मूढ, भ्रांत-चित्त-बुद्धि. —LOSS, *s* हानि *f.*, क्षयः, सं-उप-परि-क्षयः, वि-,नाशः, अपायः, अपचयः, लोपः, भ्रंशः, च्युति *f.*, व्ययः, ध्वंसः, प्र-वि-ध्वंसः, वियोगः, अपहारः, अत्ययः, त्यागः, अलाभः, क्षति *f.* 2 पराजयः, पराभवः, भंगः; 'compensating l.' क्षतिपूरणं; 'profit and l.' लाभालाभौ; 'l. of time' कालहरणं-क्षेपः, विलंबः; 'l. of caste' जातिभ्रंशः; 'l. of army' सैन्यनाशः, बलव्यसनं; 'to be at a l.' मुह् 4 P; 'being at a l. what to do or say' किंकर्तव्यता-किंवक्तव्यता-मूढ.

LOT, *s.* अंशः, वि-,भागः, उद्धारः. 2 भाग्यं, दैवं, भागधेयं, दैवगतिः *f.*, दशा, भवितव्यता; *See* FATE. 3 गुटिका; 'fall to the l. of' आपत् 1 P, उपनम् 1 P, उप-स्थ 1 U; आपतंति हि संसारपथमवर्तीर्णानामेते वृत्तांताः (Ka. 175); 'happiness will be your l' त्वं सुखभाग् भविष्यसि, तव सुखमुपनमेत्.

LOTH, *a.* *See* LOATH.

LOTION, *s.* धावनं, धावनौषधं.

LOTTERY, *s.* गुटिकपातः; गुटिकापातेन निर्णयः.

LOTUS, *s.* पद्मं, कमलं नलिनं अरविंदं, उत्पलं, कुवलयं, सरसिजं, अब्जं, अंभोजं, महोत्पलं, शतपत्रं, सहस्रपत्रं, कुशेशयं, पंकेरुहं, पंकजं, सरोरुहं, तामरसं, सारसं, सरसीरुहं, पुष्करं, अंभोरुहं, बिसप्रसूनं, राजीवं, अंबुजं; 'white l.' पुंडरीकं, सितांभोजं; 'red l.' कोकनदं, रक्तोत्पलं; 'blue l.' इंदीवरं, नीलोत्पलं. 2 (The plant) नलिनी, कमलिनी, पद्मिनी, मृणालिनी; कुमुदिनी; 'l. stalk' नाल-लः-ली-लां; 'l. fibre or film' मृणालः-ली-लं, बिस-शं; 'l. filament' किंजल्कः, केसर(स)रः-रं; 'l. root or bulb' कदाहटः,

शिफाकंदः, आलु(लु)कं ; 'l. seed' कमलाक्षः, पद्मबीजं; 'seed vessel of l.' बीजकोशः, वराटकः; 'new leaf of l.' संवर्तिका, नवदलं; 'an assemblage of l. es' षंडः, खंडः, पद्मखंडः.

LOUD, *a.* उच्च, तार, महत्, गुरु, उत्ताल; 'महास्वन, गुरुस्वर, महाध्वनिकर (री *f.*), महा-बद्ध-घोष, महाशब्द, घोषण; 'a l. noise' तारस्वरः, उच्चैर्घोषः, महाशब्दः-स्वनः, प्रणादः, तुमुलरवः. *-adv.*, -LY, *adv.* उच्चैः, तार-उच्च-स्वरेण, प्रोच्चैः, महाशब्देन, महास्वनेन; 'still l. er' उच्चैस्तरां. -NESS, *s.* उच्चता, महत्त्वं, उत्तालता, &c.

LOUNGE, *v. i.* उदास् 2 A, आलस्येन कालं क्षिप् 6 P or द 1 P, अलसीभू. -ER, *s.* अलसजनः, कालक्षेपकः, उदासीनः, कार्यपुटः. -ING, *a.* अलस, मंद; *See* LAZY; 'l. gait' मत्तेभगति *f.*-गमनं.

LOUSE, *s.* यूकः-का, केशकीटः; 'l.-egg' लिक्षा. -Y, *a.* बहुयूक, यूकापूर्ण, यूकोपदुत, सयूक.

LOUT, *s.* ग्राम्यजनः, वृषलः, ग्रामीणः, स्थूलजनः. -ISH, *a.* ग्राम्य, स्थूल, अशिष्ट, असभ्य; स्थूल-बुद्धि-मति.

LOUVER, *s.* धूमरंध्रं, धूमपथः-निर्गमः.

LOVAGE, *s.* अजमोदा, उग्रगंधा, ब्रह्मदर्भी, यवा (मा)निका.

LOVE, *s.* प्रेमन् *m. n.*, अभिलाषः, स्नेहः, रागः, वात्सल्यं, अनुरागः, प्रणयः, भावः, प्रीति *f.*, प्रेम-प्रीति-स्नेह-भावः (all with loc.); 'l. for God' ईश्वरभक्ति *f.* 2 (Amorous) कामः, अनंगरागः, शृंगारः, शृंगार-भावः, रति *f.*, रतिसुखं, मदनः. 3 (God of love) कामः, मदनः, स्मरः; *See* CUPID. 4 दया, अनुकंपा. 5 रुचि *f.*, अभिरुचिः, आसक्ति *f.*, व्यसनं, अभिनिवेशः, प्रीतिः. 6 (Darling) प्रियः-या, प्रियतमः-मा, दयितः-ता; 'to fall or be in l. with' स्निह् 4 P, अनुरंज् pass., भावं-अभिलाषं-बंध् 9 P or निविश् c., अनुरागवत्-बद्धभाव-मोहित-*a.* भू; 'l.-affected', 'l.-stricken', 'under the influence of l.' अनंगतप्त-पीडित, कामार्त, कामवश, कामातुर, अनंग-विधुर, मदनावस्थ, स्मराकुल, कामासक्त; 'to make l.' विवाहार्थं प्रार्थ् 10 A or आराध् c.; 'gestures of l.' शृंगारचेष्टा, हावः, विलासः, विभ्रमः, लीला, भावः; 'l.-knot' प्रेमग्रंथिः-बंधः; 'l.-letter' अनंग-मदन-लेखः, मन्मथलेखः; 'l.-match' प्रेम-विवाह-संबंधः; 'l.-quarrel' प्रणय-प्रेम-प्रीति-कलहः, प्रणयकोपः; 'l.-sick' कामार्त, कामातुर, कामपीडित, अनंगतप्त, विधुर, मदनविह्वल; 'l.-song' शृंगारगीतं; 'l.-tale' प्रेम-शृंगार-कथा; 'l.-token' प्रीतिलक्षणं, प्रेमाभिज्ञानं. *-v. t.* कम् 10 A (amorously); प्री-अनुरंज्-आसंज्-pass.; gen. ex. by स्निह् (with loc.); बंध्, निविश् c. with (*s.*); 'the king l. s Ságarikâ' नृपः सागरिकायां बद्धानुरागः, आसक्तचित्तः, कृतप्रणयः, &c. 2 रुच् 1 A, आनंद् 1 P, मुद् 1 A, तुष् 4 P (with instr.); ex. by प्रिय-*a.*; *See* FOND, LIKE; 'I l. music' संगीत-प्रियोस्मि; 'l. knowledge' विद्यासक्तचित्तो भव. -ABLE, *a.* स्नेहार्ह, प्रिय. -ED, *a.* प्रिय, दयित, कांत, इष्ट, अभीप्सित, स्निग्ध, हृद्य, मनीषित. -ER, *s.* (Amorous) कामुकः, कामिन् *m.*, कांतः, प्रियः, दयितः, वल्लभः, रमणः, नायकः, इष्टः, प्राणेशः, जीवितेशः. 2 प्रणयिन् *m.*, अनुरागी, निरतः, सेवी-प्रियः-*in comp.*; 'l. of knowledge' प्रियज्ञानः, ज्ञाननिरतः, ज्ञानेप्सुः; 'a l. of learned men' आगमवृद्धसेवी (R. VI. 41). -ING, *a.* प्रणयिन्, अनुरागवत्, सस्नेह, प्रणयवत्, प्रीतिमत्, वत्सल, अनुरक्त, अनुरागिन्, आसक्त, प्रिय, नि-,रत, सेविन् *in comp*; 'l. gambling' द्यूतासक्त, द्यूतसेविन्; 'a l. husband' अनुरागवान् पतिः; 'l. kindness' कृपा, दया, कारुण्यं, वात्सल्यं, प्रसादः, अनुग्रहः, स्नेहः, अनुकंपा. -INGLY, *adv.* सप्रणयं, सस्नेहं, सानुरागं, स्नेहेन, वात्सल्यात्, प्रीतिपूर्वं. -LOVELY, *a.* कांत, सुंदर (री *f.*), रुचिर, शोभन, सुभग, मनोज्ञ, मंजु, मंजुल, चारु, मनोरम, मनोहर, ललित, वाम, मुग्ध, कमनीय, अभिराम; *See* BEAUTIFUL. -LINESS, *s.* कांतिः *f.*, सौंदर्यं, शोभा, श्रीः, लावण्यं, सुभगता, चारुता; *See* BEAUTY.

LOW, *a.* (Of place) नीच, निम्न, नत, नीचस्थ, अधःस्थ, अधस्तन (नी *f.*), अवाच्. 2 ह्रस्व, नीच, अल्पाकार, खर्व; अनुच्च, अतुंग. 3 नीच, अप-नि-कृष्ट, अधम, हीन, जघन्य, अवर, खल, क्षुद्र, अनार्य, याप्य, गर्ह्य, अश्लील, निंद्य, (language); *See* MEAN; 'a l. man' अपसदः, नीचः, पृथग्जनः, जाल्मः, दुर्वृत्तः. 4 (Voice) नीच, मंद्र, मंद, धीर, ग(गं)भीर. 5 (Price) स्वल्प, अल्प, मित, परिमित, अल्पमूल्य. 6 (L.-spirited) अवसन्न, खिन्न, उद्विग्न, म्लान, विषण्ण, विमनस्, दीन-उद्विग्न-मनस्-चेतस्; *See* DEJECTED. 7 नम्र, विनीत, अनुद्धत, निरभिमान; *See* HUMBLE. 8 निःसत्व, रूक्ष, असार, अपौष्टिक (की *f.*) (as food); 'of l. rank', 'l.-born' नीच, हीनजाति, अंत्यजातीय, नीचकुलज, हीनकुल, दुष्कुलीन, अधमजन्मन्, नीचवंश-प्रसूत, हीनवर्ण. *-adv.* नीचैः, अनुच्चं, नीच in comp.; 'going l.' नीचग; 'l. bending grass' नीचैः प्रणतानि तृणानि. 2 मंदं, मृदु, सौम्यं. 3 अधस्, अधोभागे, अधस्तात्. *-v. i.* रेभ् 1 A, नद् 1 P, नर्द् 1 P, गर्ज् 1 P, हंभारवं कृ 8 U. -ING, *s.* रेभणं, रेभितं, हंभा, हंभारवः. *-a.* हंभारवकारिन्, रेभमाण. -NESS, *s.* नीचता, निम्नता, अधमता, अपकर्षः, हीनता, जघन्यता, गर्ह्यता, मंद्रता, गांभीर्यं, विषादः, अवसादः, उद्वेगः, दैन्यं, दौर्मनस्यं, म्लान्-म्लानि *f.*, &c. —LOWER, *a.* अधर, अधरस्थ, अधस्तन, नीचस्थ, अधःस्थ, अवाच्, अधः in comp.; 'l. world' अधोलोकः; 'l. garment' अधोंशुकं; 'l. region' अधःप्रदेशः; 'the l. classes' हीन-अधम-जातीयाः,

अवरवर्णः, अंत्यजातीयाः. —*v. t.* न्यूनीकृ 8 U, ऊन् 10, ह्रस् c., अल्पीकृ, लघूकृ, लघयति (D.), अपचि 5 U. 2 अपकृष् 1 P, अव-नम् c. (नमयति), भ्रंश् c., गौरवं-मानं-भंज् 7 P or ह 1 P; *See* HUMBLE. 3 अवनू c., अधः कृ, अधः-नि-पत् c. —*v. i.* न्यूनीभू 1 P, अल्पीभू, अपचि-क्षि- pass., ह्रस् 1 P. 2 नम्रीभू. 3 मलिनीभू, कलुषीभू, तमोवृत-मेघाच्छन्न-*a.* भू. 4 भ्रूभंगं कृ, भ्रूवौ संकुच् 1 P. —*s.* दुर्दिनं, मेघतिमिरं, तिमिरावृतत्वं, साभ्रता. 2 कालुष्यं, मुखमालिन्यं. —ING, *a.* तमोवृत, मेघाच्छन्न, साभ्र. दुर्दिनग्रस्त. 2 मलिन, कलुष. —LOWLY, *a.* नम्र, विनत, सविनय, निरभिमान, अनहंकार, अनुद्धत, अगर्व, नम्रवृत्ति, दर्पहीन; *See* HUMBLE. —*adv.*, —LY, *adv.* सविनयं, विनयेन, नम्रतया, अनुद्धतं. —NESS, *s.* विनयः, नम्रता, अनहंकारः, अगर्वः, अनभिमानः, नम्रवृत्ति *f.* —LOWLAND, *s.* निम्नदेशः-भूमि *f.*, नीचप्रदेशः, उपत्यका. —ER, *s.* निम्नदेशीयः.

LOYAL, *a.* भक्त, अनुरक्त, दृढभक्ति, भक्तियुक्त-मत्, सानुराग, आसक्त; 'l. to the king' नृपानुरक्त, प्रभुभक्तिनिष्ठ, राजाज्ञानुवर्तिन्, नृपासक्त; 'a l. wife' सती, साध्वी, पतिव्रता, एकपत्नी, सुचरित्रा; 'l. husband' स्वदारानिरतः, भार्यानुरक्तः. —LY, *adv.* भक्तिपूर्वं, सानुरागं, दृढभक्तिपूर्वं, राजनिष्ठापूर्वं. —TY, *s.* भक्ति *f.*, अनुरागः, आसक्ति *f.*, प्रभु-स्वामि-भक्तिः, राजभक्तिः-अनुरागः, दृढभक्तिः, राजनिष्ठा; (in a wife) पातिव्रत्यं, सतीत्वं, &c.

LUBBER, *s.* ग्राम्यः, स्थूलजनः, स्थूलधीः-बुद्धिः. —LY, *a.* स्थूल, अदक्ष. 2 स्थलीय.

LUBRIC, LUBRICIOUS, *a.* स्निग्ध, चिक्कण, श्लक्ष्ण, मेदुर. —LUBRICATE, *v. t.* अभ्यंज् 7 P, स्निग्धीकृ 8 U, स्नेहेन अंज्. —ED, *a.* अभ्यक्त, स्नेहाक्त. —ION, *s.* अभ्यंजनं, स्निग्धीकरणं. —LUBRICITY, *s.* स्निग्धता, चिक्कणता.

LUCID, *a.* दीप्तिमत्, शोभन, सुप्रभ, तेजस्विन्, उज्ज्वल, देदीप्यमान; *See* BRIGHT. 2 विशद, स्वच्छ, निर्मल, अ-वि-मल, प्रसन्न, शुद्ध. 3 व्यक्त, सुस्पष्ट, भिन्नार्थ, स्पष्टार्थ. 4 प्रसन्नचित्त; 'l. interval' चित्तप्रसादः. —LY, *adv.* स्पष्टं, सुव्यक्तं, भिन्नार्थं, स्फुटं, विशदं. —NESS, *s.* दीप्ति *f.*, कांति *f.*, शोभा, प्रभा, द्युति *f.* 2 स्पष्टता, वैशद्यं, प्रसादः, वैमल्यं.

LUCIFER, *s.* शुक्रः, भार्गवः; 'l. match' अग्निशलाका.

LUCIFEROUS, *a.* प्रकाशद, दीप्तिकर (री *f.*).

LUCIFORM, *a.* तेजोमय (यी *f.*), प्रकाशविशिष्ट.

LUCK, *s.* दैवं, भाग्यं, भागधेयं, विधिः, नियति *f.*, भवितव्यता, दैवयोगः; *See* FATE; 'good l.' सौभाग्यं, पुण्योदयः, भाग्योपचयः; 'bad or ill l.' दैवदुर्विपाकः-विपर्यासः-विपर्ययः, मंदभाग्यं, दौर्भाग्यं, दुर्दैवं, दुर्गतिः *f.*, अशुभं, अमंगलं. —LESS, *a.* दैवोपहत, मंदभाग्य, अधन्य, दुर्भाग्य, अभाग्य, भाग्य-दैव-हीन, दुर्दैवग्रस्त, हीनभाग्य. —LESSLY, *adv.* दुर्दैवात्, दुर्भाग्यात्. —LUCKY, *a.* भाग्यवत्, धन्य, सौभाग्यवत, पुण्यवत्, भाग्य-दैव-शालिन्. 2 शुभ, कल्याण (णी *f.*), भद्र, मंगल, शिव. —ILY, *adv.* दैवात्, दैवयोगात्, दिष्ट्या, दैव-भाग्ये-वशात्, सौभाग्येन. —INESS, *s.* सौभाग्यं, धन्यता, पुण्यवत्ता, &c.

LUCRE, *s.* लाभः, आयः, आगमः, फलं, वृद्धि *f.*, अर्थः, फलोदयः, अर्थप्राप्ति *f.* —LUCRATIVE, *a.* लाभद, लाभकर (री *f.*), अर्थद, फलावह. —LY, *adv.* लाभपूर्वं, सफलं.

LUCUBRATE, *v. i.* रात्रौ अधि-इ 2 A or अभ्यस् 4 U. —ION, *s.* रात्र्यध्ययनं, निशाभ्यासः.

LUCULENT, *a.* See LUCID.

LUDICROUS, *a.* हास्य, हासकर (री *f.*), उप-अवहास्य, असंगत. —LY, *adv.* असंगतं, हास्यरूपेण.

LUG, *v. t.* बलेन आकृष् 1 P or ह 1 P.

LUGGAGE, *s.* परिच्छदः, उपस्करः, यात्रासामग्री, वस्त्रपात्रसंभारः.

LUGUBRIOUS, *a.* शोकात्मक, दुःखात्मक, कारुणिक (की *f.*), दुःखावेदिन्.

LUKEWARM, *a.* कोष्ण, कवोष्ण, मंदोष्ण, कदुष्ण, ईषदुष्ण, ईषत्तप्त. 2 उत्साहहीन, उदासीन, मंदोत्साह, निरुत्सुक, अतीक्ष्ण, मंदोद्योग, निरुत्साह. —LY, *adv.* ईषत्तापन, कवोष्णं. 2 निरुत्साहं. —NESS, *s.* कवोष्णता, ईषत्तापः. 2 निरुत्सुकता, मंदोत्साहः, औदासीन्यं, मंदोद्योगः, अनौत्सुक्यं.

LULL, *v. i.* शम् 4 P, प्र-उप°, निवृत् 1 A, विरम् 1 P, निवा 2 P, विगम् 1 P. —*v. t.* शम् c (शमयति), सांत्व् 10; निवृत् c. 2 प्र-सद् c, लल् 10; 'l. to sleep' (गीतादिना) स्वप् c. —*s.* शांति *f.*, अक्षोभः. प्र-उप-शमः, निर्वातः, वायुनिवृत्तिः *f.*-विरामः-विच्छेदः. —ER, *s.* शमकः, शांतिदः. —LULLABY, *s.* स्वापगीतं.

LUMBAGO, *s.* कटिवेदना.

PROPORTION, s. प्रमाणं, परिमाणं; आनुगुण्यं, आनुरूप्यं, परस्पर-अन्योन्य-संबंधः-अन्वयः-अनुषंगः-सादृश्यं-समता; अन्वयः, संबंधः; संधानं, संयोगः, संमिति f. (of limbs &c.). 2 अंशः, विभागः; See PART. 3 अनुपातः, संबंधसाम्यं; 'in p. to' ex. by अनुगुण, अनुरूप, सदृश, प्रमाणतः, अनुसारेण, यथा in comp.; 'in p. to one's strength' यथाशक्ति, शक्त्यनुसारेण, शक्तितः; 'spend in p. to your gains' आयप्रमाणेन व्ययं कुरु; 'p. of limbs' अंगसंयोगः, अवयवसंगतिः. -v. t., -ATE, v. t. अनुरूपीं-सदृशीं-कृ 8 U, समीक्ष्, संमा 3 A, 2 P. -AL, a. समप्रमाण, परस्परानुगुण. -ATE,-ABLE,-ED, a. अनुरूप, अनुगुण, सदृश. संमित, सम, तुल्य, अनुसारिन्; 'with jars p. to their size (strength)' स्वप्रमाणानुरूपैर्घटैः (S. 1); 'her body beautiful, being p.' चतुरश्रोभि तस्या वपुः (K. I. 32). -ATELY, -ABLY, adv. अनुरूपं-पेण, अनुगुणं, अनुसारेण, सदृशं, यथाप्रमाणं, यथाभागशः.

PROPOSE, v. t. प्र-स्तु 2 U, उप-यम् 4 U, उपक्षिप् 6 P, प्रति-ज्ञा 9 A, सूच् 10, कर्तव्यं निर्दिश् 6 P or अभि-धा 3 U. 2 उद्दिश्, आकांक्ष 6 P; See INTEND. -AL, s. प्रस्तावः, उपन्यासः, उपक्षेपः, अभिधानं, प्रतिज्ञा, वचनं, कर्तव्यनिर्देशः. -ITION, s. Proposal, q. v. 2 प्रतिज्ञा, सिद्धांतः, प्रमेयं.

PROPOUND, v. t. प्रति-पद् c.. उपन्यस् 4 U, उपक्षिप् 6 P, निर्दिश् 6 P, प्रति-ज्ञा 9 A.

PROPRIETOR, s. स्वामी, प्रभुः, ईशः, पतिः, अधिकारी; See OWNER. -SHIP, s. स्वाम्यं, प्रभुत्वं, स्वामित्वं, अधिकारः. -PROPRIETARY, a. स्वाम्यधीन, प्रभुनिष्ठ, स्वामिगत; 'p. right' स्वाम्यं, अधिकारः, स्वत्वं.

PROROGUE, v. t. व्यक्षिप् 6 P, (नियतकालं यावत्) विसृज् 6 P or न्यस् 1 P. -PROROGATION, s. कार्यत्यागः-निवृत्ति f., व्याक्षेपः.

PROSCRIBE, v. t. घोषणापूर्वं दंडं आदिश् 6 P or बहिष्कृ 8 U or निर्वस् c.; 'here is Jivasiddhi being disgraced and p. ed from the city' एष जीवसिद्धिः सनिकारं नगरान्निर्वास्यते (Mu. 1). 2 निषिध् 1 P, निवृ c. -PROSCRIPTION, s. सघोषण दंडाज्ञा.

PROSE, s. गद्यं. -a. गद्यात्मक, गद्यरूप, गद्य in comp. -PROSAIC, a. गद्यरूप, गद्यात्मक, गद्य in comp. 2 नीरस, विरस, रस-सत्त्व-हीन.

PROSECUTE, v. t. (नित्यं-अनवरतं) प्रवृत् c., अनुसृ 1 P, अनु-ष्ठा 1 P, अनु-सेव् 1 A, निर्वह् c., अनुशील् 10; 'p. studies' अध्ययनक्रममनुसृ; 'p. one's efforts' अनवरतं उद्यम् 1 A, or प्रयत् 1 A; 'p. one's undertaking' प्रारब्धं उद्वह् 1 P, प्रतिपन्नं निर्वह् c. 2 अभियुज् 7 A, 10, अभिशंस् 1 P; सूच् 10, निविद् c. -ION, s. अनुशीलनं, प्रवर्तनं, नित्यानुष्ठानं, नित्यप्रवृत्ति f., निर्वाहणं, अविरतानुसरणं. 2 अभियोगः, निवेदनं; 'p. of effort' नित्योद्योगः; 'p. of study' नित्याध्ययनं, अध्ययनक्रमः. -OR, s. निर्वाहकः. 2 अभियोक्तृ m., वादी, अर्थी, अभिशंसकः.

PROSELYTE, s. परधर्माश्रयिन्, स्वधर्मत्यागिन्, पक्षांतर-मतांतर-ग्राहिन्; See CONVERT. -IZE, v. i. स्वधर्मं ग्रह c. -ISM, s. मतांतरग्रहणं, धर्मांतरस्वीकारः.

PROSODY, s. छंदस् n., छंदःशास्त्रं. -AL,-ICAL, a. छांदस (सी f.), छंदः in comp. -IAN, s. छंदःशास्त्रज्ञः.

PROSPECT, s. आलोकः, दर्शनं, चक्षुर्विषयः, दृग्गोचरप्रदेशः-विषयः. 2 आयति f., उत्तरापेक्षा; 'he has good p. s before him' शुभा तस्यायतिः. 3 आशा, प्रत्याशा, आशंसा, अपेक्षा. -IVE, a. उत्तर, उत्तरकालीन, भाविकालप्राप्य, उत्तरकालसापेक्ष; See FUTURE. -IVELY, adv. उत्तरकालापेक्षया.

PROSPER, v. i. सं-,ऋध् 4, 5 P, प्र-वि-वृध् 1 A, स्फाय् 1 A, एध् 1 A, प्र-उप-चि pass., समृद्धि-वृद्धि या 2 P or उप-इ 2 P; 'I hope your (commercial) business is p. ing' अपि प्रचीयंते संव्यवहाराणां लाभा वः (Mu. 1). 2 सिध् 4 P, सं-पद् 4 A, सफलीभू 1 P, कृतार्थीभू. -v. t. वृध् c., प्र-उप-चि 5 U, एध् c., उपकृ 8 U. अनुग्रह् 9 P, सफलीकृ, साध् c., सिद्धिं नी 1 P. -ITY, s. सं-,ऋद्धि f., संपद् f., संपत्ति f., अभ्युदयः, श्रीः, लक्ष्मीः, वि-,भूति f., सौभाग्यं, वैभवं, पुण्योदयः, ऐश्वर्यं; 'time of p.' संपत-समृद्धि-उदय-कालः-समयः. 2 समृद्धिः, उत्कर्षः, उन्नति f., उदयः, प्र-उप-चयः, वि-सं-वृद्धि f., साफल्यं, कृतार्थता, सिद्धि f. 3 क्षेमः-मं, कौशल्यं, कल्याणं, शुभं, शिवं, हितं, भद्रं. -OUS, a. समृद्ध, श्रीमत, समृद्धिमत, लक्ष्मीवत, सश्रीक, ऐश्वर्यशालिन्; (state &c.) वर्धिष्णु, प्र-उप-चयिमान, एधमान, वर्धमान; 'in p. days' संपत्सु, अभ्युदयकाले. मूर्तिसमये, समृद्धिकाले. 2 सफल, सिद्ध, कृतार्थ, सिद्धार्थ; (happy) सुस्थ, निरापद, क्षेम, कुशल, कल्याण (णी f.), शिव, भद्र, मंगल, शुभ, सौभाग्यवत, धन्य. -OUSLY, adv. समृद्ध्या, अभ्युदयेन, सुसंपदा, सौभाग्येन, शुभं, भद्रं.

PROSTITUTE, s. वेश्या, वेशवधूः, गणिका, वार-पण्य-स्त्री-अंगना-योषित्, भोग्या, सामान्यस्त्री, रूपाजीवा (false to her husband) पुंश्चली, बंधकी, असती कुलटा, स्वैरिणी, पांसु(शु)ला, धर्षिणी, इत्वरी. -v. t नियतकर्मार्थं प्र-उप-विनि-युज् 7 A, 10 or व्याप् c -ION, s. वेश्याजीवः, वेश्या-गणिका-वृत्ति f., वारसेवा बंधकीत्वं, पौंश्चल्यं, &c.

PROSTRATE, *a.* प्रणत, भूमिगत, साष्टांगप्रणत-पतित; 'lie or fall p.' *See* (*v.*); 'p. on the bed' शयनगत, शयने अवमूर्धशय; 'lying p. at the feet' चरण-पाद-पतित-प्रणत. **2** अवसन्न, क्षीण. —*v. t.* (Oneself) दंडप्रणामेन-साष्टांगपातं-नम् 1 P or प्रणिपत् 1 P, दंडवत् पत्; नीचैः प्रणम् or प्रणिपत्. **2** नि-अव-पत् c.; भूमिं गम् c. (गमयति). **3** (Strength) अवसद् c.; ध्वंस c., प्र-वि-नश् c., ह 1 P; क्षि 1, 5 P. —ED, *a.* प्रणिपतित, भूमिगत, निपतित, &c. **2** क्षीणबल-शक्ति, हत-नष्ट-शक्ति-ओजस. —ION, *s.* दंडप्रणामः अष्टांगप्रणामः-प्रणिपातः, साष्टांगप्रणामः-वंदनं; प्रणिपातः, प्रणामः. **2** (Of spirits) अवसादः, ग्लानि *f.*, विषण्णता, उद्वेगः; 'p. of strength' शक्तिपातः-क्षयः, सत्त्वहानि *f.*

PROTECT, *v. t.* रक्ष 1 P, अव 1 P परि-त्रै 1 A, गुप् 1 P, पा 2 P, पा c. (पालयति), परि-प्रति-; तृ c. **2** संवृध् c., परि-, पुष् c. —ION, *s.* गोपनं, गुप्ति *f.*, पालनं, त्राणं, रक्षा, रक्षणं, अभ्युपपत्ति *f.*, संवर्धनं, परिपोषणं. **2** शरणं, आ-संश्रयः, आ-अव-लंबः, आधारः; 'go for p.' आप्रि 1 U, आलंब 1 A, शरणं गम् 1 P or प्रपद् 4 A; 'paper granting p.' अभयपत्रं. —OR, *s.* रक्षकः, गोप्तृ *m.*, पालयिता, रक्षिता, रक्षिन्, पालकः, त्राता, शरणं, शरण्यः, आश्रयः, पः-पालः: in comp. —PROTEGE, *s.* आश्रितः, पालितः, उपजीविन् *m.*, पोष्यः, शरणं गतः.

PROTEND, *v. t.* विस्तृ c., प्रस् c.; *See* EXTEND.

PROTEST, *v. i.* दृढं-दृढोक्तिपूर्वं-वद् 1 P or आ-ख्या 2 P; 'p. against' दृढं विरुद्धं वद, दृढोक्तिपूर्वं निषाति-षिध् 1 P, दृढं असंमतिं प्रकाश c. or ज्ञा c.; 'I strongly p. against this order' अयमादेशोऽन्याय्य इति सनिश्चयं वदामि; 'p. in writing' असंमतिलेख-विप्रतिपत्तिपत्रं-प्रकाश c. —*s.* दृढनिषेधवाक्यं, अस्वीकार-असंमति-वादः, विरुद्धवादः, अस्वीकारप्रकाशनं; 'written p.' असंमतिपत्रं. —ANT, *s.* रोमीयमतविरुद्धः. —ATION, *s.* दृढवचनं-उक्तिः-वादः, विरुद्धवचनं, निषेधोक्तिः.

PROTEUS, *s.* कामरूपः.

PROTOTYPE, *s.* आदर्शः, मूर्तः, मूलप्रतिमा.

PROTRACT, *v. t.* विलंब c., व्याक्षिप् 6 P; *See* DELAY. **2** प्र-,तन् 8 U; प्रस् c., दीर्घीकृ 8 U. —ED, *a.* सुदीर्घ, विलंबित, चिरस्थित, चिर in comp.; 'p. note' तानः; 'p. sound' प्लुतः. —ION, *s.* विलंबः, व्याक्षेपः.

PROTRUDE, *v. i.* प्र-निः-सृ 1 P, निर्गम् 1 P, उद्भिद् pass., प्रलंब 1 A, बहिर्वृत् 1 A or स्था 1 P. —*v. t.* Causal of roots above. —ING, *a.* बहिर्लंब, बहिःस्थ. —PROTRUSION, *s.* निःसरणं, उद्भेदः, प्रलंबनं. —PROTUBERANCE, *s.* वि-,स्फोटः, गंडः, शोथः, शोफः, श्वयथुः, (on the skin). **2** प्रलंबनं, उत्सेधः, उन्नतता, आभोगः, उन्नति *f.* —PROTUBERANT, *a.* उन्नत, उन्नुंग, उच्छ्रित, उच्छ्रून, प्रलंब; 'having p. breasts' तुंग-उन्नत-स्तनी, घट-कुंभ-स्तनी; oft. ex. by उत्सेधः; पयोधरोत्सेधावच्छिन्नसंहतिं (K. v. 8) 'the continuity being broken by her p. breasts.' —PROTUBERATE, *v. i.* प्रलंब् 1 A; *See* PROJECT,-ING &c.

PROUD, *a. See* under PRIDE.

PROVE, *v. t.* उप-प्रति-पद् c., साध् c, वि-भू c., प्र-मा 3 A, 2 P, प्रमाणीकृ 8 U, सत्यीकृ, स्था c. (स्थापयति). **2** प्र-,दृश् c., सूच 10, निर्दिश 6 P, प्रकाश् c., व्यंज् 7 P or c.; 'he was p. ed guilty' अपराधी स्थापितः; 'good men p. their usefulness by deeds, not by words' सुजने हि फलेन साधवो न तु कंठेन निजोपयोगितां (N. II. 48), कर्मणा न तु वाङ्मात्रेण दर्शयंति. **3** परीक्ष 1 A, निरूप 10, निर्णी 1 P, निश्चि 5 U, प्रति-इ c.; *See* TEST. —*v. i.* सं-उत-पद् 4 A, वृत् 1 A, सं-,भू 1 P; निर्णी-निश्चि-प्रती-pass.; 'the tilled ground p. ed a treasure indeed' कृष्टा भूमिरेव कोषस्थाने बभूव, कोषत्वमापद्यत. —ER, *s.* साधकः, विभावकः. —PROOF, *s.* साधनं, प्रमाणं, उपपत्ति *f.*, उप-प्रतिपादनं; 'written p.' लेखप्रमाणं, साधनपत्रं; 'burden of p.' साधनधर्मः, क्रियानिर्णेयः; 'the burden of p. lies on both parties' द्वयोरपि वादिनोः क्रिया प्राप्नोति (V. M. 6). **2** लक्षणं, चिह्नं. **3** परीक्षा-क्षणं, निर्णयः, निश्चयः; 'to put to the p.' परीक्ष्. **4** स्थूल-प्रथम-मुद्रणं. **5** अभेद्यता, अहार्यता, अविकार्यता: 'p. against advice' उपदेशाहार्यः; 'water-p.' जलनभेद्य. —LESS, *a.* निष्प्रमाण, साधनहीन.

PROVENDER, *s.* पाथेयं; खाद्यं, पशुभोज्यं, शुष्कतृणादि *n.*

PROVERB, *s.* जनप्रवादः, लोकवादः, आभाणकः, जनोक्ति *f.*, न्यायः, वचनं, उक्तिः. —IAL, *a.* लौकिक (का *f.*), लोकप्रसिद्ध-प्रचलित, लोक-जन in comp., न्यायरूप. —IALLY, *adv.* लोके, जनरूढ्या.

PROVIDE, *v. t.* (पूर्वं) सं-,यज् 7 U, 10, संभृ 3 U, प्र-उप-कृप c., सनाथीकृ 8 U, द्रव्यसामग्रीं उपपद् c. or वि-धा 3 U or कृ; *See* PREPARE. **2** (पूर्वं) नियम् 1 P, प्रति-ज्ञा 9 A, परिपण् 1 A, संकेतं-समयं-कृ; निर्दिश् 6 P; *See* ENJOIN, ORDAIN; (for, against) gen. ex. by अर्थे-अर्थं in comp.; 'should p. wealth against times of want' आपदर्थं धनं रक्षेत्; 'who p.s for the future' अनागतविधाता; 'p. against' निवारणाय सज्जीभू, प्रतिकारोपायं कृप् c. —ED, *a.* (पूर्वं) संभृत, परिकल्पित; युक्त, उपेत, सहित, अन्वित, सनाथ, सनाथीकृत; 'he is duly p. for' तस्य समुचिताः संविधाः कृताः; उपकरणसामग्रीयुक्तः, अन्नवस्त्रादियुक्तः.

2 पूर्वं निर्दिष्ट, परिपणित, पूर्वं संकेतितः; ' p. that ' यदि, चेत्, एतेन समयेन. -ENCE, *s.* विधिः, परमेश्वरः; *See* GOD. 2 सुविमर्शः, दूरदर्शित्वं, पर्यवेक्षणं, पूर्वविवेकः-विचारः, सुसमीक्षा, दूर-दीर्घ-दृष्टि *f.* -ENT, *a.* दूरदर्शिन्, विमृश्यकारिन्, विवेकिन्, दूर-दीर्घ-दृष्टि. -ENTIAL, *a.* ईश्वर-विधातृ-कृत-प्रयुक्त-घटित. -ENTIALLY, *adv.* विधिवशात्, ईश्वरेच्छया, दैवात्, दिष्ट्या. -ENTLY, *adv.* सविवेकं, सुसमीक्ष्य, सुविमृश्य, दूरदृष्ट्या. —PROVISION, *s.* परिकल्पनं, विधानं, उपपादनं. 2 पूर्वोपायः, पूर्वकल्पना, संविधा-धानं. 3 समयः, संकेतः, प्रतिज्ञा, पणः, नियमः, अभिसंधिः. 4 (P. s) सामग्री, संभारः, संचयः, संग्रहः, साहित्यं, संविधा, उपस्करः, उपकरणजातं; (for journey) पाथेयं, भोज्यं, भक्ष्यं, भक्ष्यादिसामग्री, गमनसंविधाः (for army) बीवधः. -*v. t.* Provide, q. v. -AL, -ARY, *a.* सामयिक (की *f.*), अल्पकालस्थायिन्, आपात in comp., आपाततः नियुक्त. -ALLY, *adv.* आपाततः, समयानुरूपेण, स्तोककालं. -PROVISORY, *a.* सप्रतिज्ञ, सामयिक. -PROVISO, *s.* *See* (*s.*) (3).

PROVINCE, *s.* विषयः, राष्ट्रं, देशः, चक्रं, मंडलं. 2 नियोगः, कार्यं, कर्म, कर्तव्यं, अधिकारः. 3 प्रकरणं, अंगं, विषयः (fig. also), (सर्वत्रौदरिकस्याभ्यवहार्यमेव विषयः V. 3). -IAL, *a.* देशीय, देश्य, राष्ट्रीय, राष्ट्रिक-दैशिक (की *f.*), देश-राष्ट्र in comp. -*s.* देशस्थः, ग्रामस्थः. -IALISM, *s.* ग्रामीणभाषा, असंस्कृतभाषा.

PROVOKE, *v. t.* प्र-,कुप् c., क्रुध् c., क्रोधं-कोपं-उत्पद् c. or उद्दीप् c. or उत्तिज् c. 2 उत्पद् c., जन् c. (जनयति), प्रवृत् c., उत्तिज् c.; *See* EXCITE, CAUSE. 3 धृष् 5 P, आह्वे 1 A. -ING, *a.* प्रकोपक, उद्दीपक, उत्तेजक, क्रोधावह, संतापकारिन्, संतापक. -INGLY, *adv.* Ex. by (*v.*). -PROVOCATION, *s.* प्रकोपः, क्रोधोद्दीपनं, कोपोत्तेजनं; कोपकारणं-हेतुः. 2 उद्दीपनं, उद्बोधनं. -PROVOCATIVE, *a.* उद्दीपक, उद्बोधक. -*s.* दीपनं, अग्निवर्धनं, क्षुद्बोधनं, प्ररोचनं.

PROVOST, *s.* अध्यक्षः, अधिकारिन् *m.*, अधीशः.

PROWESS, *s.* शौर्यं, वीर्यं, वि-परा-क्रमः, पौरुषं, ओजस् *n.*, रणोत्साहः-शौर्यं; ' personal p.' बाहुवीर्यं, भुजबलं.

PROW, *s.* पोताग्रभागः.

PROWL, *v. i.* (भक्ष्यार्थं) परि-,भ्रम् 1, 4 P, पर्यट् 1 P. -ING, *s.* परिभ्रमणं, पर्यटनं.

PROXIMATE, *a.* समीप, निकट, आसन्न, संसक्त, सन्निकृष्ट. -LY, *adv.* समीपं, संसक्तं. -PROXIMITY, *s.* सन्निधिः, सन्निकर्षः, सान्निध्यं, नैकट्यं, संसक्ति *f.*; *See* NEARNESS.

PROXY, *s.* प्रतिनिधिः-पुरुषः, प्रतिहस्तः; ' by p. ' प्रतिनिधिद्वारा.

PRUDE, *a.* (Woman) अतिविनीता, विनयाभिमानिनी, सूक्ष्माचारनिष्ठा. -ERY, *s.* अतिविनीतता, विनयाभिमानः, मिथ्याविनयः. -ISH, *a.* *See* (*a.*).

PRUDENT, *a.* दूरदर्शिन्, विमृश्य-समीक्ष्य-कारिन्, विवेकिन्, दूर-दीर्घ-दृष्टि, परिणामदर्शिन्, सदसद्विवेकिन्; बुध, मनस्विन्, नीतिज्ञ, विज्ञ, प्र(प्रा)ज्ञ, मनीषिन्, सावधान, कृतधीः *See* WISE also. 2 (Of acts) समीचीन, श्रेयस्, वरं *ind.* -IAL, *a.* सविवेक, विवेक-समीक्षा-प्रयुक्त. -LY, *adv.* विमृश्य, समीक्ष्य, सविवेकं, दूरदर्शितया, परिणामदृष्ट्या, प्रज्ञवत्. -PRUDENCE, *s.* दूरदर्शिता, दूर-दीर्घ-दृष्टि *f.*, विवेकः, प्रसमीक्षा, समीक्ष्य-विमृश्य-कारित्वं, सदसद्विवेकः, नीति *f.*, मनीषा, मति-बुद्धि *f.*

PRUNE, *v. t.* अग्राणि लू 9 U or अव-च्छिद् 7 P or निकृत् 6 P. -ING, *s.* अवच्छेदः, निकृंतनं; ' p.-knife ' विटपच्छेदनी क्षुरिका.

PRURIGO, PRURIENT, *See* ITCH,-Y.

PRY, *v.* (Into) सूक्ष्मं निरीक्ष् 1 A or निरूप् 10 or दृश् 1 P; निपुणं अनुसं-धा 3 U or अन्विष् 4 P or चर्च् 6 P. -ING, *s.* सूक्ष्मनिरूपणं-अन्वेषणं, सूक्ष्मचर्चा.

PRYTHEE, *adv.* अयि, ननु, (ननु मां प्रापय पन्थुरेतिकं K. IV. 32).

PSALM, *s.* स्तोत्रं, गेयं, गीतं, भक्ति-धर्म-गीतं. -IST, *s.* गीत-स्तोत्र-कारः. -PSALTER, *s.* गीतसंहिता-संग्रहः.

PSEUDO, prefix, Ex. by मिथ्या, कपट, कूट, छद्म, कृत्रिम in comp.; *See* FALSE.

PSHAW, *interj.* धिक्, अपेहि.

PSYCHOLOGY, *s.* अध्यात्मविद्या, आन्वीक्षिकी.

PUBERTY, *s.* यौवनं, वयस् *n.*, तारुण्यं, यौवनदशा-अवस्था, प्रौढदशा; ' a woman attained to p.' स्त्रीधर्मिणी, उदक्या; *See* under MENSTRUAL. -PUBESCENT, *a.* प्राप्तयौवन, प्रौढ, तरुण.

PUBLIC, *s.* लोकाः, जनाः, प्रजाः, प्रकृतयः, (pl.); लोकः, जनः, प्रजा; ' in p.' प्रकाशं, लोकसमक्षं, प्रकटं, सर्वप्रत्यक्षं.-*a.* प्रजा-लोक-संबंधिन्; साधारण (णी *f.*), सामान्य, सर्वजनीन-य, सार्वलौकिक (की *f.*), लोक-जन-गण in comp.; ' p. odium ' जनद्वेषः; ' p. good ' लोकहितं; ' p. property ' गणद्रव्यं. 2 प्रसिद्ध, लोक-जन-प्रसिद्ध, सर्वत्र प्रचलित, बहुलीभूत, लोकविश्रुत, प्रकाशीभूत, सार्वलौकिक (की *f.*). 3 प्रकाश, अगूढ, अच्छन्न, अविक्लिन्न, सर्वप्रकाश, राज in comp.; ' p. road ' राजमार्गः; ' p. sale ' प्रकाशविक्रयः; ' p. house ' शुंडा, पानं, शुंडापानं, सुरालयः, सुरापणः; *See* under LIQUOR; ' p.-minded ', ' p.-spirited ' उपकारशील, जनहितबुद्धि, सर्वजनहितपरायण, लोकहित, जनहितैषिन्. -AN, *s.* शौंडिकः, सुरापणिकः. 2 कर-शुल्क-ग्राहिन् *m.* -ITY, *s.* प्रकाशता, प्राकाश्यं, प्रख्याति *f.*, प्रसिद्धि *f.*, विश्रुति *f.*, जन-लोक-प्रसिद्धिः, स्पष्टता; ' give p.' Publish, q. v. -LY,

adv. प्रकाशं-शतः, प्रसिद्धं, प्रकटं, सर्वप्रकाशं-संमुखं-समक्षं; अगूढं, अच्छन्नं, सुव्यक्तं, स्पष्टं. —PUBLISH, *v. t.* प्रकाश् c., प्रथ् 10, ख्या c. (ख्यापयति), प्र-वि-घुष् 10, ज्ञा c. (ज्ञापयति), प्रचर् c., बुध् c., प्रकाशीकृ 8 U, प्रकटीकृ, आविष्कृ, प्रकटयति (D.), प्रकटी-प्रसिद्धी-कृ; (books &c.) प्रकाश् c. —ER, *s.* प्रकाशकः, प्रकाशयितृ *m.*, ख्यापकः. —PUBLICATION, *s.* प्रकाशनं, घोषणं, ख्यापनं. 2 प्रकाशितपुस्तकं-ग्रंथः.

PUCKER, *v. t.* संकुच् 1 P, आकुंच् c., संह् 1 P, पुटीकृ 8 U. —*s.*, —ING, *s.* संकोचः, पुटः, वलि-ली *f.* —ED, *a.* संकुचित, पुटीकृत. 2 Wrinkled, q. v.

PUDDLE, *s.* पंकिलजलं, पंकगुल्मः, पंकजलाशयः. —*v. t.* आविली-कलुषी-कृ 8 U; *See* SPOIL.

PUDENCY, *s. See* MODESTY.

PUDENDUM, PUDENDA, *s.* योनि *f.*; भगं, उपस्थः.

PUERILE, *a.* बालिश, बालोचित, बालेय, बाल-शिशु-योग्य. —ITY, *s.* बालिश्यं, बालधर्मः.

PUERPERAL, *a.* प्रसत-प्रसूति in comp. —PUERPEROUS, *a.* बालप्रसविनी.

PUFF, *v. t.* ध्मा 1 P, आ-उप-°, उत्-,धि c.. (lit. & fig.); वातेन पूर् 10, उद्-हन् 2 P, स्फाय् c. (स्फावयति). —*v. i.* श्वस् 2 P, कृच्छ्रेण श्वस्, उद्-ध्मा. 2 वा 2 P. 3 फूत्कृ 8 U, मारुतं निःस c. 4 धि-उद्धन्-ध्मा-pass., स्फीत-आध्मात-उच्छून- *a.* भृ 1 P; ' do not p. up, when praised ' स्तूयमाना नोत्सिच्यते (Ka. 329). —*s.* श्वासः, मुखमारुतः. 2 फूत्कारः, फूत्कृतं. 3 वात्या, वातवेगः; *See* GUST. 4 अतिप्रशंसा. —ED, *a.* आध्मात, उच्छून, स्फीत, उद्धत, मारुतपूर्ण, श्वासपूरित; ' p. up with pride ' दर्पाध्मात, उत्सिक्त, मदोद्धत, उद्धत. —ING, *s.* उत्सेकः; *See* PRIDE.

PUG-FACED, *a.* वानरवदन, कपिमुख.

PUG-NOSE, *s. See* under FLAT.

PUGILIST, *s.* मुष्टियोधः, मल्लः. —PUGILISM, *s.* मुष्टि-मल्ल-युद्धं, मुष्टीमुष्टि युद्धं.

PUGNACIOUS, *a.* कलह-युद्ध-प्रिय, रणोत्सुक, युयुत्सु, रण-युद्ध-कलह-काम. —PUGNACITY, *s.* युयुत्सा, कलहेच्छा, कलह-युद्ध-कामः.

PUISNE, *a.* अवर, अवरपदस्थ.

PUISSANT, *a.* शूर, विक्रांत, वीर्यवत्, प्रबल. —PUISSANCE, *s.* शौर्यं, वि-परा-क्रमः, वीर्यं; *See* BRAVERY.

PUKE, *v. i.* वम् 1 P, छर्दं 10. —*s.* (वांतिकृत) औषधं.

PULCHRITUDE, *s. See* BEAUTY.

PULE, *v. i.* बालकवत् रु 2 P or °कूज् 1 P.

PULL, *s.* कर्षणं, आकर्षः; ग्रहणं, धरणं. —*v. t.* कृष् 1 P, आ-सं-°. 2 ग्रह् 9 P, आ-दा 3 A, धृ 1 P, 10. —down, नि-,पत् c., अधः पत् c., अवकृष्; (in strength) अव-सद् c., अप-चि 5 U, क्षि 5 P, अपकृष्. —off, अप-नी 1 P, अप-उत्-कृष्, अवतृ c., उन्मुच् 6 P, अपहृ 1 P; निष्कृष्, निर्हृ. —out, उद्धृ, निष्कृष्, वि-उत्-पट् 10, उत्खन् 1 P, निर्हृ (hair) उत्-,लुंच् 1 P. —towards, आ-समा-कृष्. —up, उन्मूल् 10, उद्धृ, उच्छिद् 7 P, उत्पट्; *See* ERADICATE. —ING, *s.* आकर्षणं, ग्रहणं, &c.; ' p. by the hair ' केशग्रहः-हणं; ' mutual p. of the hair ' केशाकेशि युद्धं.

PULLET, *s.* कुक्कुटशावः.

PULMONARY, *a.* तिलक-फुप्फुस in comp.

PULP, *s.* मज्जा, सारः, वसा. 2 गर्भः, बीजं. —OUS,-Y, *a.* मज्जाबहुल, मज्जागुणक; मांसल, मज्जोपम, कोमल.

PULPIT, *s.* पीठं, आसनं.

PULSE, *s.* नाडि-डी *f.*; (beating) नाडीस्फुरणं-स्पंदनं; ' feel the p. ' नाडीं दृश् 1 P or स्पृश् 6 P or परीक्ष् 1 A; ' the p. is quick ' लघुगतिः नाडी; ' the p. is slow on account of phlegm ' कफान्मंदगतिर्ज्ञेया (नाडी). 2 वैदलः, शमी-शिंबी-धान्यं; शामीजः. —PULSATE, *v. i.* स्पंद् 1 A, स्फुर् 6 P; *See* THROB. —ION, *s.* गति *f.*, स्फुरणं, आघातः, स्पंदनं; ' p. of the heart ' हृदयोद्धर्षः.

PULVERIZE, *v. t.* चूर्ण् 10, क्षुद् 7 P, पिष् 7 P. —PULVERULENT, *a.* चूर्ण-क्षोद-मय (यी *f.*).

PUMMEL, *s.* वंका.

PUMP, *s.* उत्सेलनयंत्रं, जलोत्क्षेपणं. —*v. t.* (जलादि) उत्सेल् 10, उत्क्षिप् 6 P. 2 (Out) निष्कृष् 1 P, रिच् 7 P or c., रिक्तीकृ 8 U.

PUMPKIN, *s.* कूष्मांडः-डकः, कर्कारुः.

PUN, *s.* श्लेषः. —*v. t.* श्लेषं प्रयुज 7 A, 10.

PUNCH, *s.* प्रहारः, आ-अभि-घातः. 2 विदूषकः, भंडः. 3 वेधनिका. —*v. t.* तड् 10 or प्रह् 1 P. 2 Perforate, q. v.

PUNCHY, *a.* स्थूलकाय; *See* FAT.

PUNCTILIO, *s.* सूक्ष्मता, अतिसौक्ष्म्यं; सूक्ष्मविषयः-नियमः. —PUNCTILIOUS, *a.* सूक्ष्मनियमनिष्ठ-निरत, सूक्ष्माचारनिष्ठ, अतिसूक्ष्मदृष्टि. —NESS, *s.* सूक्ष्मनियमनिष्ठा, अतिसूक्ष्मदृष्टि *f.*

PUNCTUAL, *a.* सामयिक (की *f.*), संकेत-समय-निष्ठ-अनुवर्तिन्; ' let us be p.' सामयिका भवामः (M. 1). —ITY,-NESS, *s.* समय-संकेत-पालनं-निष्ठा-अनुवर्तनं, सामयिकता. —LY, *adv.* यथासमयं, यथासंकेतंकालं.

PUNCTUATE, *v. t.* विरामचिह्नानि लिख् 6 P; चिह्नैः अंक् 10.

PUNCTURE, *v. t.* कीलाग्रेण व्यध् 4 P or भिद् 7 P. —*s.* वेधः-धनं; *See* PRICK.

PUNGENT, *a.* तीव्र, तीक्ष्ण, प्रखर, तिग्म, उग्र, चंड. 2 मर्मभिद्, अरंतुद, मर्माविध्, कटु. 3 (To the taste) तीक्ष्ण, तीव्र, तिक्त, कटु, उष्ण. —PUNGENCY, *s.* प्रखरता, उग्रता, चंडता, तीक्ष्णता, कटुता, तीव्रता, &c.

PUNISH, *v. t.* दंड् 10, शास् 2 P, (with two acc.); निग्रह् 9 P, दम् c. (दमयति); तड् 10 (by beating); '.p. ed him by an unjust death' अन्यायेन तं जघान, अन्याय्यवधं तमदंडयत्; 'should p. as a thief' चौरदंडेन दंडयेत् (Y. II. 269). **2** Pain, q. v. -ER, *s.* शास्तृ *m.*, शासकः, दंडयिता. -MENT, *s.* दंडः, शासनं, निग्रहः; साहसं; दमः. -PUNITIVE, PUNITORY, *a.* दंड in comp.

PUNT, *s.* तरालुः, तरांधुः.

PUNY, *s.* क्षुद्र, अल्पय, अतिलघु.

PUPIL, *s.* शिष्यः, छात्रः, अंतेवासिन् *m.*, अध्येतृ *m.*, विद्यार्थी. **2** कनीनिका, तारा, तारका. -AGE, *s.* शिष्यदशा-अवस्था, अंतेवासित्वं.

PUPPET, *s.* पुत्रिका, पांचालिका; *See* DOLL; 'p.-show' पुत्रिकाक्रीडा.

PUPPY, PUP, *s.* कुक्कुरशावः-शिशुः.

PURBLIND, *a.* हतदृष्टि, ईषदंध.

PURCHASE, *v. t.* क्री 9 U. **2** व्ययेन-धनेन प्राप् 5 P or लभ् 1 A. -*s.* क्रयः. **2** क्रीतद्रव्यं. **3** सं-, ग्रहणं, ग्राहः; 'p.-money' क्रयमूल्यं, अर्घः, मूल्यं. -ER, *s.* क्रयिन् *m.*, क्रेतृ *m.*

PURE, *a.* वि-, शुद्ध, शुचि (in all senses); स्वच्छ, विशद; निर्-वि-अ-मल, प्रसन्न, अनाविल, अकलुष. **2** पुण्य, अनघ, निष्पाप, साधु, अगाप, अलिप्त, निष्कलंक, अकल्मष. **3** पवित्र, पावन, मेध्य, परि-,पूत, प्रयत, तीर्थ in comp. **4** केवल, शुद्ध, मात्र in comp. **5** अदुष्ट, अभ्रष्ट, असंसृष्ट, अविकृत. **6** (Language) अपशब्दहीन-रहित, असंकीर्ण. **7** (Woman) सती, साध्वी, अज्ञातव्यवाया, सुरतानभिज्ञा, अस्पृष्टा, अक्षतयोनिः, पुरुषास्पृष्टा; 'of p. descent' सद्वंशज, शुद्धान्वय; 'of p. heart', 'p.-minded' शुद्धात्मन्, विमलात्मन्, शुद्धमति, शुद्धहृदय; प्रयतात्मन्; 'to be p.' शुध् 4 P. -LY, *adv.* निर्मलं, विशुद्धं, शुचि; निष्पापं, &c.; मात्रं, केवलं &c. -NESS,-PURITY, *s.* वैमल्यं, वि-,शुद्धि *f.*, शुद्धता, प्रसादः, वैशद्यं, शुचिता, शौचं, पुण्यता, साधुता, अपापता, पवित्रता, पूतता, साध्वीत्वं, &c. -PURIFY, *v. t.* परि-,पू 9 U or c., शुध् c., वि-परि-,° शुचीकृ 8 U, निर्मलीकृ, पवित्रीकृ, संस्कृ; प्र-,मृज् 2 P, निर्णिज् 3 U, प्रक्षल् 10, धाव् 10. -ED, *a.* परि-,पूत, शुद्ध, शोधित, प्रक्षालित, धौत, निर्णिक्त, &c.; 'p. by penance' प्रयतात्मन्. -ICATION, *s.* परि-,पूति *f.*, वि-परि-शुद्धि *f.*, शौचं, संस्कारः, पावनं, शोधनं, निर्मलीकरणं, प्रक्षालनं, धावनं, मार्जनं. -ICATIVE, -ICATORY, *a.* पावन, पवित्र, पावक, तीर्थ in comp.; अघ-पाप-नाशिन्, अघमर्षण; *See* PURE; 'p. rites' शांतिक्रिया, संस्कारः. -ING, *a.* पावन, पावक, पाविन्, &c.

PURGE, *v. t.* शुध् c., वि-,रिच् 7 P or c., मलं निःस् c. or शुध् c. **2** परि-,पू 9 U, शुध् c., पापं-अघं-शुध्; *See* PURIFY. -*s.* वि-,रेचनं-कं; उदरशोधनं. -ATION, *s.* वि-,रेचनं, वि-,रेकः, शोधनं, शुद्धि *f.* -ATIVE, *a.* वि-,रेचक-न, सारक, शोधन. -*s.* वि-, रेचनं-कं, सारकं. -ATORY, *s.* शोधक, पावन, अघनाशन-मर्षण. -*s.* पापमोचनस्थानं.

PURLIEU, *s. See* BORDER.

PURLOIN, *v. See* ROB, STEAL.

PURPLE, *a.* धूम्र, धूमल, नीललोहित, धूम्रवर्ण. -*s.* धूम्रः, धूमलः, धूम्रवर्णः, नीललोहितः. -*v. t.* धूमीकृ 8 U. -ISH, *a.* आधूम्र, ईषद्धूमल.

PURPORT, *s.* भावः, अभिप्रायः, तात्पर्यं, अर्थः, आशयः, भावार्थः, तात्पर्यार्थः. -*v. t.* अभिप्र-इ 2 P, उद्दिश् 6 P; *See* INTEND, MEAN.

PURPOSE, *s.* हेतुः, अभिप्रायः, आशयः, अर्थः, संकल्पः, उद्देशः, तात्पर्यं, चिकीर्षितं, इच्छा, आकूतं, आकांक्षा, कार्यं, मति-बुद्धि *f.*, धीः; *See* INTENTION; 'fixed p.' स्थिर-दृढ-संकल्पः-निश्चयः; 'of unfailing p.' दृढ-सत्य-संकल्प, स्थिरधी-मतिः; 'to no p.' निरर्थकं, वृथा, मृषा, व्यर्थं, निर्गुणं; 'who has effected his p.' कृती, कृतार्थः, कृतकृत्यः; 'for the p. of' ex. by अर्थ-अर्थं, हेतोः, निमित्तं-त्ते, in comp., कृते (with gen. or by dat.); 'for what p.' किमर्थं, किमुद्दिश्य, केन हेतुना. -*v. t.* अभिप्र-इ 2 P, उद्दिश् 6P, संकल्प् c., इष् 6 P; *See* INTEND. -LY, 'on p.' *adv.* कामतः, बुद्धि-बोध-पूर्वं. ज्ञानतः, बुद्ध्या, साभिप्रायं.

PURSE, *s.* धनभस्त्रिका-कोषः, ग्रंथिः. **2** धनं; *See* WEALTH; 'p.-cutting' ग्रंथिच्छेदः-भेदः; 'p.-pride' धनगर्वः-दर्पः-अभिमानः; 'p.-proud' धनोन्मत्त, वित्तगर्वित; धनदृप्त. -*v. t.* कोषे नि-धा 3 U or निविश् c. **2** Contract, q. v.

PURSUE, *v. t.* अनुसृ 1 P, अनुगम्-धाव्-व्रज् 1 P, अनु-या 2 P, अनुवृत् 1 A, अनुक्रम् 1 U, 4 P. **2** अनु-ष्ठा 1 P, आचर 1 P, नि-,सेव् 1 A, आधि 1 U, आ-स्था 1 P. **3** प्रवृत् c., निर्वह् c., सततं प्रणी 1 P; *See* PROSECUTE. **4** आप् desid. (ईप्सति), लभ् desid. (लिप्सते); 'p. one's way' मार्गं आक्रम्, वह् 1 P; *See* FOLLOW. -ER, *s.* अनुसारिन् *m.*, अनुधावकः, अनुगामी. -PURSUIT, *s.* अनुसरणं-धावनं-गमनं; अन्वेषणं, मार्गणं. **2** अनुष्ठानं, आचरणं, निषेवणं, अभिनिवेशः, अनुशीलनं; प्रवृत्ति *f.*, लिप्सा, अर्जनप्रयत्नः, निष्ठता-परता in comp. **3** व्यापारः, व्यवसायः, उद्योगः, उद्यमः, आरंभः, व्यवहारः, कार्यं, प्र-,वृत्तिः; 'literary p. s.' विद्यागमकायाणि, ज्ञानसंपादनारंभाः. —PURSUANT, *a.* अनुवर्तिन्, अनुसारिन्, अनुरोधिन्, अनुरूप. -LY, *adv.* अनुरूपं, अनुसारेण-रतः, अनुरोधेन, यथा in comp. -PURSUANCE, *s.* अनुसरणं-वर्तनं-गमनं-रोधः; 'in p. of' अनुरूपं, अनुसारेण, &c. -PURSUIVANT, *s.* अनुचरः, दूतः.

PURSY, *a.* स्थूलह्रस्व, उच्छून, स्फीत. **2** दुःश्वासिन्, कृच्छ्रश्वास.

PURULENT, *a.* पूयपूर्ण-मय (यी *f.*), पूयस्रावित् सपूय. -PURULENCE, *s.* पूयपूर्णता, सपूयता.

PURVEY, *v. t.* उपकरणानि उपक्रप् c., सं-भृ 1, 3 U or संयुज् 7 U, 10; *See* PROVIDE. -ANCE, *s.* भोजनपरिकल्पनं-संभारः-सामग्री. **2** परिकल्पनं, संभारः, संविधा-धानं. -OR, *s.* भोजनाधिकारी, आहाराधिकृतः.

PUS, *s.* पूयः-यं, दूष्यं, पूयरक्तं.

PUSH, *v.* (हस्तादिना) प्रस् c., संचल् c., प्रक्षिप् 6 P, प्रचुद् 10, प्रेर् c., प्रणुद् 6 P or c.; *See* DRIVE. **2** तड् 10, प्र-ह 1 P; आव्यध् 4 P, प्रति-अभि-हन् 2 P, आहन् 2 U; ' p. aside ' अपस् c., बहिष्कृ 8 U, निःस् c.; ' p. forward ' प्रणुद् c., प्रचल् c., प्रस् c.; ' p. afar ' उत्स् c. -*s.*, -ING, *s.* प्रसारणं, प्रक्षेपः, प्रेरणं-णा, प्रचोदना. **2** ताडनं, आघातः, प्रहारः, अभ्याघातः. **3** वेगः, प्रयत्नः. -ING, *a.* उद्यमिन, उद्योगिन्, साहसशील, प्रगल्भ, साहसिन्.

PUSILLANIMOUS, *a.* कृपण, दीन, क्षुद्रमनस्, कृपणबुद्धि-मति, लघुचेतस्, पामर, भीरुहृदय, कातर, कापुरुष, क्लीब. -PUSILLANIMITY, *s.* कार्पण्यं, दैन्यं, क्लीबता, कातर्यं, भीरुता, कृपणमतित्वं, क्षुद्रता.

PUSS, PUSSY. *s. See* CAT.

PUSTULE, *s.* Pimple, q. v. -OUS, *a.* स्फोटपूर्ण.

PUT, *v. t.* स्था c. (स्थापयति), नि-आ-धा 3 U, आरुह् c., दा 3 U, कृ 8 U, रच् c. (अर्पयति), निविश् c., वि-,न्यस् 4 P. **2** आ-समा-युज् 7 U, 10. **3** Incite, q. v.; ' p. to death ' हन् 2 P or c., मृ c., व्या-पद् c.; *See* KILL; ' p. to flight ' वि-द्रु c.; ' p. in mind ' स्मृ c., प्र-अनु-बुध् c.; ' p. in order ' यथाक्रमं-यथातथं-रच् 10 or स्था c. or विन्यस, सज्जीकृ; ' p. in writing ' पत्रे निविश् c., लेख्ये आरुह् c. -about, परिवृत् c. -aside, by, अपास् 4 U, मुच् 6 P, न्यज् 1 P; *See* ABANDON. **2** परि-,रक्ष् 1 P, सं-चि 5 U. -away, अप-निः-स् c., निष्कस् c., बहिष्कृ, व्याक्षिप् 6 P, विलंब् c. -down, भूमौ निधा, अवतृ c., निक्षिप्. **2** नश् c., विलुप् c., उच्छिद् 7 P ; *See* DESTROY, OVERTHROW. **3** (In writing) पत्रे लिख् 6 P or निविश् c. or आरुह् c. -forth, प्रस् c. **2** आविष्कृ, व्यंज् 7 P, व्यक्तीकृ, प्रकाश् c., प्र-,दृश् c. **3** उपक्षिप्, उपानी, उपन्यस्, उदाह 1 P. **4** उद-भिद् c.; ' a creeper having p. forth foliage ' सन्नद्धपल्लवा लता (R. III. 7). -off, व्याक्षिप्, विलंब् c., अतिपत् c. **2** उन्मुच्, अवतृ c., अपुनी, उच्छिद् 10, अपनह् 4 P. **3** निराकृ, निःस् c.; *See* DISCARD, DISCHARGE. **4** (From land) अपगम्, अप-या, अपस् 1 P; ' the boat p. off ' मुक्ता नौः (D. K. II. 6). -on, वस् 2 A, परि-धा; भू 1 P, 10, संध्ये 1 P; प्रसाध् c., आच्छद्; प्रा-आ-वृ 5 U; ' p. on armour ' संनह् 4 P. **2** ग्रह् 9 P, स्वीकृ, धृ, दृश् c. **3** संक्रम् c., संचर् c. **4** आसंज् c.; निविश् c. -out, विस्तृ c., प्रस् c., वितन् 8 U. **2** (Eyes &c.) सं-, उद्ध, वि-उत्-पद् 10. **3** निर्वा c. (वापयति), प्र-उपशम् c. (शमयति). **4** विलक्षीकृ, व्रीडया आकुलीकृ, *See* EMBARRASS. **5** निःस् c., बहिष्कृ. **6** प्र-विनि-युज् 7 A, 10; ' p. out at interest ' वृद्धिलाभाय विनियोजित. -over, अधिकृ c., अधि-स्था c. **2** Put off, q. v. -to, Expose, q. v.; ' p. to the sword ' खड्गेन छिद् 7 P or हन् 2 P; ' p. to sea ' नावं मुच्; ' p. to a stand ' स्तंभ् 9 P. -together, संयुज्; संधा, सं-ग्रंथ् 9 P. -up, उत्तृ 1 P, वस् 1 P; *See* LODGE. **2** (with) सह् 1 A, क्षम् 1 A; *See* BEAR. **3** व्यक्तीकृ, प्रकाशं स्था c., प्रदृश् c.; ' an article p. up for sale ' क्रेयं द्रव्यं; ' p. up to ' प्रणुद् c., प्रोत्सह् c.

PUTATIVE, *a.* प्रसिद्ध, अभिमत.

PUTRIFY, *v. i.* पूतीभू 1 P, पूय् 1 A, दुर्गंध-*a.* भू; वि-,गल् 1 P, वि-ली 4 A. -*v. t.* पूतीकृ 8 U, गल् c., विली c. -ACTION, *s.* पूति *f.*, दुर्गंधता, पूतिगंधः, गलनं, विलयः. -PUTRID, PUTRESCENT, *a.* पूतिगंधि, उग्रगंध, दुर्गंध, विगलित, विलीयमान. -NESS, PUTRESCENCE, *s.* पूतिः, दुर्गंधः, पूतिगंधः.

PUZZLE, *v. t.* व्या-मुह् c., सं-वि-भ्रम् c. (भ्रमयति), आकुलीकृ 8 U, व्यस् 4 U ; *See* CONFUSE, PERPLEX. -*s.* कूटं, प्रहेलिका, प्रवह्लिका. **2** व्या-मोहः, भ्रांति *f.*, संभ्रमः, वैक्लव्यं, व्याकुलता, व्यग्रता. -ED, *a.* मूढ, भ्रांत, व्यस्तचित्त, आकुलमनस्, किंकर्तव्यतामूढ. -ING, *a.* भ्रम-मोह-कारिन्, संभ्रमप्रद.

PYGMY, *s.* ह्रस्वः, खर्वः, वामनः. -*a.* ह्रस्व, खर्व, वामनमूर्ति.

PYRAMID, *s.* सूच्यग्रस्तंभः -AL, *a.* सूच्याकार ; सूच्यग्र, शिखरिन्, शुंडाकृति.

PYRE, *s.* चिता, चित्या, चिति *f.*

PYRITES, *s.* स्वर्णमाक्षिकं.

PYRRHONIST, *s.* नास्तिकः, मिथ्यादृष्टिः.

Q.

QUACK, *s.* कुवैद्यः, दांभिकः, क्षुद्रवैद्यः, मिथ्याचिकित्सकः. **2** हंसनादः-रवः. -*v. t.* हंसवत् नद् 1 P or रु 2 P. -ERY, *s.* दुश्चिकित्सा ; मिथ्याभिमानः. **2** Boast, q. v.

QUADRANGLE, *s.* चतुर्भुजः, चतुष्कोणः ; (of a house) प्रकोष्ठः,चत्वरं, संजवनं, चतुःशालं. -QUADRANGULAR, *a.* चतुष्कोण, चतुरस्र.

QUADRANT, *s.* चतुर्थभागः, पादः. **2** वृत्तपादः.

QUADRATE, *s. See* SQUARE.

QUADRATIC, *a.* चतुरस्रीय. **2** (Equation) वर्ग-समीकरणं.

QUADRATURE, *s.* पदसंस्थानं.

QUADRENNIAL, *a.* चातुर्वार्षिक (की *f.*).

QUADRILATERAL, *a.* चतुर्भुज, चतुःपार्श्व.

QUADRIPARTITE, *a.* चतुर्विध.

QUADRISYLLABLE, *s.* चतुरक्षरं.

QUADRUPED, *s.* चतुष्पादः (दी *f.*), चतुष्पाद्.

QUADRUPLE, *a.* चतुर्गुण. –*v. t.* चतुर्गुणीकृ 8 U.

QUAFF, *v. t.* (सतृष्णं) पा 1 P, उत्-चुलुंप् 1 P. –ER, *s.* अतिपायिन् *m.*

QUAGMIRE, *s. See* MARSH.

QUAIL, *s.* वर्तकः, वर्तिका, लावः. –*v. i.* कंप् 1 A, वेप् 1 A. **2** वि-अव-सद् 1 P, क्षि pass.; पत्ली 4 A.

QUAINT, *a.* अपरूप, विलक्षण, असंगत. **2** विदग्ध, चतुर, अतिसूक्ष्म. –LY, *adv.* विलक्षणं, असंगतं.

QUAKE, *v. i.* कंप् 1 A, उद्विज् 6 A, त्रस् 1, 4 P; (with abl.). –*s.* कंपः-पनं, उत्-प-कंपः, वेपथुः.

QUALIFY, *v. t.* योग्य-उचित-क्षम-*a.* कृ 8 U; ex. by ' q. ed. ' **2** नियम् 1 P, परिच्छिद् 7 P, परि-मा 3 A, 2 P, निबंध् 9 P. **3** Moderate, q. v. –ED, *a.* योग्य, क्षम, समर्थ, पर्याप्त, कर्मक्षम, अलंकर्मीण. **2** गुणिन्, गुणोपेत, गुणसंपन्न. **3** नियत, परिच्छिन्न, समर्याद; *See* LIMITED. –ICATION, *s.* योग्यता, क्षमता, पात्रता, औचित्यं, गुणविशिष्टता. **2** गुणः, पात्रत्वं, विशिष्टगुणः. **3** परिच्छेदः, मर्यादा, नियमनं, नियतत्वं, परिमाणं. –QUALITY, *s.* गुणः. **2** भावः, धर्मः, गुणः, स्वभावः, प्रकृति *f.*, स्व-,रूपं, लक्षणं, विशेषभावः-धर्मः-लक्षणं, शीलं; शक्ति *f.* **3** कुलीनता, श्रेष्ठ-विशिष्ट-पदं, प्रतिष्ठा, गौरवं, उत्कृष्टपदं. **4** प्रकारः, जाति *f.*; *See* KIND; ' good q. ' गुणः, सद्गुणः, सद्भावः, ' having good q. es ' गुणिन्, गुणवत्, गुणोपेत, गुणयुक्त, सद्गुण; ' bad q. ' दुर्गुणः, अवगुणः; ' inherent q. of a thing ' निसर्गधर्मः, वस्तुशक्तिः; ' men of q. ' कुलीनजनाः, अभिजात-कुलीन-वर्गः.

QUALM, *s.* वमनेच्छा, विवमिषा. **2** मनस्तापः, अनुशयः, अनुतापः. –ISH, *a.* विवमिषु.

QUANDARY, *s. See* DIFFICULTY.

QUANTITY, *s.* परिमाणं, प्रमाणं, मानं, मात्रा, अंशः, भागः. **2** मात्रा. **3** राशिः. **4** (Large) संचयः, ओघः, पूगः, पुंजः, राशिः, संग्रहः; ' a great q. of ' प्रभूत, प्रचुर, बहु, विपुल; ' great q. ' बाहुल्यं, प्राचुर्यं, बहुभागः, भूयिष्ठांशः; ex. by बहु, प्रचुर, विपुल (Much, q. v.); ' in large q. es ' बहुशः, बाहुल्येन, प्राचुर्येण; ' small q. ' स्तोकांशः, अल्पभागः, अल्पं, स्तोकं, अल्पमात्रं; ' in small q. es ' अल्पशः, स्तोकांशेन; ' long q. ' दीर्घः; ' short q. ' ह्रस्वः; ' known q. ' व्यक्तराशिः; ' unknown q. ' अव्यक्तराशिः; ' positive, negative, q. ' धन-ऋण-राशिः; ' what q. of ' कियत्.

QUANTUM, *s.* परिमाणं, मात्रा, कल्पितभागः.

QUARANTINE, *s.* गमनागमन-संसर्ग-निषेधः.

QUARREL, *s.* कलहः, कलिः, विवादः, विसंवादः, विप्रतिपत्ति *f.*, वाक्कलहः, वाग्युद्धं, विप्रलापः; द्वंद्वं, वैरं. –*v. i.* विवद् 1 A, विप्रलप् 1 P, विसंवद् 1 P, विप्रतिपद् 4 A, वैरायते-कलहायते (D.), कलहं कृ 8 U, युध् 4 A. –ER, *s.* विवादिन् *m.*, कलहकारी. –SOME, *a.* कलह-कलि-प्रिय, विवादशील, विसंवादिन्, कलह-कलि-पर, कलहकारिन्, युयुत्सु, विवादार्थिन्.

QUARRY, *s.* आकरः, ख(खा)नि-नी *f.*, पाषाणस्थानं-भूमि *f.* **2** आमिषं, मार्गितजंतुः. –*v. t.* खन् 1 P; *See* DIG.

QUARTAN, *a.* चातुर्थिक.

QUARTER, *s.* पादः, तुर्यः, तुरीयः, अर्धार्धं, तुरीय-चतुर्थ-भागः; ' a rupee and a q. ' सपादरूपकः. **2** दिश्-ज्ञा, आशा, काष्ठा, ककुभ्, हरित्; *See* DIRECTION; ' in intermediate q. ' अपदिशं; ' guardian of a q. ' दिक्पालः, लोकपालः; ' guardian elephant of the q. ' दिग्गजः. **3** प्र-,देशः, उद्देशः, स्थानं, दिक्-ज्ञा, दिग्भागः, दिग्देशः, दिगंतः; ' from various q. s ' नानादिग्देशात्, नानादिगंतेभ्यः, नानादिग्भ्यः; ' in every q. ' चतुर्दिक्षु. **4** (Q. s) वासः, वसति *f.*, निकेतनं, वासस्थानं, निवेशः, कटकः-कं; ' head q. s ' सेनापतिनिवेशः, कटकः. **5** दया, कृपा, जीव-प्राण-दानं; ' give q. ' दयां कृ 8 U, अभयं दा 3 U. **6** (Of night) यामः, प्रहरः. **7** मासत्रयं, त्रिमासं, वत्सरपादः; ' to close q. s ' बाहूबाहवि, हस्ताहस्ति, मिथःप्रत्यासन्न- *a.*; ' they two came to close q. s ' तौ बाहूबाहवि व्यासज्जेताम् (Si. XVIII. 12). –*v. t.* चतुर्धा विभज् 1 U or खंड् 10 or छिद् 7 P. **2** वस् c., निविश् c. –*v. i.* निवस् 1 P, निविश् 6 A, अध्यास् 2 A. –LY, *a.* त्रैमासिक (की *f.*), पादिक (की *f.*). –*adv.* मासत्रयांते, प्रतित्रिमासं.

QUARTO, *s.* चतुःपत्रकं.

QUASH, *v. t.* मृद् 9 P, पराजि 1 A, पराभू 1 P. **2** खंड् 10, निवृत् c., विलुप् 6 P or c., उच्छिद् 7 P. निरस् 4 U.

QUASI, Ex. by कु, कल्प, देशीय, in comp.

QUATERNION, *s.* चतुष्टयं, चतुष्कं.

QUATRAIN, *s.* चतुष्पदश्लोकः.

QUAVER, *v. i.* Tremble, q. v. **2** भग्नस्वरेण गै 1 P. –*s.* स्वरभंगः, कंपस्वरः.

QUAY, *s.* घट्टः, घट्टी, तीर्थं, उत्तरणस्थानं.

QUEAN, *s. See* PROSTITUTE.

QUEEN, *s.* राज्ञी, महिषी, देवी (title of address),

राजपत्नी-महिषी; 'q.'s metal' कांस्यं. -LIKE, -LY, *a.* राज्ञीसदृश (ज्ञी *f.*)-अनुरूप.

QUEER, *a.* विलक्षण, असंगत, अपरूप, अद्भुत; *See* ODD.

QUELL, *v. t.* शम् c. (शमयति), प्र-उप-,° निवृत् c., विनश् c., उच्छिद् 7 P. **2** दम् c. (दमयति), वशीकृ 8 U, परा-अभि-भू 1 P, पराजि 1 A.

QUENCH, *v. t.* (Thirst) शम् c. (शमयति), प्र-उप-,° छिद् 7 P, निवृत् c., अपनी 1 P. **2** निर्वा c. (वापयति), प्र-उप-शम् c. -ING, *s.* शमनं, शांति *f.*, वि-,च्छेदः.

QUERULOUS, *a.* दुःखित, परिदेवनाकुल, विलापिन्, परिदेविन्, विलापशील, शोकगर्भ, दुःखात्मक. -LY, *adv.* सविलापं. -NESS, *s.* विलपनशीलता.

QUERY, *s.*, *See* QUESTION.

QUEST, *s.* अन्वेषणं, अनुसंधानं, मार्गणं, निरूपणं; 'in q. of prey' भक्ष्यार्थं.

QUESTION, *s.* प्रश्नः, अनुयोगः, पृच्छा; 'put a question to' प्रच्छ् 6 P, अनुयुज् 7 A; 'you have put me a good q.' सम्यक् दृष्टोस्मि भवता. **2** जिज्ञासा, निरूपणं, परीक्षा-क्षणं, अनुसंधानं, विचारः-रणा. **3** संदेहः, संशयः, वितर्कः, विकल्पः, आ-,शंका; 'here a q. arises' अत्रेदं प्रष्टव्यं. **4** वि-,वादविषयः-पदं-वस्तु-आस्पदं; विचारविषयः, &c.; 'call in q.' विचर् c., (आज्ञा गुरूणां ह्यविचारणीया R. XIV. 46); 'the topic in q.' प्रस्तुत-प्रकृत-विषयः; 'the q. arose as to &c.' इति-विवादः-प्रश्नः-समुपस्थितः. -*v. t.* प्रच्छ, अनुयुज्, ज्ञा desid. (जिज्ञासते); 'ascetics may be q.ed without reserve' अनियंत्रणानुयोगस्तपस्विजनः (S. 1). **2** परीक्ष् 1 A, निरूप् 10, अनुसं-धा 3 U, विचर् c. **3** आशंक् 1 A, न प्रति-इ 2 P, न विश्वस् 2 P, वितर्क् 10, विकल्प् 1 A; *See* DOUBT. -ABLE, *a.* विचार्य, विशंक्य, शंकनीय, संदिग्ध, शंकार्ह, संदेह-शंका-पदं. -ABLY, *adv.* साशंकं, संदिग्धं. -ARY, *a.* प्रश्नात्मक. -ER, *s.* पृच्छकः, प्रष्टृ *m.*, अनुयोक्ता, अनुयोगी, जिज्ञासुः. -LESS, *adv.* निःसंशयं, निःशंकं.

QUIBBLE, *s.* वाक्छलं, वक्रोक्तिः *f.*, वक्रभणितं, कैतववादः, अप-व्यप-देशः, अपलापः, अपह्नवः. -*v. i.* अपलप् 1 P, वक्रं भण् or वद् 1 P, अपदिश् 6 P, वाक्छलं कृ 8 U. -ER, *s.* अपलापिन् *m.*, वक्रोक्तिवादी. -ING, *s. See* (*s.*).

QUICK, *a.* क्षीघ्र, त्वरित, द्रुत, क्षिप्र, सत्वर, अविलंबित, तूर्ण; 'q.-wit' प्रत्युत्पन्नधीः-मतिः &c.; 'q. as thought' मनोजवेन, संकल्पस्य °त्वरयेव. **2** तीक्ष्ण, सूक्ष्म, तीव्र, क्षीघ्रग्राहिन्, आशुकारिन्. **3** क्षीघ्र, शीघ्र-द्रुतगति, सवेग, चपल; *See* SHARP. **4** सजीव, चल, स्पंदमान; 'q. with child' चलितगर्भा, आपन्नसत्त्वा, *See* PREGNANT; 'be q.', 'q., q.' त्वरस्व, त्वरस्व; 'q.-lime' चूर्णजलं, ततचूर्णं; 'q.-sight' तीक्ष्ण-सूक्ष्म-दृष्टि *f.*; 'q.-silver' पारदः; *See* MERCURY; 'q.-witted' क्षीघ्र-तीक्ष्ण-बुद्धि-मति, प्रत्युत्पन्नमति. -*adv.* Quickly, q. v. -*s.* मर्मन् *n.*, मर्मस्थानं-देशः; 'piercing to the q.' मर्मस्पृश्-भिद्-च्छिद्-आदिभू. -EN, *v. t.* त्वर् c. (त्वरयति), गतिं वृध् c. **2** जीव् c., सोच्छ्वास- *a.* कृ 8 U, जीवं दा 3 U. **3** उद्दीप् c., उत्तिज् c., शो 4 P, प्ररुह् c., वृध् c.; *See* SHARPEN. -*v. i.* त्वर् 1 A, द्रुततरं गम् or चल् 1 P. **2** जीवित्वं-चैतन्यं-प्राप् 5 P, सजीवीभू. **3** स्पंद् 1 A, चल् 1 P, स्फुर् 6 P. -ENING, *a.* जीवद, उद्दीपक. -LY, *adv.* क्षीघ्रं, सत्वरं, त्वरितं, तूर्णं, लघु, आशु, क्षिप्रं, द्रुतं, अविलंबं, अविलंबितं, चपलं, अरं, क्षीघ्र-क्षिप्रद्रुत in comp.; 'going q.' द्रुतगामिन्, क्षीघ्रगामि. **2** अह्नाय, सपदि, सयः, झटिति, अचिरात्, अचिरेणैव. -NESS, *s.* क्षीघ्रता, तीक्ष्णता, &c.

QUIESCENT, *a.* निश्चल, निश्चेष्ट, स्थिर, अचल, विरत, शांत. -QUIESCENCE, *s.* निश्चलता, चेष्टाभावः, शांति *f.*, &c.

QUIET, *a.* शांत, प्र-उप-°, निश्चल, अचल, स्थिर, विष्कंप; अक्षुब्ध, अव्याकुल, स्तिमित, निर्वात, निवृत्तवायु, (sea); विरत, विश्रांत. **2** सौम्य, मृदु, अचंड, अनुग्र; *See* MILD. **3** स्वस्थ, निर्विघ्न, अबाध, निरुपद्रव, निरुपप्लव, निरुद्वेग, अभंग. **4** निःशब्द, तूष्णीक; 'keep q.' मौनमवलंबस्व, जिह्वां धारय, तूष्णीं भव, जोषमास्स्व. -*s.* स्थिरता, निश्चलत्वं, शांति *f.*, शमः, प्र-उप-°, विश्रामः, स्वास्थ्यं, निरुपद्रवता, निर्वातत्वं, अक्षोभः, निरुपप्लवता, &c. -*v. t.* सांत्व् 10, प्र-उप-शम् c. (शमयति), निवृत् c., विरम् c., विश्रम् c., स्थिरीकृ 8 U. -ISM, *s.* शमः, वैराग्यं, निवृत्तिमार्गः. -IST, *s.* विरागी. -LY, *adv.* शांतं, शांत्या, निराकुलं, अव्याकुलं, अक्षुब्धं, स्वास्थ्येन, अनुग्रं, अचंडं; तूष्णीं, निःशब्दं. -NESS, -ITUDE, *s.* शमः; *See* (*s.*).

QUILL, *s.* पक्षः, पर्ण; (for writing) कलमः, लेखनी; (of a lute) रणः, शारिका, कोणः; (of a porcupine) शलं, शललं-ली.

QUILT, *s.* तूला, तूलिका, तूलिकाप्रच्छदः-संस्तरः; प्रच्छदपटः. -*v. t.* तूलादिना निबिड् 4 P.

QUINARY, *s.* पंचकं. -*a.* पंचरूप, पंचक.

QUINDECAGON, *s.* पंचदशभुजः.

QUINQUENNIAL, *s.* पंचवार्षिक (की *f.*), पंचवर्षीय.

QUINSY, *s.* श्लेष्मजा रोहिणी; कंठपाकः.

QUINTESSENCE, *s.* सारः, तत्त्वं; *See* ESSENCE.

QUINTUPLE, *a.* पंचगुण; पंचविध.

QUIP, *See* TAUNT.

QUIRE, *s.* गायकगणः.

QUIRK, *s.* Quibble, q. v. **2** उपालंभः, अवक्षेपः, धिक्कारः. **3** छंदस् *n.*, मनोलौल्यं; *See* FANCY. -ISH, *a.* चपल, लोलमति.

QUIT, *v. t.* त्यज् 1 P, हा 3 P, अपास् 4 U, वि-उत्-सृज् 6 P ; *See* ABANDON ; अप-सृप् 1 P, निर्गम् 1 P, अप-या 2 P, व्यप-इ 2 P, (with abl.). **2** (Debt) वि-मुच् 6 P or c., शुध् c., निस्तृ c., निरा-अपा-कृ 8 U. —*a.* वि-,मुक्त, शोधित, निस्तीर्ण. —TANCE, *s.* निष्कृति *f.*, मोक्षः, शुद्धि *f.*, निस्तारः, मुक्ति *f.*, साधनं; ' q. of a spite ' वैरशुद्धिः-साधनं.

QUITE, *adv.* सर्वथा, सर्वज्ञः, साकल्येन, निःशेषं. **2** सुअति pr.; अत्यंतं, अतीव, भृशं; *See* EXCEEDINGLY.

QUIVER, *s.* तूणः-णी, तूणीरः, निषंगः, इषुधिः, उपासंगः. —*v. t.* स्फुर् 6 P, कंप् 1 A, स्पंद् 1 A, वेप् 1 A. —ED, *a.* तूणिन्, तूणीरभृत्. —ING, *a.* कंपमान, वेपमान, कंपित, स्फुरित, सकंप, चंचल, लोल, चपल. —*s.* स्फुरणं, स्पंदनं, कंपः-पनं.

QUIZ, *s.* उपहासकः, अवक्षेपकः. —*v. t.* उप-अव-हस् 1 P, अवक्षिप् 6 P.

QUOIT, *s.* चक्रं, वलयः-यं. —*v.* चक्रैः क्रीड् 1 P.

QUONDAM, *a.* पूर्व; *See* FORMER.

QUORUM, *s.* निर्दिष्टसंख्या, कार्यनिर्वोढक्षमा संख्या.

QUOTA, *s.* अंशः, भागः.

QUOTE, *v. t.* उद्-हृ 1 P, अवतृ c., उपन्यस् 4 U, उद्-धृ 6 P, उदा-हृ, उप-नी 1 P. —ATION, *s.* उद्धारः, अवतरणं, उद्धरणं, उपन्यासः, उद्धृत-अवतारित-वाक्यं-लेखः.

QUOTH, *v.* आह, वदति, &c.

QUOTIDIAN, *a.* दैनंदिन (नी *f.*), प्रात्याहिक (की *f.*); अन्येद्युष्क.

QUOTIENT, *s.* फलं, गुण्यः; ' by dividing is obtained the q. ' भजनेन लब्धो गुण्यः.

R.

RABBIT, *s.* शशः, शशकः.

RABBLE, *s.* प्राकृताः, पृथक्-प्राकृत-जनाः, नीचाः, प्राकृतगणः.

RABID, *a.* उन्मत्त, संभ्रांत, विक्षिप्तचित्त, वातुल. —LY, *adv.* सोन्मादं, उन्मत्तवत्. —NESS, *s.* उन्मादः, वातुलता.

RACE, *s.* अन्वयः, कुलं, वंशः, संतानः, संतति *f.*, वंशावलि-ली *f.*, गोत्रं. **2** जाति *f.*, वर्गः. **3** March, q. v. **4** चर्या, धावनं. **5** मूलं; ' to run a r.' अहमहमिकया-परस्परजिगीषया-धाव् 1 P ; ' slow and steady wins the r.' मंदोप्यविरतोद्योगः सदा विजयभाग्भवेत्, (कूर्मवृत्तिं समास्थाय सर्वत्र विजयी भवेत्); ' r.-course ' चर्याभूमि *f.*; ' r.-horse ' जवाश्वः; जवनः. —*v. i.* धाव् 1 P; *See* RUN.

RACK, *s.* तीव्रवेदना, यातना, अतिव्यथा; ' put to the r. ' अर्द् 1 P or c., संपीड् 10. **2** गवादनी, द्रोणि-णी *f.* **3** संपीडनयंत्रं, प्रमाथ-यातना-यंत्रं; ' r. and ruin ' उच्छेदः. —*v. t.* अत्यंतं पीड् or व्यथ् c. (व्यथयति), यातनायंत्रेण पीड् or प्रमथ् c.

RACKET, *s.* कोलाहलः, कलकलः, तुमुलरवः. **2** गुलिकाताडनी. —Y, *a.* तुमुलकारिन्.

RACY, *a.* सरस, रसवत् ; तीक्ष्ण-उग्र-रस.

RADIATE, *v. i.* निर्गम् 1 P, समंततः प्रभ् 1 P or उद्-इ 2 P (rays) ; स्फुर् 6 P, किरणान् विकृ 6 P or प्रभ् c., दीप् freq. (देदीप्यते). —ION, *s.* अंशुप्रसरणं-स्फुरणं, किरणपातनं-विकिरणं. —RADIANT, *a.* उज्ज्वल, दीप्तिमत्, सुप्रभ, देदीप्यमान, तेजस्विन् ; *See* BRIGHT. —LY, *adv.* सुप्रभं, अतितेजसा, उज्ज्वलं. —RADIANCE, *s.* प्रभा, दीप्ति *f.*, कांति *f.*, तेजस् *n.*, औज्ज्वल्यं ; *See* LUSTRE, LIGHT.

RADICAL, *a.* मूलं in comp., मौलिक (की *f.*); मौल (ली *f.*). **2** निसर्गज, स्वाभाविक-नैसर्गिक (की *f.*); *See* NATURAL. —LY, *adv.* समूलं, मूलतः, आमूलं. **2** स्वभावतः, प्रकृत्या, जातितः.

RADISH, *s.* मूलकः-कं.

RADIUS, *s.* त्रिज्या, जीवा ; व्यासार्धं, विष्कंभार्धं. **2** (Of a wheel) अरः.

RAFF, *s. See* RABBLE.

RAFT, *s.* उडुपं, प्लवः, कोलः, तरंडः.

RAFTER, *s.* तुला, दीर्घस्थूणा-काष्ठं, दीर्घदारु, गृहस्थूणा.

RAG, *s.* वस्त्रखंडः-डं, पटखंडः, चीरं, चीवरं, कर्पटः, न-(ल)क्तकः. **2** जर्जर-जीर्ण-वस्त्रं, पटचरं ; ' dressed in r. s ' चीरवाससं, परिहितचीरं, कर्पटिकं. —GED, *a.* जीर्ण, जर्जर.

RAGE, *s.* संरंभः, मन्युः, रोषः, क्रोधः, प्रकोपः, उत्तापः, संतापः, क्रोधावेशः, अमर्षः. **2** उत्कटेच्छा, लालसा, तीक्ष्णता, उच्चंडता, तीव्रता, उग्रता, तिग्मता. —*v. i.* नितरां क्षुभ् 4 P, 1 A, क्रुध्-रुष्-कुप् 4 P, संरंभं-मन्युवशं-गम् 1 P or प्राप् 5 P, क्रोधाकुल-*a.* भू 1 P. **2** उग्र-चंड-तीक्ष्ण-*a.* भू ; ' r. on (oh ? cloud)' गर्ज, गर्जस्तिष्ठ. —FUL, *a.* क्रोधान्वित, कोपाकुल, रुष्ट, कुपित, जातामर्ष, संरंभित. —ING, *a.* संरंभिन्, उग्र, तीक्ष्ण, तीव्र, उच्चंड, वेगवत्.

RAIL, *v. i.* अव-आ-अधि-क्षिप् 6 P, अप-भाष् 1 A, अपवद् 1 A, आकुश् 1 P, शप् 1, 4 U, गर्ह् 1, 10 A, निंद् 1 P, भर्त्स् 10 A; ' r. ing words ' आक्षेपवादः, गर्हणा, निंदावचः. —*v. t.* लोहस्तंभैः परिवृ 5 U or परिवेष् 1 A or c., निरुध् 7 U. —*s.* लोहशंकुः-शलाका-तुलाः ' r.-way,' 'r.-road ' लोहपथः-मार्गः. —ER, *s.* अवक्षेपकः, निंदकः, निर्भर्त्सकः, अपवादकः, आक्रोशकः. —ING, *s.* लोहावरणं, लोहशलाकावृति *f.* **2** अव-आ-क्षेपः, आक्रोशः, निंदा, निर्भर्त्सना, गर्हणा, अपवादः, उपालंभः, अपभावणं, तिरस्कारः.

RAIMENT, *s.* वस्त्रं, वसनं, वासस् *n.*, अंबरं, आच्छादनं, वेशः-षः, परिच्छदः; *See* CLOTH, GARMENT ; ' food and r. ' प्रासाच्छादनं, अन्नवस्त्रं.

RAIN, *s.* वृष्टि *f.*, वर्षः-र्षं, पर्जन्यः ; 'gentle r.' क्षीकरासारः; 'heavy r.' अतिवृष्टिः; 'shower of r.' धारासंपातः, धारासारः; (r. s) वर्षाः *f.* (pl.), प्रावृष् *f.*, वर्ष-मेघ-घन-समयः-कालः, मेघागमः, तपात्ययः, वर्षाकालः; 'r.-bow' इंद्रधनुस् *n.*, इंद्रचापं, and similar comp. ; सुरधनुः, इंद्रायुधं; 'r.-fall' वर्ष-वृष्टि-पातः ; 'r.-water' वृष्टि-वर्ष-जलं. —*v. i.* वृष् 1 P, (the subject being 'Indra' 'Sky' or 'Cloud'), जलं स्रु or पत् 1 P; 'when it was r. ing gently' मंदं मंदं वर्षति जलधरे-गगनेवासवे, &c. ; 'it r. ed in torrents' धारासारैर्वृष्टिर्बभूव ; 'to r. off', 'cease to r.' विरम् वृष्. —*v. t.* वृष्, जलं स्रु c. —Y, *a.* वृष्टिमत्, वर्षिन्, प्रावृषिक (की *f.*) ; 'a r. day' दुर्दिनं ; 'r. season' वर्षाः, प्रावृड्; *See* (*s.*).

RAISE, *v. t.* उत्-स्था c. (उत्थापयति), in all senses ; उत्तुल् 10, उन्नी 1 P, उच्छ्रि 1 U, उत्कृष् 1 P ; उत्क्षिप् 6 P, उद्यम् 1 A, उन्नम् c. (नमयति), उद्-हृ-धृ 1 P, उद्-हन् 2 P ; आत्मोद्धतैरपि रजोभिः (S. 1) 'r. ed by themselves' ; आ-अधि-रुह् c.; oft. ex. by उत् in comp. ; 'having r. ed his neck' उत्कंधरः; उन्मुख: &c.; 'r. ing both his arms' बाहू उद्यम्य. 2 उन्नम् c., उत्कृष्, उच्छ्रि, पदवृद्धिं कृ 8 U, प्रतिपत्तिं प्राप् c., उत्कृष्टपदे नियुज् 7 A, 10. 3 (Doubt, anger, &c.) उत्पद् c., जन् c., प्रवृत् c.. उत्था c.; *See* CAUSE. 4 वृध् c., *See* INCREASE ; (building) निर्मा 3 A, 2 P, रच् 10 ; (tax) ग्रह् 9 P; *See* LEVY; 'to r. one's voice' उच्चैः-तारस्वरेण-वद् 1 P; 'r. a cry' उत्क्रुश् 1 P, उद्-घुष् 10 ; 'r. dust' रजः उद्धून्, उद्-धू 5, 9 U, 6 P ; 'r. a siege' अवरोधं त्यज् 1 P or मुच् 6 P. —ED, *a.* उत्थापित, उच्छ्रित, उन्नत, उन्नामित, उद्यत, उत्थित, उद्धत ; उत्पन्न, जात, जनित; oft. by उत्, उद्यत, उच्छ्रित in comp.; 'having the arms r.' उद्बाहुः &c. —ING, *s.* उत्थापनं, उन्नयनं, उन्नति *f.*, उत्क्षेपः, &c.

RAISIN, *s.* शुष्कद्राक्षा.

RAKE, *s.* विटः, लंपटः, ध्यसनिन् *m.*, खंडितवृत्तः; *See* LIBERTINE. 2 दंतच्छुरिका-कर्तरिका. —*v. t.* समाह 1 P, संग्रह् 9 P, सं-चि 5 U. 2 पुनर्जीव् c.; उज्जीव् c. —*v. i.* व्यभिचर् 1 P, लंपटवत् आचर् 1 P, भोगासक्त्या आयुः गम् c. —ISH, *a.* व्यसनिन्, लंपट, भोगासक्त, विषयसुखनिरत.

RALLY, *v. i.* एकत्र-सं-भू 1 P, संमिल् 6 P, व्यूहीभू; *See* ASSEMBLE. 2 (Fig.) सुस्थ-*a.* भू ; प्रकृतिं आ-पद् 4 A, प्रकृतौ स्था 1 P, समुत्थ, बलं लभ् 1 A. —*v. t.* एकत्र आनी or समाह 1 P, पुनः व्यूह् 1 U or क्रमेण विन्यस् 4 U or विरच् 10. 2 Jest, q. v.

RAM, *s.* मेषः, उरभ्रः, उरणः, अविः, एडकः, मेदुः, ऊर्णायुः, वृष्णिः, हुडुः, लोमशः ; 'a flock of r. s' औरभ्रं. 2 (Sign) मेषः, मेषराशिः. —*v. t.* बलात्-अतिबलेन प्र-नि-विश् c. or प्रणुद् c., or संपीड् 10 'R.-rod', 'battering-r.' चूर्णप्रमोदनी यष्टिः.

RAMBLE, *v. i.* परि-अट् 1 P, परिभ्रम् 1, 4 P; विह. 1 P, इतस्ततः चर् 1 P or भ्रम् ; 'r. ing from the subject' अप्रस्तुतालापः. —*s.* परिभ्रमणं, पर्यटनं, विहारः, विहरणं. —ER, *s.* पर्यटनशीलः, पथिकः, भ्रमणकारिन्.

RAMIFY, *v. i.* शाखाप्रतिशाखारूपेण विस्तृ pass., उपशाखारूपेण विभिद् pass. —*v. t.* बहुशाखीकृ 8 U. —IED, *a.* शाखिन्, सूक्ष्मशाखामय (यी *f.*), शाखाप्रतिशाखारूपेण विस्तीर्ण. —ICATION, *s.* प्र-प्रति-शाखा, सूक्ष्म-उप-शाखा.

RAMMER, *a.* मुद्गरः, घनः, अयोघनः.

RAMMISH, *a.* उग्र-तीक्ष्ण-गंध.

RAMOUS, *a.* शाखिन्, शाखाबहुल.

RAMP, *v. i.* भ्रु 1 A, वल्ग् 1 P. —*s.* भ्रुतिं *f.*, भ्रुतं, वल्गितं; *See* LEAP. —RAMPANT, *a.* अनियंत्रित, निरवग्रह, निर्यंत्रण, उच्छृंखल. 2 अतिरिक्त, उद्रिक्त, उत्सिक्त, अतिमर्याद. 3 पश्चात्पादयोः स्थित. —RAMPANCY, *s.* अनियंत्रणा, अतिरेकः, उत्सेकः, अतिक्रमः, उत्क्रमः.

RAMPART, *s.* प्राकारः, वप्रः-प्रं, वरणः, सालः; *See* FENCE.

RANCID, *a.* उग्र-तीक्ष्ण-रस-गंध, विरस, पूतिगंधि.

RANCOUR, *s.* अभिद्रोहः, विद्वेषः, अतिद्वेषः-द्रोहः, अतिमात्सर्यं; *See* MALICE. —OUS, *a.* अभिदुग्ध, विद्वेषिन्, अति-दीर्घ-द्वेषिन्-द्रोहिन्, द्रोह-मत्सर-बुद्धि. 2 जिघांसु; विषपूर्ण, दंशशील. —OUSLY, *adv.* सद्वेषं, अतिद्रोहेण.

RANDOM, *a.* आकस्मिक-यादृच्छिक (की *f.*), अनियत, अयंत्रित, संधानहीन, दैवादागत, अतार्किकोपनत, सहसा उत्पन्न; 'at r.' अकस्मात्, यदृच्छया, निःसंधानं, अविचार्य, सहसा, असंबद्धं, अनियतं, उच्छृंखलं; अव्यवस्थया, अक्रमेण; 'talk at r.' अक्रमेण जल्प् or वद् 1 P, (जल्पतोरक्रमेण U. 1); 'oh! how he lies at r. carelessly diffused on the ground' हा हा कथं धरणीपृष्ठे निरुत्साहनिःसहं विपर्यस्तः (U. 3).

RANDY, *a.* *See* DISORDERLY.

RANGE, *s.* राजिः, श्रेणिः-णी, माला, पंक्तिः, ततिः, आवलिः-ली, आलिः-ली, वीथिः-थी, (all *f.*). 2 गणः, वर्गः, वर्णः. 3 परिभ्रमणं, पर्यटनं. 4 सोपानं, आरोहणं. 5 विषयः, पथिन् *m.*, गोचरः in comp.; 'beyond the r. of sight' चक्षुर्विषयं-नयनगोचरं अतीत्य or अतीत; 'within the r. of hearing' श्रुतिपथे-विषये-गोचरे; 'beyond the r.' अविषये, अविषय-विषयातीत-*a.*; 'r. of an arrow' शरपातः, बाणविषयः. —*v. i.* परिभ्रम् 1, 4 P, विचर् 1 P, विह 1 P (for diversion); 'r. about' इतस्ततो भ्रम्,

पयेट् 1 P. 2 स्था 1 P, वृत् 1 A; *See* BE. -*v. t.* विन्यस् 4 U, क्रमेण रच् 10, व्यूह् 1 U. -ER, *s.* लुब्धकः, व्याधः. 2 वनग्राहिन् *m.*, वनपालः.

RANK, *s.* श्रेणि-णी *f.*, पंक्ति *f.*, राजि *f.*; *See* RANGE, LINE. 2 (Of an army) व्यूहः, दंडः, सैन्यपंक्तिः-विन्यासः. 3 वर्गः, वर्णः, गणः. 4 पदं, स्थानं, आस्पदं, वृत्ति *f.*, स्थिति *f.* 5 प्रतिष्ठा, मानः, गौरवं, उत्कर्षः, उन्नति *f.*, प्रतिपत्ति *f.*, प्राधान्यं, उच्च-परम-पद-पदवी, कुलोत्कर्षः, आभिजात्यं; ' a man of high r.' प्रतिपन्निमत्, अभिजात, कुलीन, उच्चपदभाक्. -*v. i.* समान-तुल्य- *a.* वृत् 1 A or स्था 1 P; पंक्तिक्रमेण स्था. -*v. t.* पंक्तिक्रमेण न्यस् 4 U or रच् 10, वर्गक्रमेण रच्; oft. ex. by वर्ग-पक्षे-स्था c. or गण-कृत्-10, (दृष्टिपातमप्युपकारपक्षे स्थापयंति Ka. 108); ' fit to be r. ed first ' धुरि प्रतिष्ठापयितव्य or कीर्तनीय. 2 तुल्य-सम- *a.* मत् 4 A. -*a.* प्रभूत, प्रचुर, विपुल, अतिस्फीत, अतिरिक्त, उद्रिक्त. 2 उग्रगंध, पूतिगंधि, तीक्ष्णगंध. -NESS, *s.* उद्रेकः, अतिस्फीति-वृद्धि *f.*, अतिरेकः, प्रचुरवृद्धिः. 2 उग्रता, तीक्ष्णता.

RANKLE, *v. i.* उद्दीप् 4 A; उग्रतर-तीक्ष्णतर- *a.* भू 1 P; oft. ex. by शल्यं; ' those words r. in my heart ' तद्वचो मम हृदये शल्यं जातं, शल्यमिव हृदये प्रत्युप्तं; ' I r. in his eyes ' अक्षिगतोऽहं तस्य. 2 अंतः पूय् 1 A or पूतीभू ; ' the wound r. ed ' स प्रहारः करालतां गतः (P. IV. 3).

RANSACK, *v. t.* लुंट्-ठ् 1 P, 10; *See* PLUNDER. 2 निपुण-सूक्ष्मं-अन्विष् 4 P or मृग् 10 A.

RANSOM, *s.* निष्क्रयः; उद्धारः, निस्तारः, मुक्ति *f.*, मोक्षः; निस्तार-परिक्रय-मूल्यं. -*v. t.* मूल्यं-धनं-दत्वा मुच् c. or उद्धृ 1 P or निस्तृ c., निष्क्री 9 U, परिक्री 9 A. -ER, *s.* निस्तारकः, निष्क्रेतृ *m.*

RANT, *s.* निरर्थक-निरर्गल-प्रलापः, शब्दमात्रं वाक्यं. -*v. i.* उच्चैः स्वरेण प्रलप् 1 P, शब्दपांडित्यं कृ 8 U. -ER, *s.* प्रलापिन् *m.*

RAP, *v. t.* तीव्रं प्रह 1 P or तड् 10 or अभिहन् 2 P. 2 अप-,हृ 1 P; ग्रह् 9 P, चित्तं-मनः-आकृष् 1 P or ग्रह्. -*s.* तीव्रप्रहारः-आघातः. -RAPACIOUS, *a.* अति-,लुब्धक, अपहारिन्, अपहरणशील, ग्रसनबुद्धि, सर्वहारिन्-ग्राहिन्, साहसिक (की *f.*). -LY, *adv.* ग्रसत्र, ग्रसनं, बलात्; अपहारबुद्ध्या, अतिलोभेन. -NESS,-RAPACITY, *s.* साहसिकता, आततायित्वं, अपहारशीलता, अपहरणबुद्धि *f.* 2 लुब्धता, अतिलोभः. -RAPT, *a.* हर्षोन्मत्त ; परमहृष्ट, अत्यानंदितः (for ' wrapt ') पर, लीन, निमग्न in comp. -RAPTURE, *s.* हर्षोन्मादः, आनंदातिरेकः, हर्षावेशः, अत्यंतहर्षः, प्रहर्षः, उन्मादः. -ED, *a.* हर्षोन्मत्त, उन्मत्त. -OUS, *a.* उन्मत्त, परमहर्षद, मोहन; ' r. joy ' परमानंदः. -OUSLY, *adv.* सोन्मादं, परमहर्षेण; *See* ECSTASY.

RAPE, *s.* अप-,हरणं, 2 दूषणं, बलात्कारेण-बलात्-रतं-संभोगः; हठसंभोगः, आधर्षः-र्षणं, बलात्कारः, स्त्रीसंग्रहः; ' to commit r. ' बलात्कारेण रम् 1 A or अभिगम् 1 P or संगम् 1 A, आधृष् c.

RAPID, *a.* शीघ्र, द्रुत, क्षिप्र, लघु. -ITY,-NESS, *s.* त्वरा, वेगः, तरस् *m.*; द्रुतता. -LY, *adv.* शीघ्रं, सत्वरं, द्रुतं. *See* QUICK,-LY &c.

RAPIER, *s.* क्षुरिका, क्षुरिकातैरिका, क्षुद्रकृपाणः.

RAPINE, *s.* *See* PLUNDER, PILLAGE.

RARE, *a.* विरल, दुर्लभ, दुष्प्राप, अप्राप्य, असुलभ; ' of r. occurrence ' विरल, विरलदृष्ट. 2 अपूर्व, अदृष्टपूर्व, परम, अत्युत्तम, अतुल्य, अत्युत्कृष्ट. 3 विरल, सूक्ष्म, अघन. -LY, *adv.* विरलं, क्वचित्, कृच्छ्रेण, कथमपि, कष्टेन, दुर् pr.; oft. ex. by (*a.*); ' r. to be found ' दुष्प्राप, दुर्लभ ; ' r. to be seen ' दुर्लभदर्शन. -NESS, *s.* विरलता, दुष्प्रापता, दुर्लभत्वं. 2 अपूर्वता, अत्युत्तमता. 3 सूक्ष्मता. -RARITY, *s.* अपूर्वं वस्तु, चमत्कारः, कौतुकं, दुर्लभवस्तु. 2 Rareness, q. v. -RAREFY, *v. i.* सूक्ष्मी-तनू-विरली-भू 1 P. -*v. t.* तनूकृ 8 U, विरलीकृ.

RASCAL, *s.* धूर्तः, दुर्जनः, जाल्मः, शठः, कितवः, दुरात्मन् *m.*, दुर्वृत्तः, खलः, पापात्मा, नियचरितः, अधमजघन्य-वृत्तिः. -ITY, *s.* धूर्तता, दौर्जन्यं, दौरात्म्यं, कैतवं, शाठ्यं, खलता, पापवृत्ति *f.*, अधम-नीच-वर्तनं. -LY, *a.* *See* (*s.*).

RASE, *v. t.* प्रमृज् 2 P or c., विलुप् c. ; घृष् 1 P, उल्लिख् 6 P. 2 भूमिसात्कृ 8 U; *See* RAZE, ERASE. -URE, *s.* प्रमार्जनं, विलोपनं.

RASH, *a.* क्षिप्र-अविमृश्य-असमीक्ष्य-कारिन्, अविवेकिन्, अपरिणामदर्शिन्, साहसिन्, साहसिक (की *f.*), अदूरदर्शिन्, असावधान. 2 (Of acts) असमीक्ष्य &c. कृत; अविमृष्ट, सरभस, साहसिक, अविचार-असमीक्षा-पूर्व; better ex. by ' r.-ly.' -*s.* Eruption, Pimple, q. v. -LY, *adv.* असमीक्ष्य, अविमृश्य, सहसा, अविवेकेन, अविचार्य, अनालोच्य, अनवेक्षा-अविवेक-पूर्वं, सरभसं, क्षिप्रं, उत्तापेन, सावेगं. -NESS, *s.* असमीक्ष्य-अविमृश्य-कारिता, साहसं, अविवेकः, अविचारः, असमीक्षा, अनवेक्षा, रभसः, आवेगः, उत्तापः.

RASHER, *s.* (वह्नूर) खंडः, छेदः.

RASP, *s.* सं-,घर्षणी. -*v. t.* घर्षण्या घृष् 1 P.

ROGUE, *s.* धूर्तः, कितवः, जाल्मः, शठः, खलः, वंचकः, प्रतारकः, कापटिकः, कूटकः, कूटकारः, दुर्जनः, दुरात्मन् *m.*, कुहकः. -ERY, -ISHNESS, *s.* कैतवं, शाठ्यं, दौर्जन्यं, वंचनं, &c. -ISH, *a.* धूर्त, शठ, कितव; *See* (*s*). -ISHLY, *adv.* धूर्ततया, शाठ्यात्, सकैतवं.

ROLL, *v. i.* वि-लुठ् 6 P, वि-लुड् 1, 4 P. 2 परि-व्या-वि-वृत् 1 A, परि-,भ्रम् 1, 4 P, घूर्ण् 6 P, 1 A; (about) प्र-वि-चल् 1 P, घूर्ण्, वि-लुल् 1 P; 'with eyes r. ing about' घूर्णलोचन, लोलाक्ष, विलोलदृष्टि. 3 (On, by &c.) व्यति-इ 2 P, गम् 1 P, अति-व्याप्ति-क्रम् 1 U, 4 P, परि-,आ-वृत्, परि-इ; 'as days r. ed on' दिनेषु गच्छत्सु, गच्छता कालेन; 'a cloud r. s on through the air' मेघः खमाक्रमितुं प्रवृत्तः (Mr. 5); 'which has r. ed out at the feet of the Vindhya' विंध्यपादे विशीर्णा (Me. 19). -*v. t.* व्या-परि-वृत् c., घूर्ण् c., भ्रम् c., &c.; 'r. down' रयेण नी 1 P; 'r. ing down corpses' प्रेतवाहिनी (नदी). 2 लुट्-ठ् c., वि-प्र-°. 3 पिंडीकृ 8 U, संपुटीकृ, संपिंड् 10. 4 आ-परि-वेष्ट् c., अवगुंठ् 10, आ-प्रा-वृ 5 U. -*s.* लुठनं, परिवर्तनं, &c. 2 पिंडः, गोलः-लकः, नाली. 3 नामावलि-ली *f.* -ER, *s.* परि-,वर्तनी, वर्तनयंत्रं-चक्रं. 2 वेलनं-नी (for flour). 3 पटः. -ING, *s.* लोठनं, परि-व्या-वर्तनं, घूर्णनं, परि-,भ्रमणं, &c. -*a.* घूर्णत, वि-,लोल, प्रचलित.

ROMANCE, *s.* आख्यायिका, कल्पितकथा. -*v. t.* आख्यायिकां लिख् 6 P or प्रबंध् 9 P. -ROMANTIC, *a.* अद्भुत, विचित्र, आश्चर्यभूत. 2 शूर, विक्रांत; अद्भुतप्रिय, अश्रृंखलवृत्ति. 3 असंभव, कल्पित.

ROMP, *v. i.* प्रगल्भं क्रीड् 1 P, उद्धतं खेल् 1 P, (U. 4). -*s.* उद्धतखेलनं, प्रगल्भ-अविनीत-क्रीडा. 2 प्रगल्भा, अविनीता, निर्लज्जा; क्रीडाशीला.

ROOF, *s.* छदिस् *f.*, पटलं; 'the wooden frame of a r.' गोपानसी, वल(ड)भी; 'the edge of a r.' वलीकं, नीध्रं. 2 तालु *n.* (of the mouth). -*v. t.* पटलेन आच्छद् 10. -ED, *a.* सपटल, पटलाच्छन्न. -LESS, *a.* निष्पटल; (fig.) निराश्रय.

ROOK, *a.* काकः, वायसः. -ERY, *s.* काकाश्रयः.

ROOM, *s.* वेश्मन् *n.*, प्र-,कोष्ठः, शाला, कक्षः-क्षा, कुटी, गृहं; 'upper r.' चंद्रशाला, शिरोगृहं; 'inner r.' गर्भागारं, वासगृहं, अंतःकोष्ठः. 2 प्र-,देशः, स्थानं, आस्पदं, भूमि *f.*, पदं; स वासवेन इतो निषादेति विसृष्टभूमिः (K. III. 2) 'Vâsava made r. for him' &c.; 'there is r. for doubt here' शंकास्थानमेतत्. 3 अवकाशः, अवसरः, प्रसरः, विषयः, अंतरं, स्थलं; 'want of r.' अनवकाशः, स्थलसंकोचः; 'giving no r. for envy' अदत्तावकाशा मत्सरस्य; 'make r.' अंतरं दीयतां, अपसर. 4 (Stead) स्थानं, भूमिः; *See* INSTEAD of. -Y, *a.* विशाल, विस्तीर्ण, विपुल, असंबाध, सावकाश.

ROOST, *s.* वासयष्टि *f.*, यष्टिनिवासः, निलयन-शयनदंडः-स्थानं. -*v. i.* शी 2 A, स्वप् 2 P, निली 4 A, निषद् 1 P, आश्रि 1 U.

ROOT, *s.* मूलं, in all senses; तरुमूलं, कलहमूलं &c.; अंघ्रिः, पादः (Foot, q. v.); बु(ब्र)ध्नः; शिफा, जटा (fibrous); 'bulbous r.' कंदः-दं; 'to the r. s' आमूलं, मूलतः, समूलं; 'the r. of a branch' अवरोहः. 2 अधोभागः-देशः, तलं, मूलं, जाहं in comp. (of animals only). 3 मूलं, बीजं, योनि *f.*, आदिः, निदानं, कारणं, आदिबीजं-कारणं-हेतुः, प्रकृति *f.*; 'having for its r.' मूल, हेतु, &c. in comp.; वित्तमूलः कलहः, &c. 4 (Of a word) मूलं, प्रकृतिः, शब्दयोनिः; 'r.-meaning' मूलार्थः, यौगिकार्थः, व्युत्पत्तिसिद्धः. 5 (Of numbers) मूलं, पदं; 'to extract a r.' मूलीकृ 8 U. -*v. i.*, 'take r.' मूलं बंध् 9 P. -*v. t.* दृढं निखन् 1 P or रुह् c.; ex. by 'r.-ed', 2 (Up) उन्मूल् 10, समूलं उद्-हृ 1 P, उत्पह्

10, उत्खन्, व्यपहृ c., उच्छिद् 7 P. -ED, *a.* वृद्ध-बद्ध-मूल, रूढ-धृत-मूल.

ROPE, *s.* रज्जु *f.*, गुण:. दामन् *f. n.*, शुल्वं, वराटक:-कं, संदानं, वट:-टी-टं; 'the rope and bucket of a well' उद्घाटनं, घटीयंत्रं; 'r.-dancer' सूत्रायण:-कलायण:; 'r.-ladder' रज्जुसोपानं; 'r.-maker' रज्जुकार:. -Y, *a.* रज्जुधर्मन्, श्यान, सांद्र.

ROSARY, *s.* अक्षमाला, अक्षसूत्रं, जपमाला-सूत्रं.

ROSE, *s.* जपापुष्पं, ओड्रपुष्पं; (tree or flower) जपा-वा; सेवती, शतपत्री; 'r.-apple' जंबु-बू *f.*; (fruit) जंबुफलं, जांबवं. -Y, *a.* पाटल, जपावर्ण. 2 जवारूप. -ROSEATE, *a.* 'r.-coloured' पाटल, जपासवर्ण. 2 बहि: रमणीय, दृष्टिमनोहर.

ROT, *v. i.* पूतीभू 1 P, वि-,गल् 1 P, विली 4 A, दुर्गंध- *a.* भू. -*v. t.* गल् c., विली c., पूतीकृ 8 U. -ROTTEN, *a.* पूतिगंधि, दुर्गंध, विगलित, विलीन; पूतीभूत, दुष्ट, दूषित. 2 क्षीणसत्त्व, असार, नि:सत्त्व.

ROTATE, *v. i.* भ्रम् 1, 4 P, चक्रगत्या भ्रम्, परिवृत् 1 A; *See* REVOLVE. -ION, *s.* भ्रमणं, भ्रांति *f.*, आ-परि-वर्ते:-वृत्ति *f.*, चक्रावर्ते:, चक्रगति:. 2 पर्याय:, क्रम:, आनुपूर्व्यं; 'in r.' पर्यायेण, पर्यायवृत्त्या, चक्रवत्, पर्यायानुसारेण, अनुपूर्वं. -ORY,-ROTARY, *a.* चक्रावर्तिन्, चक्रगति.

ROTE, *s.* आवृत्ति *f.*, अभ्यास:, आवर्तनं; 'learn by r.' (अर्थज्ञानं विना) कंठस्थ- *a.* कृ 8 U, अभ्यस 4 U; 'learnt by r.' कंठस्थ, अभ्यस्त.

ROTUND,-ITY, *See* ROUND,-NESS.

ROUGH, *a.* नतोन्नत, विषम, असम, अक्षण. 2 रु(रू)क्ष, परुष, कर्कश, कठिन, अमसृण, असौम्य, अमृदु, दु:स्पर्श; (in disposition) निष्ठुर, उग्र, कटु, कठोर; (in manners) असभ्य, अशिष्ट, असंस्कृत, स्थूल, घन; 'r. measurement' स्थूलमानं. 3 अपटु, अदक्ष, अनिपुण, अकुशल, स्थूल. 4 (Sea) क्षुब्ध, तरंगाकुल, उत्तरंग, वायुक्षुब्ध, पवनाहत. 5 लोमश, लोमावृत, स्थूललोमन्; 'r.-cast' स्थूलं रूपं c. or विधा 3 U; 'r.-draw' स्थूलं लिख् 6 P; 'r.-hew' स्थूलं तक्ष् 1, 5 P or छिद् 7 P; 'r.-rider' अश्वशिक्षक:. -EN, *v. t.* रूक्षी-स्थूली-कृ 8 U. -LY, *adv.* रुक्षं, परुषं, कर्कशं, स्थूलं, निष्ठुरं, &c. -NESS, *s.* वैक्ष्यं, रुक्षता, पारुष्यं, कर्कशत्वं, उग्रता, कठोरता, स्थूलता, अदक्षता; संक्षोभ:, ऊर्मिप्रलोठनं, &c.

ROUND, *a.* वर्तुल, गोल, वृत्त, वृत्ताकार, निस्तल, मंडलाकार, चक्राकृति, वृत्त-गोल-रूप, वलयाकार. 2 पीन, पीवर, उन्नत. 3 अवक्र, असंदिग्ध, परिस्फुट, निश्चित, परिच्छिन्न, व्यक्त; *See* DECIDED. 4 (Number) समग्र, शून्यांतक. -*s.* मंडलं, चक्रं, वर्तुलं, गोल:, वलय:-यं. 2 परिभ्रमण, परिवर्त:, पर्याय:, आवृत्ति *f.*, आवर्त:. 3 चक्रमार्ग:-गति: *f.*; (of a ladder) भंगि *f.*, आरोहणं, सोपानं. -*prep.* परित:, अभित:, (with acc.); समंतत:, समंतात् (with gen.). -*adv.* परि in comp. (with verbs). 2 चक्रवत्, मंडलाकारेण, वलयरूपेण, चक्ररूपेण; 'turn r.' परिवृत् c., परिभ्रम् c.; 'turning r.' चक्रभ्रांति:, परिभ्रमणं, मंडलावृत्ति:; 'to get r.' मतं परिवृत् c. 3 सर्वत:, समंतत:, समंतात्, विश्वत:, सर्वदिक्षु; 'the whole year r.' समग्रवर्षं. -*v. t.* वर्तुलीकृ 8 U, गोलीकृ. 2 परिगम् 1 P, परि-या-इ 2 P. 3 समा-धा 3 U; संस्कृ; 'well-r. ed' सुवृत्त; (fig.) सुसमाहित, सुसंस्कृत; 'r.-about' वक्र, कुटिल, असरल; समंतत:, अभित:, &c. -LY, *adv.* अवक्रं, सपरिच्छेदं, सुव्यक्तं, स्पष्टार्थं. -NESS, *s.* वृत्तता, गोलत्वं, वर्तुलता, पीनता, अवक्रता, स्पष्टता, &c.

ROUSE, *v. t.* (From sleep) वि-प्र-बुध् c., जागृ c.; उत्था c. (उत्थापयति), निद्रां भंज् 7 P or भिद् 7 P. 2 उत्पद् c., जन् c., उद्-प्र-बुध् c., उत्तिज् c., उद्युज् 10, उत्था c., उद्दीप् c., प्रोत्सह् c.; 'r. to action' क्षुभ् c., चेष्ट् c., प्रचुद् 10, कार्ये प्रवृत् c. -*v. i.* Awake, q. v. -*s.* पानोत्सव:, सन्धि *f.*, सपीति *f.*

ROUT, *v. t.* भंज् 7 P, वि-द्रु c., प्र-वि-ध्वंस् c., प्र-पलाय् c. -*s.* भंग:, विध्वंस:, विद्राव:, सैन्यभंग:, व्यूहभेद:, बलव्यसनं. 2 जनसंमर्द:; *See* MOB. 3 कोलाहल:, तुमुलरव:, कलकल:. -ED, *a.* विद्रावित, भग्न, प्रपलायित; भग्नव्यूह, उत्पिंजल, समुत्पिंज, कांदिशीक.

ROUTE, *s. See* ROAD.

ROUTINE, *s.* क्रम:, पर्याय:, अभ्यास:; 'daily r.' दिनक्रम:, दैनिककार्यपरिपाटी-परंपरा; 'r. work' नित्यकर्म; 'usual r.' नित्यक्रम:, नित्याभ्यास:.

ROVE, *v. i.* पर्यट् 1 P, परि-,भ्रम् 1, 4 P, प्र-वि-चर 1 P. -ER, *s.* परिभ्रमक:, पर्यटनकृत् *m.*, भ्रमणशील:. 2 दस्यु:, चौर:. -ING, *s.* परि-,भ्रमण-अटनं, विचरणं.

ROW, *v. t.* (नौदंडेन) वह् c., प्रेर् c., संचल् c., प्रचुद् 10, प्रणुद् c. -*v. i.* नौकां वह् c. or प्रेर् c. &c. -*s.* राजि:, पंक्ति:, श्रेणि:-णी, आवलि:-ली, तति:, माला, (all *f.*); *See* LINE. 2 कलह:, संमर्द:, तुमुलरव:, कोलाहल:. -ER, *s.* नाविक:, पोतवाह:, क्षेपणिधर:, दंडधर:.

ROWEL, *s.* कंटक:.

ROYAL, *a.* राजकीय, राजयोग्य, राजार्ह, नृपोचित; राज नृप in comp. -IST, *s.* राजपक्षीय:, राजपक्षावलंबी. -LY, *adv.* राजवत्, नृपोचितं. -TY, *s.* राजत्वं, राज महिमन् *m.*, राजाधिकार:, नृपत्वं, प्रभुत्वं, आधिपत्य ऐश्वर्यं.

RUB, *v. t.* घृष् 1 P, मृद् 9 P or c. 2 प्र-परि-मृ 2 P or c., प्रक्षल् 10, निज् 3 U, परिष्कृ, श्लक्ष्ण 8 U. 3 चूर्ण् 10, पिष् 7 P, क्षुद् 7 P. 4 अभि-,अं 7 P, दिह् 2 U, लिप् 6 P, मृद्. 5 (Feet) सं c., मृद्; 'r. together' संपिष्, संघृष्; 'r. teeth together' दंतैर्दंतान् घृष् or निष्पिष्;

out' अप-व्या-मृज्, व्यामृश् 6 P or c., विलुप् c., उच्छिद् 7 P. —*v. i.* सं-घट् 1 A, संघृष्. 2 संघर्षेण अपचि-क्षि-pass. or अवसद् 1 P. 3 कृच्छ्रेण सं-उत्-तॄ 1 P, अति-इ 2 P. —*s.* घर्षणं, अभ्यंजनं, संवाहनं, मर्दनं, &c. 2 संघट्टः, समाघातः, संमर्दः. 3 कृच्छ्रं, कष्टं; *See* DIFFICULTY. —BER, *s.* घर्षकः, मार्जकः, मर्दकः. 2 (Substance) घर्षकः. —BING, *s.* घर्षणं, मर्दनं, &c.

RUBBISH, *s.* अवस्करः, उच्छिष्टं, मलं, तुच्छ-निःसार-द्रव्यं.

RUBICUND, *a.* आरक्त, पाटल.

RUBRIC, *s.* व्यवस्था, विधिः.

RUBY, *s.* माणिक्यं, पद्मरागः, शोणरत्नं, लोहितकः. —*a.* रक्त, पाटल, रक्तवर्ण.

RUDDER, *s.* केनिपातः-तकं, अरित्रं, कर्णः.

RUDDY, *a.* रक्त, अरुण; *See* RED.

RUDE, *a.* अविनीत, अविनय, वियात, धृष्ट, अमर्यादं, उद्धत, सम्भ्रमं, असभ्य, अशिष्ट, अनार्य, दुःशील, नष्टविनय, निर्लज्ज, प्रगल्भ. 2 असंस्कृत, अशिष्ट, ग्राम्य, अकृतविद्य, अप्रबुद्ध, अनक्षर, अशिक्षित, विद्याहीन-शून्य. 3 स्थूल, अदक्ष, अनिपुण, अपटु, रूक्ष. —LY, *adv.* अविनयेन, धृष्टवत्, प्रगल्भं, स्थूलं, अशिष्टतया, &c. —NESS, *s.* अविनयः, वैयात्यं, धाष्टर्यं, अमर्यादा, प्रागल्भ्यं, प्रतिभा, अनार्यता, अदाक्षिण्यं. 2 असंस्कारः, अशिष्टता, ग्राम्यता. 3 स्थूलता, अदाक्ष्यं, &c.

RUDIMENT, *s.* उपक्रमः, प्रारंभः, मूलं, प्रथम-मूल-तत्त्वं; 'r.s of knowledge' ज्ञानतत्त्वानि, ज्ञानमूलं, उपक्रमणिका. 2 मूलांगं, बीजं, मूलं, मूलवस्तु-द्रव्यं. —AL, —ARY, *a.* प्राथमिक-मौलिक (की *f.*), मूल-प्रथम-आदि in comp.

RUE, *v. t.* अनुशुच् 1 P, अनुतप् 4 A; *See* REPENT, REGRET. —*s.* व्राह्मी. —FUL, *a.* अनुशोकाकुल, अनुतापार्त, शोकार्त, विषण्ण, उद्विग्न.

RUFFIAN, *s.* आततायिन् *m.*, साहसिकः, वधोद्यतः.

RUFF, RUFFLE, *v. t.* संकुच् 1 P, आकुच् c., पुटीकृ 8 U, चूर्ण् 10; 'r. up' प्र-सं-क्षुभ् c., प्रकुप् c., व्याकुलीकृ, उद्विज् c.; 'not r.ed in disposition' प्रकृतिगंभीर, शांतात्मन्. —*s.* भंगि *f.*, ऊर्मि *f.*, पुटः, चूर्णः. 2 प्र-सं-वि क्षोभः, प्रकोपः, व्याकुलत्वं, उद्वेगः, संभ्रमः, अशांति *f.* —ED, *a.* सं-,क्षुब्ध, क्षोभित, प्रकोपित, आकुल, व्याकुल, व्यग्र, अस्थिर, संभ्रांत, अशांत, उद्विग्न, कातर, पारिप्लव.

RUG, *s.* कंबलः, रल्लकः; आस्तरः-रणं.

RUGGED, *a.* विषम, नतोन्नत. 2 रु(रू)क्ष, कर्कश; *See* HARSH. —NESS, *s.* वैषम्यं, कार्कश्यं.

RUIN, *v. t.* नश् c., वि-प्र-°,प्र-वि-ध्वंस् c., क्षि 5, 9P or c., वि-,लुप् 6 P or c., उच्छिद् 7 P, हन् 2 P or c. (घातयति); उत्-अव-सद् c., नि-अव-पत् c., उद्-इ 1 P, (building); 'r. a man' संपत्ति-विभव-नश् c., परिक्षीण- *a.* क्ष. —*s.* वि-,नाशः, प्र-वि-ध्वंसः, क्षयः, लोपः, विघातः, उच्छेदः, अवसादः, निपातनं, उत्सन्नता, जीर्णता (of a house); 'in r. s' जीर्ण, विशीर्ण, उत्सन्न, जर्जर, जर्जरित. 2 अनिष्टं, अपायः, हानि *f.*, क्षति *f.*, अनर्थः. 3 (Of fortune) परिक्षयः, वित्त-विभव-नाशः, भाग्यक्षयः, ऐश्वर्यनाशः-भंगः-लोपः, परिक्षीणता; 'r. of an army' बलव्यसनं, भंगः, पराभवः, पराजयः; 'to go to r.' परिक्षि-pass., क्षयं-नाशं-या 2 P or -इ 2 P, प्र-वि-ली 4 A; ध्वंस् 1 A; 'r. seize thee' अजीवनिः ते भूयात्; *See* under PERDITION. —ED, *a.* नष्ट, ध्वस्त, क्षीण; अवसन्न, उच्छिन्न, जीर्ण, विशीर्ण, जर्जर, &c. 2 परिक्षीण, नष्टविभव, गतश्रीक, नष्ट-गत-धन-ऐश्वर्य, प्रचलितविभव, क्षीणधन. —OUS, *a.* उत्सन्न, क्षीण, जीर्ण &c. 2 वि-,नाशिन्, नाशावह, नाश-क्षयकर (री *f.*), घातुक, अनिष्टोत्पादक. —OUSLY, *adv.* सनाशं, सक्षयं, सापायं.

RULE, *v.* प्र-,शास् 2P, नि-विनि-यम् 1 P, परिपा c. (पालयति), विनी 1 P, गुप् 1 P, ईश् 2 A (with gen.); अध्यास् 2 A, अधि-स्था 1 P; तंत्र् 10; 'r. ing subjects like one's own children' प्रजाः प्रजाः स्वा इव तंत्रयित्वा (S. 5). 2 आदिश् 6 P, वि-धा 3 U, नियमं-विधि-कृ 8 U, व्यव-स्था c. (स्थापयति); gen. ex. by (*s.*). 3 निग्रह् 9 P, सं-नि-यम्; *See* CONTROL. 4 रेखाभिः अंक् 10. —*s.* शासनं, अधिकारः, प्रभुत्वं, आधिपत्यं, स्वाम्यं, ईशत्वं, ऐश्वर्यं, राजपालनं. 2 विधिः, नियमः, सूत्रं, व्यवस्था; (moral &c.) मर्यादा, क्रमः, निर्देशः, आ-नि-देशः, प्रचोदनं-ना, शासनं, मार्गः, कल्पः; तत्त्वं (of science); न्यायः. 3 प्रमाणं, मानं; 'general r.' उत्सर्गः, सामान्यविधिः; 'r. of action' क्रियाविधिः-मार्गः; 'r. of judicature' व्यवहारविधिः-मार्गः; 'according to the r.' यथाविधि, विधितः; यथान्यायं; 'r. of three' त्रैराशिकं. —ER, *s.* शासितृ *m.*, पालयिता, शास्ता, शासकः, पालकः, अधिष्ठाता, अधिपतिः, अधीशः, नियंता, स्वामी, प्रभुः, ईश्वरः; 'under one r.' एकस्वामिक. 2 रेखालेखनी. —ING, *a.* शासत्, नियंतृ, पालक &c. 2 प्रबल, गरिष्ठ, प्रधान, बलिष्ठ; 'r. deity' अधिदेवता, अधिष्ठात्री देवता.

RUM, *s.* सीधु *m. n.*, आसवः, मैरेयं. —*a.* असंगत, अरूप.

RUMBLE, *v. i.* रस् 1 P, नद् 1 P, गर्ज् 1 P, गंभीरं स्वन् 1 P or घुष् 1 P. —ING, *s.* गर्जनं, नर्दनं, दीर्घ-गंभीर-नादः-ध्वनिः-घोषः, निर्घोषः, (of clouds) रटनितं, घनध्वनिः, मेघनादः, &c.

RUMINATE, *v. i.* रोमंथायते (D.), रोमंथं अभ्यस 4 U, (S. 2). 2 पुनः पुनः ध्ये 1 P or विचर् c., निध्ये desid. (निदिध्यासति). —ION, *s.* रोमंथः; अभीक्ष्णचिंता, निदिध्यासनं. —RUMINANT, *a.* रोमंथकर (री *f.*).

RUMMAGE, *v. t.* अस्ताव्यस्तीकृत्य सूक्ष्मं अन्विष् 4 P or निरूप् 10.

RUMOUR, *s.* जनप्रवादः, किंवदंती, प्रवादः, जनश्रुति *f.*, लोकवादः-वार्ता; *See* REPORT, —*v. t.* Ex. by (*s.*); 'it is r. ed' इति किंवदंती श्रूयते, इति जनप्रवादः.

RUMP, *s. See* HIP.

RUMPLE, *See* FOLD.

RUN, *v. i.* धाव् 1P, द्रु 1 P, प्र-वि-°, शीघ्रं-द्रुतं गम्-चल्-चर् 1 P or या-इ 2 P, रंह् 1 P; (as a fluid) क्षर् 1 P, प्र-,स्यंद् 1 A, गल् 1 P, द्रु, प्र-,स्रु; (as rivers) वह् 1P, अवतृ 1 P, गम् (सागरं); 'how much has the night yet to r.' कियदवशिष्टं रजन्याः (S. 4). 3 प्र-वि-ली 4 A, द्रवीभू, द्रु. 4 प्रवृत् 1 A, प्रगम्, प्रसृ; *See* PROCEED. 5 अति-इ 2 P, अतिक्रम् 1 U, 4 P, या 2 P, गम्; *See* PASS. 6 (Away) प्र-, पलाय् 1 A, अपसृ 1 P, अपक्रम्; अपया-गम्-धाव्-सृप् 1 P, प्र-वि-द्रु. 7 (As a sore) पूयं स्रु c. or मुच् 6 P. 8 वितन्-विस्तृ pass.; प्रसृ; *See* EXTEND; 'r. to waste' परि-,क्षि pass; 'r. riot' मर्यादां अति-इ or अतिक्रम्. —*v. t.* धाव् c.; चल् c.; वह् c. —about, इतस्ततो धाव्, वि-परि-धाव्. —after, अनुधाव्-द्रु-गम्-सृ &c. —against, at, towards, अभि-प्रति-उप-धाव्-द्रु, संमुखं गम्. —down, (*v. t.*) गुणान् अपलप् 1 P, अवमृद् 9 P; *See* DECRY, DEPRECIATE. 2 Chase, q. v. —in, आ-प्र-विश् 6 P. —into, उप-गम्, आ-पद् 4 A, ग्रस् pass.; 'ran into debt' ऋणग्रस्तो बभूव. —off, अपसृ, अपक्रम्, अपया; 'till the brook has r. off' यावन्निर्झरस्रोतो नापक्रामति, न तिरोभवति, न क्षीयते. —on, (of water) प्र-,वह्. 2 प्रवृत्, प्रसृ. 3 Prate, q. v. —out, क्षि-अवधि-pass., अवसो-समाप्- pass. —over, परिवह्, उपरि स्रु; *See* OVERFLOW. —up, वृध् 1 A; *See* INCREASE. —*s.* धावनं, द्रवणं, विद्रवः, पलायनं. 2 गति *f.*; क्रमः, मार्गः, प्रवृत्ति *f.* 3 प्रवाहः, स्रावः, प्र-नि-स्यंदः. 4 प्रचारः, प्रसिद्धि *f.*; प्रचलनं. 5 पर्यंतः, परिमाणं. 6 जलयात्रा, समुद्रपर्यटनं; 'in the long r.' अंते, दीर्घकालादूर्ध्वं; 'the ordinary r. of people' सामान्याः, पृथग्जनाः, प्राकृताः, साधारणजनाः. —NER, *s.* धावकः. 2 जांघिकः, जंघाकारिकः, प्र-,जविन् *m.*, तरस्वी, त्वरितः, वेगी, जवनः, जवः. —NING, *s. See* (*s.*). —*a.* धावत्, स्रवत् &c. 2 सपूय, पूयस्रावित् (sore). 3 यथाक्रमं, अनुपूर्वशः. —RUNAWAY,-RUNAGATE, *s.* प्रपलायितः, अपधावितः. 2 युद्धत्यागी, रणविमुखः.

RUNDLE, *s.* सोपानं, आरोहणं.

RUPTURE, *s.* भेदः, स्फोटनं, भंगः. 2 भेदः, कलहः, स्नेहभंगः, भेदः, सुहृद्भेदः. 3 अंत्रवृद्धि *f.*-स्रंसः. —*v. t.* भंज् 7 P, भिद् 7 P, स्फुट् c.

RURAL, *a.* ग्राम्य, जानपद (दी *f.*), ग्रामीय, ग्रामीण, ग्राम-जनपद in comp.; 'r. pleasures' ग्रामवासौख्यं.

RUSE, *s. See* PRETEXT.

RUSH, *v. i.* वेगेन-तरसा-धाव् 1 P or गम्-पत्-चल् 1 P, सवेगं प्रया 2 P or प्रसृ 1 P; 'r. upon' आक्रम् 1 U, 4 P, आ-अव-स्कंद् 1 P, सवेगं अभिद्रु or आपत्, अभिसृ; युद्धाभिसारिणः चमूपतयः (U. 5) 'r. ing upon (me) for fighting'; 'r. forth' निर्गम्, बहिर्गम्, निःसृ; 'r. headlong' अतिवेगेन-साहसपूर्वं-प्रविश् 6 P. —*s.* महावेगः, जवः, आवेगः, संरंभः. 2 अतिवेगेन धावनं-आपातः, सवेगावस्कंदः, सरभसाक्रमः; 'I do not care a r.' अणुमात्रमपि नोत्सुकः.

RUSH-LIGHT, *s.* तृणप्रकाशः, तृणालोकः.

RUSSET, *a.* कपिश, श्याव.

RUST, *s.* किट्टं, मंडूरं, सिंहा(घा)णं-नं, मलं, अयोमलं; कलंकः. —*v.* कलंकेन-मलेन-आवृ 5 U. —Y, *a.* मलित, मलीमस; मलावृत, समल, कलंकावृत.

RUSTIC, *a.* ग्राम्य, ग्रामीय-ण, ग्रामिक (की *f.*), जानपद (दी *f.*), असभ्य, अशिष्ट, अविनीत, प्राकृत. —*s.* ग्राम्यः, ग्रामीणः, वृषलः, जानपदः. —ALLY, *adv.* ग्रामिकवत्, ग्राम्यजनवत्. —ITY, *s.* ग्राम्यता, अशिष्टता, असभ्यता.

RUSTICATE, *v. t.* निर्वस् c., प्र-वि-वस् c. —*v. i.* प्र-वि-वस् 1 P.

RUSTLE, *v. i.* मर्मररवं कृ 8 U. —ING, *s.* मर्मरशब्दः, मर्मरः, वल्ल-पर्ण-स्वनितं.

RUT, *s.* गर्तः-र्तो, चक्रांकः, चक्रमार्गः. 2 मदः, मदजलं; 'in r.' मदजलस्यंदिन्. —TISH, *a.* मत्त, मदोत्कट.

RUTHLESS, *a.* निर्दय, निर्घृण, क्रूर, निष्कृप; *See* CRUEL.

RYOT, *s.* कृषकः, कर्षकः, कृषीवलः.

S.

SABBATH (day), *s.* विश्रामवासरः-दिवसः.

SABLE, *a.* श्याम, कृष्ण, कृष्णवर्ण. —*s.* श्यामकः. 2 कृष्णवेषः.

SABOT, *s.* काष्ठपादुका.

SABRE, *s.* खड्गः, निस्त्रिंशः, चंद्रहासः, कृपाणः.

SABULOUS, *a. See* SANDY.

SACCHARINE, *a.* शार्कर (री *f.*), मिष्ट, मधुर.

SACERDOTAL, *a.* पुरोहित in comp.; याजकीय, पौरोहित (ती *f.*).

SACHEL, *s.* क्षुद्रकोषः, पुस्तकाधारः, भस्त्रा.

SACK, *s.* स्यूतः, प्रसवः, स्योतः, स्यूनः, शाणपुटः-कोषः, गोणी. 2 लुंठनं, अपहारः, धनादेः अपहरणं; 'sack-cloth' शाणपटः-वस्त्रं, वराशिः, स्थूलशाटकः, क्षार्णं. —*v. t.* लुंठ् 1 P, 10, उपप्लु 1 A, सर्वस्वं अपहृ 1 P.

SACRAMENT, *s.* संस्कारः. —AL, *a.* संस्काररूप,

SACRED, *a.* पुण्य, पवित्र, परि-,पूत, मेध्य, शुचि. 2 अलौकिक-असांसारिक-वैदिक-(की *f.*), (opposed to profane). 3 पूज्य, पूजार्ह; भावितात्मन्. 4 पुण्याधिक, सुप्रतिष्ठित. 5 अनतिक्रमणीय, अलंघ्य, अभेद्य; दुर्धर्ष, अवध्य (person); 'an ambassador, being considered s., never tells an untruth' सदैवावध्यभावेन दूतो वदति नान्यथा (H. 3); 's. spot' क्षेत्रं, पुण्यस्थानं, तीर्थं; 's. grove' पुण्यवनं, तपोवनं; 's. knowledge' निगम-वेद-ज्ञानं, श्रुतिबोधः; 's. writing' वेदः, निगमः, श्रुति *f.*

SACRIFICE, *s.* यज्ञः, क्रतुः, अध्वरः, यागः, इज्या, मखः, सवः, होमः, हवनं, इष्टि *f.*, मेधः in comp.; 'horse-s.' अश्वमेधः; 'human s.' नरमेधः-यज्ञः &c.; 'imperial s.' राजसूयः; 'fit for a s.' यज्ञिय, मैध्य. 2 आलंभः, उत्सर्गः, बलिः, उपहारः. 3 व्ययः, उत्सर्गः, परि-,त्यागः, विनियोगः, समर्पणं; 'even at the s. of one's life' जीवितव्ययेनापि, प्राणपरित्यागेनापि; oft. by instr. alone (आत्मानं सततं रक्षेत् दारैरपि धनैरपि). -*v. t.* यज् 1 U; हु 3 U, उपह 1 P, उत्सर्गार्थं हन् 2 P or बलिं दा 3 U, समा-आ-लभ् 1 A (animal); 'he s. a beast to Rudra' पशुना रुद्रं यजते ; 'he s. ed a horse' अश्वमेधं ततान, अश्वमेधेन ईजे. 2 परि-,त्यज् 1 P, उत्-सृज् 6 P, हा 3 P, सं-क्र c. (अर्पयति), विनियुज् 7 A, 10; 's. ing their own interests' स्वार्थं परित्यज्य; 'without s. ing their interests' स्वार्थाविरोधेन (Bh. I. 74). -ER, *s.* यजमानः, यष्टृ *m.*, याजकः, यज्वन् *m.*, याज्ञिकः, होता. -SACRIFICIAL, *a.* याज्ञिय, वैतान (नी *f.*), मेध्य; यज्ञ in comp.; 's. work' यज्ञकर्म ; 's. fire' होमाग्निः, समूह्यः, परिचाय्यः, उपचाय्यः; 's. priest' ऋत्विज् *m.*; *See* PRIEST; 's. session' सत्रं.

SACRILEGE, *s.* देवतादूषणं, देवस्वापहरणं, देवस्वचौर्यं, पुण्यवस्तुदूषणं; धर्मलंघनं-लोपः. -SACRILEGIOUS, *a.* देवस्वापहारिन्; पुण्यद्रव्यदूषिन्.

SAD, *a.* विषण्ण, म्लान, शोकाकुल, सोत्कंठ, अवसन्न, उद्विग्न, उत्कंठासंसृष्ट, उदासीन, खिन्न, दुर्मनस्, विमनस्. 2 शोचनीय, शोकावह, दुःखद, क्लेशकर (री *f.*), क्लेशप्रद. 3 गंभीर; *See* GRAVE; 'to be s.' खिद्-pass., अव-वि-सद् 1 P, शुच् 1 P, दुर्मनायते (D.). -DEN, *v. t.* विषण्णीकृ 8 U, अव-वि-सद् c., खिद् c.; *See* GRIEVE. -LY, *adv.* सशोकं, सविषादं, सखेदं, सोद्वेगं, म्लानमुखेन. -NESS, *s.* विषादः, उद्वेगः, अवसादः, उत्कंठा, औदासीन्यं, म्लानि *f*, खेदः.

SADDLE, *s.* पर्याणं, पल्ययनं, पर्ययणं. -*v. t.* पर्याणं आरुह् *c.* or निविश् *c.*, सज्जीकृ 8 U; 'mounting the s. ed Indrâyudha' दत्तपर्याणमिंद्रायुधमारुह्य (Ka. 126); (fig.) भारं नि-धा 3 U or न्यस् 4 U; 's.-horse' वाहाश्वः. -ER, *s.* पर्याणकारः,

SAFE, *a.* सुरक्षित, निराबाध; सुस्थ, क्षेम, अक्षत, निर्व्रण, अजातापाय. 2 निर्भय, अकुतोभय, अभय, निःशंक, भयातीत, आपद्-भय-मुक्त. 3 अलंघ्य, दुरासद, दुर्धर्ष ; 's. against enemies' दुरासदः परैः (R. VIII. 4). 4 क्षेम्य, भयरहित, क्षेम, निर्भय ; 'a s. place' निर्भयस्थानं, अभयहेतुकं स्थलं ; 'sound and s.' कुशलिन्, निरामय, सुस्थ, अक्षत. -*s.* लोहपेटिका, लोहमंजूषा ; 's. conduct' अभयदानं-पत्रं ; 's.-guard' रक्षा, गुप्ति *f.*, रक्षणं ; 'Pass', q. v. -LY, *adv.* क्षेमेण, निराबाधं, अक्षतं, सक्षेमं, निर्भयं ; 'when she is s. brought to bed' यदा अनघप्रसवा भवति (S. 4). -TY, *s.* क्षेमः-मं, स्वास्थ्यं, क्षेमता, अक्षतं, कुशलं, अनामयं. 2 रक्षा-क्षणं, निर्भयत्वं, अभयं, निर्भयं, भय-आपद्-मुक्ति *f.* ; 'to promise s.' अभयवचनं दा 3 U.

SAFFLOWER, *s.* कुसुंभं, वह्निशिखं, महारजनं, कमलोत्तरं.

SAFFRON, *s.* कुंकुमं, अग्निशिखं, वरं, बाह्लि(ह्ली)कं, पीतनं, रक्तं, संकोचं, पिशुनं, धीरं, लोहितचंदनं, काश्मीरजन्म. -*a.* कुंकुमवर्ण-राग, अरुण; 'dyed with s.' कुंकुमाक्त.

SAGACIOUS, *a.* चतुर, विदग्ध, दूरदृष्टि, मेधाविन्, सूक्ष्मधी, तीक्ष्ण-कुशाग्र-मति-बुद्धि. -LY, *adv.* चतुरं, सूक्ष्मधिया, विदग्धतया. -SAGACITY, *s.* वैदग्ध्यं, चातुर्यं, तीक्ष्णमतित्वं, सूक्ष्मधीः-मति *f.*

SAGE, *s.* प्र(प्रा)ज्ञः, विपश्चित् *m.*, तत्त्वविद् *m.*, बुधः, पंडितः, ज्ञानी. 2 ऋषिः, मुनिः. 3 सिद्धः, साधुः, यतिः, सिद्धजनः-पुरुषः, आत्मज्ञः, मुमुक्षुः, ब्रह्मज्ञः. -*a.* प्राज्ञ, पंडित, ज्ञानिन् ; *See* WISE. -LY, *adv.* पंडितवत्. -NESS, *s.* प्राज्ञता, पांडित्यं.

SAGITTARIUS, *s.* धनुः, धनूराशिः.

SAIL, *s.* वातवस्त्रं-वसनं, नौवसनं-वस्त्रं; 'set s.' नावं-पोतं-प्लुच् 6 P or चल् c. -*v. i.* (Of a boat &c.) वायुना नुद्-चुद्-वह्-प्रेर्-pass. 2 (Of persons) पोतमारुह्य or अध्यास्य प्र-स्था 1 A ; नावा-पोतेन गम्-चल् 1 P, नावा तृ 1 P or प्लु 1 A, जलवर्त्मना गम्-या &c. 3 चल्, सं-वि-सृप् 1 P; 's. ing in the air' विहायसा-नभोवर्त्मना-गच्छन्, नभसि संसर्पन्. -ING, *s.* समुद्रयानं. -OR, *s.* नाविकः, पोतवाहः, नौवाहः, समुद्रगः.

SAINT, *s.* मुनिः, साधुः, सिद्धः, सिद्धजनः, ऋषिः, पुण्यजनः; *See* SAGE. -LY, *a.* विमल, पवित्र, पुण्यात्मन्, परिपूत, अतिपुण्य, सिद्धतुल्य.

SAKE, *s.* कारणं, निमित्तं, हेतुः, प्रयोजनं; 'for the s. of' अर्थे or अर्थं in comp., हेतोः, निमित्तं, कारणात्, with gen. or in comp., कृते (with gen.); *See* FOR.

SAL, *s.* सालः, श्यालः, सर्जः, कार्यः, अश्वकर्णकः, सस्यसंबरः.

SALACIOUS, *a. See* LUSTFUL.

SALARY, *s.* वेतनं, वृत्ति *f.*, भृति *f.*, मूल्यं; *See* HIRE;

'monthly s.' मासिकं; 'annual s.' वार्षिकं. -IED, *a.* वृत्ति-वेतन-भुज्, कृतवेतन.

SALE, *s.* *See* under SELL.

SALIENT, *a.* प्रलंब, प्रोच्छ्रित. 2 प्रवग, द्रुतगामिन्. 3 (fig.) मुख्य, प्रधान, विशिष्ट, पुरःस्फुरत्.

SALINE, *a.* लवण, क्षार, लवणगुणविशिष्ट; 's. taste' लवणरसः; 's. soil' ऊषः, क्षारमृत्तिका; 'having s. soil' ऊषर, ऊषवत्.

SALIVA, *s.* लाला, क्ष्वेलि(णी)का, स्यंदिनी; 'his mouth emits s.' वक्त्रं लालायते. -SALIVARY, -SALIVAL, *a.* लालालाविन्. -SALIVATE, *v. t.* लालां स्रु c. or निःस्रु c.

SALLOW, *a.* आपीत, पांडुर, विवर्ण; *See* PALE.

SALLY, *v. i.* निर्गम् 1 P, निष्पत् 1 P, निष्क्रम् 1 U, 4 P, जवेन बहिर्गम्, अभ्यव-स्कंद् 1 P, अभ्या-सद् c. -*s.* निर्गमः, निष्क्रमः-मणं, निःसरणं, आपातः, अभ्यासादनं, अभ्यवस्कंदनं, अवपातः. 2 स्फुरणं, उल्लवनं, उत्पतनं. 3 विलासः, विलसितं, विभ्रमः; 's. es of wit' बुद्धिविलासाः; विदग्धालापाः, नर्मालापविभ्रमाः; 's. of levity' बुद्धिचापल्यं-चांचल्यं; 's.-port' निर्गमद्वारं.

SALOON, *s.* (सुप्रसाधित-) शाला, कोष्ठः.

SALT, *s.* लवणं; (fig.) पिंडः; सफलीकृतमर्तृपिंडः (M. 5) 'who showed that he had not eaten his master's s. in vain'; 'rock-s.' सैंधवः-वं, शीतशिवं; *See* under ROCK; 'sea-s.' अक्षी(क्षि)वं, वशि(सि)रं; 'black s.' पाक्यः, बिडं; क्षारं; 'sambhar s.' रौमकं, वसुकं; 'sochal s.' सौवर्चलः, अक्षं, रुचकं; 's.-petre' यवजः, यवक्षारः, पाक्यः; यवाग्रजः. -*a.* लवण, लवण-क्षारयुक्त-मय (यी *f.*); लवणगुणविशिष्ट, क्षारधर्मक, लवण-क्षार in comp. -*v. t.* लवणीकृ 8 U, लवणेन सिच् 6 P or अंज् 7 P. -ED, *a.* लवणाक्त, लवणसंसृष्ट, लवणित. -ISH, *a.* ईषल्लवण. -NESS, *s.* लवणत्वं, क्षारता.

SALUBRIOUS, *a.* हित-स्वास्थ्य-कर (री *f.*), आरोग्यावह, पथ्य, अनामयकर, क्षेम्य, पुष्टिद, हित. 2 Salutary, q. v.

SALUTARY, *a.* हित, हित-कल्याण-कर (री *f.*),-आवह, उपकारिन्, श्रेयस्कर, शर्मकर. 2 पथ्य; *See* SALUBRIOUS.

SALUTE, *v. t.* अभि-,वंद् 1 A, अभिवद् 10 A, प्रणिपत् 1 P, प्रणम् 1 P, नमस्कृ 8 U, नमस्यति (D.), सभाज् 10; अभिनंद् 1 P, उप-स्था 1 A; 's. in return' प्रतिनंद्; प्रत्यभिनंद्. 2 Kiss, q. v. -*s.*, -ATION, *s.* प्रणामः, प्रणति *f.*, प्रणिपातः, अभि-,वंदनं, अभिवादः-दनं, नमस्कारः, नमस्क्रिया, सभाजनं; 'a s. to thee' नमस्तुभ्यं. -ER, *s.* अभिवादकः, अभिवंदकः.

SALVAGE, *s.* सं-,उद्धृतं; उद्धारः.

SALVATION, *s.* तारणं, उद्धारः, मुक्ति *f.*, मोक्षः, निस्तारः, पापमुक्तिः, ऊर्ध्वं-परम-गति *f.* 2 (Generally) परि-,त्राणं, रक्षणं, रक्षा; 'devotional way of s.' भक्तिमार्गः.

SALVE, *s.* अंजनं, प्र-अनु-लेपः, उपदेहः. -*v. t.* अंज् 7P.

SALVER, *s.* रजतभाजनं, रूप्यपात्रं.

SALVO, *s.* *See* EXCUSE.

SAME, *a.* तद् (*pron. a.*) with or without एव; अभिन्न, निर्विशेष, अनन्य; सम, समान, तुल्य; *See* LIKE; 'it is the s. Vásanti' सैव वासंती; त्रे एव पादपाः; तदेव वनं &c. (U. 3); gen. by एक, स, सम, समान in comp.; 'of the s. family' सगोत्र; 'sitting in the s. car' एकस्यंदनमास्थितौ; 'of the s. age' समवयस्क; एकरूप, समानजाति, सोदर &c.; 'at the s. time' एकदैव, युगपत्, एकसम-काले, समं, यौगपद्येन; 'in the s. way' तद्वत्, तथैव, तथा, एवं; 'he is the s. as a father to me' मां प्रति स पितृस्थाने-भूमौ वर्तते, पितृनिर्विशेषः. -NESS, *s.* ऐक्यं, साम्यं, एकरूपत्वं, सादृश्यं, संवादः, अभेदः, समभावः; 's. of class' सवर्णता, सावर्ण्यं, एकवर्णता.

SAMPLE, *s.* आदर्शः, प्रतिमा, प्रतिरूपं. -SAMPLER, *s.* सूचिकर्मादर्शः.

SANATIVE, SANATORY, *a.* स्वास्थ्यकारिन्, रोगघ्न (घ्नी *f.*), रोगापह.

SANCTIFY, *v. t.* पवित्रीकृ 8 U, पुण्यीकृ, पापमलं हृ 1 P or क्षल् 10, परि-,पू 9 U, शुध् c., शुचीकृ, पापकल्मष- निर्धू 5, 9 U, 6 P. 2 अनुमंत्र् 10 A, पुण्यकर्मणि विनियुज् 7 A, 10 or निक्षिप् 6 P. -ICATION, *s.* पापहरणं-नाशनं, पवित्रीकरणं. 2 Sanctity, q. v. -ING, *a.* शोधक, पावन. -SANCTITY, *s.* निर्मलता, पवित्रता, पुण्यता, वि-,शुद्धि *f.*, पाप-कल्मष-नाशनं-हरणं, अंतःशुद्धिः-शौचं.

SANCTIMONY, *s.* दंभः, धर्माभिमानः, पुण्यवेशधारणं, बकवृत्ति *f.* -IOUS, *a.* दंभिन्, दांभिक (की *f.*), पवित्रंमन्य, बकवृत्ति, धर्माभिमानिन्, कपटधर्मिन्. -IOUSNESS, *s.* दंभः; *See* (*s.*).

SANCTION, *v. t.* अनु-ज्ञा 9 U, अनुमन् 4 A, अनुमद् 1 A; अनुशास् 2 P, आदिश् 6 P; प्रमाणीकृ 8 U, दृढीकृ, सत्यापयति-द्रढयति (D.), सत्याकृ. -*s.* अनुज्ञा, अनुमति *f.*, अनुशासनं, अनुमोदनं, प्रामाण्यं, प्रमाणं, दृढीकरणं, सत्यापनं.

SANCTUARY, *s.* शरणं, आश्रय-शरण-स्थानं. 2 पुण्यालयः, देवतागारं, पुण्य-पवित्र-स्थानं. 3 गर्भः, गर्भागारं, गर्भगृहं.

SAND, *s.* वालुका, सिकताः (pl.); 's.-bank' पुलिनं, सैकतं; 's.-glass' वालुकायंत्रं. -*v. t.* सिकताभिः आवृ 5 U or आकृ 6 P. -Y, *a.* वालुकामय (यी *f.*), वालुकाकीर्ण, सिकतिल, सैकत (ती *f.*), बहुसिकत; 's. desert' मरुः, भन्वन् *m.* 2 वालुकानिभ; (fig.) अस्थिर, भंगुर, क्षणस्थायिन्, अदृढ.

SANDAL, s. चंदनः (tree), चंदनं (wood); गंधसारः, मलयजः, भद्रश्रीः; 'white s. wood' तैलपार्णिकं; 'red s.' रक्तचंदनं, तिलपर्णी, पत्रांगं, रंजनं, कुचंदनं. 2 कोशी-षी, पादुका.

SANDARAC, s. मसीशोषणचूर्णं.

SANDERS, s. (Yellow) पीतद्रुमः, काली(ले)यकः, हरिद्रुः, दार्वी, पचंपचा, दारुहरिद्रा, पर्जनी. 2 (Red) See 'red sandal' under SANDAL.

SANE, a. सुस्थ, निरामय, स्वस्थ, प्रकृतिस्थ, कल्य. 2 (In mind) अनुन्मत्त, प्रकृतिस्थ, अवातुल, अनुपहतचित्त, अविप्लुत, अविक्षिप्तचित्त. -ITY,-NESS, s. स्वास्थ्यं, अनुन्मादः.

SANGUIFEROUS, a. असृग्वाहिन्.

SANGUINARY, a. (Of person) रक्त-रुधिर-प्रिय, जिघांसु, मारात्मक, क्रूरचित्त, निष्ठुरचेतस्. 2 रुधिरपातदूषित, रक्तस्रावयुत, बहुरक्त.

SANGUINE, a. गाढ, उत्कट; See INTENSE; चंड, तीक्ष्ण, चंड-तीक्ष्ण-स्वभाव. 2 (Of persons) आशावत्, सुप्रत्याशिन्, अत्याशान्वित, दृढप्रत्यय, जातविश्वास; 'I feel quite s. that' इति मे गाढाशंसा; 's. hope' सुप्रत्याशा, गाढाशंसा, उत्कटेच्छा. -NESS, s. अत्याशा, अत्याशंसा, &c.

SANIES, s. पूयं; See PUS. -SANIOUS, a. पूयस्रावित्.

SANITARY, a. स्वास्थ्यहित, स्वास्थ्य in comp., आरोग्यकर (री f.), आरोग्यावह.

SAP, s. सारः, रसः, द्रवः, सत्त्वं, निर्यासः. -v. t. उत्खन् 1 P, समूलं उच्छिद् 7 P or नश् c. -PER, s. खनकः, सैंधिकः. -LESS, a. असार, निःसार, विरस, नीरस, निःसत्त्व. -PY, a. रसाढ्य, सरस, आर्द्र, ससत्त्व, रसवत्. -SAPID, a. सुरस, मिष्ट, स्वादु.

SAPLING, s. बालवृक्षः, वृक्षकः.

SAPIENT, a. प्राज्ञ, प्रज्ञ, ज्ञानपूर्ण; See WISE.

SAPONACEOUS, a. चिक्कण, मेदुर.

SAPOR, s. See FLAVOUR.

SAPPHIRE, s. महानीलः, इंद्रनीलः, नीलः, नीलोपलः.

SARCASM, s. अव-आ-क्षेपः, निंदागर्भं वचः, परिभाषणं, सनिंद उपालंभः; कटुः उपहासः. -SARCASTIC,-AL, a. साक्षेप; निंदागर्भ, अरुंतुद, उग्र, कटु, तीक्ष्ण, सावहास, परिभाषिन्, सोपालंभ. -ALLY, adv. साक्षेपं, सोपालंभं.

SARCOMA, s. See TUMOUR.

SARCOPHAGOUS, a. मांसाशिन्, मांसभुज्.

SARDONIC, a. विकृत, कराल.

SARDONYX, s. गोमेदः-दकः.

SASH, s. (अलंकारार्थं) पारिकरः, मेखला, कटिसूत्रं. 2 वातायनकाष्ठं.

SATAN, s. पिशाचाग्रणीः, पिशाचनाथः. -IC, a. पैशाच (ची f.).

SATELLITE, s. उपग्रहः. 2 (सदा-) पार्श्वचरः, अनुयायिन् m., अनुषंगी; निश्चपार्श्ववर्ती.

SATE, SATIATE, v. t. सं-परि-तृप् 5 P or c., अत्यंतं तृष् c., अतितृप्तिं-सौहित्यं-उत्पद् c., परिपूर् 10, -ED, a. अतितृप्त, परिपूर्णकाम, पर्याप्तकाम, संतर्पित, संपरि-पूर्ण; सुहित; 'to be s.' सं-परि-तृप् 4 P or तृष् 4 P. -SATIETY, s. तृप्ति f., तर्पणं, सौहित्यं, अतितृप्ति f.,-सौहित्यं-तृप्तिः; पूर्णकामता, वितृष्णता, परिपूर्ति f.

SATIN, s. चीनांशुकं (s.-cloth).

SATIRE, s. आक्षेपगर्भं पद्यं-गीतं, अवगीतं, संक्षेपकविता. 2 Sarcasm, q. v. -ICAL, a. उपहासात्मक, सोपहास, साधिक्षेप; See SARCASTIC. -IST, s. आक्षेपवादिन् m. -IZE, v. t. साक्षेपं वर्ण् 10, अवगै 1 P, काव्यद्वारा आ-अधि-क्षिप् 6 P.

SATISFY, v. t. (Persons) सं-परि-तृप् c.,-तृष् c., कामं-इच्छां-पूर् 10 or निवृत् c., तृप्ति-तुष्टि-उत्पद् c., सुखयति (D.), प्री 9 P, आराध् c.; सान्त्व् 10, प्रसद् c.; (hunger, desire, &c.) शम् c. (शमयति), प्र-उप-, छिद् 7 P, परि-पूर्, निराकृ 8 U, निवृत् c.; 'child, s. your curiosity' पूरयतु कुतूहलं वत्सः (U. 4). 2 संदेहं अपनी 1 P, संशयं छिद् or हृ 1 P or निरस् 4 U, निरुत्तरीकृ. -ACTION, s. सं-परि-तोषः-तुष्टि f., पर्याप्ति f., इच्छापूर्ति f., सौहित्यं, काम-इच्छा-तृप्तिः-निवृत्तिः-शांतिः f. 2 शांतिः, शमनं, निराकरणं, परि-,पूरणं, छेदः, निवृत्तिः, पूर्तिः, तर्पणं. 3 संशयच्छेदः, संदेहनिवृत्तिः-परिहारः. 4 प्रतिफलं, निस्तारः, शुद्धि f. -IED, a. तृप्त, तुष्ट, तोषित, तर्पित, पूर्ण-निवृत्त-काम, पर्याप्तकाम, प्रीत, कृतिन्, कृतार्थ, चरितार्थ. 2 छिन्न, पूर्ण, शांत, निवृत्त. 3 छिन्नसंशय, हृत-निरस्त-संदेह; 'to be s.' तुष्-तृप् 4 P, प्री pass. -ING, a. संतर्पक, संतोषक, तुष्टि-तृप्ति-कर (री f.), संशयच्छिद्. -SATISFACTORY, a. युक्त, समर्थ, (समर्थमुत्तरं), पर्याप्त, संशयच्छिद्, संदेहच्छेदिन्. 2 तुष्टिप्रद, संतोष-तृप्ति-तुष्टि-कर. 3 (Atoning) Ex. by प्रमृज् 2 P, निस्तृ c.; See ATONE. -ILY, adv. सम्यक्तया, वैशद्यन, संशयच्छेदितया, सम्यक्.

SATRAP, s. मंडलेशः, भोगपतिः.

SATURATE, v. t. अत्यंतं पर् 10, आ-परि-पूर; नि-सिच् 6 P, अतिक्लिद् c. -ED, a. अति-सिक्त, परिपूर्ण; See IMPREGNATE. -ION, s. अतिसेकः-क्लेदः, परिपूरणं.

SATURN, s. शनिः, शनैश्चरः, रविसुतः, सौरः-रिः -SATURNINE, a. मंद, जड-मंद-शांत-प्रकृति, जडस्वभाव. -SATURNALIA, s. शनिमहोत्सवः.

SATYR, s. वनदेवता, वन-अरण्य-चरः.

SAUCE, s. सूपः, तेमनं, निष्ठानं; उपदंशः, व्यंजनं, उपस्करः; 's.-pan' डखा, पिठरः; See FRYING PAN. -SAUCER, s. शरावः, पात्रं, आधारः.

SAUCY, a. धृष्ट, निर्लज्ज, निर्लेज्ज, प्रगल्भ, अविनीत; सप्रतिभ. -ILY, adv. अविनयेन, धृष्टवत्. -INESS, अविनयः, धार्ष्ट्यं, प्रतिभा-भानं.

SAUNTER, v. i. मंदं मंदं परिक्रम् 1 U, 4 P or परि

दृ 1, 4 P, शनैः शनैः विचर् 1 P. -ING, *s.* मंद रिक्रमणं.

VAGE, *a.* वन्य, जांगल (ली *f.*), अरण्यज, वन-रण्य in comp. 2 असभ्य, अशिष्ट, अविनीत, असंकृत, आचारहीन, अनाचार. 3 क्रूर, हिंस्र, निष्ठुर, निर्य, दारुण, क्रूरकर्मन्, श्वापद (दी *f.*); 'all of man is s.' पुरुषा नाम निष्ठुराः (Mr. 5). -*s.* शिष्ट-असभ्यजनः. 2 क्रूरकर्मा, राक्षसः, दैत्यः, नरपशुः. म्लेच्छः, किरातः, शबरः, यवनः, भिल्लः &c. -LY, *adv.* अशिष्टवत्, निष्ठुरं. -NESS, *s.* अशिष्टता, क्रौर्यं, रुणता, &c.

AVANT, *s.* बुधजनः, पंडितः, विद्वज्जनः; *See* LEARNED.

AVE, *v. t.* रक्ष् 1 P, in all senses, परि-त्रै 1 A, द्-समुद्-हृ 1 P, धृ 1 P, तृ c., उत्-सं-निः-°, मुच् c., शिक्ष् 10, पापात् मुच् &c. 2 सं-चि 5 U, संरक्ष्, नि-धा 3 U, संग्रह् 9 P, अवशिष् c. 3 निवृत् c., निवृ c., निरुध् 7 U, परिहृ; 'those that were s.ed out of the slain' हतशेषाः, हतावशिष्टाः. -*prep.* विहाय, मुक्त्वा, वर्जयित्वा; *See* EXCEPT. -ING, *a.* अव्ययशील, अल्पव्ययिन्, मितव्यय, अमुक्तहस्त. 2 उद्धारक, मुक्तिदायिन्; मोक्षप्रद. 3 विमोचक, विमोचनहेतुः. -*s.* रक्षणं, संचयः, संग्रहः, निधानं. 2 संचितरक्षित-धनं, संचयः. -SAVIOUR, *s.* तारकः, त्रायकः, परि-,त्राता, रक्षिता, उद्धर्ता, उद्धारकः.

AVOUR, *s.* स्वादः, रसः, रुचि *f.* 2 गंधः, वासः. -*v. i.* सरसी-सगंधी-भू 1 P. 2 (Appear like) Ex. by कल्प, प्राय in comp., ईषदून with abl.; by आ-अव-भास् 1 A; 'it s.s of falsehood' तत् असत्यकल्पं, अनृताभासं, असत्यसंकाशं, असत्यवदाभासते. -Y, *a.* सरस, सुरस, स्वादु; मिष्ट, रसवत्, रुचिकर. 2 सुरभि, सुगंधि.

AW, *s.* करपत्रं, क्रकचः-चं, पत्रदारणः. -*v. t.* क्रकचेन पट् 10 or दृ 9 P or c. or छिद् 7 P or अवकृत् 6 P; 's.-dust' काष्ठविदलं; 's.-pit' काष्ठविपाटनमार्गः. -SAWYER, *s.* क्राकचिकः, दारुदारणः.

SAY, *v. t.* वद्-गद्-भण् 1 P, वच् 2 P, ब्रू 2 U, भाष् 1 A, उदा-ख्या-ह 1 P; उच्चर् c., उदीर् c., आलप् 1 P (words &c.); मंत्र् 10 A; (tell) कथ् P0, आचक्ष् 2 A, आ-,शंस् 1 P, आमि-धा 3 U, आ-ख्या; *See* TELL; 'I say' ननु भणामि, ननु ब्रवीमि, ननु simply, (ननु पदे परित्यज्य भण Mr. 5); 'they s.' ex. by किंवदंती, जनप्रवादः, इति श्रूयते; *See* REPORT; 'that is to s.' ex. by नाम. -ING, *s.* वचनं, वाक्यं, वचस् *n.*, उक्तं, &c.; भाषितं, भाषणं, उक्ति *f.*, भणितं. 2 आभाणकः, प्रवादः; 'popular s.' जनप्रवादः; 'so runs the popular s.' तथा च लौकिकानामाभाणकः; *See* PROVERB.

SCAB, *s.* कच्छु-च्छू *f.*, पामन् *f.*, पामा; *See* ITCH; (white eruption) सिध्मं, किलासं. 2 अधमजनः, नरापसदः, हीनः, अपकृष्टः. -BY, *a.* कच्छुर, वामन, सिध्मलः.

SCABBARD, *s.* कोशः-षः, पिधानं, आधारः.

SCAFFOLD, *s.* मंचः, इंद्रकोषः. 2 प्रेक्षामंचः. 3 वध्यशिला-स्थानं-काष्ठं, घातस्थानं. -ING, *s.* मंचः.

SCALD, *v. t.* तप्तजलादिना दह् 1 P. -*s.* दाहः.

SCALE, *s.* तुला, धटः, तुलायंत्रं; 's.-pan' शिक्यं, पार्श्वः. 'goldsmith's s.' एषणी-णिका, नाराची. 2 (Of fishes &c.) वल्कः-ल्कं, वल्कलः-लं, शल्कं, शल्कलं; कवचः-चं. 3 फलकः-कं, पत्रं. 4 नि(निः)श्रेणी, अधिरोहि(ह)णी, सोपानपद्धति *f.*-परंपरा. 5 श्रेणी, परंपरा, आवलि-ली *f.*, माला, पंक्ति *f.* 6 प्रमाणं, परिमाणं; 'on a large scale' स्थूलपरिमाणेन. 7 ग्रामः. -*v. t.* आ-अधि-रुह् 1 P, आ-अधि-क्रम् 1 U, 4 P, लंघ् 1 A, 10, अवस्कंद् 1 P. 2 वल्कं निष्कृष् 1 P or निर्हृ 1 P. -Y, *a.* सशल्क, वल्कावृत; सवल्क, शल्किन्, वल्किन्.

SCALENE, *a.* विषमत्रिभुज.

SCALL, *s. See* SCAB, ITCH.

SCALP, *s.* मस्तकत्वच् *f.*, शिरोग्रत्वक्, शिरोस्थित्वचर्मन्. -*v. t.* मस्तकत्वचं अवच्छिद् 7 P or निर्हृ 1 P.

SCAMP, *s. See* RASCAL.

SCAMPER, *v. i.* वि-द्रु 1 P, जवेन-वेगात्-द्रु or धाव् 1 P or पलायू 1 A, सवेगं गम् 1 P.

SCAN, *v. t.* निपुणं-सूक्ष्मं-निरूप् 10 or निरीक्ष् 1 A or अवलोक् 1 A, 10. 2 (Verses) मात्राः-गणान् गण् 10 or विभज् 1 U. -SCANSION, *s.* गण-मात्रा गणनं-विभागः.

SCANDAL, *s.* निर्वादः, परि(री)वादः, अपवादः असूया, अवर्णः, दुर्वर्णः, कौलीनं, अक्षेपः, उपक्रोशः जुगुप्सा, कुत्सा, निंदा, वाच्यं, वाच्यता, गर्हणं-णा, पैशून्यं, पिशुनवाक्यं. 2 कलंकः, दूषणं, अपमान-अपकीर्ति हेतुः. -IZE, *v. t.* (*s.*) with प्रकाश् c.; अप-परि-वद् 1 A, परि-अप्-भाष् 1 A; *See* LIBEL. 2 Offend, q. v. -OUS, *a.* परि-अप-वादक, आक्षेपगर्भ परिवादात्मक, असूयक, (*s.*) in comp. 2 गर्हित, निंद्य, कलंककर-अकीर्तिकर-(री *f.*), दूषणीय, कुत्सित. 3 बीभत्स, घृणावह. -OUSLY, *adv.* गर्ह्यं, कुत्सितं.

SCANT, SCANTY, *a.* अपर्याप्त, अप्रचुर, स्वल्प, अविपुल, न्यून, अबहुल, अभूयिष्ठ. 2 संबाध, अविस्तीर्ण, संकट; *See* NARROW. 3 Miserly, q. v. -LY, *adv.* अपर्याप्तं, स्वल्पं, अप्रचुरं, अल्पमात्रं, स्तोकं. -NESS, *s.* अप्राचुर्यं, अपर्याप्ति *f.*, स्वल्पता.

SCAPE-GOAT, *s.* बलिः.

SCAR, *s.* किणः, अंकः, चिह्नं, क्षतचिह्नं, क्षतांकः, व्रणः-णं, क्षतं; (fig.) कलंकः. -*v. t.* क्षतेन-किणेन अंक् 10. -RED, *a.* क्षतांकित, किणांक.

SCARAMOUCH, *s.* भंडः, वैहासिकः.

SCARCE, *a.* अबहुल, अप्रचुर, अप्रभूत, अपर्याप्त, अधि-

पुल, न्यून, अभूयिष्ट, स्वल्प. 2 विरल, दुर्लभ, दुष्प्राप, असुलभ; *See* RARE. -LY, *adv.* कष्टेन, कथमपि, कृच्छ्रेण, दुःखेन, सकृच्छ्रं, आयासेन, दुर् pr.; oft. by (*a.*); 'one s. gets a good son' दुर्लभो गुणवान् पुत्रः; by न, स्तोकः; 's. touches (walks on) the ground' स्तोकमुर्व्यां प्रयाति (S. 1); 's. a day passed' नैकमपि दिनं व्यतीतं; 's.-when' ex. by एव with loc. abs.; मात्र affixed to *adj.*, or यावत्-तावत्; उपस्थितेयं कल्याणी नाम्नि कीर्तिर्न एव (R. I. 87); प्रविष्टमात्र एवाश्रमं तत्रभवति निहतमन्यानि नः कर्माणि संवृत्तानि (S. 3); एकस्य दुःखस्य न यावदंतं गच्छामि तावद् द्वितीयं समुपस्थितं (P. II. 6); oft. by च-च; आपूर्णश्च कलाभिरिंदुरमलो यातश्च राहोर्मुखं &c. (Mal. 9). -ITY,-NESS, *s.* दुर्लभता, दुष्प्रापता, विरलता, अप्राचुर्यं, अपर्याप्ति *f.*, स्वल्पता, न्यूनता, अबाहुल्यं, &c. 2 दुर्भिक्षं, अभावः, दुष्कालः, प्रयामः, नीवाकः.

SCARE, *v. t.* त्रस् c., सं-वि-,° भी c., उद्विज् c.; 's. away' भयदर्शनेन वि-द्रु c.; 's.-crow' बिभीषिका, संत्रासनं, भयहेतुः.

SCARF, *s.* खेलकः, सिचयः; उत्तरीयं, खेलं; 's.-skin' बाह्यत्वच् *f.*-चर्मन् *n.*

SCARIFY, *v. t.* त्वचं-चर्म-उल्लिख् 6 P or छिद् 7 P. -ICATION, *s.* त्वग्विलिखनं, चर्मच्छेदः.

SCARLET, *a.* शोण, अरुण, सिंदुरवर्ण; 's. fever' लदर्घः.

SCARP, *s.* लंबः. -*v. t.* लंबरूपेण निकृत् 6 P.

SCATE, *See* SKATE.

SCATH, SCATHE, *v. t.* क्षण् 8 P, अर्द् 1 P or c.; *See* HARM, INJURE. -LESS, *a.* अक्षत, अपरिक्षत, क्षतहीन, असंजातव्यथ, निर्व्रण.

SCATTER, *v. t.* कॄ 6 P, वि-आ-अवा-प्र-°, प्रस् c., वि-क्षिप् 6 P; (away) विक्षिप् c., निर्भे 5, 9 U, विभिद् c.; निरस्, 4 U, अपनुद् 6 P; वि-द्रु c. (army); *See* DISPEL, DISPERSE. -*v. i.* विकॄ pass., दिशि दिशि निर्गम् 1 P or प्र-या 2 P, बहुधा विक्षिप् pass. -ED, *a.* प्र-वि-आ-कीर्ण, विक्षिप्त, व्यस्त, प्रसृत, प्रसारित, विनिर्धूत, असंहत, विश्लिष्ट, विभिन्न. -ING, *s.* विकिरणं, विक्षेपणं, &c.

SCAVENGER, *s.* संमार्जकः, खलपूः, बहुकरः, मल-अवस्कर-वाहः.

SCENE, *s.* स्थलं, स्थानं, भूमि *f.*; 'the s. lies in Hastināpura' स्थलं हस्तिनापुरं. 2 अपटी; य(ज)वनिका, नेपथ्यं, रंगसज्जा. 3 प्रवेशः. 4 रंगः,-भूमिः,-शाला. 5 दृश्यं, दृग्गोचरं स्थानं, आलोकः, दृक्पातविषयः; oft. by स्थानं, आलोकः, or other words; 'this is indeed a lamentable s.' नन्वनुशयस्थानमेतत् (Mal. 8); रमणीयालोकं तत्स्थानं, &c.; अहो अधिकरणमंडपस्य परा श्रीः (Mr. 9) 'how splendid the s. of (presented by) the Court of Justice'; *See* PRESENT also. -SCENERY, *s.* Ex. by भूमिः, स्थानं; *See* above. 2 गृहवृक्षादिरचना, कृत्रिमरचना.

SCENT, *s.* गंधः, अधिवासः; 'sweet s.' आमोदः, परिमलः (arising from trituration) सौरभं; *See* FRAGRANCE; 'diffusing s.' निर्हारी, समाकर्षी; 'having a sweet s.' सुगंधि, इष्टगंध, सुरभि, घ्राणतर्पण. 2 (Organ) घ्राणं घ्राणेंद्रियं, घ्राणशक्ति *f.*; 'having a quick s.' तीक्ष्णघ्राण. -*v. t.* घ्रा 1 P, उद-आ-°. 2 वास् 10, सुरभीकृ 8 U, भू c., धूप् 1 P, 10. -ED, *a.* सु-,वासित, सुरभि, सुगंधि, सुरभीकृत, सामोद, भावित, संगंध. -LESS, *a.* निर्गंध, गंधहीन.

SCEPTIC, *s.* संदेहभृत् *m.*, हैतुकः, अप्रत्ययिन् *m.*, अविश्वासी. -AL, *a.* हैतुक, अप्रत्ययिन्, संशयात्मन्. -ISM, *s.* संदेहः, हैतुकता, अविश्वासः.

SCEPTRE, *s* दंडः, राजदंडः-वेत्रं-यष्टि *f.* 2 राजाधिकारः, प्रभुत्वं, आधिपत्यं; 'hold the° s.' महीं शास् 2 P; *See* REIGN. -ED, *a.* दंडधर, दंडभृत्; 's. king' अभिषिक्तो राजा.

SCHEDULE, *s.* पत्रं, लेखनं. 2 परिसंख्या, परिशिष्टं.

SCHEME, *s.* उपायः, कल्पना, प्रयोगः, संकल्पः, प्रबंधः, प्र-,युक्ति *f.* 2 पद्धति *f.*, व्यवस्था; 'secret s.' गूढमंत्रणा, कपटप्रबंधः, कुटिलनयः. -*v.* (मनसा) परि-,कृप् c., उपायं चिंत् or युज् 10. -ING, *a.* कुटिलनयनिष्णात, युक्तिमत्, विदग्ध; अनुसंधायिन् (in a good sense).

SCHISM, *s.* भेदः, शाखा, धर्म-मत-भेदः. -ATIC, *a.* मतभेदमूलक.

SCHOLAR, *s.* शिष्यः, छात्रः, अंतेवासिन् *m.*; *See* PUPIL; 's. of a s.' प्रशिष्यः. 2 वृत्तिभुज् *m.*, वृत्तिभाक्. 3 पंडितः, कृतविद्यः, विद्वान्; *See* LEARNED, WISE. -LY, *a.* पंडितोचित, पांडित्ययोतिन्. -SHIP, *s.* पांडित्यं, वैदुष्यं, विद्या. 2 वृत्ति *f.*, वेतनं.

SCHOLIAST, *s.* टीकाकारः, टीकाकृत् *m.*, वृत्ति-भाष्यकारः. -SCHOLIUM, *s.* टीका, भाष्यं, वृत्ति *f.*

SCHOOL, *s.* विद्यालयः, विद्यागारं-गृहं-मंदिरं, पाठशाला, अध्ययनस्थानं. 2 शिष्य-छात्र-समूहः. 3 शाखा, संप्रदायः; 's. of philosophy' दर्शनं; 's.-boy' बालशिष्यः, युवच्छात्रः; 's.-fellow' सहाध्यायिन् *m.*, सतीर्थः-र्थ्यः, एकगुरुः; 's.-man' तार्किकः, नैयायिकः; 's.-master' आचार्यः, गुरुः, उपदेशकः, उपाध्यायः, पाठशालाधिकृतः-अध्यक्षः. -*v. t.* शिक्ष् c., वि-नी 1 P, अधि-इ c. (अध्यापयति); *See* INSTRUCT. -ING, *s.* शिक्षणं, अध्यापनं, उपदेशः. 3 गुरुदक्षिणा, शिक्षामूल्यं.

SCHOONER, *s.* द्विकूपका नौः.

SCIATICA, *s.* कटीशिरावेदना.

SCIENCE, *s.* वि-,ज्ञानं; *See* KNOWLEDGE. 2 विद्या, ज्ञानं. -SCIENTIFIC, -AL, *a.* ज्ञानानुरोधिन्, विज्ञान-वा-

ज्ञ in comp. 2 कृतविद्य, विद्वस्, आगामिन्, विज्ञानविद्.

SCIMITAR, *s.* खड्गः, असिः; निस्त्रिंशः, करवालः; *See* SWORD.

SCINTILLATE, *v. i.* स्फुलिंगान् मुच् 6 P or उत्क्षिप् 6 P; 'a blazing fire will s. in all directions' अग्नेर्ज्वलतः सर्वा दिशो विस्फुलिंगा विप्रतिष्ठेरन् (S. B. 109). 2 स्फुर् 6 P, भ्राज् 1 A, प्रकाश् 1 A; *See* SHINE. -ION, *s.* स्फुरणं; अग्निकणः, स्फुलिंगनिर्गमः; 'in the state of s.' स्फुलिंगावस्थ *a.*

SCIOLIST, *s.* पल्लवाग्राहिपंडितः, किंचिज्ज्ञः, (शास्त्र-) चुंबकः. -SCIOLISM, *s.* पल्लवाग्राहिज्ञानं, किंचिज्ज्ञता.

SCION, *s.* नवपल्लवः, किसलयः, अंकुरः, प्ररोहः. 2 वंश्यः, वंशजः; 'the s. of the family of some one' कस्यापि कुलांकुरः (S. 7).

SCIRRHUS, *s.* मांसग्रंथिः.

SCISSORS, *s.* कर्तरी, खंडधारा, कर्तरिका, कृपाणी, छेदनी.

SCOFF (at), अव-उप-हस् 1 P, अव-आ-अधि-क्षिप् 6 P, अव-ज्ञा 9 U, तिरस्कृ 8 U, धिक्कृ, अवमन् 4 A, परिभू; *See* CONTEMN, MOCK. -ING, *s.* अव-उपहासः, अव-अधि-क्षेपः, अवज्ञा, अवमानः, धिक्कारः. -INGLY, *adv.* सोपहासं, साक्षेपं.

SCOLD, *v. t.* निर्-,भर्त्स् 10 A, परुषं निंद् 1 P, आक्रुश् 1 P, आ-अधि-क्षिप् 6 P, गर्ह् 1, 10 A. अप-परिभाष् 1 A, उपालभ् 1 A; *See* REPROACH. -*s.* कर्कशा, दुर्मुखी, कैकेयी, वक्रशीला. -ER, *s.* निंदकः, भर्त्सकः. -ING, *s.* भर्त्सनं,-ना, निंदा, उपालंभः, आक्रोशः, परिभाषणं, &c.

SCONCE, *s.* दंडः. 2 आश्रयस्थानं, शाला, आश्रयः. 3 Fort, q. v. 4 दीपाधारः. -*v. t.* दंड् 10; *See* FINE.

SCOOP, *s.* दर्वी, कंबि-वी *f.*; *See* LADLE. 2 कोटरः-रं, पुटं. 3 खनित्रं. -*v. t.* दर्व्या अवपत् c. or अवदृ c. 2 उत्खन् 1 P, खनित्रेण पुटीकृ 8 U.

SCOPE, *s.* आशयः, अभिप्रायः, हेतुः, अर्थः, तात्पर्यं, उद्देशः. 2 विषयः, प्रसरः, परिमाणं, पर्यंतः, अवधिः, सीमा; 'mind of limited s.' अल्पविषया मतिः (R. I. 2). 3 अवसरः, अवकाशः; लब्धावकाशा मे प्रार्थना (S. 1) 'has found a s. (for itself)'.

SCORCH, *v. t.* अभि-सं-तप् 1 P or c., निर्-परि-दह् 1 P, भृष् 1 P, भ्रस्ज् 6 P, (in a pan); 's. ed with heat' आतपाक्रांत; 's. ed with the fire of missiles' अस्त्रपावकमृष्ट. -ING, *a.* दाहक, तापक, अत्युष्ण, अतितिग्म, उचंड, प्रखर, नैदाघ (घी *f.*).

SCORE, *s.* विंशति *f.* 2 अव-,च्छेदः, भंगः, दंतः. 3 रेखा, चिह्नं. 4 गणना, गणनापत्रं-लेखः. 5 विन्यासः (in music). 6 हेतुः, कारणं, निमित्तं; विषयः, अर्थः; 'on that s.' तस्मिन्विषये, तदर्थं; 'on the s. of friendship' सख्यहेतोः &c. -*v. t.* अवच्छिद् 7 P, दंतूरीकृ 8 U, भंगीकृ. 2 अंक् 10; रेखाभिः अंक् 3 अभि-,लिख् 6 P, गण् 10, (ऋणं or देयं) गण् or लिख् 6 P.

SCORIA, *s.* *See* DROSS.

SCORN, *v. t.* निर्-अव-धू 5,9 U, तिरस्कृ 8 U, अवज्ञा 9 U, अवमन् 4 A, उपेक्ष् 1 A, परिभू 1 P, ग्रक्ष्, धिक्कृ, परुषं निंद् 1 P. -*s.* (अत्यंत) अवज्ञा, अवमानः, तिरस्कारः, धिक्कारः, परिभवः, उपेक्षा; *See* CONTEMN, CONTEMPT. 2 अवलेपः, दर्पः; *See* PRIDE. -ER, *s.* अवमंतृ *m.*, तिरस्कर्तृ, निंदकः. -FUL, *a.* सावमान, सावज्ञ; तिरस्कारिन्, अवमानिन्, निंदात्मक; अवज्ञागर्भ; सावलेप, दृप्त. -FULLY, *adv.* सावज्ञं, सावमानं, सावलेपं.

SCORPIO, *s.* वृश्चिकः.

SCORPION, *s.* वृश्चिकः, अ(आ)लिः, वृ(द्रो)णः; 'the sting of a s.' लूमं.

SCOT, *s.* करः, देयभागः; 's.-free' अक्षत, अविकल, निर्व्रण.

SCOTCH, *v. t.* छैदैः अंक् 10, ईषत् छिद् 7 P.

SCOUNDREL, *s.* खंडितवृत्तः, जाल्मः, दुरात्मन् *m.*, अधमः, नरापसदः, निकृष्टः, खलः, दास्याः पुत्रः; (in voc.) काणेलीमातः; *See* RASCAL.

SCOUR, *v. t.* सं-परि-मृज् 2 P or c., निर्णिज् 3 U, घर्षणेन शुध् c., निर्घृष् 1 P. 2 Purge, q. v. -*v. i.* (Off, along) द्रुतं-जवेन-शीघ्रं-अपक्रम् 1 U, 4 P or धाव् 1 P or पलाय् 1 A, द्रुतं तॄ 1 P or अतिक्रम्. -ER, *s.* निर्णेजकः, वस्त्रधावकः. -ING, *s.* मार्जनं, निर्णेजनं.

SCOURGE, *s.* कशा-षा, प्रतिष्कशाः-षः, प्रतोदः, ताडनरज्जु *f.*; (fig.) धूमकेतुः, उपप्लवः, उत्पातः, कृतांतः, कालः, पीडकः. -*v. t.* कशया हन् 2 P or तड् 10 or प्रह् 1 P; 'fit to be s. ed' कश्य. 2 अत्यंतं पीड् 10 or अर्द् 1 P or c., उप-भु 1 A. -ING, *s.* कशाघातः, कशाताडनं-प्रहारः.

SCOUT, *s.* चारः, चरः, प्रणिधिः, अपसर्पः, गूढचरः; *See* SPY. -*v. i.* संचर् 1 P, गूढं-प्रच्छन्नं परचेष्टां निरूप् 10. -*v. t.* अव-उप-हस् 1 P, सहासं निरस् 4 U or निराकृ 8 U or प्रत्यादिश् 6 P.

SCOWL, *s.* भ्रूभंगः, भ्रु(भ्रू)कुटि-टी *f.* -*v. i.* भ्रुकुटिं बंध् 9 P, कृ 8 U with (*s.*), भ्रुवौ संकुच् 1 P, भ्रूभंगेन दृश् 1 P; *See* FROWN. -ING, *a.* सभ्रूभंग; 'with a s. look' सभ्रूभंगं, भ्रूवोर्भेदात्.

SCRAGGY, *a.* रूक्ष, कर्कश; *See* ROUGH, HARD. 2 कृश, क्षाम, क्षीण; *See* LEAN.

SCRAMBLE, *v. i.* हस्ताभ्यां भृत्वा-मंदंमंदं आरुह् 1 P. 2 संमर्द-कलई-कृ 3 U (with dat.); झटिति संग्रह् 9 P, ग्रहीतुं उद्यम् 1 A; 's. ed for water' जलादानार्थं परस्परं संमर्दमकुर्वन्. -*s.*,-ING, *s.* मंदं मंदं आरोहणं. 2 सरभसग्रहणं, संमर्दः.

SCRAP, *s.* खंडः, शकलः-लं, लवः, भंगः; 's. s of

what is eaten' फेला, भुक्तसमुज्झितं; उच्छिष्टं, पिंडः; 's.-book' खंडाधारः, द्रव्यखंडाधारः.

SCRAPE, *s.* कृच्छ्रं, संकटं, आपद् *f.*, दुर्गं, कष्टं, दुःखं, दुर्गति *f.*, दुर्दशा; 'got into a s.' कृच्छ्रगत, आपन्न, दुःस्थित. 2 घर्षणं. —*v. t.* घृष् 1 P; लिख् 6 P, उत्-वि-°, तक्ष् 1, 5 P, त्वक्ष् 1 P, खुर् 6 P. 3 घर्षणेन प्रमृज् 2 P or निर्णिज् 3 U or अप-नी 1 P or शुध् c.; (with feet) अपस्कृ 6 P. 4 (Together) (कष्टेन or महाप्रयत्नेन) समाह 1 P, संचि 5 U, संग्रह् 9 P, एकीकृ. —ER, *s.* उल्लेखनी, निर्घर्षणी, निर्घर्षणकः. 2 काष्ठकुद्दालः. —ING, *s.* घर्षणं, उल्लेखनं, तक्षणं, क्षुरणं. 2 विदलं, तटं; अव(प)स्करः, अवकरः, मलं.

SCRATCH, *v. t.* वि-उत्-प्रोत्-लिख् 6 P, वि-अव-दृ 9 P or c.; छिद् 7 P, निर्भिद् 7 P, खुर् 6 P; 's. with the nail' नखेन क्षण् 8 P or अंक् 10 or लिख्. 2 कंडूयति-ते (D.); नखैः घृष् 1 P. 3 (As birds) विष्कृ 6 P, अपस्कृ. 4 ईषत् क्षण् or उल्लिख्. 5 Scrawl, q. v. 6 (Out) प्रमृज् 2 P, विलुप् 6 P or c., निर्घृष्, उच्छिद् 7 P, विनश् c.; *See* ERASE. —*s.* (त्वचः) उल्लेखनं, दारणं, छेदः, भेदः; क्षतं, घर्षणं; व्रणः; 's. with the nail' नखक्षतं, नखांकः-व्रणः-पदं. 2 ईषत्क्षतं, त्वग्व्रणः; 'hard s.' ओरंकः. —ER, *s.* उल्लेखकः, विदारकः, कंडूयनकः; विष्किरः. —ING, *s.* उल्लेखनं, विदारणं, छेदः, &c.; कंडूयनं, कंडूया, कंडूतिः *f.*

SCRAWL, *v. t.* अस्पष्ट-स्थूल-लिख् 6 P, स्थूलाक्षरैः-अतिक्षिप्रं-लिख्. —*s.*, —ING, *s.* अस्पष्ट-स्थूल-लेखः.

SCREAM, *v. i.* आ-उत्-वि-क्रुश् 1 P, उच्चैः नद् 1 P or वि-, रु 2 P, वाश् 4 A (of birds); रवं मुच् 6 P, उच्चैः आक्रंद् 1 P, चीत्कारशब्दं कृ 8 U; 's. with pain' आर्तवत् रु, आर्तनादं मुच्. —*s.*, —ING, *s.* आक्रंदनं, उत्क्रोशः, चीत्कारः, उच्चनादः-रवः, कोलाहलः, विक्रुष्टं; 's. of pain' आर्तरवः-नादः,

SCREECH, *See* SCREAM; 's.-owl' नक्तरावी उलूकः, कालपेचकः.

SCREEN, *s.* आवरणं, व्यवधा-धानं, तिरस्करिणी, जव(य)निका; अंतर्धा-धानं, प्रतिसीरा. —*v. t.* प्र-, छद् 10, निगुह् 1 U, गुप् 1 P, (crime &c.); नि-आ-सं-वृ 5 U or c., व्यव-धा 3 U, पिधा, अंतर्धा. 2 रक्ष् 1 P; आश्रयं दा 3 U, आश्रयदानेन प्रच्छद्, &c.

SCREW, *s.* कर्षणी, व्यावर्तनकीलः. 2 कूपणः, बद्धमुष्टिः. —*v. t.* कर्षण्या-कीलकेन-बंध् 9 P. 2 व्या-परिवृत् c. 3 (Out) निष्पीड् 10, निर्हे 1 P, निष्कृष् 1 P, निर्दुह् 2 U. 4 पीड्, अर्दे 1 P or c., बाध् 1 A, उपसृ 1 A.

SCRIBBLE, *See* SCRAWL.

SCRIBE, *s.* लेखकः, लिपिकारः, अक्षरचणः, कायस्थः.

SCRIP, *s.* पुटः, पुटी; क्षुद्रकोपः. 2 लेखः, पत्रं, लेख्यं.

SCRIPTURE, *s.* वेदः, श्रुति *f.*, आम्नायः, निगमः. 2 शास्त्रं; 'religious s.' धर्मशास्त्रं; 'authority of the s. s' शास्त्रप्रमाणं. —AL, *a.* शास्त्रसिद्ध-उक्त, श्रुतिविहित, शास्त्र in comp.; 's. prohibition' शास्त्रप्रतिषेधः.

SCRIVENER, *s.* कुसीदः; *See* USURER. 2 लेखकः, लिपिकारः, लेखकवृत्तिः.

SCROFULA, *s.* गंड-कंठ-माला. —SCROFULOUS, *a.* गंडमालिन्.

SCROLL, *s.* पट्टः, लेख्यं, दीर्घपत्रं-पटः.

SCROTUM, *s.* मुष्कः, अंडः, फलं, कोशाः-षः, अंड-मुष्क-फल-कोशाः-षः, वृषणः.

SCRUB, *v. t.* अत्यंतं मृज् 2 P or c. or प्रक्षल् 10 or निर्णिज् 3 U or घृष् 1 P. —*s.* वातीनः, अधम-नीच-जघन्य-वृत्तिः. —SCRUBBY, *a.* तुच्छ, निकृष्ट, हीन; *See* MEAN.

SCRUPLE, *s.* संदेहः, आ-, शंका, संशयः, विकल्पः. —*v. i.* विकृप् 1 A or c., संदिह् 2 U, शंक् १ A, वि-आ-परि-°; ex. by 'Doubt', q. v. —SCRUPULOUS, *a.* सरल, ऋजु. 2 सूक्ष्म, निपुण, अतिसूक्ष्म, अतिसूक्ष्मदृष्टि. 3 साशंक, शंकाशील, आ-, शंकित.

SCRUTINY, *s.* निपुणपरीक्षणं, सूक्ष्मनिरूपणं-परीक्षा-दर्शनं, अनुसंधानं, निरूपणं. —EER, *s.* सूक्ष्मनिरूपकः. —IZE, *v. t.* सूक्ष्मं-निपुणं-दृश् 1 P or परीक्ष् 1 A or निरूप् 10, निपुणं अनुसं-धा 3 U or अनुयुज् 7 A or अन्विष् 4 P. —IZER, *s.* सूक्ष्मनिरूपकः, निपुणपरीक्षकः, सूक्ष्मदर्शिन्.

SCUD, *v. i.* अतिवेगेन-सहसा-गम् 1 P or चल् 1 P.

SCUFFLE, *s.* तुमुलं, नियुद्धं, कलहः, बाहुबाहवियुद्धं, द्वंद्वं. —*v. i.* बाहुबाहवि युध् 4 A.

SCULK, *v. i.* निभृते-गूढस्थाने-वृत् 1 A or स्था 1 P, गुप् pass.; 's. off' व्यपसृप् 1 P, पलाय् 1 A, अपक्रम् 1 U, 4 P. —ER, *s.* गूढवर्तिन् *m.*

SCULL, *s.* कपालः-लं, शिरोस्थि *n.*, करोटि-टी *f.*, कर्परः. 2 क्षुद्रक्षेपणि *f.*; 's.-cap' शिरस्त्रं, मस्तकावरणं.

SCULLION, *s.* पात्रक्षालकः-मार्जकः.

SCULPTOR, *s.* त्वष्टृ *m.*, तक्षकः, तष्टा, तक्षन् *m.* —SCULPTURE, *v. t.* तक्ष् 1, 5 P, त्वक्ष् 1 P, उल्लिख् 6 P, प्रतिमां कृ 8 U or निर्मा 3 A. —*s.* तक्षणं, त्वक्षणं, प्रतिमा-मूर्ति-करणं. 2 प्रतिमा, मूर्ति *f.*

SCUM, *s.* मंडः-डं; फेनः-णः; 's. of boiled rice' निस्रावः, आचामः; *See* under RICE. 2 मलं, उच्छिष्टं, अवस्करः, अवकरः, कल्कः, असारद्रव्यं, किट्टं; (fig.) मलं; मलं पृथिव्या वाहीकं (Mah. VIII. 45. 23) 'are the s. of the (whole) world.'

SCURF, *s.* शुष्कचर्मन्-*n.*; किलासं, सिध्मं; *See* ITCH (dry).

SCURRILOUS, *a.* परुष, तीक्ष्ण; दुरुक्त, अश्लील, अदक्षिण, दुर्वाच्य. 5 कटुभाषिन्, दुर्मुख, मुखर, वाग्दुष्ट. —SCURRILITY, *s.* पारुष्यं, मौखर्यं, दुरुक्तं, &c.

SCURVY, *s.* शीतादः, लवणरक्तं. —*a.* कुत्सित, गर्ह्य, तुच्छ, नीच; *See* MEAN.

SCUTCHEON, *s.* कुलीनचिह्नपत्रं, कौलीनकोषः.
SCUTTLE, *s.* करंडः, मंजूषा. **2** छिद्रं.
SCYTHE, *s.* लवित्रं, दात्रं, खड्गीकं, शस्यकर्तरिका.
SEA, *s.* सागरः, समुद्रः, उदधिः, अर्णवः, जलधिः, वारिधिः, अपांपतिः; *See* OCEAN; ' a rough s.' क्षुब्धार्णवः; ' s. of worldly existence ' भवसागरः, संसारार्णवः; ' s. of troubles ' क्लेशसागरः, दुःखार्णवः, &c.; ' go to s.' नाविकः-सांयात्रिकः-भू 1 P, नाविकवृत्तिं सेवृ 1 A; ' beyond the s. s ' द्वीपांतरे; ' s.-beat ' तरंगाहत; ' s.-faring ' समुद्रग यायिन्, सांयात्रिक; ' s.-fight ' नौयुद्धं; ' s.-girt ' *See* Girt; ' s.-green ' श्यामहरित, सागरवर्ण; ' s.-gull ' करंटः; ' s.-man ' नाविकः, समुद्रगः, पोतवाहः; ' s.-port ' पोताश्रयस्थानं, पोतशरणं, नौकाश्रयः; ' s.-shore ' समुद्रतटं-तीर, वेला, रोधस् *n.*; ' s.-sick ' समुद्रक्षुब्धदेहमत्; ' s.-side ' समुद्रवेला &c.
SEAL, *s.* मुद्रा, (fig. also); ' opening the s. of sleep ' क्षिपन्निद्रामुद्रां (Mal. 2); ' open it, preserving the s. and show me ' मुद्रां परिपालयन् उद्घाट्य दर्शय (Mu. 5); ' s. of the lips ' ओष्ठमुद्रा. **2** मकरः, नक्रः —*v. t.* मुद्रयति (D.). **2** निर्णी 1 P, स्थिरीकृ 8 U, दृढीकृ, दृढयति (D.); ' the defeat in that battle s. ed his fate ' पराजयेन तस्य भाविगतिः एकांततः निर्णीता. **2** मुद्रया अंक् 10 or चिह्नयति (D.). **3** (मुद्रया) पि-धा 3 U, बंध् 9 P; मुखं बध्नाति ' s. s the lips '. —ED, *a.* मुद्रित, कृतमुद्र, मुद्रांकित, मुद्राबद्ध; ' s. ing wax ' ला(रा)क्षा; *See* LAC.
TWILIGHT, s. संध्या, संधिप्रकाशः, संध्याकालः-समयः, निशादिः.

TWIN, a., s. यम, यमज, यमल; 'we are t. brothers' भ्रातरावावां यमजौ (U. 6); oft. by यमलं, युगं, द्वंद्वं, मिथुनं, युगलं; 't. stars', मिथुनं; 'one of t.' यमः, यमलः.

TWINE, s. सूत्रं, तंतुः. -v. t. उद्-ग्रंथ् 9 P, उल्लच् 10, (कुसुमोल्लचितान्वलीभूतश्चलयन् अलकान् R. VIII. 53). 2 (Itself) आ-परि-वेष्ट् c., आ-परि-वृत् c.

TWINGE, s. व्यथा, पीडा, वेदना, शलः-लं, तीव्रवेदना. -v. t. Ex. by कृ with (s.).

TWINKLE, v. i. (Of the eye) नि-,मिष् 6 P, उन्मिष्, निमील् 1 P, उन्मील्, निमेषोन्मेषं कृ. 2 स्फुर् 6 P, तरल-सकंप-प्रभा 2 P or प्रकाशू 1 A or धृत् 1 A. -s.,-ING, s. निमि(मे)षः, निमेषोन्मेषौ; 'within the t. of the eye' निमेषमात्रात्, निमेषेण. 2 स्फुरणं, स्फुरितं, तरलज्योति n. -प्रभा; 'the eyes knowing no t.' (पद्मौ) निमेषालसपक्ष्मपंक्तिः (R. II. 19), अनिमेषलोचनो ददर्श (Ka. 11).

TWIRL, v. t. त्वरितं भ्रम् c. or परि-वृत् c. -v. i. परि-वृत् 1 A, भ्रम् 1, 4 P. -s. त्वरितपरिवृत्ति f.

TWIST, v. t. परि-व्या-वृत् c., आकुंच् c., मुद्-द्रु 10. -v. i. व्यावृत् 1 A, आकुंच् pass. -s. व्यावर्तनं, आ-,कुंचनं, मोटनं.

TWIT, v. t. See CENSURE, TAUNT.

TWITCH, v. t. (सहसा) आकृष् 1 P, आ-क्षिप् 6 P. -v. i. स्फुर् 6 P, स्पंद् 1 A, प्र-,कंप् 1 A. -s. सहसाकर्षः-आक्षेपः, स्फुरणं, स्पंदनं.

TWITTER, v. i. प्र-जल्प् 1 P, प्र-लप् 1 P. -s. प्रलापः, प्रजल्पः; See CHATTER.

TWO, a. द्वि (द्वौ, द्वे f. n.), द्वि pr.; द्वयं affixed; 't. years' द्विवर्षं, वर्षद्वयं; 't. or three' द्वित्राः; 't.-fold' द्विगुण; 't.-handed' द्विहस्त; द्विजिह्व &c.; 'in t. ways' द्विधा. -TWICE, adv. द्विः, द्विवारं; 't. married' पुनरूढा, पुनर्भूः (widow remarried); '20 is t. 10' द्विरावृत्ता दश विंशतिः संपद्यते.

TYPE, s. आदर्शः; प्रतिरूपं; See MODEL. 2 चिह्नं, लक्षणं, व्यंजनं. 3 मुद्राक्षरं. 4 प्रकारः, रीति f. -ICAL, a. Ex. by (s.) in comp.; आदर्शीभूत, प्रतिरूपक. -TYPIFY, v. t. आदर्शीकृ 8 U, प्रतिरूपेण दृश् c. -TYPOGRAPHY, s. मुद्राकनं.

TYRANNY, s. प्रजापीडनं, लोकोपप्लवः, जनमर्दनं, निष्ठुरशासनं. -IC,-ICAL, a. प्रजोपप्लविन्, प्रजोपद्रविन्. -IZE, v. t. (भृशं) पीड् 10, उप-द्रु 1 A, विप-द्रु 8 U, उपद्रु 1 P. -TYRANT, s. प्रजापीडकः, लोकोपप्लावकः, उपद्रवी, निष्ठुरशासनः.

TYRO, s. नवच्छात्रः-शिष्यः, अनभ्यस्तः.

U.

UBIQUITOUS, a. सर्वगत, सर्वव्यापिन्.

UDDER, s. ऊधस् n., आपानं, स्तनं (mostly human); 'having pot-like u.s' घटोधनी; 'having large u.s' पीनोधनी.

UGLY, *a.* कु-वि-अप-रूप, विकृत, कदाकार; दुर्दर्शन, विकृताकार. 2 कुत्सित, निंद्य. -INESS, *s.* वैरूप्यं, अपरूपता, कदाकारः.

ULCER, *s.* पूयव्रणः-णं, विद्रधिः, नाडीव्रणः-णं, पूयक्षतं. -ATE, *v. t.* व्रणं उत्पद् c. -*v. i.* सक्षतीभू 1 P, व्रणं बंध् 9 P. -ATED,-OUS, *a.* पूयव्रणिन्, सव्रण, सक्षत, उपहत in comp. with (*s.*).

ULTERIOR, *a.* इत्तर, अपर; *See* DISTANT.

ULTIMATE, *a.* चरम, अंतिम; *See* LAST. -LY, *adv.* अंते, शेषे, अंततः. -ULTIMATUM, *s.* चरमाभिसंधिः, अंत्यप्रतिज्ञा.

ULTRA, *a.* Ex. by अति in comp.

UMBILICAL, *a.* नाभ्य, नाभि in comp.; ' u. cord ' नाभि *f.*,-नालः.

UMBRAGE, *s.* छाया. 2 अप्रीति *f.*, कोपः, असंतोषः, अपराधः; ' take u. ' प्र-,कुप् 4 P, ' Angry ', q. v.; ' give u. ' विरागं नी 1 P; *See* INSULT.

UMBRELLA, *s.* छत्रं, आतपत्रं, घर्मवारणं, जलत्रं.

UN, A prefix, ex. by अ (अन् before vowels), sometimes by निर्, वि, दुस् pr., हीन, रहित in comp.; ' unaided ' असहाय, साहाय्यहीन; ' undaunted ' निर्भीक, अभय; ' unmixed ' अमिश्र; ' unwelcome ' अप्रिय, अनभिमत &c.; ' unattainable ' दुष्प्राप. (In cases where the word formed with ' un ' is not given, the student should take the simple word or form it, and use the above prefixes. With nouns the sense of ' un ' may be expressed by अप-नी 1 P, or हृ 1 P; *e. g.* ' unbar ' अर्गलं अपनी, निर्गलीकृ &c.)

UNACCUSTOMED, *a.* अपरिचित, अनभ्यस्त, अननुभूत.

UNAFFECTED, *a.* अकृत्रिम, सहज, अव्याज; *See* ARTLESS.

UNANIMOUS, *a.* एकमत-चित्त. -LY, *adv.* एकचित्तीभूय, ऐकमत्येन. -UNANIMITY, *s.* ऐकमत्यं, चित्त-मत-ऐक्यं, एकचित्तता; अस्मिन् विषये सर्वेषामैकमत्यं ' there is a u. on this point '.

UNARMED, *a.* विशस्त्र, निरायुध, असज्ज.

UNASSAILABLE, *a.* दुष्प्रधर्ष, अधृष्य, दुरासद.

UNASSUMING, *a.* अविकत्थन, अकृत, विनीत; *See* HUMBLE.

UNAVAILING, *a.* निरर्थक, निर्गुण, निष्फल.

UNAWARES, *adv.* अतर्कितं, अलक्षितं, निभृतं, अकस्मात्; *See* SUDDENLY also.

UNBAR, UNBOLT, *v. t.* निरर्गलयति (D.).

UNBELIEVER, *s.* नास्तिकः,-बुद्धिः, पाखंडः, मिथ्यादृष्टिः.

UNBEND, *v. t.* शिथिलीकृ 8 U; *See* RELAX. -ING, *a.* Cruel, q. v.

UNBIND, *v. t.* उद्-ग्रंथ् 9 P, शिथिलीकृ 8 U.

UNBLEMISHED, *a.* निष्कलंक, निरवद्य, अक्षत.

UNBOSOM, *v. t.* विवृ 5 U; *See* DISCLOSE; ' u. oneself ' हृदयं-मनोगतं-विवृ.

UNBOUNDED, *a.* अनंत, अमित.

UNBRIDLED, *a.* उच्छृंखल, उद्दाम, निमर्याद, अनर्गल.

UNBURDEN, *v. t.* भारमपनी 1 P; *See* ALLEVIATE also.

UNCEREMONIOUS, *a.* अनादर, मंदादर. -LY, *adv.* मंदादरेण.

UNCERTAIN, *a.* संदिग्ध, संशयग्रस्त; *See* DOUBTFUL. -TY, *s.* अनिश्चयः, अनिर्णयः.

UNCHAIN, *v. t.* निगडान् अपनी 1 P, मुच् c.; *See* FREE, LIBERATE.

UNCHARITABLE, *a.* दोषदृष्टि, असूयक, छिद्रान्वेषिन्.

UNCHASTE, *a.* अविनीत, पांसुल, &c.; *See* PROSTITUTE.

UNCLAIMED, *a.* अस्वामिक, अनधिकृत.

UNCLE, *s.* पितृव्यः. 2 मातुलः (maternal u.)

UNCLOSE, *v. t.* Open. q. v.

UNCLOTHE, *v. t.* Strip, q. v. -ED, *a.* विवस्त्र, नग्न; *See* NAKED.

UNCLOVEN, *a.* एकशफ, एकखुर.

UNCOMMON, *a.* असामान्य, अपूर्व, अलौकिक (की *f.*). -LY, *adv.* अपूर्वं; *See* EXCEEDINGLY.

UNCONCERN,-ED, *a.* Indifferent, &c., q. v.

UNCONTROLLED, *a.* अप्रतिबंध, निरर्गल, निर्यंत्रण.

UNCOUPLE, *v. t.* Separate, q. v.

UNCOUTH, *a.* Ugly, Strange, q. v.

UNCOVER, *v. t.* उच्छद् 10, अपा-वि-वृ 5 U; *See* STRIP; ' they u.ed their heads ' शिरोवेष्टनमपनि-युः.

UNCTION, *s.* अभि-,अंजनं, आ-वि-लेपः-पनं. -UNCTUOUS, *a.* स्निग्ध, मसृण, चिक्कण, सांद्र.

UNDECEIVE, *v. t.* भ्रमं निरस् 4 U or अपाकृ 8 U or छिद् 7 P.

UNDECIDED, *a.* अनिश्चित; (of persons) Irresolute, q. v.

UNDENIABLE, *a.* निर्विवाद, निःसंदेह.

UNDER, UNDERNEATH, *prep.* अधः, अधस्तात् (with gen.); *See* BELOW; तले in comp. or with gen. 2 अधीन, आयत्त, वशग; *See* SUBJECT. 3 (Age &c.) ऊन in comp.; ' u. 16 ' ऊनषोडशवर्ष; ' u. age ' अप्राप्तवयस्क, अप्राप्तव्यवहार; ' should bury one who is u. two years ' ऊनद्विवर्षं निखनेत् (Y. III. 1). 4 काले, समये or ex. by ' Reign ', q. v.; ' u. the Moghuls ' मौंगलेषु महीं शासत्सु; gen. ex. by loc. or instr.; ' u. this condition ' अनेन समयेन; ' u. misfortunes ' आपदि, आपत्काले; ' u. your favour ' भवदनुग्रहेण.

-*a.* अधर, अधः: in comp.; 'u.-garment' अधोंशुकं, अधोवासः; *See* GARMENT; oft. by उप pr.

UNDERGO, *v. t.* अनुभू 1 P, सह् 1 A, उपगम् 1 P; *See* SUFFER; 'u. examination' परीक्ष् pass.; 'u. change' परिवृत् 1 A, विकृ pass.

UNDERGROUND, *a.* आंतर्भौम, भूम्यधस्तात्.

UNDERHAND, *a.* गूढ, प्रच्छन्न, परोक्षकृत, छलेन कृत; निंद्य, गर्हणीय.

UNDERLIE, *v. t.* ली 4 A, निगूह् pass. (with loc.).

UNDERLINE, *v. t.* अधोरेखया अंक् 10.

UNDERLING, *s.* अनुजीविन् *m.*

UNDERMINE, *v. t.* सुरंगां कृ 8 U, उत्खन् 1 P, अधस्तात् विनश् c. 2 विनश् c, अवसद् c., उच्छिद् 7 P, कृ 1 P; 'a river u. ing its banks' कूलंकषा सिंधुः.

UNDERRATE, UNDERVALUE, *v. t.* न्यूनमूल्यं कृप् c., अर्घतः पत् c. 2 लघु मन् 4 A, अवमन्, लघूकृ, अपकृष् 1 P.

UNDERSTAND, *v. t.* बुध् 1 P, ज्ञा 9 U, अवगम् 1 P, ग्रह् 9 P, उपलभ् 1 A, वि-भू c., अव-इ 2 P, अवधृ 10; *See* KNOW. 2 (Words &c.) अध्या-इ 1 P, ऊह् 1 A, (इदं पदमत्राध्याहर्तव्यं). -ING, *s.* मतिः, बुद्धिः, धीः, मेधा, ग्रहण-ज्ञान-शक्तिः, प्रज्ञा; *See* INTELLECT. 2 भावः, वृत्ति *f.*; 'good u.' सद्भावः, मित्रभावः; 'come to an u.' *See* SETTLE.

UNDERTAKE, *v. t.* आरभ् 1 A, उपक्रम् 1 A; *See* BEGIN. 2 व्यवसो 4 P, ईह् 1 A; *See* ATTEMPT, INTEND. 3 स्वी-अंगी-कृ 8 U, उ(ऊ)रीकृ, अभ्युपगम् 1 P, अभ्यूप-इ 2 P, प्रति-पद् 4 A. -ER, *s.* आरंभकः, अनुष्ठातृ *m.* 2 प्रेतकर्मनिर्हारकः. -ING, *s.* कार्यं, व्यवसायः, कर्म, आरंभः, व्यापारः, प्रवृत्ति *f.*

UNDESERVING, *a.* अनर्ह, अगुणवत्, अपात्र, निर्गुण.

UNDESIGNED, *a.* अनभिप्रेत, अबुद्धिपूर्व. -LY, *adv.* अज्ञानतः, अबोधपूर्वं, अकामतः.

UNDESIGNING, *a.* Sincere, q. v.

UNDIMINISHED, *a.* अक्षत, अन्यून, अनपाय, अक्षुत, अक्षीण.

UNDISGUISED, *a.* Frank, q. v.

UNDIVIDED, *a.* अभिन्न; (attention) एकाग्र, अनन्य, अनन्यासक्त, सुसमाहित; *See* FIXED.

UNDO, *v. t.* उन्मुच् 6 P, उद्-घट् c., उद्-ग्रंथ् 9 P. 2 व्या-परा-वृत् c.; 'able to do, not to do, or u. things' कर्तुमकर्तुमन्यथा कर्तुं क्षमः. 3 हन् 2 P, नश् c.; 'Oh! I am undone' हा हतोस्मि (मंदभाग्यः), दैवेन मुषितोस्मि.

UNDRESS, *v. t.* वासः-वस्त्रं-अपनी 1 P or अवहृ c. or उन्मुच् 6 P or अपनह् 4 P. -*s.* लघुवासस् *n.* -ED, *a.* (food) असंस्कृत, अपक्व, आम. 2 विवस्त्र, विवसन, उन्मुक्तवसन.

UNDULATE, *v. i.* तरंगायते (D.), उत्स्पृ 1 P; better by 'u. ing.' -ING,-ORY, *a.* ऊर्मिमत्, तरंगित, उन्नतावनत, भंगुर, उत्सर्पिन्. -ION, *s.* भंगुरता, ऊर्मिमत्ता, &c.

UNEARTH, *v. t.* उत्खन् 1 P.

UNEQUALLED, *a.* Matchless, q. v.

UNERRING, *a.* अमोघ, अभ्रांत, अवंध्यपात; 'took an u. aim on his bow' धनुषि अमोघं समधत्त बाणं; *See* FIX.

UNEVEN, *a.* विषम, उन्नतानत.

UNEXPECTED, *a.* असमर्थित, अतर्कित, आकस्मिक (कीं *f.*), अकांड, अनपेक्षित, अचिंतितपूर्व. -LY, *adv.* अकस्मात्, अकांडे, अतर्कितं.

UNFAITHFUL, *a.* Faithless, q. v.

UNFASTEN, *v. t.* Loose, q. v.

UNFATHOMABLE, *a.* अगाध, अतलस्पर्श.

UNFAVOURABLE, *a.* प्रतिकूल, वि-पराङ्-मुख (खी *f.*), विरक्त, अननुकूल; विषम, अप्रिय, अप्रसन्न.

UNFEELING, *a.* निर्दय, क्रूर; *See* CRUEL.

UNFIT, *a.* अयोग्य, अक्षम, &c. -*v. t.* Disable, q. v.

UNFOLD, UNFURL, *v. t.* विस्तृ-स्तृ c. 2 विवृ 5 U; *See* DISCLOSE.

UNFORESEEN, *a.* Unexpected, q. v.

UNFORTUNATE, *a.* अधन्य, दुर्दैव, मंद-हत-भाग्य, दैवोपहत, आपद्ग्रस्त. 2 अमंगल, अभद्र, अशुभ. -LY, *adv.* मंदभाग्यतया, दुर्दैवात्.

UNFOUNDED, *a.* अमूलक, निर्मूल, मिथ्या in comp.

UNFRUITFUL, *a.* Fruitless, q. v.

UNGAINLY, *a.* Clumsy, q. v.

UNGOVERNABLE, *a.* अवश्य, अविधेय, अनिवार्य, दुर्निवार, दुर्निग्रह. उद्दाम, निर्यंत्रण, उच्छृंखल.

UNGRATEFUL, -NESS, *See* INGRATE &c.

UNGUENT, *s.* अभ्यंजनं, अनु-वि-लेपः-पनं, समालंभः-भनं.

UNHAPPY, *a.* अधन्य, मंदभाग्य, दुःखभाज्, अनिर्वृत; *See* MISERABLE.

UNHARMED, UNHURT, *a.* अक्षत, निर्व्रण.

UNHARNESS, *v. t.* मुच् c.

UNHINGE, *v. t.* विसंधीकृ 8 U, अपसंधीकृ.

UNICORN, *s.* एकशृंगः.

UNIFORM, *a.* सरूप, एक-समान-विध, एक-समान-रूप, एकप्रकार, एकाकार; सम, समान, अविशेष. -*s.* निर्विशेषः वेषः. -ITY, *s.* सारूप्यं, ऐकविध्यं, साम्यं, एकरूपता. -LY, *adv.* नियतं, अभ्रांतं, अविरतं, एकरूपेण, सदा.

UNIMPEDED, UNINTERRUPTED, *a.* निर्विघ्न, निरंतर, अनंतराय, अविच्छिन्न, अविरत.

UNIQUE, *a.* अपूर्व, अद्वितीय, अप्रतिरूप.

UNISON, *s.* एकतानः, स्वरैक्यं.

UNIT, *s.* एकः, एकांकः. -UNITY, *s.* एकता-त्वं, अद्वैतं; 'doctrine of u.' अद्वैतवादः, अभेदः. 2 ऐक्यं, एकचित्तता. -UNITARIAN, *s.* अद्वैतवादिन् *m.*

Unite, *v. t.* युज् 7 U, 10, सं-समा-°, संगम् c., संहन् 2 P, समानी 1 P, सं-घट् c., सं-धृच् 7 P, 2 A, सं-धा 3 U; 'seems u. ed' भवति कृतसंधानमिव (S. 1). -*v. i.* घट् 1 A, (तत्तेन तत्समयसा घटनाय योग्यं V. 2), संयुज् pass.; एकत्र भू, सं-,मिल् 6 P; *See* Assemble. -ed, *a.* संहत; मिलित; संयुक्त. -edly, *adv.* संभूय, मिलित्वा, एकीभूय, संहत-. *a.* -Union, *s.* संगः, संगमः, समागमः, संगतं-ति *f.*, संहति *f.*, समवायः, सं-,योगः, संधिः; 'u. is strength' समवायो हि दुस्तरः; (*cf.* बहूनामप्यसाराणां संहतिः कार्यसाधिका 'weak faggots make a strong bundle').

Universe, *s.* विश्वं, सर्वं जगत्, त्रिभुवनं; *See* World. -al, *a.* विश्व, सार्वलौकिक-सार्वत्रिक-(की *f.*); सर्वगत, सर्व; 'u. spirit' विश्वात्मा, जगदात्मा, ब्रह्म. -ality, *s.* सर्वगतत्वं, अभिव्यापित्वं. -ally, *adv.* सर्वतः, सर्वत्र, विश्वतः, विष्वक्.

Univocal, *a.* एकार्थ, ऐकतानिक (की *f.*).

Unkind, *a.* अस्निग्ध, विप्रिय, निर्दय, क्रूर. -ness, *s.* निर्दयता, &c. 2 अपकारः, अहितं.

Unlace, *v. t.* *See* Free.

Unlawful, *a.* Illegal, q. v.

Unlearn, *v. t.* स्मृतेः अपास् 4 U, वि-स्मृ 1 P. -ed, *a.* अज्ञान, अकृतविद्य.

Unless, *conj.* न-नो-चेत्, यदि न.

Unload, *v. t.* भारं अप-नी 1 P or अव-हृ c. or अवरुह् c.; *See* Disburden.

Unlock, *v. t.* उद्-घट् c., उन्मुद्रयति (D.).

Unloose, *See* Loose, -en.

Unman, *v. t.* पौरुषं नश् c. or ह 1 P. -ly, *a.* क्लीब, पौरुषहीन, पुरुषानर्ह.

Unmask, *v. t.* छद्मवेशं अपहृ 1 P; (fig.) निजरूपं प्रकटीकृ 8 U; 'he was u. ed' तस्य वास्तविकं स्वरूपमाविष्कृतं.

Unmeaning, *a.* अनर्थक, असंगत, अपार्थ.

Unmoor, *v. t.* उन्मुच् 6 P or c.

Unmoved, *a.* स्थिर, अविचलित, निर्विकार.

Unnatural, *a.* निसर्ग-सृष्टिक्रम-विरुद्ध-बाह्य.

Unnecessary, *a.* निष्प्रयोजन, वृथा in comp.

Unnerve, *v. t.* Enfeeble, q. v.

Unpack, *v. t.* उद्-घट् c., कोशात् निष्कृष् 1 P.

Unprincipled, *a.* दुर्वृत्त, विचारहीन, सदसद्विवेकहीन.

Unravel, *v. t.* उद्-ग्रंथ 9 P, व्याकृ 1 U, व्या-ख्या 2 P.

Unreal, *a.* असार, मायात्मक, अतथ्य.

Unrelenting, *a.* *See* Cruel.

Unreserved, *a.* अशेष, निःशेष, सं-,पूर्ण.

Unrestrained, *a.* निरवग्रह, उच्छृंखल, उद्दाम, निर्बंधन, अनर्गल, निरंकुश.

Unrivalled, Unparalleled, *a.* अप्रतिम, अद्वितीय, अतुल, अप्रतिरूप; अनुपम.

Unroll, *v. t.* *See* Open.

Unruly, *a.* Ungovernable, q. v.

Unsaddle, *v. t.* पर्याणं अपनी 1 P.

Unscrupulous, *a.* निःशंक, शंकाहीन.

Unseal, *v. t.* मुद्रां अपनी 1 P, उद्-घट् c., उन्मुद्रयति (D.).

Unsettle, *v. t.* आकुलीकृ 8 U, क्षुभ् c., आकुलयति (D.); *See* Agitate. -ed, *a.* अस्थिर, आकुल, क्षुब्ध.

Unshakle, *v. t.* *See* Free.

Unsheathe, *v. t.* कोशात् उद्-हृ 1 P or निष्कृष् 1 P. -ed, *a.* विकोश, उद्धसित.

Unsightly, *a.* अप्रिय-विरूप-दर्शन, कुरूप; *See* Ugly.

Unsound, *a.* असार, अयुक्तिसिद्ध.

Unsteady, *a.* *See* Fickle.

Unstring, *v. t.* (A bow) ज्यां अपनी 1 P or शिथिलयति (D.); 'a bow unstrung' शिथिलज्याबंधं धनुः (S. 2).

Untie, *v. t.* उत्-मुच् c., मोक्ष् 10, उद्-ग्रंथ् 9 P, शिथिलयति (D.).

Until, *prep.* *See* Till.

Untimely, *a.* अकाल in comp.; oft. अप pr.

Unto, *prep.* *See* To.

Untwist, Untwine, Unveil, Unwrap, *v. t.* *See* Open.

Unusual, *a.* अपूर्व, असामान्य, अलौकिक (की *f.*).

Unwholesome, *a.* अपथ्य, अहितावह.

Unwieldy, *a.* स्थूल, अतिमहत्, अनुत्थानयोग्य.

Unworthy, *a.* अनर्ह, अयोग्य, निर्गुण; oft. by अ; 'u. object' अपात्रं; अकार्यं, &c.

Unyoke, *v. t.* मुच् c., मोक्ष् 10. 2 वियुज् 10.

Up, *prep., adv.* उत् prefixed; ऊर्ध्वं, उपरि, उच्चैः; 'up to' *See* Till; आमदानात् 'up to being given away'; आफलोदयकर्मणां &c.; 'be up and doing' कार्यव्यग्रो भव; 'ups and downs' पातोत्थाताः; *See* Down. -per, *a.* उपरितन (नी *f.*), उपरिस्थ, ऊर्ध्व, उत्तर; 'to get the u. hand' अभि-भू 1 P, अतिरिच् pass; *See* Excel.

Upbraid, *v. t.* निर्भर्त्स् 10 A; *See* Reproach.

Uphold, *v. t.* समर्थ् 10, द्रढयति (D.), उत्तंभ् 9 P, सं-धृ 10, आ-अव-लंब् 1 A; *See* Support.

Upholsterer, *s.* गृहोपस्करविक्रायिन् *m.*

Upland, *s.* उपरिभूमि *f.*, अधित्यका.

Uplift Upraise, *v. t.* उद्यम् 1 A, उत्था c., (उत्थापयति), उच्छ्रि 1 U; *See* Raise.

Upon, *prep.* *See* On.

UPRIGHT, *a.* उन्नत, उच्छ्रित, दंडवत् *ind.*, ऋजु. 2 सरल, सत्यात्मन्, ऋजु; *See* HONEST. -LY, *adv.* दंडवत्; ऋजु, साक्ष्येन.

UPROAR, *s.* कोलाहलः, कलकलः, तुमुलं.

UPROOT, *v. t.* उन्मूल् 10, मूलात् छिद् 7 P, उत्पट् 10, उद्धृ 1 P; *See* ERADICATE.

UPSET, *v. t.* परिवृत् c., पर्यस् 4 U.—*s.* पर्यासः, परिवर्तनं; *See* OVERTURN.

UPSHOT, *s.* परिणामः, पर्यवसानं.

UPSIDE, *s.* अधरांशः; 'u.-down' अधरोत्तर- *a.*, अधोमुख-*a.*.; 'turn u.-down' अधोमुखीकृ.

UPSTART, *s.* नवोदयः, नवोत्थानः, नवर्द्धिः, आगंतुकः.

UPWARD, UPWARDS, *adv.* ऊर्ध्वं, उपरि. 2 अधिक in comp.; अधिकत्रिंशा नराः 'u. of 30'; परं, परः in comp. (पुरःसहस्राः शरदः U. 1).

URBAN, *a.* पौर (री *f.*), नागरिक (की *f.*). 2 सुजन, सुशील, दक्षिण. -ITY, *s.* दाक्षिण्यं, नागरिकवृत्ति *f.*, सौजन्यं.

URCHIN, *s.* (दुष्ट-) बटुः, माणवकः.

URETHRA, *s.* मूत्रमार्गः-द्वारं.

URGE, *v. t.* प्रोत्सह् c., प्रचुद् 10, उत्तिज् c., प्रणुद् 6 P or c., प्रवृत् c.; *See* PROMPT. 2 निर्बंधेन प्रच्छ् 6 P, अनुनिर्बंध् 9 P; *See* IMPORTUNE. -ENCY, *s.* गौरवं, गुरुता, भारः. 2 निर्बंधः, आग्रहः. -ENT, *a.* गुरु, आवश्यक (की *f.*), अपरिहार्य, अविलंब्य. -ENTLY, *adv.* निर्बंधेन. 2 आशु, अपरिहार्यतया.

URINE, *s.* मूत्रं, प्रस्रावः, मेहः. -*v. i.* मूत्र् 10. -AL, *s.* मूत्रपात्रं-भाजनं. -ARY, *s.* मूत्रस्थानं. -*a.* मूत्र in comp.

URN, *s.* (जल-) कुंभः, कलसः-शः, भाजनं.

URSA-MAJOR, *s.* सप्तर्षयः.

USE, *v. t.* प्र-उप्-युज् 7 A, 10, व्यव-हृ c., व्याहृ c., उप-,भुज् 7 U, सेव् 1 A; धृ 10 (clothes &c.). 2 प्र-युज्; 'is used in the sense of *Light*' तेजसि प्रयुज्यते; 'for it is found to be so used' इति प्रयोगदर्शनात्; 'to be used (conventionally or by popular acceptance)' ex. by रूढ, प्रसिद्ध; ज्योतिःशब्दो ज्वलन एव रूढः (S. B. 104); दाक्षिण्यरूढेन लज्जा (R. I. 31). 3 आचर् 1 P, व्यव-हृ 1 P, वृत् 1 A (with loc.); *See* ACT. 4 अभ्यस्त-परिचित-*a.* कृ 8 U. 5 (With inf.) By present tense simply; पातुं न प्रथमं व्यवस्यति, नादत्ते &c. (S. 4) or by पूर्वं, पुरा; 'I used to sing' पुरा गायकवृत्तिरासं; 'it used to be so' एवं पूर्वं आचार आसीत्; 'to be used to' अभिज्ञ, परिचित, अभ्यस्त, अनुभूत, उपभुक्त; अनभ्यस्तरथचर्याः (U. 5) 'not used to sit in chariots'; 'used to pain' दुःखाभिज्ञ, अनुभूतदुःख; 'not used to ornaments' अनुपभुक्तभूषणः (S. 4). -*s.* उपयोगः, प्रयोजनं, अर्थः, फलं, कार्यं; किं with instr.; किं तेन जातेन, कौर्थस्तेन जातेन &c.; *See* WANT. 2 प्रयोगः, व्यवहारः, व्यापारः, उपभोगः, सेवनं; 'to apply to one's own u.' स्वयं उपयुज्; 'in general u.' रूढ, प्रसिद्ध, सर्वप्रयुक्त. -AGE, *s.* प्रयोगः. 2 व्यवहारः, आचारः, आचरणं, वृत्ति *f.*; 'conventional u.' रूढि *f.* -FUL, *a.* उपयुक्त, हित, सोपकार, उपयोगिन्, उपकारिन्, हितकर (री *f.*). -FULLY, *adv.* अवृथा, सफलं, सोपयोगं, अमुधा. -FULNESS, *s.* उपयोगः-गिता, हितकारित्वं. -LESS, *a.* निष्प्रयोजन, निरर्थक, विफल, निष्फल, निर्गुण, निरुपयोग, व्यर्थ, अनुपयोगिन्, वृथा-मुधा in comp. -LESSLY, *adv.* वृथा, व्यर्थं, मुधा, निष्फलं. -LESSNESS, *s.* अनुपयोगः, वैयर्थ्यं. —USUAL, *a.* साधारण (णी *f.*), सामान्य, व्य(व्या)वहारिक-प्रायिक-लौकिक-सांप्रदायिक (की *f.*), प्रसिद्ध; oft. by 'u.-ly.' -LY, *adv.* प्रायः, प्रायेण, प्रायशः, साधारण्येन, सामान्यतः, बहुशः.

USUFRUCT, *s.* फल-फलभोग-अधिकारः.

USURP, *v. t.* बलाद् ग्रह् 9 P or आत्मसात्कृ 8 U, अनधिकारेण आक्रम् 1 U, 4 P. -ATION, *s.* बलाद् आक्रमणं-ग्रहणं, बलापहारः. -ER, *s.* बलाद् ग्राहिन्; 'u. to the throne' राज्यापहारी.

USURY, *s.* कुसीदं, कौसीद्यं; अर्थप्रयोगः, वृद्धिजीविका. -ER, *s.* कुसीदकः, वृद्ध्याजीवः, वार्धुषिकः, वार्धुषिः. -OUS, *a.* कौसीद (दी *f.*), सवृद्धिक.

UTENSIL, *s.* भांडं, पात्रं, उपकरणं, भाजनं.

UTERUS, *s.* गर्भकोशः, गर्भाशयः, योनि *f.* -UTERINE, *a.* सहोदर, सोदर, समानोदर, सनाभि.

UTILITY, *s.* उपयोगः; *See* USE.

UTMOST, *a.* परम, पर; 'to the u. of one's power' यावच्छक्यं, यावच्छक्तितः; 'do or try one's u.' यावच्छक्यं प्रयत् 1 A; 'u. limit' परा काष्ठा, परा कोटिः; 'this is the u. that I can do' एष मे परमो विभवः (Ka. 159).

UTOPIAN, *a.* काल्पनिक (की *f.*), मनःसृष्ट; 'u. scheme' कल्पना-मनः-सृष्टिः.

UTTER, *a.* संपूर्ण; *See* COMPLETE. 2 केवल, मात्र in comp.; (मौखर्यमात्रमिदं). -*v. t.* उदीर् c., व्या-हृ 1 P, उदाहृ, उद्-गृ 6 P, उच्चर् c.; *See* SAY also. -ANCE, *s.* उच्चारः-रणं, उद्गारः, व्याहारः, उदीरणं; 'easy of u.' सुखोच्चार्य, सुखोद्य. -LY, *adv.* सर्वथा, अशेषेण, साकल्येन, संपूर्णं.

UVULA, *s.* अलि-प्रति-जिह्वा.

UXORIOUS, *a.* स्त्रीवश्य, भार्यासक्त, स्त्रीविधेय, दारनिरत, कामवश. -NESS, *s.* भार्यासक्ति *f.*, भार्याधीनता.

V.

VACANT, *a.* शून्य, (fig. also), रिक्त; 'with v. looks' शून्येक्षण *a.*; 'v.-minded' शून्यहृदय. 2 अस्वामिक; 'a v. throne' अराजक. -VACANCY, *s.* शून्यं, रिक्तं. 2 शून्यं; अस्वामिकं अधिकारपदं. -VACATE, *v. t.* उत्सृज् 6 P, रिच् 7 P, परि-, त्यज् 1 P. -ION, *s.* अनध्ययनं, अध्ययनविश्रामः-निवृत्ति *f.*, विश्रामकालः.

VACCINE, *a.* गव्य.

VACCINATE, *v. t.* गोबीजं निविश् c.

VACILLATE, *See* WAVER. -ION, *s.* अस्थिरता, अनिश्चयः, चांचल्यं.

VACUITY, VACUUM, *s.* शून्यं, खं, रिक्तं, आकाशं.

VAGABOND, VAGRANT, *a., s.* स्वेच्छाचारिन्, परिभ्रमिन्; यथेच्छविहारिन्. 2 अज्ञातनिवास, गूढचारिन्.

VAGARY, *s.* वि-,भ्रमः, छंदः-दस् *n.*, मनोलौल्यं, बुद्धिचापल्यं.

VAGUE, *a.* अनिश्चित, संदिग्ध, अनियत, अनिर्णीत, अपरिच्छिन्न. -NESS, *s.* अनिश्चयः, अपरिच्छेदः, अनिर्णयः, संदेहः, संशयः.

VAIN, *a.* व्यर्थ, निष्फल, विफल, निरर्थक, मोघ, मुधा-वृथा in comp.; 'v. thoughts' वृथामनोरथाः. 2 असार, निःसार, शून्य. 3 (Vainglorious) वृथाभिमानिन्, अहंकारिन्, वृथावलेप, गर्वित; *See* PROUD. -LY, 'in v.' *adv.* वृथा, मुधा, निरर्थकं, व्यर्थं, निष्फलं. -VANITY, *s.* वृथाभिमानः, मिथ्यागर्वः, अहंकारः; *See* PRIDE. 2 असारत्वं, निःसारता, अवलेपः, वैयर्थ्यं, मोघता. 3 असारद्रव्यं.

VALEDICTION, *s.* आमंत्रणं, आपृच्छा, आप्रच्छनं; स्वस्तिवादः. -VALEDICTORY, *a.* स्वस्तिवाचनिक (की *f.*).

VALET, *s.* चेटः, दासः, पार्श्वचरः.

VALETUDINARIAN, *a., s.* रोगिन्, दुर्बल, व्याधिपीडित, सदारोगिन्.

VALIANT, *a.* विक्रांत, पराक्रमवत्, उरुविक्रम, शूर, वीर; *See* BRAVE. -LY, *adv.* सविक्रमं, सपराक्रमं, शूर-वीर-वत्, साहसपूर्वकं.

VALID, *a.* सबल, प्रबल, सप्रमाण; सयुक्तिक (की *f.*), अखंडय, न्याय्य, धर्म्य. -ITY, *s.* प्राबल्यं, सिद्धि *f.*

VALLEY, VALE, *s.* दरी, उपत्यका, अद्रिद्रोणी.

VALOR, *s.* वि-परा-क्रमः, शौर्यं, वीर्यं. -OUS, *a.* शूर, वीर, विक्रांत; *See* BRAVE.

VALUE, *v. t.* मूल्यं-अर्घं-निरूप् 10 or स्था c. (स्थापयति) or सं-ख्या c. 2 मन् 4 A, वि-गण् 10, आ-कल् 10; 'v. highly' बहु मन्, संमन् c. -*s.* मूल्यं, अर्घः; *See* PRICE. 2 माहात्म्यं, गरिमन् *m.*, सारता. 3 महार्घः, बहु-महा-मूल्यं. 4 अर्घप्रमाणं; 'fixing the v.' अर्घसंस्थापनं. -ABLE, *a.* महार्घ-र्घ, महा-बहु-मूल्य, मूल्यवत्, गुणवत्. -*s.* बहुमूल्यद्रव्यं. -ATION, *s.* मूल्यनिरूपणं-संख्यापनं-निर्णयः.

VALVE, *s.* कपा(वा)टः-टी-टं; विधानं.

VAMPIRE, *s.* भूतः, प्रेतः, पिशाचः.

VAN, *s.* (सेना-) मुखं, अग्रभागः, अग्रं, मूर्धन् *m.*, नासीरं, शिरस् *n.*; 'in the v.' अग्रे, पुरस्तात्, अग्रतः. 2 यानं; *See* CART; 'v.-guard' अग्रानीकं, सेनामुखं, नासीरचराः (pl.).

VANE, *s.* वायुगतिदर्शि यंत्रं.

VANISH, *v. i.* तिरोभू 1 P, तिरोधा-अंतर्धी-pass.; *See* DISAPPEAR. 2 वि-नश् 4 P, प्र-वि-ली 4 A.

VANQUISH, *v. t.* पराजि 1 A, पराभू 1 P, वशं नी 1 P; *See* HUMBLE, SUBDUE. -ER, *s.* जेतृ *m.*

VANTAGE,-GROUND, *s.* अग्रभूमि *f.* 2 उत्कर्षः, श्रेष्ठपदं.

VAPID, *a.* विरस, नीरस, रसहीन.

VAPOUR, *s.* बाष्पः, धूमः; 'v. of the sky' खबाष्पः, अभ्रं; 'v.-bath' उष्णस्वेदः. -*v. i.* वि-,कत्थ् 1 A; *See* BOAST. -OUS,-Y, *a.* बाष्पमय (यी *f.*), बाष्परूप. 2 असार, निःसार.

VARIEGATE, *v. t.* चित्र् 10, चित्रीकृ 8 U, कर्बुरीकृ, शबलीकृ; कल्माषयति (D.). -ED, *a.* चित्र, कर्बुर, कर्बुरित, कि(क)र्मीर, किर्मीरित, शबल, कल्माष, कल्माषित, एत, शार; 'v. colour' कर्बुरः, किर्मीरः, शबलः.

VARNISH, *s.* कुंकुमः. -*v. t.* कुंकुमेन लिप् 6 P, स्निग्धीकृ (fig.) बाह्यशोभां दा 3 U.

VARY, *v. t.* परिवृत् c., विपर्यस् 4 U or c., अन्यथाकृ 8 U, नानाविध-विविध- *a.* कृ; विपर्यासं नी 1 P; *See* CHANGE. -*v. i.* भिद् pass, परिवृत् 1 A; विरुध् pass.; oft. ex. by भिन्न, भिन्नरूप; प्रयोजनापेक्षितया प्रभूणां प्रायश्चलं गौरवमाश्रितेषु (K. III. 1) 'v. es with the object in view' &c. -IABLE, *a.* अस्थिर, चंचल, परिवृत्तिशील, अनित्य, अनवस्थित. -IANCE, *s.* भेदः, विरोधः, विप्रतिपत्ति *f.*; विवादः, कलहः, वैरं, द्वंद्वं; 'to be at v.' विप्रति-पद् 4 A; (अत्र स्मृतयः विप्रतिपद्यंते); 'at v.' विमत, विप्रतिपन्न, परस्परविरुद्ध. -IATION, *s.* परिवृत्ति *f.*, विकारः, भेदः, -IETY, *s.* विचित्रता; भेदः, विशेषः in comp.; शमी वृक्षविशेषः-भेदः. 2 शबलता, चित्रता, (of colours); 'v. of' Various, q. v. -VARIED, VARIOUS, *a.* विविध, नानाविध-रूप-प्रकार-जातीय, अनेक-नाना in comp.; बहुविध; 'v. talks' उच्चावचाः प्रलापाः; 'in v. ways' अनेकधा, बहुविधं, नाना. -LY, *adv.* बहुधा, विविधं, नाना, नानाप्रकारं, अनेकविधं.

VASCULAR, *a.* नाडीविशिष्ट-संबंधिन्.

VASE, *s.* कुंभः, कलसः-शः, पात्रं, भाजनं; 'a golden v.' भृंगारः, कनकालुका.

VASSAL, *s.* प्रजा, वशवर्ती, आयत्तः, परतंत्रः; *See* DEPENDENT.

VAST, *a.* विशाल, विस्तीर्ण, विपुल, अपरिमित, सुमहत्, अतिबृहत्.

VAT, *s.* कुंडं, (बृहत्) भांडं.

VAULT, *s.* गुप्ति *f.*, विवरं, भूमिगृहं. 2 खोडकशीर्षं; 'v. of heaven' नभोमंडलं. 3 वल्गितं. -*v. i.* वल्गु 1 P, प्लु 1 A.

VAUNT,-ER, *See* BOAST; 'v. ing of his might' अतिदर्पितबलः (Mr. 5), स्वबलावलिप्तः.

VEAL, *s.* गोवत्समांसं.

VEER, *v.* परिवृत् 1 A, भिन्नदिशं या 2 P or गम् 1 P.

VEGETATE, *v. i.* उद्भिद् pass., स्फुट् 6 P, प्र-रुह् 1 P. -ION, *s.* उद्भिद्, उद्भेदः, तृणादि, तृणजाति *f.* -VEGETABLE, *a.* उद्भिद्-द, उद्भिज्ज, औद्भिद (दी *f.*). -*s.* (Eatable) शाकः-कं; हरितकं, शिग्रुः. -*s.* उद्भिद्-ज्जं, ओषधि *f.*, तृणादि.

VEHEMENT, *a.* प्रचंड, तीव्र, तीक्ष्ण, बलवत्, उग्र, सरभस, सवेग; परुष, रूक्ष (of tone, speech &c.). -LY, *adv.* बलवत्, चंडं, तीव्रं. -VEHEMENCE, *s.* चंडता, तीक्ष्णता, रभसः, वेगः, तरस् *n.*, संरंभः.

VEHICLE, *s.* यानं, प्रवहणं, वाहनं, रथः, वाहः, पत्रं. 2 द्वारं.

VEIL, *v. t.* छद् 10, आ-प्र-सं-°, अवगुंठ् 10, सं-वृ 5 U, व्यव-धा 3 U; *See* COVER. -*s.* अवगुंठनं, आवरकं, आवरकः, तिरस्करिणी. 2 आवरणं, व्यवधानं, आच्छादनं, संवरणं; 'throw the v. off' स्वरूपं प्रकटीकृ or आविष्कृ, वि-वृ 5 U, विशदीकृ.

VEIN, *s.* शि(सि)रा, धमनी, नाडि-डी *f.*; (of stones) रे(ले)खा. 2 वृत्ति *f.*, भावः, मनोवृत्तिः; 'angry v.' कोपवृत्तिः. -Y, *a.* शिराल.

VELOCITY, *s.* जवः, वेगः, रंहस् *n.*, रभसः, तरस् *n.*

VENAL, *a.* धनभेद्य, उत्कोचदानवश्य. 2 पण्य in comp; 'a v. woman' पण्यस्त्री.

VEND, *v. t.* वि-क्री 9 A, पण् 1 A. -ER, *s.* विक्रयिन् *m.* -IBLE, *a.* पण्य, विक्रेय.

VENERATE, VENERABLE, *See* REVERE,-ED.

VENERY, *s.* मैथुनं, रति *f.*, संभोगः. -VENEREAL, *a.* (*s.*) in comp.; 'v. disease' उपदंशः. 2 वाजीकर (री *f.*).

VENESECTION, *s.* शिराच्छेदः.

VENGEANCE, *s.* प्रतिहिंसा, प्रत्यपकारः, वैरनिर्यातनशुद्धि *f.*; *See* REVENGE.

VENIAL, *a.* मर्षणीय, क्षंतव्य, लघु, उपेक्ष्य, अल्प; oft. by उप pr.

VENISON, *s.* मृग-हरिण-मांसं.

VENOM, *s.* विषं, गरलं, गरं, क्ष्वेडुः. -OUS, *a.* सविष, विषाक्त, दंदशूक, विष in comp.

VENT, *v. t.* उत्-वि-सृज् 6 P, उत्क्षिप् 6 P, निः-सृ °, उद्गम् 1 P, उद्-गृ 6 P ; *See* EMIT. -*s.* छिद्रं, रंध्रं, द्वारं; 'give v. to' उदीर् °, प्रकटयति (D.), आविष्कृ 8 U.

VENTILATE, *v. t.* वीज् 10 ; *See* FAN. 2 प्रचर् °, प्र-सृ °. -ED, *a.* प्रवात, वायुव्याप्त; 'a bed in a v. place' प्रवातशयनं (M. 4). -OR, *s.* वीजनं, व्यजनं.

VENTRAL, *a.* उदर in comp.

VENTRICLE, *s.* कोशः-षः, द्वारं.

VENTRILOQUIST, *s.* गारुडवादिन् *m.* -VENTRILOQUISM, *s.* गारुडवादः.

VENTURE, *s.* साहसं, साहसक्रिया. 2 संकटं, संशयः; *See* DANGER. -*v. i.* संशये निक्षिप् 6 P. 2 उत्सह् 1 A, साहसं कृ 8 U, धृष् 5 P; 'we cannot v. to state this' इति कथनरूपं साहसं कर्तुं न शक्नुमः, इति कथयितुं नोत्सहामहे; 'nothing v., nothing gain' साहसे श्रीः प्रतिवसति. -OUS, -SOME, *a.* साहसिक (की *f.*), साहसबुद्धि.

VENUS, *s.* शुक्रः, भार्गवः, कविः, उशनस् *m.*, काव्यः, दैत्यगुरुः.

VERACIOUS, *a.* सत्यवाच्, सत्यगीर्, सत्यवादिन्, सत्यशील. -VERACITY, *s.* सत्यवादित्वं, सत्यशीलता.

VERANDA, *s.* *See* PORCH.

VERB, *s.* क्रिया,-पदं. -AL, *a.* शाब्दिक (की *f.*), शाब्द (ब्दी *f.*), शब्दरूप. 2 (Oral) वाचिक-वाचनिक (की *f.*); (वाचिकमिदानीं श्रोतुमिच्छामि Mu. 5). -ALLY, *adv.* वाचा. 2 शब्दतः, यथाशब्दं. -ATIM, *adv.* यथाव्याहृतं, पदानुपदं, शब्दशः, यथाशब्दं. -OSE, *a.* वाग्बहुल, अतिविस्तीर्ण; *See* PROLIX. -OSITY,-IAGE, *s.* वाग्विस्तरः, वाक्प्रपंचः, वाग्विचयः.

VERDANT, *a.* हरित, शाद्वल.

VERDURE, *s.* हरितत्वं, हारित्यं; शादः, शाद्वलता; 'clothed in fresh v. of sprouts' नवहरितसस्यांकुरवती.

VERDICT, *s.* निर्णयः; विचारः; दंडनिर्णयः.

VERDIGRIS, *s.* ताम्रकिट्ट-मलं, कलंकः.

VERGE, *s.* प्रांतः, पर्यंतः, धारा; 'on the v. of' उन्मुख (खी *f.*), आसन्न in comp.; 'on the v. of ruin' विनाशोन्मुख, आसन्नलय. 2 दंडः, यष्टि *f.* -*v. i.* अव-,लंब् 1 A; by (*s.*); 'is v. ing on ruin' आसन्ननाशो वर्तते; 'when it was v. ing towards sunset' परिणतप्राये अहनि; 'v. ing on 18' अष्टादशवर्षदेशीय; *See* BORDER. -ER, *s.* दंडिन् *m.*, दंड-वेत्र-धरः.

VERIFY, *v. t.* प्रमाणीकृ 8 U, प्रमाणयति (D.), समर्थ् 10, सत्याकृ, सत्यापयति (D.), निर्णी 1 P. -ICATION, *s.* सत्यापनं, सत्याकारः.

VERILY, *adv.* सत्यं, नूनं, नियतं, नाम, खलु.

VERITABLE, VERITY, *See* TRUE, TRUTH.

VERMICULAR, *a.* कृमिसदृश (शी *f.*).

VERMIFUGE, *a.* कृमिहर, कृमिघ्न (घ्नी *f.*)

VERMILION, *s.* सिंदूरं. -*a.* शोण, रक्त. -*v. t.*, 'cover with v.' सिंदूरीकृ, सिंदूरेण रंज् °.

VERMIN, *s.* कृमयः (pl.), कृमिगणः.

VERNACULAR, *a.* जन्म in comp.; 'v. dialects' भाषा, प्राकृतभाषा. —*s.* जन्मभाषा, मातृभाषा.

VERNAL, *a.* वासंत (ती *f.*), वासंतिक (की *f.*), वसंत in comp.

VERSATILE, *a.* चपल, लोल, लोल-मति-बुद्धि, चंचल; *See* FICKLE. —ITY, *s.* (बुद्धि-) चापल्यं, लौल्यं.

VERSE, *s.* कविता, पद्यं, काव्यं; 'syllabic v.' वृत्तं; 'blank v.' मुक्तप्रासः. 2 श्लोकः. 3 (Portion of v.) चरणः, पादः, पदं. —VERSIFY, *v. t.* पद्यानि रच् 10 or निबंध् 9P, कवयति (D.). —IER, *s.* कविः, कविदेश्यः. —ICATION, *s.* श्लोक-पद्य-रचना, छंदोबंधः.

VERSED, *a.* अभिज्ञ, कुशल, निपुण, प्रवीण, सुप्रतिष्ठित, अभ्यंतर, विशारद; *See* SKILFUL.

VERSION, *s.* Translation, q. v. 2 पाठांतरं, पाठभेदः.

VERTEBRA, *s.* पृष्ठवंशास्थि *n.* —ATE,-TED, *a.* पृष्ठवंशयुत-विशिष्ट.

VERTEX, *s.* शीर्षं, अग्रं, शिखरं; *See* TOP also.

VERTICAL, *a.* ऊर्ध्व-उपरि-तन (नी *f.*), लंबरूप. —LY, *adv.* अधोमुखं, ऊर्ध्वाधरं.

VERTIGO, *s.* भ्रमरं; *See* GIDDINESS.

VERY, *adv.* अति-सु pr., सातिशयं, अतीव, भूरि, निसु-तरां, अत्यंतं; *See* EXCEEDINGLY; 'v. deceitful' भूरिमाय. —*a.* Ex. by demonstrative pron. with एव; 'the v. hills' त एव गिरयः; 'this v. day' अद्यैव. 2 सत्य, तथ्य. 3 मात्रं in comp., केवल.

VESICLE, *s.* त्वक्-चर्म-स्फोटः.

VESPER, *s.* संध्या, संध्योपासनं.

VESSEL, *s.* पात्रं, भाजनं, भांडं, आधारः. 2 पोतः, समुद्रयानं, जलयानं, वहित्रं, नौः. 3 नाडी; *See* VEIN.

VEST, *s.* वस्त्रं, वेशः-षः, वसनं. —*v. t.* वेष् c., परि-धा c.; *See* DRESS. —ED, *a.* (in) व्यवस्थितः; 'are warlike qualities v. (in any one)' किं व्यवस्थितविषयाः क्षात्रधर्मा इति (U. 5). 2 अर्पित, आयत्त. —VESTMENT, VESTURE, *s.* वासस् *n.*, वस्त्रं; *See* DRESS.

VESTAL, *a.* शुद्ध, पवित्र; *See* CHASTE.

VESTIBULE, *s.* देहलि-ली *f.*; *See* PORCH.

VESTIGE, *s.* चिह्नं, अंकः, लक्षणं, पदांकः, पदपंक्ति *f.*, पदवी.

VETERAN, *a.*, *s.* जातानुभव, ज्ञानवृद्ध, अभ्यासवृद्ध.

VETERINARY, *s.* पशुचिकित्सकः, पशुवैद्यः; (art) पशुचिकित्सा.

VETO, *v. t.* प्रति-नि-षिध् 1 P, प्रत्या-ख्या 2 P; *See* CONTRADICT. —*s.* प्रति-नि-षेधः, प्रत्यादेशः.

VEX, *v. t.* बाध् 1 A, पीड् 10, क्लिश् 9 P, संतप् c., व्यथ् c., अर्द् 1 P or c. 2 प्रकुप् c., क्रोधं उद्दीप् c. —ATION, *s.* क्लेशः, दुःखं, पीडा, कष्टं, बाधा, आयासः, संतापः. 2 प्रकोपनं, क्रोधोद्दीपनं. —ATIOUS, *a.* कष्टद, क्लेशकर-पीडाकर (री *f.*), उद्वेगकर, संतापक. —ED, *a.* दुःखित, संतापित, अर्दित, &c. —EDLY, *adv.* सक्रोधं, सोद्वेगं.

VIAND, (V. s) *s.* अन्नं, भक्ष्यं, सिद्धान्नं.

VIATICUM, *s.* पाथेयं, पथि भोज्यं.

VIBRATE, *v. i.* दोलायते (D.), कंप् 1 A, स्फुर् 6 P, भ्रम् 1, 4 P. —*v. t.* भ्रम् c., इतस्ततः चल् c., वि-धू 5, 9 U. —ION, *s.* आंदोलनं, दोलावितं, स्फुरणं, कंपः, भ्रमणं.

VICAR, *s.* प्रतिनिधिः. —IOUS, *a.* प्रतिनिधिरूप.

VICE, *s.* अधर्मः, पापं, पापाचरणं, असदाचारः, व्यभिचारः. 2 दोषः, दुर्गुणः, व्यसनं. 3 (Instead of) Ex. by स्थानि or प्रतिनिधिः, oft. by उप pr.; 'viceroy' राजप्रतिनिधिः, राजस्थाने स्थितः; 'v.-president' उपाध्यक्षः. —VICIOUS, *a.* दुष्ट, दुराचार, अपथप्रवृत्त, व्यसनिन्, दुरात्मन्, पापवृत्त; दुर्वृत्त, दुश्चारित्र, खंडितवृत्ति. —LY, *adv.* दुष्टतया, दुर्वृत्ततया, दुष्टभावेन.

VICINAGE, VICINITY, *s.* संनिधिः, सांनिध्यं, संनिकर्षः.

VICISSITUDE, *s.* आ-परि-वृत्ति *f.*, विपर्ययः, परिवर्तः, अनुक्रमः; 'Oh! how rarely seen (by mortal prescience) the strange v. s of human life' अहो अलक्षितोपनिपाताः पुरुषाणां समविषमदशाविभागपरिणतयो भवंति (Mu. 6).

VICTIM, *s.* बलिः, उपहारः, वध्यः, यज्ञपशुः; (fig.) *See* PREY. —IZE, *v. t.* उपहारीकृ 8 U; *See* SACRIFICE.

VICTOR, VICTORIOUS, *s.*, *a.* वि-,जयिन्, जैत्र (त्री *f.*), जित्वर (री *f.*), जिष्णु, प्राप्तजय. 2 जयप्रद, जयावह. —IOUSLY, *adv.* सविजयं, जयपूर्वं. —Y, *s.* वि-,जयः; 'gain v.' विजयं लभ् 1 A or प्राप् 5 P, वि-जि 1 A; 'v. to your Majesty' जयतु जयतु देवः.

VICTUAL, *v. t.* खाद्यसामग्रीं उपकृप् c. —*s.* (V. s) खाद्य-भक्ष्य-सामग्री, भक्ष्यसंभारः. —LER, *s.* भक्ष्यविक्रयिन् *m.* —LING, *s.* अन्नविक्रयः, भक्ष्यव्यवहारः.

VIE, (with) *v. i.* स्पर्ध् 1 A, जि desid. (जिगीषति); *See* RIVAL; अहमहमिकया प्रणामलालसाः (Ka. 81) 'v. ing with each other for saluting'.

VIEW, *v. t.* सं-,ईक्ष् 1 A, निर्वर्ण् 10, आ-अव-लोक् 1 A, 10, निरीक्ष्; *See* SEE. —*s.* आलोकनं, समीक्षणं, दर्शनं, दृष्टि *f.*; 'point of v.' दृष्टिः, पक्षः; 'from a worldly (practical) point of v.' लोक-व्यवहार-दृष्ट्या; शास्त्रदृष्ट्या &c.; इत्येतल्लोकदृष्ट्या निदर्शितं शास्त्रदृष्ट्या न परामृश्यते (S. B. 508); 'from this point of v.' अस्मिन् पक्षे. 2 मतं, बुद्धि *f.*, मति *f.*, दृष्टिः. 3 हेतुः, आशयः, अभिप्रायः, उद्देशः;

'with what v.' किमुद्दिश्य, केन हेतुना, किमभिप्रेत्य; 'with this v.' अस्माद्धेतोः, एतदर्थं; 'of narrow v.s' कृपणबुद्धि-दृष्टि; 'of liberal v.s' उदारधीः. 4 दृक्पातः-विषयः, नयनगोचरः-प्रदेशः; 'having in v.' दृग्गोचरवर्तिन्. -LESS, a. अदृश्य.

VIGIL, s. जागरणं, प्र-,जागरः, रात्रिजागरः. -ANCE, s. अवधानं, अवहितता, दक्षता, जागरूकता. -ANT, a. जागरूक, अवहित, दक्ष, सावधान, अप्रमत्त. -ANTLY, adv. अप्रमादेन, सावधानं.

VIGOUR, s. वीर्यं, बलं, शक्ति f., ओजस् n., सत्त्वं, तेजस् n., प्रभावः, पौरुषं; See STRENGTH. -OUS, a. प्रबल, ओजस्विन्, महासत्त्व, ऊर्जस्वल, वीर्यवत्; See STRONG; सोत्साह, सप्रयत्न. -OUSLY, adv. चंडं, बलवत्, तरसा, ओजस्वितया; सवीर्यं, महाप्रयत्नेन, सोद्यमं, सोत्साहं.

VILE, a. अधम, नीच, जघन्य, नि-अप-कृष्ट. -NESS, s. नीचता &c.; See MEAN &c. —VILIFY, v. t. कुत्सि-वद् 1 A, कुत्स् 10, आक्षर् c.; See TRADUCE, LIBEL. -ER, -ICATION; See under CALUMNY.

VILLA, s. ग्राम्यं गृहं, विनोदस्थानं.

VILLAGE, s. ग्रामः; निवसथः; 'head of a v.' ग्रामणीः, ग्रामेशः, ग्रामाध्यक्षः. -a. ग्राम्य, ग्रामीय, ग्रामीण, ग्राम in comp. -ER, ग्रामिन् m., ग्रामिकः, ग्रामवासी, ग्रामीणः, ग्रामस्थः, ग्राम्यजनः.

VILLAIN, s. दुर्वृत्तः, अपसदः affixed, (नरापसदः), चांडालः, खलः, अधमः, दुरात्मन् m.; See RASCAL also. -OUS, a. दुर्वृत्त, दुष्टतम, अधम &c.

VILLEIN, s. दासः, प्रजा.

VINDICATE, v. t. रक्ष् 1 P, प्रमाणीकृ 8 U, समर्थ् 10, प्रति-पद् c., स्था c. (स्थापयति); (from blame) शुध् c., निर्दोषीकृ. 2 निर्वह् 1 P or c.; निर्व्यूढस्तेपत्यस्नेहः (U. 3) 'thy parental affection has been v.ed'. -ION, s. रक्षणं, प्रतिपादनं; स्थापनं; निर्वोढृ:; दोषमुक्ति f., परिशोधनं. -OR, s. रक्षकः, समर्थयितृ m.

VINDICTIVE, a. प्रतिकारपरायण-शील, वैरसाधनपर, वैरनिर्यातनोत्सुक; क्रोधन, क्रोधिल; अक्षमिन्, असहिष्णु.

VINE, s. द्राक्षा,-लता. -OUS, a. सुराप्रय (यी f.). -VINEGAR, s. शुक्तं, शौक्तिकं. -VINEYARD, s. द्राक्षाक्षेत्रं-वाटिका. -VINTAGE, s. द्राक्षाः, द्राक्षाफलं; 'v.-time' द्राक्षावचयकालः. -VINTNER, s. शौंडिकः, सुराजीविन् m.

VIOLATE, v. t. धृष् c. (a woman). 2 अतिक्रम् 1 U, 4 P, हलंघ् 1 A, 10, अतिचर् 1 P, व्याहन् 2 U, लुप् c., भंज् 7 P; 'for fear of v.ing your word' प्रतिज्ञाभंगभीरुणा (त्वया). 3 भंज्, पराजि 1 A. -ION, s. अतिक्रमः, भंगः, उल्लंघनं, लोपः,-पनं. 2 आ-,धर्षणा-णा. -OR, s. धर्षकः. 2 हलंघकः.

VIOLENCE, a. प्रचंड, प्रबल, तीव्र, तुद, महावेग, उग्र. 2 साहसिन्, साहसिक (की f.), तीक्ष्णकर्मन्; 'a v. death' अपमृत्युः. -LY, adv. प्रसह्य, प्रसभं, तरसा, वेगेन, बलात्कारेण, बलवत्, उच्चंडं, तीव्रं, गाढं, अति-शु pr.; 'v. in love' गाढानुराग. -VIOLENCE, s. बलं, तरस् n., जवः, वेगः. 2 बलात्कारः; साहसं, प्रमाथः, प्रसभं.

VIOLET, s. पाटलं. 2 (Colour) नीललोहितः.

VIOLIN, s. सा(शा)रंगी, पिनाकी.

VIPER, s. दंदशूकः, अहिः; See SNAKE.

VIRAGO, s. स्त्रीयोधी, पुरुषवृत्तिः, क्रूरभी.

VIRGIN, s. कुमारी, कन्या, तरुणी, अक्षता, अक्षत-अविद्ध-योनिः, पुरुषास्पृष्टा. -a. कौमार (री f.), (s.) in comp. 2 वि-,शुद्ध, अक्षत. -ITY, s. कौमारं, कुमारीत्वं; पुरुषास्पर्शः. 2 विशुद्धता.

VIRGO, s. कन्या,-राशिः.

VIRILE, a. पौरुष (षी f.), पौरुषेय (यी f.), पुरुष in comp. -ITY, s. पुंस्त्वं, पुरुषत्वं, पौरुषं.

VIRTUE, s. धर्मः, पुण्यं; सुकृतं, सदाचारः, साधुता, धर्माचरणं, नीति f. 2 गुणः, सद्गुणः. 3 शक्ति f., बलं, प्रभावः, सामर्थ्यं; 'by v. of' वशात्, बलेन, प्रभावेण. —VIRTUAL, a. वास्तविक (की f.), better by 'v.-ly'. -LY, adv. वस्तुतः, यथार्थतः, अर्थतः. —VIRTUOUS, a. धार्मिक (की f.), पुण्य-धर्म-शील, धर्मपर-परायण, साधु, पुण्यात्मन्, सुकृतिन्, पुण्यभाज्, न्यायाचार, साधुवृत्त, सदाचार, सच्चरित; oft. by सत्; सती, सज्जनः &c. 2 (Of acts) धर्म्यं, पुण्य, साधु. -LY, adv. धर्मतः, धर्मेण, सदाचारतः.

VIRULENT, a. उग्र, कटु, तीक्ष्ण, चंड; See MALIGNANT, SHARP.

VIRUS, s. विषं.

VISAGE, s. आस्यं, आननं, वदनाकृति f., वदनच्छाया; 'with sad v.' विषण्णवदन.

VISCERA, s. अंत्राणि (pl.).

VISCID, VISCOUS, a. सांद्र, श्यान, स्निग्ध; श्लिक्ष्ण, क्लिन्न; 'v. fluid' दानजलं, दानं (of an elephant).

VISIBLE, a. दृश्य, दृग्गोचर, प्रत्यक्ष, दृष्टिविषय, नयनपथवर्तिन्, नेत्रविषयगत, व्यक्त, सुप्रकाश, चक्षुर्ग्राह्य, and sim. comp. -VISIBLY, adv. प्रत्यक्षं, प्रत्यक्षतः, साक्षात्.

VISION, s. दृष्टि f., चक्षुरिंद्रियं. 2 छाया, आभासः, माया, मनःसृष्टि f., कल्पना. 3 स्वप्नः, स्वप्नदर्शनं. -ARY, a. अवास्तव (वी f.), मानसिक-काल्पनिक (की f.), मनःसृष्टः-कल्पित.

VISIT, s. दर्शनं, अभ्यागमः. 2 साक्षात्कारः; 'pay a v. to' द्रष्टुं अभ्यागम् 1 P. -v. t. दृश्, अभि-इ 2 P, अभ्युपगम्, द्रष्टुं गम् or या 2 P. 2 साक्षात्कृ 8 U. 3 (With punishment) दंड् 10; 'v. a lover' अभि-सृ 1 P (कामुकं). -ANT, -OR,

s. अभ्यागतः, गृहागतः. -ATION, *s.* अभ्यागमनं. 2 दुर्विपाकः.

VISTA, *s.* वीथि-थी *f.*, तरुपंक्ति-श्रेणी *f.*

VISUAL, *a.* चाक्षुष (षी *f.*), दृष्टिगत, चक्षुस्-नेत्र in comp.; ' v. organ ' चक्षुरिंद्रियं.

VITAL, *a.* आवश्यक (की *f.*). 2 प्राणभूत, जीव-प्राण in comp.; ' v. air ' प्राणवायुः; ' v. principle ' जीवात्मा; ' v. part ' मर्मन् *n.*; ' v. s ' मर्माणि; ' touching (rending, piercing,) the v. s ' अन्तुदं, मर्मस्पृशं, मर्माणि कृंतत्. -ITY, *s.* जीवनं, चेतनत्वं, सजीवत्वं, चेतना; प्राणः, जीवः, जीव-प्राण-शक्तिः *f.*

VITIATE, *v. t.* Corrupt, q. v. -ION, *s.* दूषणं, भ्रंशनं.

VITREOUS, *a.* काचज, काचाभ, काचमय (यी *f.*). -VITRIFY, *v. t.* काचसात्कृ 8 U.

VITRIOL, *s.* (Blue) तुत्थांजनं, शिखिग्रीवं, वितुन्नकं, मयूरकं, कपेरी; (green) कासीसं.

VITUPERATE,-ION, *See* CENSURE.

VIVACIOUS, *a.* प्रफुल्ल, सोत्साह, सतेजस्. -NESS, -VIVACITY, *s.* उत्साह;, तेजस्विता, प्रफुल्लता, उल्लासः.

VIVA-VOCE, *See* ORALLY.

VIVID, *a.* सुस्पष्ट, विशद, परिस्फुट.

VIVIFY, *v. t.* जीव् c., सजीवीकृ 8 U.

VIVITAROUS, *a.* जरायुज, जीवज. 2 सचेतनप्रज.

VIXEN, *s.* कलहप्रिया, कर्कशा, चंडी.

VOCABLE, *s.* शब्दः, वाक्यं, वचनं.

VOCABULARY, *s.* अभिधानं, कोशः, शब्दार्णवः, शब्दसंग्रहः-कोशः.

VOCAL, *a.* वाचिक (की *f.*), वाङ्मय (यी *f.*), वाग्जात. 2 वाणीयुक्त, वाग्विशिष्ट. 3 सुस्वर, मधुर; ' v. music ' कंठगीतं.

VOCATION, *s.* वृत्तिः *f.*, व्यवसायः, नियोगः, व्यापारः.

VOCATIVE, *s.* संबोधनं, संबुद्धिः *f.*

VOCIFERATE, *v. i.* उच्चैः आक्रंद् 1 P, उत्क्रुश् 1 P, उद्-घुष् 10. -ION, *s.* आक्रोशः, उद्घोषः. -VOCIFEROUS, *a.* महाशब्द, सकोलाहल, उद्घोषण. -LY, *adv.* महाशब्देन, उद्घोषेण.

VOGUE, *s.* व्यवहारः, प्रवृत्तिः *f.*, प्रचारः, रीतिः *f.*, क्षुण्णा पद्धतिः; ' it is not in v. here ' अत्र नेदृशो व्यवहारः; ' being long in v. ' चिरप्रवृत्त.

VOICE, *s.* स्वरः, स्वनः, नादः, शब्दः, वाणी, वचनं, वाच् *f.*, कंठध्वनिः-रवः. 2 मतं, अभिप्रायः; ' with one v. ' एकचित्तीभूय, ऐकमत्येन; ' cracked v. ' भग्नस्वरः; ' active v. ' कर्तृवाच्यं; ' passive v. ' कर्मवाच्यं; ' neuter v. ' भाववाच्यं.

VOID, *a.* शून्यं, रिक्त. 2 असिद्ध, अप्रमाण, आकिंचित्कर (री *f.*), निरर्थक. 3 Destitute, Devoid of, q. v. -*s.* शून्यं, शून्यस्थानं. -*v. t.* रिच् 7 P or c., शून्यीकृ 8 U. 2 निष्फलीकृ. 3 (Excrement) उत्सृज् c., वि-उत्-सृज्, उद्-गृ 6 P. -ABLE, *a.* विसर्जनीय, परित्यक्तव्य.

VOLATILE, *a.* वायुपरिणामशील. 2 चंचल, लोल; *See* FICKLE. -ITY, *s.* चापल्यं, चांचल्यं.

VOLCANO, *s.* ज्वालामुखः, आग्नेयागिरिः.

VOLITION, *s.* संकल्पः, इच्छा; *See* WILL.

VOLLEY, *s.* वर्षः, (शिलावर्षः, शरवर्षः &c.), वृष्टि *f.*,-पातः.

VOLUBLE, *a.* चंचल, चपल. 2 (Of tongue) वाचाल, चपलजिह्व. -VOLUBILITY, *s.* वाक्चापल्यं.

VOLUME, *s.* खंडः-डं, भागः, पुस्तकं (when the sense is clear). 2 अंतर्गतं घनफलं. 3 आवलि-ली *f.*, पटलं, राशिः, संहतिः *f.* -VOLUMINOUS, *a.* विस्तीर्ण, बहुपुस्तक.

VOLUNTARY, *a.* ऐच्छिक-यादृच्छिक (की *f.*), इच्छामति-पूर्व; better ex. by ' v.-ily '. -ILY, *adv.* यदृच्छया, इच्छापूर्वकं, स्वेच्छातः, अ-नि-कामं, आत्मसंतोषेण. -VOLUNTEER, *v. t.* अयाचितं उपानी 1 P or कृ c. (अर्पयति) or दा 3 U or कृ 8 U. -*s.* यादृच्छिकः युयुत्सुः, स्वेच्छासैनिकः.

VOLUPTUARY, VOLUPTUOUS, *s.*, *a.* विषयासक्त, भोगनिरत, इंद्रियसुखासक्त, विषयिन् ; *See* SENSUAL.

VOMIT, *v.* उद्-,क्ष्म् 1 P, उद्-गृ 6 P, छर्द् 10, उत्क्षिप् 6 P. -*s.* वांतं. 2 वमनं (emetic). -ING, *s.* वमनं, वमः-मि *f.*, वमथुः, प्रच्छर्दिका. -IVE, *a.* वमन (नी *f.*), वांतिकर (री *f.*), वांतिकृत्.

VORACIOUS, *a.* घस्मर, गृध्नु, अतिलोलुप, औदरिक (की *f.*); *See* GLUTTONOUS.

VORTEX, *s.* भ्रमि *f.*, आवर्तः.

VOTARY, *s.* भक्तः, उपासकः, पूजकः; आश्रितः.

VOTE, *s.* संमतिः *f.*, संमतं. -*v. t.* संमतिं-अनुमोदनं-दा 3 U, मतं प्रकाश् c.; संमतिपूर्वं वृ 5 U or नियुज् 7 A, 10 or दा.

VOUCH, *v. t.* साक्षीकृ 8 U, प्रमाणीकृ, प्रमाणं दा 3 U. 2 दृढीकृ, द्रढयति (D.). -ER, *s.* प्रमाणपत्रं-लेखः, साधनपत्रं-लेखः, आगमः.

VOUCHSAFE, *v. t.* वि-गृ 1 P, कृपया दा 3 U; (with inf.) प्र-सद् 1 P; *See* CONDESCEND, PLEASE; भगवान् मारीचस्ते दर्शनं वितरति (S. 7) ' v. s thee an audience ' 2 अनु-ज्ञा 9 U.

VOW, *s.* व्रतं, संकल्पः, प्रतिज्ञा, शापथः, नियमः; ' under a v.' व्रतबद्ध, धृतव्रत, संकल्पबद्ध. -*v.* प्रतिज्ञा 9 A, प्रतिज्ञां कृ 8 U or आरुह् 1 P, सशपथं-सप्रतिज्ञां वद् 1 P or अभि-धा 3 U, (' Say ', q. v.); ' he has v. ed to destroy us ' अस्मन्निनाशे कृतसंकल्पोसौ.

VOWEL, *s.* स्वरः, अच् *m.*, अक्षरवर्णः.

VOYAGE, *s.* जलयात्रा-यानं, समुद्रयानं, संयात्रा. -*v.*

Ex. by क्र with (*s.*), पोतेन गम् 1 P, जलवर्त्मना गम्. -EE, *s.* सांयात्रिकः, जलयात्रिकः.

VULGAR, *a.* ग्राम्य, असभ्य, अश्लील, अशिष्ट; प्राकृत, लौकिक (की *f.*). -ISM, *s.* ग्राम्या रीतिः. 2 ग्राम्यशब्दप्रयोगः. -ITY, *s.* असभ्यता, अश्लीलता. -LY, *adv.* साधारणतः, लौकिकरीत्या. 2 असभ्यरीत्या, ग्राम्यतया. -IZE, *v. t.* ग्राम्यीकृ.

VULNERABLE, *a.* भेद्य, धृष्य; वैध्य; 'v. point' रंध्रं, छिद्रं, मर्मन् *n.*; आवृणोदात्मनो रंध्रं रंध्रेषु प्रहरन् रिपून् (R. XVIII. 61) 'guarded against his own v. points' &c.

VULPINE, *a.* धूर्त, शृगालवत्.

VULTURE, *s.* गृध्रः, दाक्षाय्यः.

W.

WAD, *s.* चूर्णरोधनी.

WADDLE, *v. i.* हंसवत् गम् 1 P or चर् 1 P.

WADE, *v. i.* तॄ 1 P, कष्टेन गम् 1 P, कृच्छ्रेण पारं गम्.

WAFT, *v. t.* वह् 1 P or c., उत्क्षु 6 P; कर्णवाही मालिनीतरंगाणां (S. 3); पुष्परेणूत्किरैर्वातैः (R. I. 38); (boat &c.) वह् c., प्रणुद् c., प्रचुद् 10, प्रेर् c.; *See* DRIVE. -*v. i.* प्लु 1 A, वायुना वह्-नी pass.

WAG, *v. t.* सं-,चल् c., वि-,धू 5, 9 U, वि-क्षिप् 6 P; 'w. ging the tail' लांगूलचालनं-विक्षेपः-विधूति *f.* -*v. i.* चल् 1 P, धू pass. -*s.* परिहासवादिन् *m.* -GISH, *a. See* WITTY. -WAG-TAIL, *s.* खंजनः.

WAGE, *v. t.* (War) विग्रह 9 P, युद्धं आरभ् 1 A.

WAGER, *s.* ग्लहः, पणः. -*v.* ग्लह-पण् 1 A, (with gen. of thing staked).

WAGES, *s.* वेतनं, भृति *f.*, मूल्यं, निर्वेशः, पणः; *See* HIRE.

WAGON, *s.* प्रवहणं, यानं, शकटः-टं, चातुरं. -ER, *s.* शाकटिकः, शकटवाहः, चाक्रिकः.

WAIF, *s.* अज्ञातस्वामिकं द्रव्यं.

WAIL,-ING, *See* LAMENT,-ATION.

WAIN, *s.* गोवहनं, शकटः-टं.

WAINSCOT, *s.* भित्तिप्रटलं.

WAIST, *s.* मध्यः-ध्यं, मध्यमः-मं, कटि-टी *f.*, कटिदेशः; 'w.-coat' कटिवस्त्रं.

WAIT, *v. i.* स्था 1 P; (for) प्रति-ईक्ष् 1 A, अनु-प्रतिपा c. (पालयति) (of time and persons); 'w. for some time' कालः कञ्चित्प्रतीक्ष्यतां (K. II. 54); मां प्रतिपालय &c.; सह् 1 A, स्था, (of time only) (द्वित्राण्यहान्यर्हसि सोढुमर्हन् R. v. 25); स्फुलिंगावस्थया वह्निरेधापेक्ष इव स्थितः (S. 7) 'here is fire in the state of a spark (only) w. ing for fuel (to blaze up)'; (on or upon) उप-स्था 1 A, उप-अनु-आस् 2A, उप-सेव् 1A, उप-चर् 1 P; 'w. at table' परिविष् c. -ER, *s.* सेवकः, परिवेषकः, परिवेष्टृ *m.* (at table).

WAIVE, *v. t.* परि-,त्यज् 1 P; *See* ABANDON.

WAKE, *v. t.* प्र-बुध् c., जागृ c. -*v. i.* प्र-वि-बुध् 4 A, जागृ 2 P. -*s.* जागरणं, जागरः, प्र-बोधः-धनं. 2 पदवी; 'follow in the w. of' पदवीं प्रतिपद् 4 A; *See* TREAD. -FUL, *a.* (lit.) रात्रिजागर, निद्राविमुख, विनिद्र, उन्निद्र; जागरूक, दक्ष, अवहित, सावधान. -FULNESS, *s.* जागरः-रणं, अस्वापः, अस्वप्नः, अनिद्रा, प्रबोधः, जाग्रदवस्था. 2 दक्षता, अवधानं, &c.

WALK, *v. i.* (पद्भ्यां) चर्-चल्- गम् 1 P, परि-,क्रम् 1 U, 4 P, पादाभ्यां या 2 P &c.; 'w. about', 'w. to and fro' परिक्रम्, इतस्ततः भ्रम् 1, 4 P; (for pleasure) वि-हृ 1 P; 'w. away,-off' अपसृ 1 P, अप-या-क्रम्-गम् &c. -*s.*-ING, *s.* पादचारः-गमनं; 'w. about' परिक्रमः-मणं; 'taking a w.' विहारः, विहरणं, (वायुसेवनार्थं) परिक्रमणं. 2 गमनागमनस्थानं; अध्वगमार्गः. -ER, *s.* पादचारिन्, पा-(प)दगः.

WALL, *s.* भित्ति *f.*, कुड्यं; 'enclosing w.' प्राकारः, वरणः, सालः, प्राचीरं; 'take the w. of' अभ्रस्थानं आ-सद् c.; 'go to the w.' अव-सद् 1 P, अवसन्न-उच्छिन्न- *a.* भू 1 P; 'drive to the w.' अव-सद् c., उच्छिद् 7 P. -*v. t.* प्राकारेण आ-वृ 5 U.

WALLET, *s.* भस्त्रा; क्षुद्रकोषः.

WALLOW, *v. i.* लुठ् 6 P, लुड् 4 P; क्रीड् 1 P.

WALNUT, *s.* अक्षोटः; अक्षोटं (fruit).

WAN, *a. See* PALE.

WAND, *s.* दंडः, यष्टि *f.*

WANDER, *v. i.* परि-,भ्रम् 1, 4 P, अट् 1 P, वि-चर् 1 P, परि-,क्रम् 1 U, 4 P; 'w. from' भ्रंश् 1 A, 4 P, च्यु 1 A. -*s.*, -ING, *s.* परि-,भ्रमणं-अटनं. -ER, *s.* परिभ्रमकः, भ्रमिन् *m.*

WANE, *v. i.* परि-,क्षि 1 P or pass., -हस् 1 P; *See* DECAY, DECLINE. -*s.* क्षयः, -हासः. -ED, *a.* परि-क्षीण, क्षीणकल, प्रातक्षय, निष्कल, कलाशेष (चंद्रः). -ING, *a.* क्षयिन्, क्षय in comp.; 'w. period' क्षयकालः, कृष्णपक्षः, बहुलः, तमिस्रपक्षः.

WANT, *v.* अपेक्ष् 1 A, आ-,कांक्ष् 1 P, इष् 6 P; gen. ex. by कार्यं, प्रयोजनं, अर्थः, किं, (with gens of that which wants and instr. of thing wanted); 'I do not w. this house' ममानेन गृहेण न कार्यं, न प्रयोजनं &c.; 'why do you w. to see her' किं तया दृश्यया (S. 2). 2 Wish, q. v. 3 परि-,हा pass.; हीन, रहित, निर् in comp.; आर्यस्य सुविहितप्रयोगतया न किमपि परिहास्यते (S. 1) 'nothing will be w. ing' &c.; 'w. ing in courage' शौर्यहीन, निर्वीर्य, &c.; 'he w.s wisdom' स निर्बुद्धिः, ज्ञानरहितः. -*s.* अपेक्षा, प्रयोजनं, कार्यं,

आकांक्षा. 2 अभावः, विरहः, अप्राप्ति *f.*, राहित्यं, हीनता. 3 न्यूनता, ऊनत्वं, अपचयः. 4 दारिद्र्यं, धनाभावः, दुर्गति *f.*, कृच्छ्रं; ' come to or reduced to w. ' दारिद्र्योपहत, भाग्यक्षयपीडितां दशां प्रपन्न (Mr. 1). -ING, *a.* ऊन, न्यून, विकल; *See* DEFICIENT.

WANTON, *a.* विलासवत्, विलासिन्; ' w. sport ' विलसितं; *See* PLAYFUL. 2 अनियंत्रित, निर्मर्याद, स्वेच्छाप्रवृत्त, लोल, (स्वभावलोल); स्वैरिन्, स्वेच्छाचारिन्; काम in comp.; ' a w. woman ' पुंश्चली, स्वैरिणी, बंधकी. 3 ज्ञानतः-कामतः-कृत, बोधपूर्वं कृत. 4 प्रचुर, विपुल. -*v. i.* विलस् 1 P, क्रीड् 1 P, वि-भ्रम् 1, 4 P. -LY, *adv.* सविलासं; नियंत्रणं, स्वैरं, स्वेच्छया, यथाकामं; कामतः. -NESS, *s.* विलासः, कामचारः; न कामचारो मयि शंकनीयः ' do not suspect me of w. '

WAR, WARFARE, *s.* विग्रहः, संप्रहारः, वैरारंभः, वैरं, संग्रामः, युद्धं, रणं, (a particular battle); ' w.-cry ' सिंहनादः, क्ष्वेडा; ' w.-horse ' वारकीरः. -*v. i.* विग्रह् 9 P, युध् 4 A, कृ with (*s.*). -LIKE, *a.* रणप्रिय, युयुत्सु, युद्धदुर्मद; रणोत्सुक, रणवीर-शूर; ' w. qualities ' क्षात्रधर्मः; ' w. tribe ' क्षत्रियजातिः. 2 सांग्रामिक-सांग्रहिक (की *f.*).

WARBLE, *v.* कूज् 1 P, वि-रु 2 P.

WARD, *s.* रक्षा. 2 रक्षितः पुरुषः, आश्रितः, रक्षकाधीनः, रक्ष्यः. 3 विभागः. -*v. t.* वार् 10 or वृ *c.*, नि-प्रति-°, निरुध् 7 U, निरस् 4 U, नि-प्रति-विध् 1 P, प्रति-हन् 2 P, व्यप-ऊह् 1 U. -EN, *s.* रक्षकः, रक्षापुरुषः. -ER, *s.* रक्षकः, दौवारिकः, द्वाःस्थः.

WARDROBE, *s.* वासांसि (pl.); वस्त्रसमूहः. 2 वस्त्राधानं-आधारः.

WARE, WARES, *s.* पण्यं, पण्यद्रव्यं; ' w.-house ' पण्यागारं, पण्याधानं, पण्यशाला.

WARM, *a.* तप्त, उष्ण, चंड, घर्म in comp.; (fig.) तीक्ष्ण, चंड, सोत्साह. 2 घर्मार्त, आतपाक्रांत; ' grown w. ' Angry, q. v. -*v. t.* तप् *c.*, ईषत् तप्; ' w. oneself ' (in the sun) सूर्यातपं सेव् 1A, (सेवेत्यृतौ नो ह्यर्कं H. 2); ' w. oneself at the fire ' अग्न्यातपं सेव्. -LY, *adv.* सोत्साहं, सस्नेहं, उष्णं &c. -NESS, -TH, *s.* तापः, उत्तापः, उष्मन् *m.*; ' w. of wealth ' विस्तोष्मा. 2 चंडता, तीक्ष्णता. 3 उत्साहः; ' w. of affection ' स्नेहातिशयः.

WARN, *v. t.* (पूर्वं) प्र-अनु-बुध् *c.*, उप-दिश् 6 P, अनु-ज्ञास् 2 P. 2 सूच् 10, निर्दिश्, वि-ज्ञा *c.* (ज्ञापयति); ' I w. ed him of the impending danger ' प्रत्यासन्नापदं तं प्राबोधयं; oft. by ' Beware ', q. v.; अवहितो भव यदापत्प्रत्यासन्ना. -ING, *s.* प्रबोधनं, उपदेशः.

WARP, *v. t.* आ-वृत् *c.*, संकुच् 1 P; (fig.) कलुषी-कृ, दुष् *c.* (दूषयति). -*v. i.* आवृत् 1 A, संकुच् pass.

WARRANT, *s.* प्रमाणं, अधिकारः; (written) अनुज्ञा-अधिकार-पत्रं. -*v. t.* प्रमाणं दा 3 U, प्रमाणीकृ 8 U, अधिकृ *c.*; *See* SANCTION. -ED, *a.* सप्रमाण, साधार. -Y, *s.* प्रमाणपत्रं.

WARREN, *s.* शशकनिलयः.

WARRIOR, *s.* भटः, योधः, योद्धृ *m.*, वीरः, रथी, विक्रांतः; *See* HERO, SOLDIER; ' w.s on the enemy's side ' प्रतिभटाः.

WART, *s.* किणः, चर्मकीलः-लं, अधिमांसं.

WARY, *a.* सावधान, अप्रमत्त, दक्ष; *See* CAREFUL.

WASH, *v. t.* प्र-,क्षल् 10, प्र-मृज् 2 P or *c.*, निज् 3 U, अव-निर्-°, धाव् 1 U, 10; ' w. the mouth (after meals) ' उपस्पृश् 6 P. -S.,-ING, *s.* धावनं, प्र-,क्षालनं, मार्जनं, अवसेकः, निर्णेकः. 2 आलेपः, वि-प्र-लेपः-पनं. -ED, *a.* प्रक्षालित, निर्णिक्त, धौत, धावित, मार्जित &c. -Y, *a.* जलधर्मक. -WASHERMAN, *s.* रजकः, धावकः, निर्णेजकः, (रजकी, रजकवधू *f.*).

WASP, *s.* वरटा, गंधोली. -ISH, *a.* कर्कशस्वभाव, वरटाशील.

WASTE, *v. t.* क्षि 1, 5 P or *c.*, अव-सद् *c.*, नश् *c.*, क्षै *c.* (क्षपयति), ह्रासं-क्षयं-नी 1 P, अप-चि 5 U, व्यय् 10 (व्ययति). 2 (Away) मुधा-व्यर्थं-हृ 1 P or गम् *c.*, वि-क्षिप् 6P. -*v. i.* परि-,क्षि-परिहा-अपचि- pass., क्षयं-नाशं-लयं या 2 P or गम् 1 P, विनश् 4 P, अव-सद् 1 P, ह्रस् 1 P; क्षै 1 P; (in strength) अंगैः परिहा pass.; *See* LEAN. -*s.* क्षयः, नाशः, अपचयः, व्ययः, ह्रासः, अवसादः. 2 अपव्ययः, वि-,क्षेपः, हरणं; ' w. of time ' कालक्षेपः-नाशः-हरणं-यापनं; ' w. of breath ' वाग्व्ययः-क्षेपः. 3 (Land) क्षिलभूमि *f.*, मरुभूः. -*a.* उच्छिष्ट, निःसार, निर्गुण. 2 निर्जन, शून्य, क्षिल, अप्रहत, जंगल; ' lay w. ' उप-हृ 1 A, उप-हृ 1 P, बाध् 1 A, पीड् 10. -ED, *a.* परि-,क्षीण, क्षाम, अपचित, &c. -FUL, *a.* अपव्ययिन्, वृथाव्ययिन्, व्ययशील. -ING, *a.* क्षीयमाण, क्षयिष्ण. -WASTEPIPE, *s.* उच्छिष्टजलनाली, परि(री)वाहः.

WATCH, *v.* रक्ष् 1 P, प्रति-,पा *c.* (पालयति); *See* PROTECT. 2 निरूप् 10, निरीक्ष् 1 A, अवेक्ष् 3 उपास् 2 A, उप-स्था 1 A; ' w. over ' अधि-ष्ठा 1 P. -*v. i.* जागृ 2 P, (fig. also), रक्षार्थं जागृ. 2 अव-धा 3U, अवहित-सावधान-*a.* भू; ' w. for ' अपेक्ष्, प्रतीक्ष्. -*s.* रक्षा, निरूपणं. 2 रक्षिन् *m.*, रक्षापुरुषः, रक्षिन् *m.* 3 जागरणं, जागरूकत्वं, दक्षता. 4 प्रहरः, यामः; ' w.-house ' उद्घाटः; ' w.-man ' रक्षिन् *m.*, रक्षकः; प्रहरिन् *m.*, वैबोधिकः, वैतालिकः; ' w.-word ' प्रत्ययवाक् *f.* -FUL, *a.* जागरूक, दक्ष, सावधान, अप्रमत्त. 2 प्रजागर in comp., उन्निद्र.

WATER, *s.* जलं, अंबु-अंभस् *n.*, उदकं, कारि- पयस् *n.*, तोयं, सलिलं, वीरं, पानीयं, वार् *f.*, अप् *f.*, वाः);

पाथस् n.; 'land and w.' स्थलजले; 'place where w. is distributed' प्रपा, पानीयशालिका; 'by w.' जलेन, जलवर्त्मना; 'of first w.' अनर्घ्य; 'it can hold w.' प्रमाणकोटिं प्रवेदुमर्हति. 2 मूत्रं, प्रस्रावः; 'make w.' मूत्रोत्सर्गं कृ; 'w.-carrier' जलवाहः, उदवाहः, वृतिहारः; 'w.-closet' शौचकूपः; 'w.-course' जलमार्गः, परि(री)वाहः; 'w.-fall' जलप्रपातः, निर्झरः; 'w.-ing place' प्रपा; 'w.-man' नाविकः, उदवाहः; 'w.-melon' गोडुंबं, सेटु n., तरंबुजं, कालिंगं; 'w.-mill' जलचाल्यचक्रं, जलयंत्रं; 'w.-pot' घटः, कुंभः, कलसः-शः; *See* JAR; 'w.-proof' जलाभेद्य; 'w.-snake' जलसर्पः; राजिलः; 'w.-spout' जलवज्रः; 'w.-wheel' घटीयंत्रं, उर्दचनयंत्रं. -*v. t.* (प्लवेन) सिच् 6 P, प्लु c., उक्ष् 1 P. 2 जलं पा c. or दा 3 U. -*v. i.* जलं मुच् 6 P or स्रु c. or पत् c.; 'my eyes are w. ing' जललवस्यंदिनी नेत्रे. 2 लालायते (D.). -ED, *a.* जलभूयिष्ठ, अनूप; जलसिक्त; 'w. by rivers' नदीमातृक; 'w. by rain' देवमातृक. -Y, *a.* जलमय (यी *f.*), जलात्मक, जलरूप; 'w. shafts' वर्षधाराः, धाराशरसंपाताः. 2 जलाढ्य, बहूदक, जलभूयिष्ठ, अनूप, जलप्राय.

WAVE, *s.* तरंगः, ऊर्मि *f.*, वीचि-ची *f.*, कल्लोलः, भंगः, भंगि-गी *f.* -*v. t.* धू 5, 9 U or c. (धूनयति), वि-आ-°, चल् c., सं-ईर् c. 2 उत्सृज् 6 P, परित्यज् 1 P. -*v. i.* इतस्ततः प्र-वि-चल् 1 P, धू pass. -Y, *a.* तरंगित, ऊर्मिमत्, कल्लोलमय (यी *f.*), भंगिमत्, भंगुर, उन्नतानत.

WAVER, *v. i.* दोलायते (D.), द्वैधीभू 1 P, सं-ह्री 2 A, विरूप् 1 A; 'his mind w. ed being at a loss which course to follow' इत्येकपक्षाश्रयविरूक्तवादासित्स दोलाचलचित्तवृत्तिः (R. XIV. 34); oft. by अनवस्थित, अकृतनिश्चय also. -ING, *a.* अनिश्चित, दोलायमान, संदिग्ध, अनवस्थित.

WAX, *s.* लाक्षा (for sealing). 2 सि(क्षि)क्थं, सिक्थकं, मधूच्छिष्टं, मधुजं. 3 कर्णमलं, तोकमं. -*v. i.* वृध् 1 A; 'w. ing and waning' वृद्धिक्षयौ; 'the moon w. ed' कलावृद्धो बभूव; 'w. ing hot' क्रोधेद्धो भूत्वा. 2 सिक्थकेन लिप् 6 P or अंज् 7 P. -EN, -Y, *a.* सिक्थमय (यी *f.*), सिक्थाक्त.

WAY, *s.* मार्गः, पथिन् *m.*, अध्वन् *m.*, वर्त्मन् *n.*, पदवि-वी *f.*, अयनं, सरणि-णी *f.*, पद्धति-वी *f.*, पथः; 'step in a wrong w.' अपथे पदमर्पयंति (R. IX. 74). 2 अंतरं, मात्रं, पर्यंतः; 'a little w.' ईषद्दूरं, स्तोकांतरं. 3 उपायः, युक्ति *f.* 4 प्रकारः, विधिः, रीति *f.*, क्रमः, मार्गः; 'a good way' अतिपंथाः, सुपथाः, सत्पथः, सुपथः; 'a bad or wrong w.' अपथाः; अपथः, व्यध्वः, दुरध्वः, विमार्गः, विपथः, कदध्वा, का(कु)पथः; 'a place where four w.s meet' चतुष्पथः, चतुष्पथं; 'a dreary w.' अंतरं, दूरसंचारः, दुर्गमः पन्थाः, दुर्गसंचरः, संक्रमः. 5 (With numerals) Ex. by धा; 'in two w.s' द्विधा; शतधा &c.; 'a long w. off' सुदूरं; 'on the w.' अंतरा, अंतरे; 'stand or come in the (one's) w.' परिपंथीभू, अंतरायः &c. ('Obstacle', q. v.) भू; (lit.) नयनपथ-विषय-या 2 P; 'in this, that-w.' इत्थं-एवं, तथा; 'by w. of example' निदर्शनद्वारा-रूपेण; 'lead the w.' मार्गं आदिश् 6 P or दृश् c.; 'this w.' 'this w.' इत इतः; 'by w. of' द्वारेण, रूपेण; 'make w.' अपसर, अपेहि, अंतरं दीयतां; 'in every w.' सर्वथा; 'in another w.' अन्यथा; 'w.-farer' पथिकः; *See* TRAVELLER; 'w.-lay' पथि निभृतं प्रतीक्ष् 1 A, (लुंठनार्थं, वधार्थं), पथि अवस्कंद् 1 P; 'w.-ward' प्रतीप, स्वैरिन्, दुर्ललित; *See* OBSTINATE; 'w.-worn' अध्वश्रांत, अध्वसंजातखेद.

WEAK, *a.* दुर्बल, अशक्त, अबल, क्षीणबल, बल-शक्ति-हीन, निःसत्त्व, निस्तेजस्, निर्वीर्य, अल्प-बल-शक्ति. 2 (In mind) मंद, अल्पधी, विकलचित्त; 'w. point or side' छिद्रं, रंध्रं, दोषः, मर्मस्थानं. -EN, *v. t.* दुर्बलीकृ 8 U, शक्ति-बलं ह्र 1 P, शक्तिं अव-सद् c. or अपचि 5 U; 'to be w. ed' अपचि pass.; *See* WASTE, LEAN. -ED, *a.* हतबल, क्षीणशक्ति, -हत (form). -NESS, *s.* दौर्बल्यं, बल-शक्ति-क्षयः-नाशः, असामर्थ्यं, बल-सत्त्व-हानि *f.* 2 दोषः, (यौवनद्रोषाः); छिद्रं.

WEAL, *s.* हितं, कल्याणं, क्षेमं, श्रेयस् *n.*, भद्रं, कुशलं; 'w. and woe' शुभाशुभं.

WEALTH, *s.* धनं, द्रव्यं, वसुः, *n.*, अर्थः, वित्तं, द्रविणं, संपद्, हिरण्यं, विभवः, वैभवं, संपत्ति *f.*, ऐश्वर्यं, रै *f.*, रि(क)क्थं, द्युम्नं, स्वापतेयं; 'w. in cattle' गोधनं. -Y, *a.* धनिन्, धनिक, धन-वित्त-वत् &c., सधन, वित्तसंपन्न, सश्रीक, वसुमत्, अर्थयुक्त, विभवशालिन् and sim. comp.

WEAN, *v. t.* स्तन्यं त्यज् c. or हा c. (हापयति) or विस्रंस् c. 2 विरक्ती-विमुखी-कृ 8 U; *See* SEPARATE. -ING, *s.* स्तन्यत्यागः. 2 विरक्तिः *f.*, वैराग्यं, संगत्यागः.

WEAPON, *s.* शस्त्रं, अस्त्रं, आयुधं, प्रहरणं, हेतिः *f.*

WEAR, *v. t.* परि-धा 3 U, भृ 1 P, 10, भृ 3 U, वह् 2 A. 2 (Away) क्षि 5 P, नश् c., विलुप् c., भ्रंस् 2 P or c.; घर्षणेन नश् c. 3 जीर्णीकृ 8 U. 4 अव-,सद् c., खिद् c., क्रम् c., ग्लै c.; *See* FATIGUE. -*v. i.* (Away) क्षि pass., अवसद् 1 P, अपचि pass. 2 (By use) जॄ 4 P, जर्जरीभू 1 P; 'when the night had almost worn away' क्षीणभूयिष्ठायां क्षपायां; 'w. off' अपगम् 1 P, नश् 4 P, क्षि pass.; 'w. out' जीर्णी-जर्जरी-कृ, अपचि (*v. i.*) जॄ, क्या 9 P, जर्जरीभू. -*s.* परि-क्षयः, अव-

पचर्यः, उपयोगः. 2 घर्षणं. 3 सेतुः, आलि *f.* -ER, *s.* धारिन्, भृत् in comp. -ING, *a.* धारिन्, भृत्, धर in comp. 2 परिधानयोग्य.

WEARY, *v. t.* आयस् c., क्लम् c., खिद् c. -*v. i.* आयस् 1, 4 P, क्लम् 1, 4 P. -IED, *a.* खिन्न, क्लांत, परिश्रांत, म्लान, जातखेद; 'w. of' निर्विण्ण, निर्वेदमापन्न; *See* DISGUSTED; 'w. of life' जीवितादुद्विजमानः (Mal. 3). -INESS, *s.* क्लमः, श्रमः खेदः, आयासः; *See* FATIGUE,-ED &. -ISOME, *a.* श्रम-खेद-जनन (नी *f.*), आयासकर (री *f.*), श्रमावह, कष्टप्रद.

WEASEL, *s.* नकुलः, बभ्रुः, अंगूषः.

WEATHER, *s.* कालः, दिनं; 'bad w.' दुर्दिनं; 'good w.' सुदिनं; 'if the w. be fine' यदि दुर्दिनं न स्यात्; 'w.-beaten' वाताहत, प्रभंजनोपहत; 'w.-wise' वातादिलक्षणविद्, कालविद्. -*v. t.* तॄ 1 P, प्रत्यव-स्था 1 A; पारं गम् 1 P.

WEAVE, *v. t.* वे 1 P; वप् 1 P, गुं(गु)फ् 6 P, वि-,रच् 10. -ER, *s.* तंतुवायः-पः, कुविंदः, पटकारः. -ING, *s.* वायः-पः, तंतु-तंत्र-वायः, ऊति-व्यूति *f.*, पटनिर्माणं, पटकर्म.

WEB, *s.* जालं, तंत्र-तंतु-संतति *f.*; (of the eye) पटलं; 'w.-footed' जालपाद.

WED, *v. t.* वि-उद्-वह् 1 P, परि-णी 1 P. -DED, *a.* ऊढ, परिणीत. 2 आसक्त, अवलंबिन्, रक्षिन्, (to an opinion); 'w.-lock' विवाहः; 'a wife married in w.-lock' धर्मपत्नी, सहधर्मचारिणी; *See* MARRIAGE.

WEDGE, *s.* कीलः, शंकुः. -*v. t.* संपीड् 10, संबाध् 1 A, संमृद् 9 P.

WEDNESDAY, *s.* बुधवासरः.

WEED, *s.* कक्षः, तृणादिकं, स्तंबः; (fig.) गतिरोधनं, प्रसरस्तंभनं. 2 (W. s) वासस् *n.*; *See* GARMENT; 'widow's w..s' क्लिष्टनिवसनं, चीरं. -*v. t.* (Out) (कक्षं) उद्-हृ 1 P, निर्दो 4 P, उत्पट् 10. -ER, *s.* निर्दोतृ *m.*, कक्षोद्धारिन्. -Y, *a.* कक्षपूर्ण-बहुल.

WEEK, *s.* सप्ताहः, सप्तदिनं; 'w.-day' वारः. -LY, *a.* साप्ताहिक (की *f.*), सप्तदैनिक (की *f.*). -*adv.* प्रतिसप्ताहं.

WEEN, *v. i.* मन् 4 A; *See* THINK; 'over w.-ing' अत्यंताभिमानिन्.

WEEP, *v. i.* रुद् 2 P, वि-लप् 1 P, अश्रूणि पत् c. or विमुच् 6 P, आ-,क्रंद् 1 P; *See* CRY, LAMENT. -ING, *s.* रुदितं, रोदनं, विलापः, आक्रंदनं, क्रंदितं, अश्रुपातः. -*a.* साश्रु, अश्रुलोचन.

WEIGH, *v. t.* तुल्-तूल् 10, तुलायां धृ 10. 2 (In mind) वि-मृश् 6 P, आलोच् 10, वि-चर् c., वि-गण् 10; *See* THINK. 3 (Anchor) उत्तुल्; 'w. down' आमि-ष्वङ् 1 P, आकुलीकृ; 'w. duly' परिच्छिद् 7 P, सूक्ष्मं निरूप् 10. -*v. i.* Ex. by 'Weight' q. v.; 'what does it w.' किंभारामिदं; किं भारपरिमाणं; 'w. upon' पीड् 10, बाध् 1 A; *See* AFFLICT; 'w. with' मन् pass.; 'dress w. s much with them' वेषस्तैर्बहु मन्यते. -ING, *s.* तोलनं, विगणनानं. —WEIGHT, *s.* मानं, भारः, तोलः, परिमाणं, भारपरिमाणं, गुरुत्वं. 2 गुरुत्वं, गौरवं, प्रभावः, भारः. 3 भारः, धुर् *f.*; 'of little w.' लघ्वर्थ, लघुप्रभाव, अगुरु. -Y, *a.* गुरु, महत्, सप्रभाव; सप्रमाण.

WEIR, *s.* बंधः, योगः.

WELCOME, *a.* स्वागत. 2 शुभ, इष्ट, हित, प्रिय, अभिमत, सुखद. -*v. t.* स्वागतं व्याह् 1 P, सभाज् 10, अभिनंद् 1 P, सत्कृ 8 U, पूज् 10; (आश्रममृगैरभिनंदितागमनेषु समीरेषु Ka. 49). -*interj.* स्वागतं (with dat.). -*s.* स्वागतं, सभाजनं, अभिनंदनं.

WELD, *v. t.* *See* UNITE.

WELFARE, *s.* हितं, कल्याणं, क्षेमं, कुशलं, श्रेयस् *n.*, भद्रं, मंगलं, सुखं, भूति *f.*, शिवं, सुस्थिति *f.*

WELKIN, *s.* नभस् *n.*; *See* SKY.

WELL, *s.* वापी, कूपः, प्रहिः, अंधुः, दीर्घिका (large w.), उदपानं; 'covering of a w.' वि(वी)नाहः; 'reservoir near a w.' आहावः, निपानं, उपकूपजलाशयः. 2 गुप्ति *f.* -*a.* कुशलिन्, स्वस्थ, सुस्थशरीर, निरामय, नीरोग, कल्य; *See* HEALTHY. 2 कुशल, क्षेम, सुखिन्; oft. by कुशलं; अपि कुशलमस्याः प्रजापालस्य मातुः (U. 4) 'is she w.'; 'got w. again' पुनः प्रकृतिस्थोऽभवत्, प्रकृतिमापन्नः; 'know that we are doing w. in every respect' सर्वत्र नो वार्तमवेहि (R. v. 13). -*adv.* सु pr., (सुकृत, सुदर्शन &c.); सुष्ठु, साधु, सम्यक्; 'w. said' साधूक्त, सूक्त; 'w. off' सुस्थित *a.*, वित्तवत्, सुस्थ; 'you might as w. have kept all (fruits)' सर्वेषां रक्षणेपि न तव काश्चिद्दोषोऽभविष्यत्. -*interj.* बाढं, तथा; 'saying very w.' युज्यते, बाढं, तथेति उक्त्वा; 'very w.' भवतु; 'w. then' तेन हि. 2 (As expletive) भवतु, अस्तु, gen. by तावत्; 'w. we go away now' साधयामस्तावदधुना; 'w.-behaved' साधुशील, सुवृत्त; 'w.-being' हितं, कुशलं; *See* WELFARE; 'w.-born' कुलीन, सत्कुलजात; 'w.-done' साधु साधु; 'w.-informed' बहुज्ञ, बहुश्रुत; 'w.-meaning' सदाशय, हितबुद्धि; 'w. nigh; *See* NEARLY; 'w.-read' अधीतिन्, सर्वशास्त्रपारंगत, बहुदर्शिन्; 'w.-wisher' हितकामः, हितैषिन् *m.*, मित्रैषी.

WELTER, *v. i.* लुठ् 6 P, लुड् 4 P; *See* ROLL.

WEN, *s.* मांसार्बुदं.

WENCH, *s.* बंधकी, पुंश्चली, दुर्वृत्ता. 2 कन्या, तरुणी. -*v. i.* Fornicate, q. v.

WEND, *v. t.* (One's way) गम् 1 P, चल् 1 P; *See*

Go; 'here he w. s his way' इत एवाभिवर्तते.

WEST, *s.* प्रतीची, पश्चिमा, वारुणी. —*a.*,-ERLY, -ERN, *a.* पाश्चात्य, प्रतीच्य, अपरम, अपर. 2 पश्चिमाभिमुख (स्त्री *f.*). —WARDS, *adv.* प्रतीचीमभि, प्रतीच्यभिमुखं, पश्चिमादिशि.

WET, *a.* आर्द्र, क्लिन्न, सिक्त, उक्षित, उन्न, जलार्द्र. —*v. t.* क्लिद् c., आर्द्रीकृ 8 U, आर्द्रयति (D.); *See* MELT. —*s.* आर्द्रता, तेमः, क्लेदः. 2 दुर्दिनं; 'w.-nurse' स्तन्यदायिनी, धात्री, उपमाता.

WETHER, *s.* छिन्नवृषणो मेषः.

WHACK, *v. t. See* STRIKE.

WHALE, *s.* तिमिः, तिमिंगिलः.

WHARF, *s.* घट्टः, तरस्थानं. —AGE, *s.* तरपण्यं-मूल्यं, घट्टदेयं शुल्कं.

WHAT, *pron.* किं (कः-का-किं), किं in comp.; 'w. then' ततः किं, किं तर्हि; 'w. is he doing now' स (राजा) किमारंभः संप्रति (U. 2); 'w. is his name' किंनामासौ; 'w. else' अथ किं; 'w. is that to me' किं मम तेन; 'w. though' यद्यपि. 2 यदयद्. —*interj.* कथं, आः, किं, ननु. —EVER,-SOEVER, *a.* यद्-यद्. 2 यत्किम्, यत्किंचित्; 'to w. person' यस्मै कस्मैचित्पुरुषाय; यो यो वा भवाम्यहं, &c.

WHEAT, *s.* गोधूमः, सुमनः. —EN, *a.* गोधूममय, (*s.*) in comp.

WHEEDLE, *v. t.* चाटूक्तिभिः प्र-नृ c. or वच् 10 or लल् 10; *See* FLATTER.

WHEEL, *s.* चक्रं, रथांगं, मंडलं. —*v. i.* परि-भ्रम् 1, 4 P, परा-परि-आ-वृत् 1 A, मंडलाकारेण भ्रम्. —*v. t.* व्यावृत् c., भ्रमं c. —ED, *a.* चक्रिन्, चक्रयुक्त. —WHEEL-WRIGHT, *s.* रथकारः, चक्रकारः.

WHEEZE, *v. i.* कृच्छ्रेण श्वस् 2 P.

WHELP, *s.* शावः-वकः, शिशुः, किशोरः.

WHEN, *adv.* यदा; by loc. abs.; 'w. the speech was over' वचस्यवसिते तस्मिन्. 2 कदा; 'w.-ever,-soever' यदा यदा, यदा कदाचित्. —WHENCE, *adv.* यतः, यस्मात्. 2 कुतः, कस्मात्.

WHERE, *adv.* क, कुत्र. 2 यत्र; 'w.-ever' यत्र यत्र; यत्र कुत्रापि, यत्र कुत्राचित्; 'w.-as' यतः, विपर्ययेण तु; 'w.-by' येन; 'w.-fore' यदर्थं, यतः, येन, किमर्थं, कस्य हेतोः; 'w.-in', 'w.-to' यत्र; 'w.-upon' यदनंतरं, तदनु.

WHET, *v. t.* तिज् c., नि-,शो 4 P, क्षुद् 2 P. —*s.*, —STONE, *s.* शाणः-णी, शाणाश्मन् *m.*

WHETHER, *pron.* कतरः-रा-रत्. —*conj.* किं followed by वा, उत, आहो or आहोस्वित् (for 'or'), 'w. he do that or not' स तत्करोतु न करोतु वा.

WHEY, *s.* मस्तु *n.*, दधिमंडं.

WHICH, *pron. a.* यत् (यः-या-यत्). 2 किं (कः-का-किं); 'w. of two' यतर, कतर; 'w. of many' यतम, कतम; 'w.-ever' ex. by repeating (1).

WHIFF, *s.* फूत्कारः, फूत्कृतं.

WHILE, *s.* क्षणः, मुहूर्तः, कालः, समयः; 'for a w.' कंचित्कालं, क्षणं; 'after a long w.' चिरेण; 'not worth w.' निष्फलं, निरर्थकं, न उपयुक्त; 'worth w.' उपयुक्त. —*conj.*, WHILST, यदा, यावत् (followed by तावत्); gen. by pres. part.; ग्रामं गच्छंस्तृणं स्पृशति 'w. going' &c. —*v. t.* (away) क्षिप् 6 P, गम् c., हृ 1 P, क्षि-नुद्.

WHIM, *s.* कामचारः, कामवृत्ति *f.*, छंदः, छंदस् *n.*, चापल्यं, मनोलौल्यं, लहरी, चित्ततरंगः; 'to one's w.' स्वच्छंदेन, स्वेच्छया; 'acting according to another's w.' छंदोनुवृत्ति *f.* —WHIMSICAL, *a.* कामचारिन्, स्वैरिन्, स्वैर, स्वच्छंदानुवर्तिन्, स्वच्छंद; चपल, लोल, अनवस्थित.

WHIMPER, *v. i.* बालकवत् रुद् 2 P or क्रंद् 1 P.

WHINE, *v. i. See* MURMUR.

WHIP, *s.* कशा-षा, प्रतोदः, प्रतिष्कषः-क्षाः. —*v. t.* कशया प्र-हृ 1 P or तड् 10 or ताड् 10 or दंड् 10 or आहन् 2 U. —PING, *s.* कशाघातः-ताडनं-प्रहारः; 'deserving w.' कश्य, कशार्ह.

WHIRL, *v. i.* घूर्ण् 6 P, 1 A, परि-,भ्रम् 1, 4 P. —*v. t.* घूर्ण c., भ्रम् c. (भ्रमयति). —*s.*,-ING, *s.* भ्रमणं, घूर्णनं, भ्रमि *f.*, आवृत्ति *f.*; 'w.-pool' आवर्तः, भ्रमिः, भ्रमः, जलावर्तः, जलगुल्मः; 'w.-wind' चक्रवातः, वातावर्तः; वात्या, वातभ्रमः.

WHISK, *v. t.* अतिशीघ्रं चल् c. or विक्षिप् 6 P. —*s.* लघुक्षेपः. 2 चामरं (for flies).

WHISKERS, *s.* गंडलोमन् *n.*, गुंफः.

WHISPER, *v.* नीचैः-उपांशु-वद् 1 P; कर्णे जप् 1 P or कथ् 10 or ख्या 2 P; कर्णे उप-जप्; 'w. aside' जनांतिकं वद्. —*s.*,-ING, *s.* कर्णेवादः, उपांशुवादः, कर्णेजपः; जपः-पनं; 'in a w.' उपांशु, जनांतिकं, नीचस्वरेण. —ER, *s.* कर्णे (णे)जपः-कथकः.

WHISTLE, *s.* शीत्कृशब्दः. 2 वंशः-शी. —*v. i.* शीत्कृशब्दं कृ 8 U.

WHIT, *s.* लेशः, लवः, गंधः, अणुः; 'not a w.' न मनागपि, न स्तोकमपि, नाल्पमपि.

WHITE, *a.* शुक्ल, श्वेत, धवल, शुभ्र, सित, गौर (री *f.*), शुचि, अवदात, विशद; भौत, पांडुर, अवि-मल. —*s.* श्वेतवर्णः, शुक्लवर्णः, शुक्लः; श्वेतः, सितः, &c.; 'dressed in w.' श्वेतवासो दधान. —EN, *v. t.* धवलीकृ 8 U, धवलयति (D.) &c. —*v. i.* धवलीभू 1 P, धवलायते (D.). —ISH, *a.* आपांडु. —NESS, *s.* शुक्लता, धावल्यं, शुभ्रता, धवलिमन्-शुक्लिमन् *m.* —WHITE-WASH, *v. t.* सुधया लिप् 6 P or धवलीकृ; 'a house w.ed' सुधाधवलं. —*s.* सुधा, सुधालेपः. —WHITES, *s.* श्वेतप्रदरः.

WHETHER, *adv.* कुत्र, क्व. 2 यत्र.

WHETLOW, *s.* नखपक्षः, चिप्पं, नखव्रणं.

WHO-EVER, &c. *See* WHICH &c.

WHOLE, *a.* सकल, समग्र, कृत्स्न, अखिल, समस्त, सर्व, अखंड, निखिल, विश्व, अशेष, निःशेष, पूर्ण, अनून. 2 (Number) अभिन्न. –*s.* साकल्यं, कात्स्न्यं, सामग्र्यं, समासः; ' on the w. ' एवं च, एतावता, समासतः, समासेन; ' the w. of ' ex. by (*a.*). –LY, *adv.* समग्रं, साकल्येन, अशेषेण, निरवशेषं. सर्वथा, सर्वतोऽशः, सर्वभागेन, एकांततः. –WHOLESALE, *a.* Ex. by रूप in comp., समस्त (विक्रयः); ' w. dealer ' समूपविक्रयिन् ; ' w. buying ' समस्तराविक्रयः.

WHOLESOME, *a.* पथ्य, आरोग्यावह; हितावह; *See* SALUTARY.

WHOOP, *s.* सिंहनादः, क्ष्वेडा.

WHORE, *s. See* PROSTITUTE; ' w.'s son ' वेश्यापुत्रः; ' w.-monger ' भुजंगः, विटः. –DOM, *s.* वेश्यावृत्ति *f.*-प्रसक्ति *f.*

WHY, *adv.* किं, कुतः, कस्मात्, किमर्थं, किन्निमित्तं, केन हेतुना; ' w. do you do so ' एवं करणे कस्तव हेतुः. 2 ननु; ' w. you yourself are before me ' ननु भवानेव ममाग्रे वर्तते (S. 2).

WICK, *s.* दशा, वर्ति *f.*, वर्तिका, तैलिनी.

WICKED, *a.* (Of persons) दुष्ट, दुर्जात, दुरात्मन्, पाप, शठ, दुराचार, खल, पापकर्मन्, दुर्वृत्त, नृशंस, पापात्मन्, पापचरित, अधार्मिक (की *f.*), दुश्चरित्र. 2 (Of things) दुष्ट, पाप in comp., दुर् pr.; ' w. policy ' दुर्नीतिः; *See* SINFUL. –LY, *adv.* दुष्टतया, दुर्वृत्ततया, खलवत्. –NESS, *s.* दुष्टता, दौर्जन्यं, दौरात्म्यं, पापं, दुष्कृतं-ति *f.*, पापकर्म, दुराचारः, अनाचारः.

WICKER, *a.* वैणव (वी *f.*), वैदल (ली *f.*); ' w.-work ' वैदलं.

WIDE, *a.* विस्तीर्ण, विशाल, उरु, विपुल, पृथु; *See* BROAD; ' w. of the mark ' लक्ष्यभ्रष्ट-च्युत, अप्रास्ताविक (की *f.*). –*adv.*, -LY, *adv.* विपुलं, सर्वत्र, सु-अति-बहु pr.; ' w. known ' सुविख्यात; ' w. awake ' सुप्रबुद्ध; ' with eyes w. open ' उत्फुल्लनयन. –EN, *v. t.* पृथूकृ 8 U, विशालीकृ, प्रथ् 10. –WIDTH, *s.* विस्तारः, व्यासः, परिणाहः, विशालता.

WIDOW, *s.* विधवा, अ-गत-भर्तृका, विश्वस्ता, अनाथा, रंडा; ' child-w. ' बालविधवा. –ED, *a.* अनाथा, नष्टभर्तृका. –ER, *s.* मृतपत्नीकः, गतभार्यः. –HOOD, *s.* वैधव्यं, वैधव्यदशा.

WIELD, *v. t.* (हस्तेन) भृ 3 U, धृ 1 P, 10, प्र-उप-युज् 7 A, 10. 2 (A state &c.), प्र-शास् 2 P, विधेइ c. ; राज्यधुरां वह् 1 P. –Y, *a.* सुप्रयोज्य ; (body) उत्थानयोग्य (S. 2).

WIFE, *s.* भार्या, पत्नी, जाया, वधूः, कलत्रं, दार *m.* (pl.), स्त्री, परिग्रहः, गृहिणी, गेहिनी, सहधर्मिणी, दयिता, वल्लभा, प्रिया, कांता, रमणी, क्षेत्रं, गृहाः (pl.); ' a rival w. ' सपत्नी ; ' taking a w. ' दारपरिग्रहः-क्रिया ; ' one whose husband has gone abroad ' प्रोषितभर्तृका.

WIG, *s.* उपकेशः, कृत्रिमकेशः.

WIGHT, *s.* माणवकः, जंतुः, प्राणिन् *m.*

WILD, *a.* वन्य, वनजात, आरण्यक, वन-अरण्य in comp.; 'a w. mountain' कांतारमध्यवर्ती-वनांतर्गतः-पर्वतः; वनपशुः, वनगजः, वनपुष्पं &c. 2 हिंस्र, क्रूर, क्रव्याद्. 3 उन्मत्त, अतिव्याकुल ; ' w. with anger ' क्रोधोन्मत्त; ' w. with joy ' हर्षोन्मत्त, हर्षनिर्भर. 4 प्रचंड, तीव्र ; दुर्दांत, अनियंत्रण, उद्दामवृत्ति, उच्छृंखल ; ' w. storm ' प्रचंडप्रकंपनः. 5 अयुक्तिक, अनुपपन्न, निरर्थक ; *See* ABSURD. –ERNESS, *s.* वन्यं, अरण्यं ; *See* FOREST. 2 मरुः-भूमि *f.*, धन्वन् *m.* –LY, *adv.* उन्मत्तवत्, प्रचंडं, सांन्मादं, उच्छृंखलं. –NESS, *s.* वन्यता, रौद्रता, उन्मादः, &c.

WILE, *s.* छलं, कपटं, वंचनं, माया, छद्मन् *n.* –WILY, *a.* भूरिमाय, मायाविन्, समाय, छद्मपर, कापटिक-छाद्मिक (की *f.*), सकपट.

WILL, *v.* संकृप् c., निर्दिश् 6 P, निश्चि 5 U, निर्णी 1 P. 2 Wish q. v. 3 (As auxiliary) Futures or Pot. mood. –*s.* संकल्पः, सत्संकल्प-इच्छा-शक्ति *f.* 2 कामः, इच्छा, अभिलाषः, आकांक्षा, इष्टं; ' god's w. be done ' ईश्वरेच्छा बलीयसी, प्रभवति भगवान् विधिः; ' against one's w. ' बलात्, हठात्, अकामतः; ' would have her w. ' आत्माभिप्राये निर्बंधपरासीत्; ' at w. ' स्वेच्छया, यथाकामं, स्वैरं, काम in comp.; ' subject to the w. of another ' परतंत्रवश. 3 इच्छापत्रं. –FUL, *a.* कामतः कृत. 2 स्वैरिन्, काम-स्वेच्छा-चारिन्, स्वैरवृत्त-गामिन्, *See* WANTON. –FULLY, *adv.* कामतः, इच्छापूर्वकं, स्वैरं, बुद्ध्या, जानन् *a.* अपि. –FULNESS, *s.* कामचारः, स्वेच्छाचारः, यदृच्छा, स्वैरिता, स्वाच्छंद्यं. –ING, *a.* इच्छु, सकाम, उद्यत; oft. by desid. 2 इष्ट, अनुमत, यथेप्सित. –INGLY, *adv.* प्रकामं, स्वेच्छया, कामतः, स्वेच्छापूर्वं. –WOULD (that) Ex. by अपि नाम; अपि वामाहमप्यात्मनोनुरूपं वरं लभेयेति (S. 1); ' w. I had loved him more ' वरं तस्मिन्नहमधिकतरं स्निग्धोऽभूवं; यदि...अभविष्यं तर्हि अहो शोभनमापतिष्यत्.

WIN, *v. t.* वि-जि 1 A, विजयिन् *a.* भू; ' won the battle ' युद्धे जयमाप, समरविजयी बभूव; ' who is said to w. ' यो विजयीति गण्यते-मन्यते. 2 लभ् 1 A, प्राप् 5 P; *See* GET. 3 आकृष् 1 P, प्र-विलुभ् c., *See* ATTRACT; ' w. over ' स्वपक्षं नी c., अनुयायिन् *a.* कृ. –NER, *s.* जयिन् *m.*, जेतृ *m.* –NING, *s.* जयः. 2 लाभः, अर्जितं. –*a.* हृदयहारिन्, चित्ताकर्षिन्.

WINCE, *v. i.* वि-कंप् 1 A, क्षुभ् 6 P ; ' he did

ıot w.' स भयचकितो नाभवत्; *See* START. WIND, *s.* वातः, वायुः, पवनः, पवमानः, अनिलः, समीरणः, मारुतः, मरुत् *m.*, मातरिश्वा, श्वसनः, स्पर्शनः, गंधवहः, आशुगः. **2** (In stomach) वातः, वायुः. **3** श्वासः; 'w.-fall' वायुपातः; (fig.) अकस्मल्लाभः; 'w.-lass' उन्मोलनी; 'w.-mill' वातचाल्यं चक्रं, वायुपेषणी. -*v. i.* वक्रं-कुटिलं-गम् or इ् 1 P, जिह्मं या 2 P; 'the river runs w. ing 'or a koss' क्रोशं कुटिला नदी (S. K.). **2** Turn, ı. v. -*v. t.* परि-आ-वृत् c. **2** पूर् 10 (मारुतेन), मा 1 P. **2** (Up) संपुटीकृ 8 U, पिंडीकृ, डेप-,सं-हृ 1 P; अव-सो 4 P; (hair) सं-हृ, सं-यम् c., (संयमय कशपाशं Ka. 84). -ING, *a.* वक्र, कुटिल, जिह्म. -*s.* वक्रं, वंकः, पुटभेदः. -WARD, *adv.* वातामिमुखं. -Y, *a.* वातमय (यी *f.*), वातुल. -WINDOW, *s.* वातायनं, जालं, गवाक्षः.

WINDPIPE, *s.* श्वासनालिका.

WINE, *s.* मद्यं, द्राक्षारसः-आसवः; मधु *n.*, माध्वीकं; मदिरा, सुरा; 'w.-bibber' मद्यपः, सुरापः; 'w.-seller' मद्यविक्रायिन्, शौंडिकः.

WING, *s.* पक्षः, पत्रं, पतत्रं, गरुत् *m.*, छदः, पर्णं *n.*; 'root of a w.' पक्षप्रति *f.*, पक्षमूलं; 'to be on the w.' डी 1 A; 'under the w. of' आश्रित- *a.* **2** (Of army &c.) पक्षः, दलं, पार्श्वदलं. -*v. t.*, 'w. the way' अध्वक्रमणं कृ 8 U. -ED, *a.* पक्षिन्, पतत्रिन्.

WINK, *v. i.* निमिष् 6 P, नि-मील् 1 P, पक्ष्म संकुच् 1 P. **2** संकेतं-संज्ञां-कृ 8 U (नेत्रेण); 'w. at' उपेक्ष् 1 A, न गण् 10. -*s.* निमि(मे)षः, निमीलनं, पक्ष्मसंकोचः. **2** नेत्रसंज्ञा, अक्षिसंकेतः.

WINNOW, *v. t.* वि-,शुध् c., पू 9 U, बहलीकृ 8 U, प्रस्फुट् c.; (fig.) परीक्ष् 1 A; *See* DISCRIMINATE. -ER, *s.* पावकः. -ING, *s.* पवनं, प्रस्फोटनं; 'w. ing basket' शूर्पः-र्पं, प्रस्फोटनं.

WINTER, *s.* हेमंतः, शिशिरः, तुषारकालः, हिमागमः, हिम-शीत-कालः. -WINTRY, *a.* (*s.*) in comp.; हैमंत (ती), हैम (मी *f.*). **2** शीत, शिशिर.

WIPE, *v. t.* प्र-परि-मृज् 2 P or c., प्र-क्षल् 10, निर्घृष् 1 P, संमृद् 9 P; *See* WASH; 'w. away,' 'w. out' प्रमृज्, (स्वभावलोलेत्ययशः प्रमृष्टं R. VI. 41), अप-अव-मृज्. -*s.* मार्जनं, प्रक्षालनं. **2** प्रहारः. -ER, *s.* मार्जनी, प्रक्षालनी.

WIRE, *s.* तंत्र, तंत्री, तारः-रा, धातुसूत्रं, लोहतारा-सूत्रं-तंतुः. -*v. t.* तारायंत्रेण प्रेषय् c. -Y, *a.* तंत्रमय (यी *f.*).

WISE, *a.* प्र(ज्ञा)ज्ञ, विज्ञ, विदग्ध, ज्ञानवत्, पंडित, प्रज्ञावत्, धीमत्, विवेकिन्, सुधी, धीर, मति-बुद्धि-मत्, मनीषिन्, विद्वस्; *See* LEARNED also. **2** (Of acts) सु in comp.; ज्ञानप्रयुक्त, वैदग्ध्यमूलक; 'w. saying' सुभाषितं; 'w. step' साधुमार्गः. -*s.* प्रकारः; *See* MANNER; 'in this w.' एवं, इत्थं. -LY, *adv.* प्रज्ञया, ज्ञानेन, सविवेकं, सम्यक्, सुसमीक्ष्य, सुष्ठु, प्राज्ञवत्. -WISDOM, *s.* प्रज्ञा, ज्ञानं, वैदग्ध्यं, बुद्धि *f.*, धीः, विवेकः, वैदुष्यं, पांडित्यं, धीरता, मनीषा. -WISEACRE, *s.* पंडितंमन्यः.

WISH, *v. t.* इष् 6 P, स्पृह् 10 (with dat.), सं-,ईह् 1 A, वांछ् 1 P, आ-,कांक्ष् 1 P, अभिलष् 1, 4 P, कम् 1 A, वश् 2 P; oft. by desid. forms; जिगामिषति 'w. es to go;' जिघृक्षति &c.; 'w. ill to' असूयति (D.) (with dat.); अकुशलं आशंस् 1 A; 'I w. no evil to any' न मे कस्मिंश्चित् प्रति-हतबुद्धिः-द्वेषभावः; 'I w. I could see him again' अपि नाम तं पुनरपि पश्येयं; 'he had nothing left to w. for' न किमपि तस्य स्पृहणीयमासीत्. -*s.* इच्छा, मनोरथः, स्पृहा, ईहा, कामः, इष्टं, वांछितं, अभिलाषः; वांछा, कांक्षा.

WIST, *s.* शुष्कतृणकूर्चकः.

WISTFUL, *a.* *See* EAGER.

WIT, *s.* बुद्धि-मति *f.*, मेधा, धीः; *See* INTELLECT. **2** बुद्धितीक्ष्णता, बुद्धिविलासः-चातुर्यं; 'was at his w.'s end' किंकर्तव्यतामूढः-कुंठितमतिः-आसीत्, निरुत्तरीकृतः. **3** (Person) वाक्चतुरः, नर्मज्ञः, परिहासकथः, नर्मभाषी. **4** रसः, नर्मन् *n.*, वैदग्ध्यं, सारस्यं, नर्म-रसिक-उक्ति *f.*, नर्मालापः-भाषणं; 'to w.' तद्यथा. -TY, *a.* नर्मवेदिन्, नर्मभाषिन्; सरस, विदग्ध, रसयुक्त; परिहासजनन (नी *f.*); 'w. speech' परिहासालापः, नर्मवाक्यं, नर्मालापः.

WITCH, *s.* डाकिनी, मायाविनी, कुहकिनी, मायिनी. -ERY, 'w.-craft', *s.* माया, अभिचारः.

WITH, *prep.* Gen. ex. by instr. **2** (Manner) by instr.; प्रीत्या 'w. affection'; by comp. with स; सहर्षं, सभयं &c.; पूर्वं, पूर्वकं in comp.; 'w. respect' मानपुरःसरं, आदरपूर्वकं. **3** (Accompaniment) by Bah. comp.; 'Madana w. Rati' रतिसहायो मदनः; सकृष्णो रामः; gen. by समं, साकं, सार्धं, सह, सहितं, with instr.; 'send the book w. Rāma रामहस्ते पुस्तकं प्रेषय. **4** (With verbs) 'to live w.' सं-वस्. **5** (On the side of) पक्षे. **6** (In the opinion of) मतेन, मते, (तव मतेनाकिंचित्करमिदं); 'w. all' अनादृत्य; *See* 'in spite of' under SPITE. -AL, *adv.* समं, तथा च, अपि च, तथैव.

WITHDRAW, *v. t.* प्रति-,सं-हृ 1 P, अपाकृष् 1 P, अप-नी 1 P, प्रत्यव-हृ; 'w. s the world into himself' आत्मन्येवाखिलं विश्वं संहरति. -*v. i.* अप-क्रम् 1 U, 4 P, अप-हृ 1 P, अप-गम् 1 P, पराावृत् 1 A; *See* RETIRE. -AL, *s.* संहारः, संहरणं, अपसरणं, अपक्रमः-मणं.

WITHER, *v. i.* म्लै 1 P, म्ले 1 P, वि-शु pass.; शुष्

1 P, श्री pass. –*v. t.* नश् c., शृ c.; *See* FADE. –ED, *a.* म्लान, ग्लान, विशीर्ण, शुष्क, जीर्ण.

WITHERS, *s.* स्कंधदेशः, स्कंधः.

WITHHOLD, *v. t.* नि-ग्रह् 9 P, अव-नि-रुध् 7 U, नियम् 1 P, प्रति-,संह् 1 P, अपसं-ह्, वि-धृ 10; न दा 3 U.

WITHIN, *adv.* अंतर् in comp.; अंतर्वर्तिन्. 2 चित्तोद्भूत, आंतर. (*a.*). –*prep.* अंतरे, अभ्यंतरे, मध्ये, अंतर् in comp.; 'w. the house' गृहाभ्यंतरे, अंतर्गृहं &c.; 'w. six months' षण्मासाभ्यंतरे, षण्मासमध्ये; अर्वाक् (with abl.). 2 (In the reach of) गोचर, विषय, ग्राह्य, in comp.; 'w. hearing' कर्णगोचरीभूत; 'w. the reach of eyes' नयनगोचरे, नैयनविषये &c.; 'w. the reach of the hand' हस्तप्राप्य-ग्राह्य.

WITHOUT, *prep.* विना (with acc., instr., abl.), अंतरेण (with acc.), ऋते (with abl.), वर्जयित्वा, मुक्त्वा, विहाय (with acc.); by अ-निर्-pr., हीन, रहित, वर्जित, व्यतिरेकेण, व्यतिरिक्त in comp.; 'w. delay' अविलंब; 'w. doubt' निःसंशयं, असंशयं; 'w. money' धनहीन-रहित, निर्धन. 2 (Before participles) By अ (अन्); 'w. burning' अदहन्, अदग्ध्वा; 'w. being marked' अलक्षित. 3 बहिः (with abl.), बहिर्भागे. –*adv.* बहिः, बाह्यतः; 'lying w.' बहिःस्थित.

WITHSTAND, *v. t.* निरा-प्रति-कृ 8 U, प्रतिकूलयति (D.), वि-रुध् 7 U, परिपंथीभू 1 P, (बद्धपरिकरस्य तेन त्रैलोक्यमपि क्षमं परिपंथीभवितुं Ve. 3); प्रत्यव-स्था 1 A; *See* OPPOSE.

WITNESS, *s.* साक्षिन् *m.*; 'w. es for prosecution' पूर्ववादिनः साक्षिणः; 'ear-w.' श्रुतसाक्षी; 'eye-w.' दृष्टसाक्षी. 2 साक्षात् द्रष्ट *m.* 3 साक्ष्यं, प्रमाणं. –*v. t.* प्रत्यक्षीकृ 8 U, प्रत्यक्षं दृश् 1 P; *See* SEE. 2 साक्ष्येण प्रमाणीकृ. –*v. i.* साक्ष्यं दा 3 U, साक्षीभू 1 P.

WIZARD, *s.* मायाकारः; *See* MAGICIAN.

WOE, *s.* दुःखं, शोकः; *See* SORROW, GRIEF. –*interj.* हा, धिक्, (with acc.); अहो बत, हा कष्टं. –FUL, *a.* Sorrowful, q. v.; 'is in a w. plight' कष्टमभ्यापन्नः (U. 3).

WOLF, *s.* वृकः, कोकः, ईहामृगः.

WOMAN, *s.* स्त्री, नारी, अंगना, अबला, योषित्, वनिता, ललना, योषा, सीमंतिनी, वधूः, वामा, महिला; 'noblyborn w.' कुलांगना, कुलजा; 'young w.' युवतिः, तरुणी, प्रमदा, बाला; 'beautiful w.' सुंदरी, प्रमदा, सुभगा, नितंबिनी, वामलोचना; 'an excellent w.' वरारोहा, मत्तकाशिनी, उत्तमा, वरवर्णिनी; 'passionate w.' कोपना, भामिनी; 'old w.' स्थविरा, वृद्धा, जरती; 'virtuous w.' सती, साध्वी, पतिव्रता, सुचरित्रा, कुलस्त्री, कुलपालिका. –HOOD, *s.* यौवनं. –ISH, *a.* स्त्रीवत् *ind.*, स्त्रैण (णी *f.*). –KIND, *s.* स्त्रीजनः, अबलाजनः, स्त्रैणं. –LY, *a.* (*s.*) in comp.; 'with w. timidity' स्त्रीस्वभावसुलभकातरतया.

WOMB, *s.* गर्भः, गर्भाशयः, गर्भस्थानं.

WONDER, *s.* विस्मयः, चमत्कारः. आश्चर्यं, कौतुकं. 2 अद्भुतं, चित्रं, अद्भुतवस्तु; 'it is no w. that' नैतच्चित्रं यद् &c., किमत्र चित्रं; 'w.-struck' विस्मयाकुल-उपहृत-आपन्न. –*v. i.* वि-स्मि 1 A, by (*s.*) in comp.; w. ed at hearing the news' वार्तांश्रवणेन संजातविस्मयः-सविस्मयः-बभूव. –FUL, WONDROUS, *a.* अद्भुत, आश्चर्यभूत, विस्मयकर (री *f.*), आश्चर्य, वि-,चित्र, विस्मापक. –FULLY, *adv.* अद्भुतं, साश्चर्यं. –INGLY, *adv.* सविस्मयं, साश्चर्यं.

WONT, *s.* अभ्यासः, रीति *f.*, संप्रदायः, आचारः, नित्यव्यवहारः. –ED, *a.* परिचित, नित्य, अभ्यस्त; 'w. nature' स्वभावः, प्रकृति *f.*; *See* NATURE; 'to bring to one's w. nature' प्रकृतौ स्था c., प्रकृतिस्थ-*a.* कृ.

WOO, *s.* (विवाहार्थं) याच् 1 A, अर्थ् 10 A, आराध् c. –ER, *s.* विवाहकामः, विवाहार्थी.

WOOD, *s.* काष्ठं, दारु *n.* 2 वनं, अरण्यं; *See* FOREST; 'w.-apple' कपित्थः; 'w.-cock' काष्ठ-कुक्कुटः; 'w.-cutter' काष्ठच्छिद्, काष्ठिकः; 'w.-land' वृक्ष-वृक्षावृत-भूमि *f.*; 'w.-man' आटविकः, वनजीविन् *m.*, 'w.-cutter', q. v.; 'w.-nymph' वनदेवता; 'w.-pecker' काष्ठकूटः, दार्वाघाटः; 'w. pigeon' हारीतः; 'w.-sorrel' चुक्रिका, दंतशठा. –ED, *a.* वृक्षावृत, सवृक्ष. –EN, *a.* काष्ठ-दारु-मय (यी *f.*), काष्ठ-दारु in comp. –Y, *a.* वृक्षाकीर्ण, द्रुमभूयिष्ठ, द्रुमावृत. 2 Silvan, q. v.

WOOF, *s.* प्रतितंत्रः, वाणि-णी *f.*

WOOL, *s.* लो(रो)मन् *n.*, ऊर्णा (of sheep). –LEN, *a.* लोमज, और्ण (र्णी *f.*), ऊर्णामय (यी *f.*); मेषलोमज; 'w. cloth' और्णवस्त्र-पटः. –LY, *a.* लोमश, रोमवत्.

WORD, *s.* शब्दः, नामन् *n.*, पदं, वचस्; 'w. for w.' यथाशब्दं. 2 वचनं, संगरः, प्रतिज्ञा; *See* PROMISE, ; 'true to, or keeping, one's w.' सत्यपालित-संगरः; 'you have given your w.' विहितप्रतिज्ञः-दत्तवचनः-असि; 'to break one's w.' विसं-वद् 1 P, प्रतिज्ञां लुप् c. 3 वाक्यं, वचस् *n.*, वाच् *f.*, उक्ति *f.*, वचनं; 'whose w. can be trusted' आप्तः, आप्तवाक्, सत्यार्थवक्ता; 'war of w.s' वाग्युद्धं, वाक्कलहः; 'a man of few w.s' मितवाक्, अल्पभाषी. 4 संदेशः, वार्ता; 'in a w.' किं बहुना; 'in a few w.s' संक्षेपतः, समासेन; 'upon my w.' (I tell you &c.) यदि मद्वचः श्रद्धेयं मन्यसे, यदि